हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरिजपुस्तकमालायाः

१८

वेदान्तविभागे (४) चतुर्थपुष्पम् ।

॥ श्रीः ॥

संक्षेपशारीरकम्

श्रीमत्सर्वज्ञमुनिविरचितम्

श्रीमन्मधुसूदनसरस्वतीकृतसारसंग्रहाख्य
व्याख्यासमलङ्कृतम् ।

तस्येमे द्वितीयातृतीयचतुर्थाध्याया*
द्वितीयो भागः ।

न्यायतीर्थ-साङ्ख्ययोगाचार्यादिपदवीभूता
केलकर इत्युपनामकेन पं० सीतारामशास्त्रिणा
वझे इत्युपनामकेन भाऊशास्त्रिणा च
संशोधितम् ।

वाराणस्याम्
सेठश्रीहरिदासगुप्तपुत्रेण
चौखंबासंस्कृतसीरीज काशीसंस्कृतसीरीजाद्यनेकपुस्तकप्रकाशकेन
सेठजयकृष्णदासगुप्तमहाशयेन स्वकीये 'विद्याविलास' यन्त्रालये मुद्रितम् ।

१९८२.

हमारे यहां हर तरह की छपाई तथा जिल्दसाजी का कार्य भी होता है।
हर तरह के संस्कृत ग्रन्थ तथा भाषा भाष्य पुस्तकों के मिलने का पता—

जयकृष्णदास-हरिदासगुप्त

चौखम्बासंस्कृतसीरीज आफिस,
विद्याविलास प्रेस, गोपालमंदीरलेन,
बनारस सिटी।

S. No. 4

KASHI-SANSKRIT-SERIES;
(HARIDAS SANSKRIT GRANTHAMÂLÂ.)
18
Vedanta Section No 4.

SANKSHEPA-ŚÂRÎRAKA

BY

SARVAJNATMA-MUNI,

With a Gloss called Sárasangraha

BY

SRI MADHUSUDAN SARASVATI.

Vol. II Containing 2nd, 3rd & 4th Adhyayas.

Edited by

BHAU SASTRI VAJHE.

& P. SITARAM SASTRI KELKAR

Nyaya-Tirtha & Sankhya-Yogacharya.

BENARES

Printed-Published and sold by

JAI KRISHNA DAS-HARI DAS GUPTA,

he CHOWKHAMBA SANSKRIT SERIES OFFICE

Vidya Vilas Press, Gopal Mandir Lane.

1925.

Registered According to Act XXV. of 1867.

Printed-Published & sold by
JAI KRISHNA DAS GUPTA,
The Chowkhamba Sanskrit Series Office,
VIDYA VILAS PRESS,
Gopal-Mandir-Lane,
BENARES.

* श्रीः *

भूमिका

अयि ! निसर्गतः सततं सुखसाधनासक्तस्वान्ताः !! इतस्ततः सुखोपायाभासानेव स्वसाधनत्वेन गवेषयन्तो भवन्तोऽतएव वास्तविकं सुखमुपलभ्य सुखिनो न भवितुमर्हन्ति । यद्यपि वस्तुत आत्माऽद्वितीयसच्चिदानन्दरूपोऽपि देहादिकमात्मत्वेनाऽभिमन्यमानोऽनर्थं प्राप्नोतीव तदुक्तमाचार्यपादैः—स्वतश्चिदानन्दाद्वितीयब्रह्मात्मरूपोऽप्यात्मा स्वाश्रयया स्वविषययाऽविद्यया स्वानुभवगम्यथा साभासया स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मभावात्प्रच्युतोऽनात्मनि देहादावात्मभावमापन्नोऽप्राप्ताशेषपुरुषार्थः प्राप्ताशेषानर्थोऽविद्याकामकर्मपरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टपरिहृतिं चाकाङ्क्षन् लौकिकवैदिकसाधनैरनुष्ठितैरपि परमपुरुषार्थं मोक्षाख्यमलभमानो मकरादिभिरिव रागद्वेषादिभिरितस्तत आकृष्यमाणः सुरनरतिर्यगादिप्रभेदभिन्नासु नानायोनिषु परिवर्त्तमानो मोमुह्यमानः संसरन् कथञ्चित् पुण्यवशाद्वेदोदितेनेश्वरार्थकर्मानुष्ठानेनाऽपगतरागादिमलोऽनित्यादिदोषदर्शनेनोत्पन्नेहामुत्रफलभोगविरागो वेदान्तेभ्यः प्रतीयमानं ब्रह्मात्मभावं बुभुत्सुर्वेदोदितशमदमादिसाधनसम्पन्नो ब्रह्मविदमाचार्यमुपेत्याऽऽचार्यानुसारेण वेदान्तश्रवणादिनाऽहंब्रह्मास्मीति ब्रह्मात्मतत्त्वमवगम्य निवृत्ताज्ञानतत्कार्यो ब्रह्मरूपोऽवतिष्ठत इति । तथापि तत्र तत्रोक्तहेत्वाभासैरौपनिषदसिद्धान्तविरुद्धं प्रतिपाद्यते युज्यते चाऽधिकारिभेदेन तत् । अतः श्रद्धालूनामौपनिषदसिद्धान्तज्ञानाधिकारितास्वरूपान्यतमश्रद्धा परिपालनायैव भगवान् बादरायण अथातो ब्रह्मजिज्ञासेत्याराभ्याऽध्यायचतुष्टयीं प्रणिनाय । पुनः कालपरिपाकेन श्रुत्यर्थविलुण्ठनदत्तमतिभिर्बौद्धादिभिस्तेषु भगवत्पादप्रणीतेषु सूत्रेष्वावृतेषु कृपासागरो धर्मरक्षणतत्परः श्रीशङ्करो भगवान् शङ्करनाम्नैवाऽवततार । तेन भगवता किल बौद्धबुद्धिपङ्कमग्नमद्वैतसिद्धान्तं समुद्धिर्षुणा यत्र तत्र वादकथायां बौद्धादिकरीन्द्रान् निपात्य "एकं

ब्रह्मैवाऽद्वितीयं समस्तं सत्यं सत्यं नेह नानास्ति किञ्चित् " इत्यौपनिषदः सनातनः सिद्धान्तः पुण्यात्मनि भारतदेशे पटहघोषेण प्रख्यापयामासे । तद्योगक्षेमाय च संसारिषु कृपालुतया ब्रह्मसूत्रभाष्यं प्रणिन्ये, येन तावद्दुःखजिहासवः संसारसागरनिमज्जनशीलास्ततः पारं यान्ति । परन्तु तस्याऽतिदुरूहत्वेन मन्दमतयस्तदाकलनेऽक्षमतया दयया श्रीसुरेश्वरादि-मुख्यशिष्यान्यतमं सर्वज्ञनामानं मुनिमुद्दिश्य कञ्चनाऽद्वैतसिद्धान्तदीपकं नातिदीर्घमति मञ्जुलं ग्रन्थं प्रणयेत्याज्ञापयामास भगवान् शङ्करः । स चाऽन्वर्थनामा सर्वज्ञमुनिः पद्यात्मकं ग्रन्थं सङ्क्षेपशारीरकं नाम प्रणिनाय । अस्मिन् ग्रन्थे सम्यक्तयौपनिषदः सिद्धान्तः परमतनिरसनपुरःसरं सङ्क्षेपेण प्रतिपादितोऽनुषङ्गतश्चाऽन्येऽपि व्युत्पादकाः पदार्थाः, यान् ज्ञात्वा परमतदर्शिता साधु भवेत् । अस्य बह्व्यः टीकाः श्रीनृसिंहादिभिः कृताः सन्ति । तास्वद्वैतसिद्ध्यादिकर्ता प्रसिद्धतरः सर्वतन्त्रस्वतन्त्रः पूर्वकाले न्यायशास्त्रे कृतभूरिपरिश्रमः श्रीभगवतः कृष्णचन्द्रस्य परमभक्तोऽपि वेदान्तनिष्ठः शारीरकसारसङ्ग्रहनाम्नीं टीकां यथार्थनाम्नीं चकार । अस्य सङ्क्षेपशारीरकरत्नस्य शारीरकसारसङ्ग्रहाभिधटीकाकाञ्चनयोगोऽयं पण्डितमण्डलीमण्डनाय साधु समजनि । अतो नातिदीर्घेण कालेन वेदान्तरहस्यं तद्विवादे च प्रावीण्यमीप्सवो भगवतः सर्वज्ञस्येमां श्रीमधुसूदनसरस्वतीपरिरक्षितां कृतिं परिशीलयन्तु । सम्पूर्णस्याऽस्य ग्रन्थस्य प्रायः शोधनेन गृहीतपरिश्रमेषु विद्वद्वरेषु शोधिताऽनेकवेदान्तग्रन्थेषु "घर्के" इत्युपनामकेषु श्री पं० भाऊशास्त्रिमहोदयेषु केनचिन्निरसनीयकार्येणेतो (काशीतो) बहिर्गतेषु किञ्चिदवशिष्टशोधनकार्ये तदनुमतो यथामति तत्कार्यमकरवम् । अस्य शोधने श्रीमता ग्रन्थप्रकाशनद्वारा लोकसहायेन बाबूगोविन्ददासमहोदयेन मुद्रितपुस्तकं सहायकमभूत् । यथामति शोधितेऽप्यत्र पुनर्दोषसुलभतया सीसकाक्षरयोजनप्रमादेन च जायमानानि स्खलितानि सहन्तां सहृदया इति सादरं प्रार्थयते ।

केलकरोपाभिध-न्यायतीर्थ-साङ्ख्योगाचार्यादिपदवीभृत्
श्री (पं०) सीतारामशास्त्री ।

संक्षेपशारीरकस्य श्लोकाद्यचरणप्रतीकवर्णानुक्रमः ।

श्लोकप्रतीकानि	अ०	श्लो०
अ		
अकार्यस्वरूपस्य कार्यत्वमिष्टं	१	२४७
अकृतागमश्च कृतनिष्फलता	२	३०
अक्षव्याक्तिर्विप्रतीत्यास्पदत्वं	२	७१
अखण्डमेवाद्वयमात्मतत्त्वं	२	९७
अखण्डवाक्यार्थमनुव्रजन्ती	२	९६
अग्निः क्षिप्तोऽप्युल्मुकेन प्रदेश-	२	१६१
अचतुर्गुणशौचवारणात्	१	८१
अजडकारणभावनिबन्धनं	१	३२५
अज्ञस्तावत्यन्यगात्मा ऽहमज्ञः	२	१२९
अज्ञाततापि घटतेऽत्र दृशोऽनुभूतेः	१	३१६
अज्ञातत्वे यानवोचाम दोषा	२	१४२
अज्ञातमर्थमवबोधयतः प्रमायां	१	११३
अज्ञातमर्थमवबोधयदेव मानं	२	८
अज्ञातमर्थमवबोधयितुं न शक्तं	२	२१
अज्ञानकल्पितमानिर्वचनीयमस्मिन्	१	३३६
अज्ञानकल्पितमानिर्वचनीयमिष्टं	१	११८
अज्ञानजन्यकरणप्रतिबिम्बवाचि	२	२०७
अज्ञानतज्जघटना चिदधिक्रियायां	१	५५९
अज्ञानतज्जमखिलं जगदात्मभासा	२	१८५
अज्ञानतज्जमतिहीनतया सुषुप्ते	३	१२७
अज्ञानदाह इति नैकपदं समासात्	४	२२
अज्ञाननाशपदमत्र हि मुख्यमिष्टं	१	२१३
अज्ञानमप्यविदुषोऽस्य न तु स्वतोऽस्ति	१	५१
अज्ञानमत्र यदि नानुभवात्प्रसिद्धं	३	१२२
अज्ञानमन्यसदभावनया प्रसिद्धः	१	१२१
अज्ञानमस्ति सकलं हि सुषुप्तिकाले	३	१३३
अज्ञानमात्मविषयं भवहेतुभूतं	१	३०३
अज्ञानमावरणमावरणं च माया	३	१०८
अज्ञानमित्यजडबोधतिरस्क्रियात्मा	१	३१७
अज्ञानमेव च भविष्यति शक्तिरेषा	३	९४
अज्ञानमेव तु तदाऽवगतं त्वदीयं	३	१२१
अज्ञानवर्जिततया परमेश्वरोऽसौ	२	१८३
अज्ञानसंशयविपर्ययरूपकाणि	३	३४३
अज्ञानात्मकवस्तु नाश्रयतया	२	२०९

श्लोकप्रतीकानि	अ०	श्लो०
अज्ञानानि बहून्यसंख्यवपुषः	२	१३३
अज्ञानि ब्रह्म जीवो भवति भवति च	२	१६४
अज्ञानि ब्रह्म बुद्धीरनुसरति ततः	२	१३६
अज्ञानित्वं जीवभावो न तस्मात्	२	२०६
अज्ञानित्वं ब्रह्मणश्चानभीष्टं	२	१९६
अज्ञानित्वं ब्रह्मणो जीवता चेत्	२	१९५
अज्ञानिनो भवति मोहविजृम्भितं तत्	२	१९१
अज्ञानिनो भवति दुःखमनेन कलुषं	२	१७३
अज्ञानं जडशक्तिमात्रवपुषा	२	१६९
अज्ञानं जडशक्तिमात्रवपुषा	३	९९
अज्ञानं सकलभ्रमोद्भवनकृत्पिण्डेषु	२	१३२
अज्ञो विनश्यति पुमानतिमूढभावात्	१	२६८
अज्ञोऽहमित्यवगतिर्न परस्य पुंसः	२	१७८
अतोऽनपोह्यैव च तत्त्वसंविदु-	२	९४
अतो विरोधस्य निराससिद्ध्यै	२	९८
अतो न वेदान्तवचःसु विद्यते	१	४४८
अतः परत्वं श्रवणस्य तुल्यं	३	१८७
अतः प्रसज्यप्रतिषेधसम्भवात्	१	४४९
अत्यन्तानुपलब्धवस्तुनि पुनः	३	२५७
अत्राप्यसौ दृतिहरिः पशुरित्यखण्डः	४	२३
अत्राह यद्यपि किमप्युपनेयमत्र	१	१२९
अत्राह वाच्यशबलान्वितवस्तुनीयं	१	२०२
अत्राह सद्वयमहं मम रूपमीचे	१	९५
अत्रैव जन्मनि भवेदपवर्गदायि	३	३४९
अत्रैव वस्तुनि दृढं व्यवतिष्ठमानः	२	१९३
अत्रोच्यते न खलु वेदशिरांसि मुक्त्वा	२	७
अथ कलञ्जपदार्थगभञ्जणं	१	४१८
अथ केनाचिदात्मनैकता	१	१६८
अथ तदीययोगनिवर्तनं	१	४१९
अथ तमोमयविश्वविकल्पना	४	३७
अथ यद्युपक्रमणमल्पतरं	२	१२१
अथ यद्युपक्रमणमल्पमपि	२	१२२
अथवा चितिरेव केवला	४	१५
अथवा चितिवत्प्रतीयतां	३	१७६
अथवाऽनुवादमुपलभ्य ततः	१	५३६

श्लोकप्रतीकानि	अ०	श्लो०
अथवा मितियोग्यताऽस्तिता	१	४९४
अथ शब्दसूचितमुमुक्षुरिमं	२	८५
अथवा स तत्र परमात्ममतिः	३	५१
अदृष्टदोषं परिहृत्य श्रुतेः	१	४२९
अथाप्यवान्तरवचःपरिणामबोध-	३	३११
अद्वैतबाधकमभून्मम यद् द्वितीय-	४	५६
अद्वैतमप्यनुभवामि करस्थबिल्व-	४	५५
अद्वैतमात्मपदमाहुरनन्यमानं	१	११६
अद्वैतीकरणं निषेधवचनादुत्पन्नबुद्धेरपि	१	२५१
अद्वैतेऽर्थे प्रत्यगर्थोऽस्ति तद्वत्	१	१६२
अद्वैतं परिशोधितं भगवतो विष्णोः	१	२६५
अधममध्यमशुद्धिनिरूपणे	३	६०७
अधिकारिणं च विषयं च विना	२	२४६
अधिष्ठात्रधिष्ठेयभावेन योनि	१	५२९
अधिष्ठानमाधारमात्रं यदि स्यात्	१	३२
अध्यक्षगोचरमनर्थमवैमि वाक्यं	२	३
अध्यस्तमल्पवपुरस्य न वा	१	२७
अध्यस्तमेव हि परिस्फुरति भ्रमेषु	१	३६
अध्यात्ममेवमधिभूतमथाधिदैवं	३	६७
अनधिकारिणि शुद्धचिदात्मके	१	५५३
अनधिकारितया दृगवस्थिता	१	५५४
अनवबुद्धमतः श्रुतिमस्तकैः	१	३३५
अनादिवृद्ध्यवहारलक्षणो	३	२५४
अनाद्यजन्धेश्च निवृत्तिनिष्ठा	१	४२६
अनाद्यविद्यापटनेषबन्धनं	१	४५४
अनुपपत्तिबलेन विधेस्तयोः	१	५०५
अनुभूतियुक्त्यनुमितित्रितया	१	३८
अनुमानमागमविरुद्धमिदं	२	१७१
अनुवददिदमेव वाक्यमर्थात्	१	५३४
अनृतजडविभक्तदुःखतुच्छासहनवपुः	१	२६६
अनृतजडविरोधिरूपमन्त-	१	१
अन्तरङ्गबहिरङ्गसाधने	३	३२७
अन्तरङ्गमपवर्गकाङ्क्षिभिः	३	३२८
अन्तर्गुणा भगवती परदेवतेति	३	२२१
अन्यदेव यदि कारणं भवेत्	१	३३४
अन्यस्य विभ्रमकरी पुरुषस्य	३	९२
अन्ये पुनर्विधिवचोजनितात्मबुद्धि-	१	२५७

श्लोकप्रतीकानि	अ०	श्लो०
अन्ये वदन्ति निरुपाधिनियोगरूपं	१	१३७
अपरोक्षरूपविषयभ्रमधी-	१	४१
अपि च कर्तुरनुस्मरणे भवेत्	३	२६२
अपि च किंचिदपि प्रतिपादकं	३	२५९
अपि तु वैदिकवाङ्मनसातिगा-	३	२६५
अपि च परमहंसस्त्यक्तसर्वैषणः सन्	४	१०
अपि च पुरुषकर्मेन्द्रियाणीन्द्रियाणि	३	२५०
अपि च प्रतिषेधचोदना	१	४०१
अपि च प्रतिषेधचोदना	१	४०१
अपि च बन्धनहेतुतया श्रुतं	३	२५६
अपि च भाष्यकृदेव तदन्वयी-	१	४०
अपि च रूपितगोचरताविधे-	१	६०
अपि च विश्वमनुप्रविवेश	३	११
अपि विशिष्टविधौ वचनान्तरात्	१	५३७
अपि च लौकिकमानबलाश्रयात्	३	२६१
अपुनरुक्तिनिषेध्यनिषेधकृत्	३	३१८
अपुनरुक्तपदानि विना यतः	३	३१४
अप्यात्ममप्यात्मगतत्वमेव	३	२८०
अबुध्यमानो न हि संविदं तत्	४	३१
अबोधनाशस्थितिरित्यमुष्मिन्	१	२१२
अब्रह्मण्या धर्ममिरोर्नजेष	१	४०६
अभयं सनातनमनातुरधीः	२	२२४
अभिचारकर्म विधयो हि यथा	२	२४४
अभिदधाति करोति च लिङ्पदं	१	१९६
अभिनयेन करिष्यति चेदयं	३	२६०
अभिन्न एवैष पटः समीक्ष्यते	२	१०४
अभिन्नता भिन्नतया विरुद्धा	३	१९४
अभिन्नहेतुर्विषये समान	१	२२३
अभिमतपशुपुत्रवृष्टिनाक	१	१९२
अभिहितघटनाऽथवान्विताना	१	२८२
अभिहितघटना न चोपपन्ना	१	२८३
अभिहितघटना यदा तदानीं	१	२८४
अभीष्टहेतुत्वलिङर्थपृष्ठतः	१	४४३
अभेदिनो निर्विकृतेरनेक-	२	६६
अभेदिनः सावयवस्य सत्यं	२	६५
अयमपि परमात्मा प्रत्यगात्मस्वभावः	४	२१
अयं तु मायेति न शब्द एव	३	९६

श्लोकप्रतीकानि	अ०	श्लो०
अर्थवादगतमभ्युपेयते	३	१६१
अर्थस्य मूलं निकृतिः क्षमा च	३	३६६
अर्हार्थे च कृत्यस्मरणम-	१	६३
अर्हेकृत्यतृचश्च पाणिनिवचः	२	५१
अल्पं रूपं बन्धने प्रत्यगात्मा	१	५०
अवगतिगतमेवापेक्ष्य पूर्वापरत्व-	३	२४७
अवितथमिदमेवमेतत्	१	५०८
अविरलपदपंक्तिः पद्मनाभस्य पुण्या	४	६१
अविरुद्धविशेषणद्वयप्रभवत्वेऽपि	१	१६७
अव्युत्पत्तिं बिभ्रती भाति संवित्	२	२१४
अशब्दमस्पर्शमरूपमव्ययं	३	२९२
अशुचेः प्रतिषेधशास्त्रतः	१	८०
असज्जनिः सेत्स्युपवर्ण्यमानं	३	२०२
असत्यमूर्तिर्न च सत्यमूर्तिः	२	१०९
असदपि फलवत्तामश्नुते युष्मदिच्छा	२	२३५
असन्नकर्णे गगनप्रसून-	३	१९९
असन्निवृत्तिर्न च सन्निवृत्तिः	२	१०८
अस्तित्ववस्तुविषयेऽपीतरत्रेच्छिः	१	४९३
अस्त्यस्त्यमीति न तिङन्तपदानि सन्ति	१	४९१
अस्त्यस्त्यमीति च पदं प्रचुरं क्रियाया	१	२८३
अस्थूलादिवचैर्निरस्तनिखिलद्वैतप्रपञ्चं	१	२६४
अस्थूलादिवचोनिषेधकतया भेदस्य संशोधनात्	१	२५६
अस्थूलादिवचः समुत्थितमतिर्नाकार- मादास्यते	१	२५४
अस्यैव तत्त्वविनिवेदनशक्तिभाजः	१	२५९
अहं प्रजायेय बहु स्यां स्यां	२	६७

आ

श्लोकप्रतीकानि	अ०	श्लो०
आकाङ्क्षादिर्विधेते योग्यतास्ता	१	५४७
आकाङ्क्षितं भवति पूर्णशक्तियुक्त	१	९७
आकाशादावस्तिता तावदेका	१	१८४
आकाशादौ नित्यता तावदेका	१	१८१
आकाशादौ शुद्धता तावदेका	१	१८२
आकाशादौ सत्यता तावदेका	१	१७८
आकाशो विद्रोऽस्त नास्ति च यथा	२	१३४
आक्षेपतोऽयं मदिदं भवतीति नाम	१	३०९
आग्नेय इत्यापि तद्धितान्त-	१	३०८
आग्नेयमादिवनमर्थैरिमितीदृशं हि	१	४९०
आच्छाद्य विक्षिपति संस्फुरदा-	१	२०
आज्ञादिभेदेष्वनुवर्तमाने	१	१३६
आज्ञायर्थैः प्रेरकः पौरुषेये	१	१८७
आज्ञायाश्चाद्युपाधिप्रणिपतितवपुः	१	१३८
आत्मन्येव समस्तवस्तु यदि वा	२	११४
आत्मानं नतु कर्मतामुपनयञ्छब्दः	१	२४१
आत्मा प्रसाधयति वेद्यपदार्थजातं	१	५४
आत्माऽमूढः स्वप्रकाशो यथाऽयं	२	१४५
आत्रेयवाक्यमपि संव्यवहारमात्रं	३	२१७
आदाय नानाविधकारणानि	१	२१९
आदाय मुख्यगुणलाक्षणिकप्रवृत्तीः	१	१०४
आदाय मुख्यगुणलाक्षणिकप्रवृत्तीः	१	४८५
आदेर्यांशेनाणुमात्रेऽपि भेदो	१	१३१
आद्ये सूत्रे त्वंपदस्योदितत्वात्	१	५५२
आधिक्यमुत्सृजति शब्दगुणो निजेऽर्थे	१	१०५
आनन्दत्वे सत्यता सत्यतायां	१	१८८
आनन्दाविग्रहमयास्तसमस्त	१	२६
अन्ये भिन्नस्वभावं विविधमभिदधत्यानु- रूप्येण	१	११९
आप्तोक्तत्वप्रत्ययेऽयं मानभावः	१	२७०
आबोधतः सकलमेव हि सत्यमिथ्या	२	२२
आरम्भणादिवचनं सकलं प्रवृत्तं	२	५५
आरम्भणादिवचसा खलु निर्विकल्प	२	४५
आरम्भवादमुपगम्य तदीययुक्तेः	२	७०
आरम्भवादः कणभक्षपक्षः	२	६३
आरम्भसंहतिविकारविवर्तवादान्	२	५७
आरुह्य भूमिमधरामितरोऽधिरोढुं	२	६०
आरोपदृष्टिरपवादकदृष्टिरेवं	२	८१
आरोपदृष्टिरुदिता परिणामदृष्टिः	२	८२
आलम्बनं च विरहय्य न विभ्रमस्य	१	६४०
आवापोद्वापहेतोः पदामिदममुकस्याभि- धाने समर्थं	५	१३५
आवृत्त्या वा तत्र वृत्त्याऽथ वेदं	१	५५९
आश्चर्यमत्र मम भाति कथं द्वितीयं	४	५७
आश्रयत्वविषयत्वभागिनी	१	३१९

श्लोकप्रतीकानि	अ०	श्लो०
आसन्नवस्तुविषयेण यथाऽक्षजेन	२	१२३
आसीदहंकरणमात्मतमोनिमित्त	३	१२८
आस्तामत्र वचःप्रवृत्तिविरहः	१	२४०
इ		
इच्छायामिति सूत्रकारवचनं	३	३३९
इतरेतराध्यसनमेव ततः	१	३७
इतरेतराध्यसनमस्त्वनयोरुभयोः	३	२३८
इतश्च निर्भेदकमात्मतत्त्वं	३	१९८
इति कामुकस्य तव संसरणं	३	५३
इति केचन वर्णयन्ति तत्	१	८३
इति तु केचिदुशन्ति महाधियः	२	९१
इति न धर्मविशेषसमर्पणं	१	६२
इति परस्परसंश्रयता यदा	३	२२७
इति बहुश्रुतभाषितमुच्चकैः	४	५१
इति योजय सर्वमीदृशं	१	८२
इति वचःपरिणाममुदीरितं	३	३१७
इति वाजपेयगतनीतिवशा	१	४६२
इति विशेष इह प्रतिपादितः	३	३२१
इति श्रुतिः कारणसाक्षिभाव	३	१८६
इति श्रुतिः शास्ति निषिद्धकर्मणि	१	४३२
इत्थं जगत्कारणवादिवाक्यं	१	५४९
इत्युक्ते गुरुणा स पृच्छति पुनः	३	१४३
इत्युक्त्वोपरते गुरौ पुनरयं	३	५७
इत्येवं कथयन्ति केचिदपरे	३	२२९
इदमर्थवस्त्वपि भवेद्रजते	१	३४
इदमुपेत्य किमप्युदितं मया	१	२३०
इयमेव सर्वजननी प्रकृति-	२	१६७
इयं घटव्यक्तिरितीदृशेषु च	१	२७५
इष्टाभ्युपायवचनो लिङिति स्थितौ च	१	४७४
इष्टाभ्युपायस्य च कार्यभावः	१	४७७
इष्टाभ्युपायो विधिरात्मनीच्छा	१	४७५
इह कलञ्जपदेन नञन्वयः	१	४२०
इह जगति हि सर्व एव जन्तु-	१	६६
इह तावदक्षदशकं मनसा	३	२०
इहाधुनाऽऽरम्भणशब्दशक्ति	२	९५
ई		
ईशितव्यमनपेक्ष्य नेश्वरः	३	१८८
ईश्वरत्वमपि तत्परश्रुतिः	३	१६२
उ		
उक्तसाधनसमुद्भवा सती	४	१
उक्तं साधनजातमत्र सकलं	३	३५८
उच्यते न तमसो निवृत्तितः	४	४
उच्यते शृणु विविच्य साधनं	३	३२९
उत्थानलिङ्गकृतकल्पनयैतदेवं	३	१२०
उत्पत्तिरप्यस्य निरूप्यमाणा	३	२०१
उत्पत्तिरेव हि धिया स्वफलं प्रदातुं	४	२६
उत्पन्नशुक्तिमतिरात्मचितिर्यथैव	४	१९
उत्सर्गतः सकलकर्मनिवृत्तिनिष्ठा	१	८४
उत्सृज्य तत्र वितथांशमथेतरस्मिन्	१	२८८
उदासीनता च श्रुता नञ्प	१	४३७
उदितपक्षपरिग्रहकारिणां	१	४२१
उद्दिश्यमानत्वमनूद्यमान-	१	४५७
उद्दिश्यमानं तदनूद्यमान-	१	४५९
उद्गातृप्रतिहर्तृकर्तृकतया जातौ	२	११७
उद्यन्निरस्यति तमश्च तदुद्भवं च	४	२४
उपचितापचितानि न निर्गुणे	३	३१६
उपनिषद्वचसा परमात्मधीः	३	३००
उपनिषद्वचसाभिहितात्मधीः	३	३०१
उपनिषदिति वेद इत्यपीदं	३	२९७
उपनिषदितिशब्दो वेदशब्दश्च तस्मात्	३	२९८
उपसत्तिवाक्यमधिकारिणि	१	५५६
उपसदनवचो विचारमार्गात्	१	५५८
उपससाद चतुष्टयसाधनो	१	६५
उपादानता चेतनस्यापि दृष्टा	१	५४५
उपादानता सच्चिदानन्दमूर्तेः	१	५४४
उपादानतः संख्यया संगतिः स्यात्	१	५०६
उपाधिना सार्धमुपाधिजन्य	३	२७९
उपाधिमौपाधिकमान्तरं च	३	२७५
उपाधिरज्ञानमनादिसिद्ध-	३	२७७
उपाधिरन्तःकरणं त्वमर्थे	३	२७८
उपाध्यभावेन भवेदुपाधिमत्	१	११५

श्लोकप्रतीकानि	अ०	श्लो०
उपायमातिष्ठति पूर्वमुच्चैः	२	६२
उपेत्य वादं परिगृह्य चोच्यते	१	४४९
उभयमपि परात्मनः स्वरूपम्	१	६८
उभयव्यतिमिश्ररूपतां	२	८८

ए

एकत्वमेकवचनादवगम्यमानं	१	५०१
एकत्वमेकवचनेन समर्पितं यत्	१	५०९
एकत्र शक्तिग्रहणोपपत्ता	१	२०१
एकत्र वृत्तिरिति लक्षणमत्र मुख्यं	१	२२१
एकदेशमुपलभ्य धर्मिणः	३	३०८
एकाज्ञानविकल्पितं सकलमे-	२	१७०
एका या प्रकृतिः समस्तजननी	१	५१०
एकाहाहीनसत्रद्वयविधिविहिता	१	६४
एकेन वाक्येन धियो विधान-	१	४५८
एको देवः सर्वभूतेषु गूढः	३	१८३
एकोपाधावस्तिता नास्तिता च	२	१९९
एकोपाधावेकवस्तुप्रसिद्धौ	२	१५२
एकं चेतनमस्य यत्प्रकृतिना-	१	५१३
एकः शत्रुर्न द्वितीयोऽस्ति शत्रुः	१	३२१
एतत्त्वंपदलक्ष्यवस्तु भवता	३	१४२
एतत्समन्वयनिरूपणमेवमस्मिन्	१	५६३
एतदप्यहमेवेतुमुत्सहे	४	३
एतद्धि सोऽयमितिवाक्यमखण्डनिष्ठं	१	१५०
एतस्माच्च न जाग्रतस्तव भवेत्	३	८३
एतावता न च तमोऽपि सुषुप्तिकाले	३	१२४
एवमात्मनि तमोनिवृत्तितो	४	६
एवमेव तु तमोनिवृत्तिगीः	४	१८
एवं तमोऽपि न बभूव सुषुप्तिकाले	३	१२६
एवं तावत्तत्त्वमर्थौ विशुद्धौ	३	३०९
एवं तावदखण्डवस्तुविषये	१	२१६
एवं तावल्लक्षणावृत्तिहेतोः	१	२०८
एवं तावल्लोकसिद्धा न माया	३	१०४
एवं न तत्त्वविनिवेदनशक्तियोगः	२	४४
एवं न वा अर इत्यश्रुतमेव तावत्	३	१६८
एवं पुराणाधगत यदि नानुभूतं	२	२०
एवं प्रमाणमखिलं बाह्येऽर्थेऽनिष्ठं	२	१२

श्लोकप्रतीकानि	अ०	श्लो०
एवं विज्ञाय तापत्रयमतिगहनं	३	५६
एवं वेदशिरःप्रमाणमुदितं प्रत्यक्त्वरूपे तव	१	२४९
एवं वेदान्तवाक्यैरवगतपदवीं	२	२४८
एवं शब्दान्तराणां नयनिपुणमतिः	१	१४१
एवं सतीदमपि तत्त्वमसीति वाक्य	१	१५१
एवं सतीदमविवेकनिबन्धनं ते	३	७५
एवं सतीह तमसो न विविच्य वस्तु	३	१३४
एवं सतीह यदि वेदशिरो न मान	१	२९९
एवं सतीहापि विरुध्यमानं	३	२८७
एवं समन्वयनिरूपणयः श्रवबोध	२	१
एवं समन्वयविरोधनिरासविद्या	४	५२
एवं स्फुरत्यपि दृगात्मनि तत्स्वरूपे	१	४९

ऐ

ऐदम्पर्यमखण्डवस्तुविषयं	१	२
ऐश्वर्यमज्ञानतिरोहितं सत्	३	१७५
ऐश्वर्यमध्यनुभवादिवदात्मरूपं	१	१९२
ऐश्वर्यमस्य परमात्मन उक्तमन्यैः	३	१५१
ऐश्वर्यवस्तु परिगृह्य तदन्यजन्तः	३	१७२
ऐश्वर्यवर्णनमतिस्फुटमेव कृत्वा	१	१९३
ऐश्वर्यवर्णनमिह द्विविधेन वेदे	१	१६९

औ

औत्पत्तिकी शक्तिरशेष-	१	४
औत्पत्तिके हि भगवानपमप्रबुद्धे-	२	४८
औदासीन्यप्रच्युतिप्रापकेऽर्थे	१	१८६
औदासीन्यप्रच्युतेः प्रापकौ च	१	७९
औदासीन्यविशेषमेव हि परब्र- ह्यात्मधीजन्मने	१	७५
औदासीन्यं बोधिते शास्त्रवृन्दै-	१	७६
औदासीन्यं पुरुषगतमेवाविशेषा-	१	४१९
औदासीन्यं बोधयच्छास्त्रमेतत्	१	७७

क

कणभुगभिमतिर्वा कल्पनीया तदानीं	३	२४९
करणमिह लिङ्गदेर्ज्ञानमेवाङ्गिनागः	१	३८९
कर्मुष्टिनिविष्टमुत्तमं	१	३०४
कर्तृकर्म परिहृत्य नश्यते	३	१९३

श्लोकप्रतीकानि	अ०	श्लो०
कर्तृत्वमाह मम कर्मविधिर्नियोगः	२	४
कर्तृत्वादि च दृश्यकर्मापतितं	३	८२
कर्त्रादिसंनिधिबलेन तवापि कर्तृ	३	८१
कर्त्रादेरवभासकत्वमगमः	३	६१
कर्मकाण्डकृतबुद्धिशुद्धित-	१	६९
कर्मपथ्नेऽतिगते च काण्डे	१	४८८
कर्मेन्द्रियाणि खलु पञ्च तथा पराणि	३	१६
कष्टः कष्टः कल्पितब्रह्मवादः	२	१९८

का

काणाददर्शनसमाभयदोषराशिः	३	२१८
कादाचित्कात् कल्पना कारणस्य	२	२०२
कामादि तत्र च भवेदितरत्र चेति	३	१७७
कारकस्य करणेन तल्लक्षणात्	३	३३२
कारणत्वमपि चित्सुखादिवत्	३	१८१
कारणत्वमुपलक्षणं चिते	१	१३३
कार्त्स्न्यं हीष्टमबाधनं न खलु तत्	३	८४
कार्यत्वमिच्छावशवर्ति किंचित्	१	४७८
कार्यप्रधानमखिलं च पदं सुबन्त-	१	४८९
कार्यवस्तु विरहय्य कारणं	३	१८९
कार्यानुमानपरतन्त्रमिदं हि शास्त्रं	१	५३९
कार्यान्वयान्वयिनि वस्तुनि शब्दशक्तिः	१	१३०
कार्यान्वयान्वयिनि वस्तुनि शब्दशक्तिः	१	३४९
कार्यान्वयान्वयिनि शक्तिरिति स्थितौ च	१	६५३
कार्यान्वितार्थविषया यदि शब्दशक्तिः	१	३४९
कालस्वभावपरमाण्वसुमृत्प्रधान-	१	५२८
कालोऽतीतोऽनादिरेष्यत्यनन्तः	१	१२९
कालोऽनादिस्तत्र मुक्तः शकादिः	२	१३१
काष्ठैः स्थाल्यां पचति विश्वैः	१	३६२
किंच क्रियापदमपेक्ष्य पदानि वाक्य-	१	१०८
किंच प्रतीचि सकलोपनिषत्प्रवृत्ता	२	१०३
किंच प्रमान्तरमपेक्ष्य गिरः प्रवृत्तिः	१	१०१
किंच प्रमान्तरमिहाभ्युपयत्प्रतीचि	१	१११
किंच प्रवृत्तिविनिवृत्तिविहीनवस्तु	१	११२
किंच स्वयंप्रभमलुप्तचिदेकरूपं	१	१०६
किंचाज्ञानं ब्रह्मणोऽध्यस्ति नास्तो-	१	१५५
किंचानृतद्वयमिहाध्यसितव्य-	१	३२
किंचाप्रसिद्धमिदमत्र जगत्त्रयेऽपि	१	१२०
किंचाऽऽम्नायवचःप्रमेयबलतः	२	१२४
किंचिज्ज्ञताऽस्य तमसाऽऽवृतनित्यदृष्टेः	२	१७७
किंचैतत्किं बन्धमोक्षव्यवस्था	२	२१६
किं तु त्वंपदलक्ष्यमर्थमधुना	३	९९
किं ते धनेन किमु बन्धुभिरेव वा ते	३	३६९
किं द्वैतानुभवो विरोधपदभाक्	२	२१९
किं निरस्तसहकारिकारणा	४	२
किं सप्रपञ्चमिदमस्त्वथ वा समस्त	३	१४४
कुड्यं गृहस्य सरसोऽम्बुजमस्य वक्त्रं	१	२२४
कुरु परापरवाक्यविवेचनं	३	३१९
कुर्वत्कारणपक्षमाश्रितवतः	३	२३४
कूटस्थान्नित्यैव तु मुक्तिरेषा	४	२९
कृपणधीः परिणाममुदीक्षते	२	८९
कृपणमध्यमपक्व धियां नृणां	३	२४०
क्रियानुप्रवेशं विना प्रागभावः	१	४३९
क्रियापदं वेदशिरःस्वपीष्यते	१	२८२
क्वचिदभ्युपेत्य कथनं कुरुते	२	७७
क्षितिजलदहनानिलाम्बराणां	१	४९६
क्षितिजलदहनेषु तत्प्रदेशान्	१	४९७
क्षरं प्रधानममृताक्षरं हरः	४	४६
क्षीरस्य पूर्णे चषके नियुक्तो	३	६४

ख

खमपि खादति खण्डितमीक्षते	३	१९७

ग

गङ्गापदं हि निजमर्थमपास्य तीरे	१	१५५
गन्धच्छायालेशसंस्कारभाषा	४	४२
गुणतया हि पदानि परात्मनः	३	३३९
गुणतो गुणवृत्तिरिष्यते	१	१७२
गुणं क्षिपेत्कारणमर्थवत्त्वं	३	२१२
गुरुचरणसरोजसंनिधाना-	१	९
गुरुशिष्यसंगतिरतो न भवेत्	३	३६
गोवत्सादौ मुक्तता तावदेका	१	१८३
ग्राह्यग्राहकयोः स्थिरत्वगमनी	१	३१

श्लोकप्रतीकानि	अ०	श्लो०
घ		
घट एव गच्छति नभस्त्वचलं	३	२८
घटात्पटो भिन्न इतीष्यते यदि	२	१०५
च		
चलने ह्युपाध्यभिमतस्य भवेत्	३	३१
चिच्छक्तिः परमेश्वरस्य विमला	३	२२८
चितिगतजडशक्तेराद्य इष्टो विवर्तः	३	२५२
चितिभेदमभेदमेव वा	४	१४
चितिवस्तुबुद्धिजनकस्य पुनः	२	१०१
चितिवस्तुनः स्वमहिमस्फुरणे	२	९९
चितिशक्तिबाधितवपुः	२	१६८
चित्रादिवद्भवति साधनजातमस्य	३	२५१
चित्रायागः पशुफल इति	१	३३२
चिद्वस्तुनाश्रिति भवेत्तिमिरं तमिस्रं	१	३१८
चेतसस्तु चितिमात्रशेषता	३	३४५
चैतन्यमेव तु तमस्वि तदप्रबुद्धं	२	१८९
चैतन्यवस्तुविषयाश्रय एव मोहः	३	१३
चैतन्यस्याज्ञानशक्तेरनादे-	२	१९२
ज		
जगत्कारणत्वं पुनर्यत्र दृष्टं	१	५३१
जगदुदयनिमित्तं चेतनं किंतु नाना	१	४९९
जगन्महिम्ना च जगत्प्रसिद्धिः	३	२३१
जडत्वहेतोर्न जगन्महिम्ना	३	२३२
जडप्रमाणस्य फलानिरूपणा	२	११३
जडशक्तिमात्रवपुषा	२	१६६
जडशक्तिरस्ति च परस्य विभोः	३	४४
जडार्थसंवित्रहि कुर्वतः फलं	२	११०
जनयत्यसाविह मृषा वपुषा	२	२२९
जनिमदभवदेतच्चेतनादेव हेतोः	१	४९८
जन्मादिलक्षणमिदं जगतो यदुक्तं	५	५३८
जन्मादिषड्भावविकारहीना	४	३०
जन्मान्तरेषु यदि साधनजातमासीत्	३	३६१
जन्या न मुक्तिर्घटते कुतश्चित्	४	३२
जहतीह च लक्षणा मता	१	१९१
जाग्रत्स्वप्नसुषुप्तिधर्मकमिदं	३	१४०
जाग्रत्स्वप्नसुषुप्तमूर्छिततनू	३	१३९

श्लोकप्रतीकानि	अ०	श्लो०
जाग्रद्भूमौ या प्रसिद्धेह माया	३	१०५
जाड्यं जगत्यनुगतं खलु भावरूपं	१	३२२
जातः सुतः कलवंशविवर्धनस्ते	१	३५९
जानात्यर्थे लिङ्पदं गौणमाहुः	१	४७९
जानात्यर्थे श्रेयसो हेतुभाव-	१	४८०
जीवत्वमेव तु तदाश्रयमध्यपाति	३	१५
जीवन्मुक्तिगतो यदाह भगवान्	२	१७४
जीवन्मुक्तिप्रत्ययं शास्त्रजातं	४	३९
जीवन्मुक्तिव्याघृतेः प्रापको यः	४	४९
जीवन्मुक्तिस्तावदस्तिप्रतीतेः	४	४३
जीवस्य कार्यकरणाधिपतेरविद्या	२	१७५
जीवा एते स्वप्रकाशस्वभावा	२	१४७
जीवाज्ञतावचनमेवमिदं समस्तं	२	१८८
जीवाः सर्वे त्वां प्रति प्रस्फुरन्तः	२	१४९
जीवेशानजगद्विभागजननी	२	१९०
ज्ञप्तु-युष्मत्त्र्योर्यद्वदेवं प्रवृत्तौ	३	२७२
ज्ञातेऽपि तावति ततोऽनतिरिक्त	१	४४
ज्ञात्वा देवं सर्वपाशापहानिः	३	१५५
ज्ञानमस्ति खलु बाह्यगोचरं	३	१६३
ज्ञानव्यक्तिर्विभतीत्यास्पदत्वं	३	७२
ज्ञानस्य प्रागभावादपरमभिहितं	३	१११
ज्ञानात्मकस्यामलसत्त्वराशेः	२	२८६
ज्ञानोत्पत्तिं वामदेवस्य गर्भे	३	३५०
ज्ञानं निवर्तकमपि द्वितयस्य तस्य	३	१०९
ज्ञानं विधातुं नहि शक्यमेतत्	१	४५०
ज्ञायन्ते चेद् ब्रह्मणा जीवभेदा	२	१४६
ज्योतिर्द्वियान्तरित एव हि कर्मजातं	३	७७
ज्योतिर्ब्रह्मक्षणवाक्यमानबलतः	३	१४१
ज्यैष्ठ्यात्समर्थमथवा क्षजमेकमेव	२	६
त		
तच्छब्दवाच्यगतमद्वयभागमेकं	१	१६०
तच्छब्दादेषगतमाद्वितीयमासीत्	३	३०९
तच्छेषभावमनपेक्ष्य च तत्फलं स्याद्	१	४६७
ततस्तन्निषेधार्थमेतद्वभाषे	१	५३०
ततो वियन्मुख्यमदो जगज्जडं	३	२३९
ततोऽस्तु रूपादिविहीनरूपे	१	२७७

श्लोकप्रतीकानि	अ०	श्लो०
तत्परःश्रुतिवचः प्रमाणकं	३	१५८
तत्र सत्यमनृतं च भेदतः	२	३७
तत्रापि दुर्घटमवैति यदा तु तत्त्व-	२	४७
तत्रापि पूर्वमुपगम्य विकारवादं	२	५८
तत्त्वावेदकमानदृष्टिरधमा	२	८३
तत्त्वंपदार्थविषयो नय एष योज्यः	१	१७७
तत्त्वं पदार्थविषयं तम इत्यपीदं	३	३४२
तथा तमःसंभवमच्छमन्तः	३	६५
तथा त्वमर्थेऽपि चतुष्टयं तत्	३	२७६
तथा श्रुतौ नेतिवचःसु नाम्नि	१	४१४
तथा सच्चिदानन्दशब्दास्तदर्थं	१	२३६
तथा हि नाम्ने करणीतिनाम्ना	१	४१३
तथा हि सम्बन्ध्युपमर्दबुद्धये	१	४४४
तथा ह्यजक्षीरविधेः समीपे	३	२८६
तदन्वयात्प्रागसतः कथं स्यात्	३	२०५
तदसदिष्टफलोद्भवदर्शना-	१	४२८
तदसुन्दरमात्मसंविदः	१	४९५
तद्दुर्घटं न खलु किंचिदपि प्रमाणं	१	३७१
तद्दुघटं न खलु सैविदियं स्वयंग्या	१	२८५
तद्धि द्विधैकाधिकरण्यमुक्तं	१	२१८
तद्बुद्धिमात्रफलतैव च तत्परत्वं	१	४१६
तद्वदत्र पदजातबुद्धिभि-	१	३७८
तत्र भाति चतुरस्रमुच्चकैः	३	१५७
तन्मायावि ब्रह्म चेत्स्वप्रकाशं	२	१४४
तमसा विनिर्मितमिदं सकलं	२	२९
तयोस्तु बाध्यो विधिशास्त्रलभ्या	१	८७
तर्कप्रतीतिसमयेऽपि तदद्वितीयं	३	२०६
तव गाढमूढतमसा रचितं	२	२२२
तव चित्तमात्मतमसा जनितं	२	२२५
तव नित्यमुक्तसुखचिद्वपुषः	३	२२
तव बोधजन्मनि पुरा	२	२३९
तव बोधमात्रमुपनेयमतः	२	२३८
तव रूपमेव तव दुःखकरं	२	२३७
तस्माज्जीवन्मुक्तरूपेण विद्वान्	४	४५
तस्मात्कर्म समस्तमेव तु भवत्	३	३४०
तस्मात्तत्परवेदवाक्यगतिभिः	३	२९१
तस्मात्पथ नपदभङ्गभयाद् गुणानां	१	५२२
तस्मात्प्रमाणफलमत्र निरूप्यमाणं	१	१२९
तस्मात्प्रवृत्तिविनिवृत्तिविवर्जितत्वं	१	३१५
तस्मादखण्डमवबोधयितुं समर्थः	१	४९५
तस्मादखण्डविषया न वचःप्रवृत्तिः	१	१००
तस्मादखण्डविषये वचने विवादं	१	२७३
तस्मादध्यस्तमेतत्सकलमपि दृशौ	१	५७
तस्मादभिव्यक्तिकरी न हेतु	३	२१४
तस्मादशेषजगदेकनिदानभूत-	३	१३१
तस्मादसंगतमिदं प्रतिभाति यन्मे	१	१४४
तस्मादसङ्गतमिदं यदुशन्ति केचित्	१	३५६
तस्मादाध्वं निराशाः श्रुतिशिरसि न	१	१४३
तस्मादेतल्लक्षणं चिह्नमाहुः	१	५४८
तस्मादेषा स्वप्रयुक्तप्रमाण-	३	२७१
तस्माद् ब्रह्मणि वाच्यवाचकयुजा	१	५२६
तस्माद् ब्रह्माविद्यया जीवभावं	२	१६२
तस्मान्न मानफलना निरूपा-	३	२३७
तादस्थ्येनोपाधिमादाय मोहः	२	१५९
तादर्थ्येनोपाधिरङ्गं यदि स्यात्	२	१६०
तान्येव कार्यकरणानि बहुप्रकारं	३	६६
तिसृषु भूमिषु तस्य च तिष्ठतः	२	९२
तिस्रोऽपि चिद्घननतनोस्तवदृश्यभूता	३	१३६
तीर्थेन तं विविदिषन्तमनन्यभक्तं	१	९२
त्यक्तः कथंचिदर्थे वदितुमलमयं	१	१३१
त्वत्पादपङ्कजसमाश्रयणं विना मे	४	५८
त्वमतः स्वमोहरचितं गहन	२	२३३
त्वय्येव कल्पितमहंकरणं बिभर्ति	३	१३७
त्वम्पदस्य दृशिमद्वृद्धये	१	५६१
त्वंपदार्थविषयं समन्वयं	१	५६०
तेन सत्यमिह जागरं विदुः	२	३६
तेषां भेदः स्वप्रकाशो यदीष्टः	२	१४८

द.

दहरस्थगुणोपसंहृतेः	३	१७८
दहरादुपसंहृतैर्गुणैः	३	१७९
दीपस्तमस्तिरयतीह भवत्कृतश्चित्	४	२५
दृतिहरणकरत्वं पुंसि चान्यत्र चेदं	४	२०
दृशो विराट्सूत्रशरीरगोचरं	१	४५३

श्लोकप्रतीकानि	अ०	श्लो०
दृश्यत्वजाड्यपरतन्त्रचिदाश्रय—	२	१६९
दृष्टश्च रज्जुविधिनाऽवगतार्थवस्तु	१	२५८
देवयानपितृयानयोः पथोः	३	५२
देवादीनां नास्ति कर्माधिकारः	४	४९
देशकालपुरुषैरवस्थया	२	३४
देहव्यक्तिर्विप्रतीत्यास्पदत्वं	३	६८
द्रष्टव्य इत्यपि विधिर्न विधिप्रमेय—	२	५०
द्वारं तमोन्वयमपेक्ष्य दृशा हि दृश्यं	१	५२
द्विजं न हन्यान्न कलञ्जमश्यात्	१	४०८
द्वैषव्यक्तिर्विप्रतीत्यास्पदत्व	३	७४
द्वैतोद्वैतनिवेशिनोऽनुभवना	२	२१०
द्व्यणुकव्यणुकव्यपाश्रयं	२	७४
द्व्यणुकस्य जन्मपरमाणुयुगात्	१	७२

ध.

धर्मनिर्णयनिमित्तमिष्यते	१	७०
धर्मेऽपि तत्त्वमतिरेव तु नोदनायाः	२	५४
धातोः कर्मण इत्युदीरितमिदं	३	३३८
धातोः कर्मण इत्युवाच भगवान्	३	३३७
धात्वर्थतोऽन्या नच भावनाऽस्ति	१	३९९
धात्वर्थाख्यानशक्तो यदि भवति गुणाद्भवितुं	१	१४०
धूमे सत्ता स्यादसत्ता च तस्मिन्	२	२०१

न.

न कर्म काण्डेऽपि ततो नियोगः	१	४००
न खलु कारणकार्यसमन्वयः	३	२२२
न खलु जगति श्रेयोहेतुप्रतीत्युदयादृते	१	३६४
न खलु निर्गुणवस्तुपरं वचः	३	२९८
न खलु पाणिनिपिङ्गलसंज्ञया	३	२६३
न खलु संश्रुतसंहृतशब्दयोः	३	३२४
न खल्वीदृशं कारणं योगसिद्धं	१	५३३
न च किमपि नः कार्यं नाम प्रमाण-पथानुगं	३	३६३
न च किंचिदन्यदसतो वदितुं	३	२०६
न च क्रियाकारितसंहतानि	१	२८०
न च गतार्थमिदं प्रति भाति नो	१	५९
न च तथाऽयमभित्रसमाश्रयः	३	२२३
न च तमोमयजन्म विमुक्तता	४	३६
न चन्द्रप्रकाशप्रकर्षं प्रकाशात्	१	२३५
न च प्रमाणान्तरयोग्यतायां	१	२७६
न च प्रसिद्धार्थपदान्तराणां	३	९५
न च भवति विरोधस्योत्थितस्या-पनीतिः	१	१६६
न च मादृशजनधीकृतरचनं	३	२६७
न च वर्णपूगमपहाय भवेत्	२	२३१
न च वर्णितादपरमत्र भवान्	३	२०७
न च विनिगमनायां कारणं किंचिदस्ति	१	१६३
न च शक्तिरस्ति सहजा यदि वा	३	८९
न च शुक्रशोणितसमागमने	३	९०
न च सोमयागपदयोरुभयोः	१	३५२
न चैवं विधिः कश्चिदत्रेति न स्यात्	१	५०७
नञः प्रपञ्चप्रतिपादकस्य च	१	२९२
नञः स्वसम्बन्धिपदार्थवस्तुनः	१	४०२
न तथाऽन्तरङ्गमुपलब्धिजनेः	३	३५३
न तथाऽन्तरङ्गफलसंन्यसनं	३	३५९
न तदत्र सम्भवति युक्तिवशात्	२	२०९
न तदात्मनः स्फुरणमेव निजं	२	२०४
न तमोऽपि पूर्वमभवत्र	२	२४०
न तमः परिहृत्य लभ्यते	२	२४१
न तव क्वचिद्गमनमस्ति विभोः	३	३६
न तव प्रतीचिकरणानि बहिः	३	४१
न तस्य कश्चित्पतिरस्ति लोके	३	१८५
न तस्य कार्यं करणं च विद्यते	३	१८४
नद्यास्तीरे फलमिति गिरः	१	१०२
न नामयोगो न च धातुयोगः	१	४१२
न नीलत्वजात्याश्रयव्यक्तितः स्यात्	१	२२८
न नीलोत्पलादि प्रदेशेषु किंचित्	१	२२९
न नीलोत्पलाद्या गिरो व्यक्तिनिष्ठाः	१	२२७
ननु कल्पितं यदिह जागरितं	२	३२
ननु च डित्थडवित्थपदादिवत्सकलमेव	३	२५३
ननु चाद्ययाश्रयतमः स्फुरणं	२	२१०
ननु चैकरूपचितिवस्तुगतं	२	२०३

श्लोकप्रतीकानि	अ०	श्लो०
ननु निवृत्तिपरत्वमुदीरितं	१	४१७
ननु मातृमानविषयावगती	२	२७
ननु लौकिकवचसां नरमति-	३	२६६
ननु शाक्यभिक्षुसमयेन समः	२	२५
ननु सच्चिदादिवपुषो जगतः	१	५४३
ननु सदृशमिदं वश्योयमस्मासु कस्मात्	३	२४
ननु समीहितसाधनता लिङो	१	४२७
ननूद्विदादेर्यदि नाम लोके	३	९७
न न्वज्ञेयमिदं भवेद्यदि मम प्रत्यक्स्व-रूपं ततः	१	२४४
नन्वन्यो मद्बन्धमोक्षादिभागी	२	२१८
नन्वेवं चेद्बन्धमोक्षव्यवस्था	२	२१५
नन्वेवं सति रज्जुखण्डलकम-	३	१०२
नन्वेवं स्याद्दुर्निवाराऽनवस्था	२	१५४
न पाल्यत्वयोगादलंभूष्णुभाव-	१	४३६
न पुरान्वयश्च तव चिद्वपुषः	३	३२
न पुरान्वयोऽत उपपत्तिसद्भः	३	३७
न पुराष्टकेन रहितस्य तव	३	२१
न प्रधानमपहाय वेदने	३	३३४
न प्रधानमिह वेदनं भवेत्	३	३३५
न प्रमातरि सति प्रबाध्यते	२	३३
न प्रमेयमपहाय मातृता	३	१९१
नभसः प्रदेशविरहान्नभसः	३	३३
न भेदबुद्धिर्घटते प्रमाणतः	२	१०६
नयनिपुणधीर्बालभेष्टां	१	३६५
न योग्यतामात्रनिबन्धनो भवेत्	३	२३४
नरकपातविवर्जनवर्त्मना	१	४३०
न रविशार्वरसख्यकृदीक्ष्यते	३	१९६
न शक्यमुत्पाद्यमिति प्रशस्यते	२	११२
न संङ्करो नापि च संयुति-स्तयोः	३	२३३
न स्थानतोऽप्यस्ति परस्य कश्चित्	३	१४६
न स्थानतोऽप्यस्ति परस्य तस्मात्	३	२८२
न स्वाध्यायवदाप्यता न च पुनः	१	३०६
न हि कल्पनाविरचितं वितथं	३	२४
न हि खलु मतिपूर्वा ब्रह्मणः सृष्टिरिष्टा	३	२४९
न हि चित्तदृश्यमपि सत्यमिति	२	२२६
न हि भूमिरूषरवती मृगतृड्जल	३	२९
न हि विभक्त्यभिधेयपदार्थगं-	१	५०२
न ह्यर्थवादा विधेभिर्विरुद्धा	३	२८५
नाखण्डवस्तुविषया वचसः प्रवृत्तिः	१	१०३
नाज्ञाततामनवगम्य पुरा प्रवेशात्	२	१८
नाज्ञाततावगतये स्वयमेव बाह्यं	२	१७
नाज्ञाततावगतिरस्ति जडेषु पूर्व-	२	१६
नाज्ञानमद्वयसमाश्रयमिष्टमेवं	२	२११
नाज्ञानमस्ति च सुषुप्तिग-तस्य पुंसः	३	१२५
नाद्यापि वेद्म्यहमनिर्वचनीयभाषां	१	१२८
नाद्यां न हन्यां न पिबेयमित्यपि	१	४०९
नानाविधैर्बहुभिरेव निमित्तभेदैः	१	२२२
नान्वेति तत्त्वं चिति व्यतिरेकितं च	३	१३८
नापूर्वमर्थमुपलम्भयितुं पदानां	१	१०९
नाभावताऽस्य घटते वरणात्म-कत्वात्	१	३२०
नामधातुमहितो नजिष्यते	१	४०५
नावेदविन्मनुते पुरुषं बृहन्तं	३	२९६
नासंसृष्टपदार्थबुद्धिपदयोः	१	३७२
नासंसृष्टमतो वदन्ति वचना-	१	३८१
नाहङ्कृतिं च परिहृत्य तमस्विताधीः	२	१८०
नाहं प्रकाश इति तावदनेन माया	३	११०
नांशः परस्य न च तस्य विकार एष	३	१०
निजमायया परिगतः पुरुषः	२	३०
नित्यबोधपरिपीडितं जगत्	२	३८
नित्या च कारणगणस्य सती प्रवृत्तिः	३	२१५
नित्यापरोक्षमपि वस्तु परोक्षरूपम्	१	१२३
नित्यं प्रियादिषु सुखं प्रतिबि-म्बितं सत्	३	१५२
नित्यः शुद्धो बुद्धमुक्तस्वभावः	१	१७३
निमित्तं च योनिश्च यत्कारणं तत्	१	५३२

श्लोकप्रतीकानि	अ०	श्लो०
नियोग एवैष पुमान्नियुज्यते	१	४२४
नियोगकोटयाऽपि नरो न कश्चित्	१	४७६
निरतिशयसुखं च दुःखजात-	१	६७
निरभिसंधिसमर्पितमच्युते	४	८
निरूपणायां नयतोऽस्ति कश्चित्	३	२१०
निवृत्तिनिष्ठे तु निषेधवाक्ये	१	४४२
निवृत्तिरस्ति द्विविधा बहिः- स्थिता	१	८६
निवृत्तिसिध्याऽपि नियोगसिद्धिः	१	४२३
निषिद्धक्रिया दुःखनिष्पत्तिहेतुः	१	४४१
निषिद्धक्रिया प्रत्यवायाय नेति	१	४३८
निषिद्धक्रिया प्रत्यवायाय नो चेत्	१	४३९
निषिद्धक्रियां चोदितस्याक्रियां वा	१	४४०
निष्कारणं श्रुतिशिरोवचनस्य भङ्गं	१	५४२
निष्पन्नमेव यदि वा पुरुषप्रयत्न-	१	२९५
निष्पादिता सकलकारकवर्गसाध्या	३	११८
निःश्रेयसं न खलु साध्यमतः क्रियाभिः	१	३१४
निःसंधिबन्धनमिदं चिदचि- त्स्वरूपं	१	१९८
नीलैकगोचरतया नियतं न चक्षुः	१	२९६
नीलं सुगन्धि महदुत्पलमम्बुशायी	१	२२०
नैतत्कलत्रनिमित्तोऽपि घटते	१	३७९
नैतत्प्रमाणमपनेतृसतो न तावत्	१	१२६
नैतत्सारं सत्त्वमिष्टं यदि स्यात्	२	२००
नैतद्वस्तुनि कल्पितस्य जगतो वाक्यप्रसूतप्रमा	१	२४५
नैतादृशं ब्राह्मणस्यास्ति वित्तं	३	३६३
नैवं भ्रान्तिनिमित्तकारणमयं	३	१०३
नोपन्तमित्यत्र नञ्नेत्रणार्थ-	१	४०७

प

श्लोकप्रतीकानि	अ०	श्लो०
पदजातबुद्धिजनिता भवति	१	३७४
पदवाक्यमाननिपुणा	१	११
पदवृत्तिसमन्वयावुभौ	१	५५१
पदान्तरस्यागमनादिहान्वयः	१	३६७
पदार्थबोधेन कृतार्थता न ते	३	२९४
पदार्थबोधं परिहृत्य वाक्यं	३	३०४
परपक्षनिषेधमाचरन्	२	७८
परमात्मपदं पराकृताद्वितयं	१	३०५
परमात्मभागपरिवेष्टनकृत्	३	३४
परमात्मसंश्रयतमोजानितं	२	२८
परमेव तत्त्वमगृहीतमभूत्	२	२३६
परमेश्वरता गुणोऽन्यतः	३	१८०
परमेश्वरेण विभुना रणयन्	३	४७
परशब्दवृत्तिरपरत्र भवेत्	१	१७१
पर्यायता न खलु तत्त्वमसीति वाक्ये	१	२२५
परस्पराभावधिया न भेदधीः	२	१०७
परस्पराभावमुपाददानो	१	२१०
परस्पराभावविहीनभावात्	१	२११
पराञ्चि खानि व्यतृणत्स्वयंभूः	२	१३
परिकल्पितोऽपि सकलज्ञतया	२	२२७
परिच्छिन्नवस्तुव्यवच्छेदसिद्धौ	१	५२७
परिणति च विवर्तदशाद्वयं	३	२४३
परिणाम इत्यथ विवर्त इति	२	८६
परिणामधियो विवर्तधीः	२	८७
परिणामबुद्धिमुपमृत्य पुमान्	२	८४
परिणामविवर्तयोरतः	३	२७४
परिपूर्णचिद्रसघनः	३	४०
परिणामवादमुपगम्य तथा	२	७६
पशुनेतिपदे तृतीयया	१	५०४
पश्यन्न पश्यति गिरा कथयां बभूव	३	१६७
पश्यामि चित्रमिव सर्वमिदं द्वितीयं	४	५४
पदार्थं न पृथक्प्रमाणमपरं	१	३८०
पारम्पर्यं प्रगतिकगति कारणादा-	१	३७६
पारम्पर्यं शुद्धिहेतुत्वहेतोः-	४	५०
पारोक्ष्यं च ब्रह्मणि प्रत्यगर्थे	१	२३८
पित्रा तत्त्वमसीति बोधनमतु	३	२९९
पुरधर्ममात्मनि विकल्प्य तथा	३	३९
पुरमेव गच्छति चितिस्त्वचला	३	२९
पुरवेष्टितं न तव चिद्बलयं	३	२७
पुरवेष्टितः पुरवशानुगतः	३	४८

श्लोकप्रतीकानि	अ०	श्लो०
पुरहेतुकं तव यथा च वपुः	३	४५
पुरहेतुकं यदभवच्च विभोः	३	४३
पुरहेतुरूपघटितस्य दृशेः	३	४६
पुरुषभेदवशाद्विविधा भवेत्	२	९०
पुरुषमतिनिवेशो नास्ति वेदप्रमेये	३	२४८
पुरुषमेकमपेक्ष्य च भूमिका	३	२४२
पुरुषापराधमलिनाधि	१	१४
पुरुषापराधविगमे तु	१	१५
पुरुषापराधविनिवृत्तफलः	१	१६
पुरुषापराधशतसंकुल	१	१७
पुरोपलब्धो विषयो न दृश्यते	३	२५६
पुर्यष्टकं तदिदमप्यभवद्धि लिङ्गं	३	१९
पुर्यष्टकं भवति तस्य परस्य मोहात्	३	९
पुरं पुरस्थत्वमथो पुरस्थं	३	२८१
पुंलिङ्गताऽपि घटते क्रतुगामिनोऽस्य	१	४७३
पूर्वक्षणे भवति वाच्यपदार्थभाग-	१	२०४
पूर्वण्यदृष्टपरिपन्थिनिबर्हणानि	३	३४७
पूर्वापरान्वयबलेन हि कारणत्व-	१	३७३
पूर्वापरीभूतपदार्थनिष्ठ-	१	४९२
पूर्वापर्ये पूर्वदौर्बल्यमाह	२	११६
पूर्वोत्पन्नमृगाम्बुविभ्रमाधियः	२	११५
पूर्वं विकारमुपवर्ण्य शनैः शनैस्तत्	३	२२०
पृष्ठात्परस्परयुजा प्रतिपत्तिरेषा	१	१७६
पृष्ठेन पूर्णवपुषा क्रियते प्रतीति	१	२५०
प्रकर्षः प्रकाशातिरिक्तो न चात्र	१	२३४
प्रकृष्टप्रकाशात्मजा सी हि लोके	१	२३१
प्रकृष्टप्रकाशध्वनी व्यक्तिमेकां	१	२२६
प्रक्षालनेन धवलं किमिदं बभूव	२	१९
प्रच्यावि वस्तु यदिहास्ति निजस्वरूपात्	३	१२
प्रतिषेधवाक्यवदतः सकलं	१	४०४
प्रत्यक्त्वादिगुणान्वयेन यदि वा	१	१७०
प्रत्यक्षप्रमाणकमस-	१	३
प्रत्यक्त्वमात्रविषयाश्रयता	१	२१
प्रत्यक्त्वमात्रविषयाश्रयमोहहेतोः	२	२१२
प्रत्यक्त्वं लक्ष्येत् त्वंपदार्थः	१	२३७
प्रत्यक्षकर्मवचसोरुभयोः सभूहः	२	५
प्रत्यक्षलिङ्गवचनानि हि दर्श-	१	२२
प्रत्यक्षसूत्र इदमेव निवेदयिष्यन्	४	२७
प्रत्यक्षादेरेष दोषस्तनोऽयं	२	१०२
प्रत्यक्परात्मविषयवस्तुविवेचनाय	३	१३५
प्रत्यग्भावस्तावदेकोऽस्ति बुद्धौ	१	१५९
प्रत्यग्रूपमतो न शब्दविषयः	१	२४३
प्रत्ययप्रकृतिशब्दतो बहिः	१	३९३
प्रत्यग्वस्तुन एव तत्र विषये मा -	२	१२७
प्रत्ययार्थविषयं हि कर्मणा	३	३३३
प्रत्यये सनि न चापवादकं	३	३३६
प्रत्यासन्ना परिणतिरियं	२	८०
प्रथमचरमभावो निर्णये कारणं चेत्	१	१६४
प्रथमात्रिकं याजिनिगद्य गतं	४	४६०
प्रभुरेष सर्ववित्कृपणो	२	२२३
प्रमाणतो नास्ति निषिद्धकर्मणः	१	४३१
प्रमाणमिच्छन्प्रतिषेधचोदनां	१	४४७
प्रवर्तकोत्थाननिबन्धने ततः	१	३६६
प्रवर्तकं वाक्यमुवाच चोदना	१	४१६
प्रवर्तकं वाक्यमुवाच चोदना	१	४११
प्रवृत्तिशास्त्रेण समेऽपि संमते	१	८९
प्रवृत्त्यभावस्य विरोधिकार्ये	१	१३२
प्रवृद्धरागस्य निवृत्तयोऽस्थिरा	१	४२५
प्राज्ञे मुखं समनुभूय समुत्थि-	१	२३
प्राणोत्क्रान्तिर्नास्ति मूर्धन्यथैषां	४	४८
प्राप्तिपदिकान्यनतिरिक्तविषयाणि	१	२७४
प्राप्तिपदिकार्थगतमेव वचनानि	१	५०३
प्रारम्भाः फलिनः प्रस-	१	५
प्रागदुकैरपि तथैव तदेषितव्यं	३	१३०
प्रियशिरस्त्वकथा खलु यादृशी	३	१७०
प्रेमानुपाधिरसुखात्मनि नोप-	१	२५

ब.

बहिरङ्गसाधनमशेषगुरोः	३	३५२
बहु निगद्य किमत्र वदाम्यहं	१	३३१
बाह्यध्यात्मिकवस्तुजातजननी	२	१३७
बाह्यैरसौ रविनिशाकरवह्निवाग्भिः	३	७६

श्लोकप्रतीकानि	अ०	श्लो०
बिम्बस्य नापि तमसि प्रतिबिम्ब-	२	१७९
बुद्धिव्यक्तिर्विप्रतीत्यास्पदत्वं	३	७०
बुद्धिः समस्तविषयावगमे प्रवृत्ता	२	११
बुद्धेर्वृत्तौ ज्ञानता तावदेका	१	१७९
बुद्धेर्वृत्तौ तावदानन्दतैका	१	१८०
बुध्यादिकार्येष्वपि चेतनोऽयं	१	५४६
बुध्या तत्त्वंपदार्थानुभवविषयं	३	३१०
बोधस्वभावकमबुद्धमनुष्णमुष्णं	१	११४
बोधात्मत्वे निर्निमित्ते प्रतीचो	१	१९०
ब्रह्मज्ञानं जानता ब्रह्मबुद्धेः	१	४५१
ब्रह्मज्ञानं प्रमाणं भवति दृढमिदं	४	७
ब्रह्मज्ञानं ब्रह्मणि ज्ञायमाने	१	४५२
ब्रह्मज्ञानं सूचयन्सूत्रकारो	१	५६
ब्रह्मपुच्छमितिवाक्यगामिनो	२	१२०
ब्रह्म प्रमेयमथनेष्टमिह प्रमाणं	१	११९
ब्रह्मस्वयंभुपरमात्मपदस्य वेदो	३	२६८
ब्रह्म स्वयं प्रथमतः शबलेषु तस्य	१	२८९
ब्रह्माज्ञानसमुद्भवग्रहगणं	२	१२९
ब्रह्माज्ञाने द्वाद्वितीयत्वमेकं	१	१५८
ब्रह्मात्मत्वं सान्तरायं पुरस्तात्	४	४४
ब्रह्मात्मवस्तु निरवद्यचिदेकरूपं	१	३४१
ब्रह्मादीनामस्ति मुक्तिश्रुतिभ्यः	४	४७
ब्रह्माश्रयं न हि तमोऽनुभवेन लभ्यं	३	१४
ब्रह्मास्मीतिवचो निविष्टपदयोर्मानं	१	२९३
ब्रह्मेतिशेषिपदमत्र हि लक्ष्यमेकं	१	१७५
ब्रह्मैव सन्निति गिरं प्रति शेषितायै	१	३१०
ब्रह्मैव सन्निति ततोऽपि बलि- ष्ठमेतत्	१	३१३
ब्रह्मैव सन्निति ततः प्रथमश्रुतं सत्	१	३११
ब्रह्मैव सन्निति वचः प्रथमश्रुतत्वात्	१	३०७
ब्रह्मैव संसरति मुच्यत एतदेव	३	७
ब्रह्मैवाज्ञानि तस्मादिह भवितुमलं	२	२०८

भ.

भगवाननादिनिधनः कृपया	३	३५४
भङ्क्त्वा कथंचिदनुमानवशेन सिद्धेः	१	५४१
भवति च पुरुषार्थकर्मिकेयं	१	३९१
भव्यप्रतीतावुपभोगभाजो	१	४८३
भव्यप्रतीतौ न हि कश्चिदर्थो	१	४८४
भव्याय भूतमिति किंच विधिप्रधाने	१	३१२
भव्याय भूतमुपदिश्यत इत्यवोचन्	१	३९६
भल्लातकादिरसयोगनिबन्धनं च	३	१४९
भावनाद्वयमतोऽवबोध्यते	१	३९४
भिन्नाभिन्नरवौ घटादिवचसा	१	२०९
भुजङ्गभोगं सुकुमारशीतलं	१	४३३
भुजङ्गमाङ्कशायिने	४	६३
भूतस्य भव्याय यथोपदेशः	१	४८२
भूतानि पञ्च तव मोहसमुद्भवानि	३	६१
भूतार्थनिष्ठवचनादपि शब्दशक्तिः	१	३६०
भूत्वा रागः कारणं पुंस्प्रवृत्तेः	१	१३४
भूयस्त्ववत्तनुगुणावयवक्रि—	१	२९
भेदश्रुतिस्त्वन्यपरा समस्ता	३	२८४
भेदश्रुतिः कल्पितमेव भेद-	३	२८८
भेदादिरूपमवबोधयितुं समर्थं	१	१४७
भेदो भिन्नश्चातिरेकोऽतिरिक्तो	१	२१९
भेदं च भेद्यं च भिनत्ति भेदो	१	५५
भोक्ता भोगं प्रेरितारं च मत्वा	३	२९३
भोक्त्रादिसूत्रे परिणामवाद	२	७९
भ्रमादनर्थस्य निदानमादरा—	१	४३४
भ्रान्तिज्ञानाद्ब्रह्मणः सिद्धिपक्षे	२	१४१
भ्रान्तिप्रतीतिविषयो न च सन्नचासन्	१	३३९
भ्रान्तं तथोपचरितं च यथाविभाग-	२	२१४

म.

मज्जत्यलाबु सहसाप्सु शिलाः	२	२
मणिमन्त्रमहौषधमितीदृशकं	३	९१
मतिमतां प्रवरो वृषभध्वजः	३	२१४
मनोवगम्येऽप्यपरोक्षतां बला—	१	४३
मन्त्रार्थवादगतमध्ययनं तदर्थं	१	४६८
मन्त्रार्थवादवचसामपि गोचरेषु	१	४७०
मन्त्रो हीनः स्वरतो वर्णतो वा	२	२३०
मलिनं नभो नहि कदाचिदभूत्	३	२३
मलं निरस्यार्थवदिष्यते चेत्	३	२१३
महिम्नामापि वाचिकी—	१	१३

श्लोकप्रतीकानि	अ०	श्लो०
महीभुजोऽयं पुरुषो मनस्वी	१	२८१
मातृप्रमाणमितिमेयविभागभिन्नं	१	११७
मानान्तराधिगतगोचरगामिनीस्यात्	१	१९२
मानान्तराधिगतता हि न लक्षणायां	१	१९३
मानान्तरानधिगतं त्ववगम्यमानं	१	२९७
मानान्तरानधिगतं परिनिष्ठितं यत्	१	२९४
मानेन मेयावगतिश्च युक्ता	१	४८७
मानं न कारकमिति प्राथितं पृथिव्यां	१	१२७
मायानिर्वचनीयमेव तु तमो	३	१००
मायानिविष्टवपुरीश्वरबोध एष	३	१९३
मायामयत्ववचनादखिलं मृषेति	३	९३
माथामयी बाह्यनिवृत्तिरिष्टा	१	८८
मायामसौ वितनुते विभुरेवमेनां	३	१८७
मायामात्रमतः समस्तमभवत्स्वप्ने	३	११२
मायामेनां जागरे लोकसिद्धां	३	८५
मायोपाधेरद्वयस्येश्वरत्वं	३	१४८
मायाविनो न मणिमन्त्रमथौषधं वा	३	८७
मायाश्रुतिस्मृतिवचः सकलं तथा च	२	६८
मिथ्याज्ञानाज्जीवभेदप्रसिद्धौ	२	१९१
मिथ्याज्ञानाद्ब्रह्मणः सिद्धिपक्षे	२	१४३
मिथ्या सुषिः सवितृमण्डलमध्यवर्ती	१	३३७
मीमांसितव्यमनयैव सदाद्वितीयं	१	५८
मुक्तामुक्तौ विद्वदन्यौ त्वदन्या	२	१२८
मुक्तेऽज्ञानं ब्रह्मभित्येतदेवं	२	१९६
मुक्तो मह्यं स्वप्रकाशश्चकास्ती—	२	१५८
मूर्तमूर्ततदुत्थलिङ्गपुरुषव्यामिश्र–	३	२३०
मोक्षस्वरूपे विकलक्रियोऽसौ	४	३३

य

श्लोकप्रतीकानि	अ०	श्लो०
यच्छ्रुतं विविदिषोदयाय तत्	३	३३०
यज्ञादिक्षपितसमस्तकल्मषाणां	३	३४८
यत एवमत्र न विरोधलवो	३	२२१
यत एवमेतदुपपत्तिपथं	३	३८
यतो महावाक्यत एव पुत्रो	३	३०२
यतो यतो निवर्तते	३	३६४
यतः प्रपश्यन्नपि भेदिनः स्वं	१	४७
यत्कर्मकाण्डनिपुणैरुदितं पुरस्तात्	१	१४६
यत्कर्मभावमनपास्य निजप्रमेये	१	१४
यत्केचिदाहुरभिधाय निजान्पदार्थान्	१	३७०
यत्तु प्रमाणमनुभूतिरिति प्रमाण–	१	२८४
यत्तु प्रमाणमपधीर्यं निजप्रमेये	२	३९
यत्रापि दैवगतितोऽस्त्यतिरिक्तभा—	१	४९
यत्राविशेषकनिमित्तकतावरोधे	१	३४८
यत्रैव काक इदमेव तु देवदत्तवेश्मेति	१	२०६
यथा च यागाद्यनुबन्धभेदा	१	४२२
यथा विशिष्टस्य विधानतोऽर्थात्	१	५३९
यथा ह्ययं ज्योतिरात्मा विवस्वान्	३	१९०
यदपि किंचिदुपासननिष्ठितात्	३	२८९
यदि कारणसंश्रयाद्गुणाद्यणुकादेः	२	७५
यदि कृत्स्न एव परमः पुरुषः	३	३५
यदि तत्र पश्यसि हरेः परमं	३	५५
यदि परिणतिरेषा चिद्विवर्तोऽथवा स्यात्	३	२४१
यदि बोध एव परमार्थवपुः	२	२६
यदि भाव्यभागविलये न भवेत्	१	२४५
यदि वा समुच्चयवशात्पुरुषः	३	५०
यदि सत्यमित्यवगतिं कुरुते	२	२२८
यदिह किंचिदबोधसमुद्भवं	३	३२७
यदिह साधनमात्मधियः श्रुतं	३	३५७
यदीयसंपर्कमवाप्य के—	१	८
यद्यादरायणमतं परिगृह्य पूर्वं	१	२९७
यद्यत्र पश्यसि विरोधमुदीर्य त्वं	१	९४
यद्वत्प्राकृतैवकृतावातिरावन्योन्य–	१	११८
यद्वस्तु सद्वयतयाऽवगतं स्वशब्दात्	१	९६
यद्वाक्यजातमथ वेदशिरोनिविष्टं	१	१४८
यद्वा विद्वद्गोचरं योजनीयं	४	४०
यद्यद्धकं किमपि लौकिकमीक्षितं तत्	२	१०
यद्धि कारकतयाऽवगम्यते	३	३३१
यमनियमविधानैर्वाङ्मनः कायचेष्टा	१	७४
यमस्वरूपा सकला निवृत्तिः	१	८९
यस्मात्कृपापरवशो मम दुश्चिकित्सं	४	५९
यस्य प्रयोगविधिरस्ति परिग्रहीता	४	११
यस्यापि विप्रुषि कृतार्थतया निषण्णाः	१	३०२
यागार्थमुख्यता यद्वदस्य	१	४८१
या नान्यमुद्दिश्य कृतिः प्रवृत्ता	१	१३३

श्लोकप्रतीकानि	अ०	श्लो०
या फलश्रुतिरिहोपवर्णिता	१	१९९
यावत्त्वंपदलक्ष्यवस्तुविषयो	१	६०
यावद्दृशोऽन्यदिह संसृतिकारणं तत्	१	३२४
योग्यत्वमत्र नच तत्त्वमसीति वाक्ये	१	९८
योग्येतरान्विततया न च वाच्यतास्य	१	३६९
योग्येतरान्वितपदार्थगतैव शब्द—	१	३९४
योग्येतरान्वितनिमित्तकशब्दशक्ति	१	३४७
योग्येतरान्वितपदार्थनिवेदने तु	१	३४४
यो यः शब्दो यत्कृतेऽर्थे निरूढः	१	१८९
यः कर्मकाण्डविषयेऽभिहितो—	१	७१

र.

रजतप्रतीतिरिदमि प्रथते मनु	१	३९
रज्ज्वज्ञानविजृम्भितस्य फणिनो	१	२५९
रागद्वेषप्रशाखं विषयगुणसमुद्भा—	२	१२६
रागव्यक्तिर्विप्रतीत्यास्पदत्वं	३	७३
रूपं तावकमुज्झितद्वयमभूदद्वैत—	१	२६९
रूप्यज्ञानं रजतमिदमित्येवमुत्पद्यमानं	१	४६९
रूप्यादिविभ्रममपेक्ष्य हि शुक्तिकादौ	२	५२

ल.

लडादिशब्देऽपगते लिडादौ	१	१६८
लक्ष्यस्य लक्षणमिह त्रिविधं प्रसिद्धं	१	५१४
लक्ष्यस्वरूपकथनाय न लक्षणाय	१	५२३
लक्ष्यस्वरूपमपि सद्यदमुष्य साक्षात्	१	५१६
लक्ष्यस्वरूपमुपलभ्य तदेकनिष्ठं	१	५२४
लक्ष्यार्थनिष्ठमुपलब्धमतोऽन्यतोऽर्थात्	१	५१५
लक्ष्यार्थवाचि पदमत्र हि लक्षणार्थे	१	५२१
लिङ्लोडादिर्भावकस्तत्रभाव्या	१	३८८
लोके प्रसिद्धपदगोचरतानिमित्त—	१	२७८
लोके प्रसिद्धपदगोचरताऽस्तिकार्ये	१	२७९
लोकप्रसिद्धार्थपदाश्रयाणां	१	२९०
लोके हि मायाधिगता न माया	३	८६

व.

वकारमासाद्ययमेवनित्या	१	७
वक्तृत्वमेव घटते यदि लिङ्पदस्य	१	३९७
वक्तृज्ञानविवक्षयैरपि भवेच्छ—	१	३५०
वक्ष्यामि वत्स तववाञ्छितमत्यवस्थ—	१	९३
वचनार्थविभक्तिवाच्ययो—	१	५११
वस्तुस्वभाव इति सत्त्वमतो गृहाण	२	२८७
वस्तुस्वरूपकथने ननु नास्ति पुंसः	१	३००
वस्त्वस्तु नित्यमपरोक्षमिदं तु वाक्यं	१	१२४
वाक्यप्रवृत्तिमनुसृत्य च सूत्रकारः	२	५६
वाक्यप्रसूतमतिरिन्द्रियजन्यधीवत्	१	१२२
वाक्यात्प्रवर्त्तकनिवर्तकरूपभाजः	१	३४३
वाक्यादभूतार्थनिष्ठाङ्भवति तु नृणां	१	१४२
वाक्यार्थान्वयि तत्पदार्थकथननेतीति	१	२६२
वाक्येषु नञ्वत्सु निवृत्तिमात्रं	१	४१०
वाक्योत्थापितबुद्धिवृत्तिरमला	१	२४८
वाक्यं मुक्तिफलां धियं जनयति स्पष्टं	१	२५३
वागादेः खलु बाह्यवस्तुविषयो नात्मा	१	२४२
वाग्विस्तरा यस्य बृहत्त—	१	६
वाचको हरणकर्तुरिष्यते	४	१७
वानप्रस्थगृहस्थनैष्ठिकजनैः	१	३५९
विकारवादं कपिलादिपक्ष—	२	६४
विदितता परमात्मन इष्यते	१	६१
विदिते पदे भगवतः परमे	२	२४३
वियेति हि वाक्यमेव मिह च स्पष्टं	३	१८
विद्या च विश्वविषयानुभवोत्थपूर्व—	३	१७
विद्याविग्रहमग्रहेण पिहितं	४	५३
विद्वांसो यदि मम दोषमु—	१	१२
विधयश्च कर्मविषयाः स्वतमः	२	२४२
विधिनिषेधवचःपरिणामतः	३	३२६
विधिनिष्ठवाक्यमपि बोधयति	१	५१२
विधिपदानि हि भागसमर्पणात्	१	३१४
विधिमुखेन परस्य निवेदकं	३	३१२
विधिरिह गुणभूतः प्रत्ययार्थोऽपि नित्यं	१	३९०
विधिवचस्युभयं तु पदे पदे	३	३१९
विनाऽपि शक्तिग्रहणं पदानां	१	२९१
विना महावाक्यमतो न कश्चित्	३	३०३
विरुद्धचिकस्य द्वयापत्तिदोषात्	१	४५६
विवर्तवादस्य हि पूर्वभूमिः	२	६१
विशेषणानामसती प्रवृत्तिर्न दृश्यते	३	२०१

श्लोकप्रतीकानि	अ०	श्लो०
विश्वोद्भवस्थितिलयप्रकृतित्वमस्य	१	५१९
विश्वोद्भवस्थितिलयप्रकृतित्वरूप-	१	५२०
विश्वं विष्णोरुत्थितं नामरूपं	४	२७२
विषयकरणदोषान्न भ्रमः संविदि स्या-	१	३०
विषयकरणदोषान्न भ्रमः संविदि स्या	२	२७२
विषमदुर्गमदेशसहलगः	३	२५८
विस्पष्टमात्ममतमेव हि सर्वधर्म-	२	१९४
विज्ञाते ब्रह्मणि स्याद्विधिरयमफलः	१	४५५
वृत्तिप्रवर्तकनिवर्तकशास्त्रसिध्ये	१	७८
वेदवाक्यविषयस्य सत्यता	२	४१
वेदान्तवाक्यगतिरत्र बहुप्रकारा	३	१४५
वेदान्तवाक्यजनिता मतिवृत्तिरेव	४	२८
वेदान्तवाक्यजनितां परमात्मबुद्धि-	२	५३
वेदान्तवाक्यमिह कारणबोधे	३	३४१
वेदान्तवाक्यमिह येन यथाप्रवृत्तं	१	५४०
वेदान्तवादिसमयेऽपि समानमेतत्	३	२१६
वेदान्तविज्ञानसुनिश्चितार्थाः	३	३६२
वेदेऽपि लाक्षणिकवृत्तिरियं त्रिधैषा	२	१५७
वेदे वक्तुरभावस्तदुभयं नास्तीह	१	३५१
वेदैकसम्यामाति कार्यमभीष्टमस्मिन्	१	३५७
वैराग्यस्य दृढत्वमेकमपरं	३	३
वैराग्यं विषयेषु पूर्वमपि मे	३	५८
व्यतिषक्तबुद्धिजनकं सकलं	१	३७५
व्यवहारगोचरमतः सकलं	२	२४७
व्यवहारनिर्वहणशक्तिमसौ	३	१७०
व्यापारं सकलस्य भासयति यो	३	६२
व्यावहारिकमतोऽवगम्यतां	२	४३
व्युत्पन्नस्य हि बुद्धिजन्मस-	१	१९

श.

शक्तिव्याप्तिप्रत्ययौ कारयिष्यन्	३	१०७
शक्तो गुरोश्चरणयोर्निकटेनिवासा	१	११०
शक्नोति सिद्धमवबोधयितुं च वाक्यं	१	५६२
शबलता कवली कृततावशात्	१	३२९
शबलतापरिधानसमन्वयात्	१	३३०
शबलमात्मपदेन निगद्यते	१	३२६
शब्दजातिवचनो न हि शब्दशब्दः	२	२७२

श्लोकप्रतीकानि	अ०	श्लो०
शब्दशक्तिविषयं निरूपणं	३	३४४
शब्दस्य लाक्षणिकमुख्यविभागभिन्ना	१	१९४
शब्दस्य लाक्षणिकवृत्तिरपि त्रिधैषा	१	१९४
शब्दार्थसङ्गतिविदामथ सत्त्वशुद्धेः	१	१९९
शब्दो गकार इति लौकिकमस्ति वाक्यं	१	२७१
शब्दः प्रवृत्तिजनको न तु बोधकश्चेत्	१	३५९
शशाङ्काभिधानाभिधेये हि दृष्टे	१	२२२
शशाङ्काभिधानाभिधेयो न चेष्टः	१	२२३
शश्वत्स्वयं प्रथमलुप्तचिदात्मभूतं	१	३५८
शास्त्रद्वयेन परिदर्शितसाधनेन	१	९०
शास्त्रद्वैविध्यदृष्टेर्द्विविधमधिकृते	१	७३
शास्त्रं तावत्परं नेष्यते त-	२	२१७
शास्त्रं प्रवृत्तिषु निवृत्तिषु तुल्यरूपं	१	७२
शिष्योपसत्तिवचनानि समन्वितानि	१	५५७
शुक्तिकाविषयबुद्धिजन्मना	४	१६
शुक्तिकाविषयबुद्धिजन्मनः	४	५
शुक्लादिमंशात्पृथगप्रतीता	१	४६
शुद्धत्वार्थं ब्रह्मणस्त्यज्यते चेत्	२	१९७
शुद्धः परो न खलु वाङ्मनसव्यतीतः	३	६
शुद्धे वस्तुनि यद्यपि प्रविशति ध्वानं	२	२३५
शुश्रुत्यतर्कजनितं चिदचिद्विभागं	१	२८०
शेषिव्यूह्यं न्यायसाम्यादशेष-	१	१८९
श्रद्धत्स्व सौम्येति हि शास्ति शास्त्रं	१	२६७
श्रवणमननबुध्योर्जातयोर्यत्फलं	३	३४६
श्रवणादिकं शमदमादिपरः	३	५४
श्रवणेन्द्रियं च किल कर्णगतं	२	२३२
श्रीदेवेश्वरपादपङ्कजरजः	४	६२
श्रुतपदैरुपसंहृतिशालिभिः	३	३२२
श्रुतिवचनमनेकं वक्ति तस्योक्षितृत्वं	१	२५१
श्रुतिवचनविशेषाच्चेतने कारणेऽस्मिन्	१	५००
श्रुतिवचांसि मुनिस्मरणानि च	२	९३
श्रुतिवचांसि मुनिस्मरणानि च	३	२४१
श्रुतेश्च तात्पर्यमखण्डरूपे	३	२८३
श्रुत्याऽविरोधमुपपन्नसमन्वयोऽथ	३	१
श्रेयोहेतुत्ववाची यदि भवति तदा	१	३९८
श्रेयःसाधनतामृष्टोऽनिलये सत्येति	३	३५

श्लोकप्रतीकानि	अ०	श्लो०
श्रेयःसाधनयागदानहवनाद्यर्थेषु	१	४७२
श्रेयःसाधनता लिङर्थ इति च प्राग्युक्त–	१	४७१
श्रोत्रादिजन्यमतिवृत्तिषु बाह्यशब्दा	२	७८
श्रौतार्थवृत्तिबललभ्यमपीह वस्तु	२	१७४
श्वेतिमानमभिपश्यतः पुरः	१	३७७
ष.		
षष्ठप्रपाठकनिबद्धमुदीरितं यत्	२	२१९
षष्ठी जातिगुणक्रियादिरहिते	१	२३९
स.		
सकलशक्तिविकल्पनयान्वये	३	२२६
सकलवेदशिरःसु परात्मधी–	३	२१३
सकृदुच्चरन्यजतिरेष गुणं	१	४६१
सगुणवाक्यमपीह समन्वितं	१	४६३
सच्चित्सुखाद्वयवपुः कथयन्ति केचित्	१	१७४
सती न संवित्क्रियते हि सत्त्वा–	२	१११
सती हि सत्ताऽस्य पदस्य दृष्टा	३	२०२
सतोऽपि कार्यत्वमयुक्तमेव	३	२११
सतः प्रमाणाभिमतेषु पञ्चसु	३	२५९
सत्यतो यदि मृषा न भियते	३	४७
सत्यप्यलुप्तचिति यत्त्वयि नास्ति कर्तृ–३		११३
सत्यप्येवं ज्ञातिरेकावकाशः	१	१८७
सत्यप्रतिज्ञनयनोत्थधियो घटादेः	१	४८
सत्यमेवमनृतं च दुर्लभं	२	३९
सत्यमेवमनृतं च भेदतः	२	४२
सत्यासत्यवपुस्तथाहि सगुणं	१	४६४
सत्येऽप्यस्ति ज्ञानता ज्ञानतायाम्	१	१८६
सत्यं ज्ञानमनन्तमित्यभिहिते संभावना नीयते	१	२६३
सत्यं न गत्यन्तरमस्ति तत्र	३	९८
सत्यं यदाह गुरुमान्यदि वाक्यगम्यं	१	१४५
सत्यं यदाह पितृमान्व्यवहारदृष्टि	२	४९
सत्संप्रयोग इति जैमिनिरप्युवाच	२	४६
सदसत्सदसद्विकल्पित-	४	१२
सदसत्सदसद्विकल्पितप्रतिबद्धा	४	१३
सदसद्बुद्धवर्नं न विमुक्तता	४	३५
सदृशसाशपराग्विषयेषु चेद्	१	३९
सदुपमावरणतालुभवादभीष्टं	३	१२९

श्लोकप्रतीकानि	अ०	श्लो०
स परिपृच्छति कोऽहमसौ च कः	१	९१
सप्रयोजनकबुद्धिकारणं	१	४६९
समवायिकारणगणेन तथा	३	२०८
समविषमसमुच्चयो न युक्तो	४	९
समीहितोपायतया लिङन्वयात्	१	४४३
समुपसंहृतशब्दसमन्वितैः	३	२२३
सम्यग्ज्ञानध्वस्तसर्वप्रपञ्चः	३	१९४
सम्यग्ज्ञानबलेन तं विरहितं	३	१०१
सम्यग्ज्ञानविभवसुः सकल-	४	३८
सम्यग्ज्ञानाज्जीवभेदप्रसिद्धा	२	१५०
सम्यग्ज्ञानाद्ब्रह्मणः सिद्धिपक्षे	२	१४०
सम्यग्ज्ञानान्मुक्तिसिद्धिर्यदीष्टा	२	१५७
सर्वत्र वस्तुषु जडेष्वजडप्रकाशं	१	१०७
सर्वप्रमाणफलभूतसमस्तसंवित्	२	१८४
सर्वश्रुतिस्मृतिवचोभिरयं परिव्राट्	३	३६०
सर्वे परार्थविषयमेव हि मानजातं	२	९
सर्वे यदर्थमिह वस्तु यदस्ति किं–	१	२१४
सर्वे सर्वमुद्भवाय घटते	२	२२५
स समानमित्युपनिषद्वचनं	३	४२
साक्षादिहाभिमतमेव विवर्तवाद–	२	९५
साक्षिताऽपि परमात्मनो भवेत्	३	१८२
साक्षित्वमात्मतमसामतिकच्चुकेन	३	१३२
साक्ष्यवस्तु परिहृत्य साक्षिता	३	१९०
सा चोपनेयरहिते विषयेऽप्यनन्तेऽ	१	३४२
सादृश्यधीप्रभृति न त्रितयं नि–	१	२१८
सापेक्षबुद्धितौ यदा तु भवतःपूर्वापरौ	२	११९
साभासज्ञानवाची यदि भवति पुनः	१	१६९
साभासमेतदुपजीव्य चिदद्वितीया	१	३२३
सामगानमथ जक्षणं जगत्	३	१६४
सामगानमथ जक्षणं जगत्	३	१६५
सामगानमपि तत्स्वरूपता	३	१६०
सामर्थ्यमस्य मणिमन्त्रनिमित्तमस्ति	३	८८
सामानाधिकरण्यमत्र पदयोः	१	२९७
सामानाधिकरण्यमत्र भवति प्राथम्य-	१	१९६
सामानाधिकरण्यमन्वयगिरा हेतुं	१	२१७
सामान्यतः प्रथममेष पदार्थपिण्डो	१	३६१
सामान्यं न विशेषवस्तुविरहे	३	१९३

श्लोकप्रतीकानि	अ०	श्लो०
सायुज्यादि न मोक्षपक्षपतितं	४	३४
सिद्धान्वितं यदि लिङादिपदानि कार्ये	१	३४६
सिद्धार्थवादिवचनेषु न गौणतादि	१	४८६
सिंहश्रुतिर्न घटते यदि शूरतास्य	१	१७३
सुकृतदुष्कृतकर्माणि कर्तृतां	१	३२७
सुकृतदुष्कृतकर्मवशादयं	३	४९
सुकृतदुष्कृतयोः शबला यथा	१	३२८
सुप्तो जन्तुः स्वल्पमात्रेऽपि काले	२	१३०
सूत्रं तनु सुमन्वयादितीवीधिव्यापार-	१	२६१
सृजति रक्षति संहरति प्रभुः	२	३६९
सृष्टिस्थितिप्रलयसंयमनप्रवेश-	१	२६०
सोपाधीश्वरता निषेधनपरा	३	१६३
सोऽयमित्यपि पदार्थरूपकं	१	१०७
सोऽयंगिरोरिव न लक्षणयाऽपि वृत्तिः	१	९९
सोऽयं पुमानयमसाविति पौरुषेये	१	१६५
सोऽयं पुमानिति वचस्युभयप्रकारा	१	१५६
सोऽयं पुमानिति हि मुख्यपदार्थयुक्त-	१	१४९
सोऽवच्छेदोऽप्यरित नास्त्यम्बरे चेत्	२	१५३
सङ्कल्पपूर्वकमभूद्घुनन्दनस्य	२	१८२
सङ्क्षेपशारीरकमेवमेतत्	४	६०
सज्जातवादमुपगम्य तु तत्र पक्षे	२	६९
संज्ञासंज्ञिसमन्वयावगतये	१	५२५
सम्बन्धजातविरहान्न च लक्षणाऽस्मिन्	१	२५२
सम्बन्धिता भवति लाक्षणिकप्रवृत्तेः	१	२०५
सम्बन्धिरूपं यदि वस्तु लक्ष्य-	१	२०३
सम्बन्धः समवाय इत्यपि पदे	१	२७०
संविच्चिभेदतदभावतदीयजन्म	३	२३६
संविद्दुरं वहति तद्विषयोपयुक्तं	१	५३
संविद्व्यक्तिर्विप्रतीत्यास्पदत्वं	३	६९
संविद्युत्पादकं यद्वचवनमभिमतं कर्म मीमांसकानां	१	२४६
संवित्परिस्फुरति न स्फुरतीति तस्यां	२	२१३
संवित्प्रमाणघटनां प्रति योग्यतां चेत्	१	२८६
संवेदनं यदिह मानफलं प्रसिद्धं	३	८०
संसारदोषमवधारयतो यथावत्		४
संसारूपमवगच्छ विविच्यमानं	३	५
संसिद्धा सविलासमोहविषये	१	३१

श्लोकप्रतीकानि	अ०	श्लो०
संसिद्धा सविलासमोहविषये	३	२३९
संस्कारभ्रमसंततिं प्रतिनरं भिन्नां	२	१३८
स्पष्टानुभूतिविषयो न तमस्तदानीं	३	१२३
स्पष्टं तमःस्फुरणमत्र न तत्र	२	१७६
स्फुरणास्फुरणे च नाऽऽत्मनः स	२	२०९
स्मृतिसमपदजन्यबुद्धियुग्मा	१	३८५
स्यादेतदेवमनवद्यपुमर्थसिद्धि-	१	३०१
स्वकारणैस्तन्तुभिरेवमस्य	३	२०४
स्वतोऽपरोक्षा चितिरत्र विश्र-	१	४२
स्वप्नदृष्टमिह रज्जुसर्पव-	२	३५
स्वप्नभ्रमोऽपि सुकृतादिनिबन्धनत्वात्	३	११७
स्वप्नश्च जागरितमप्युभयं तवैव	३	११९
स्वप्ने तत्रशिलाधिरोहणगता निःश्रे-	१	२३
स्वप्ने न जागरितमस्ति मृषात्वहेतोः	३	११५
स्वप्नेऽप्येवं स्वप्नदृङ्मोहमात्रात्	३	१०६
स्वप्नोपलब्धमखिलं वितथं तथाऽपि	३	११६
स्वप्नः शुभाशुभकलागमसूचकःस्यात्	१	३३८
स्वभावतश्चिद्घनविग्रहस्य	३	१४७
स्वभावतो यन्मिथुनं विरुद्धं	३	१९५
स्वराडिति च विद्यते श्रुतिः	३	१५६
स्वाज्ञानकल्पितजग-	१	१
स्वाज्ञानान्वयिनी चिदेव भवति	३	८
स्वातन्त्र्यमीश्वरगिरा गुणमार्गवृत्ति	३	१७१
स्वात्मानमेव जगतः प्रकृतिं यदेक-	१	५५०
स्वाध्यायधर्मपठितं निजवेदशाखा	३	२९५
स्वाध्यायवत्र करणं घटते-	१	१८
स्वानुरक्तमतिजन्मकारणं	१	५१७
स्वानुरक्तमतिजन्महेतुतां	१	५१८
स्वाभाविकी हि वियदन्वितता घटादेः	३	७९
स्वाभाविकी हुतभुजः खलु नोष्णता तं	३	११४
स्वायाविद्याकल्पिताचार्यवेद	२	१६३
स्वेच्छाविनिर्मितवपुर्वरमन्तरेण	२	१८१

ह.

हित्वा न वाक्यपदते प्रतिपत्तिहेतुः	१	११०
ह्रस्वाणुत्वे कारणत्वहेतोः	२	७२
ह्रस्वारब्धं त्र्यणुकमणुभिस्तद्दारब्धमेतत्	२	७१

समाप्तोऽयं संक्षेपशारीरकस्य श्लोकाद्यचरणप्रतीकवर्णानुक्रमः ।

॥ श्रीः ॥


संक्षेपशारीरकद्वितीयतृतीयचतुर्थाध्यायानां

विषयानुक्रमणिका ।



विषयः	पृष्ठः
प्रत्यक्षादिविरोधेन समन्वयाक्षेपः	१
भिन्नविषयत्वेन न प्रत्यक्षादिविरोधः	५
वेदान्तानामात्मविषयत्वसाधनम्	९
प्रमाणस्य न अनात्मग्राहकत्वम्	११
सर्वस्यापि दृश्यस्य मिथ्यात्वसमर्थनम्	१३
सर्वस्य कल्पितत्वेऽपि न विज्ञानवादिमतसाम्यम्	१५
जाग्रत्स्वप्नयोः साम्ये शङ्कापरिहारौ	१९
परमते सत्यासत्यविभागासिद्धिः	२५
अनात्मप्रत्यक्षस्य न तात्त्विकप्रामाण्यम्	२७
परिणामवादो न श्रुतिसंमतः	३३
परिणामवादाभ्युपगमतात्पर्यम्	३५
विवर्त्तवादस्यैव साक्षादभिमतत्वम्	३९
संघातवादखण्डनम्	४१
वैशेषिकमतखण्डनम्	४३
आरोपादिदृष्टित्रयनिरूपणम्	५१
दृष्टित्रयस्यैकपुरुषाश्रयत्वम्	५७
प्रत्यक्षादेर्न तत्त्ववेदकत्वम्	६१
पौर्वापर्ये पूर्वदौर्बल्यन्यायः	७१
संसारस्य ज्ञानैकनिवर्त्यत्वम्	७९

विषयः	पृष्ठः
बन्धमोक्षव्यवस्थानिरूपणम्	८१
ब्रह्मण एव अज्ञानाश्रयत्वम्	१०५
जीवेश्वरयोर्वैलक्षण्यम्	१०७
जीवत्वस्य वस्तुभूतत्वाभावः	१२५
बन्धमोक्षव्यवस्थाशास्त्रप्रामाण्यम्	१२९
कल्पितस्यापि तत्त्वबोधकत्वसंभवः	१३३
कल्पितस्यापि तत्त्वबोधकत्वम्	१३७
मुक्तौ विशेषः	१३९
यावज्जीवादिश्रुतिविरोधः	१४१
मानान्तराविरोधोपसंहारः	१४३
ब्रह्मविद्यासाधननिरूपणम्	१४७
जीवस्य देहान्तरसंसरणविचारः	१५१
त्वंपदलक्ष्यप्रश्नः	१८१
त्वंपदलक्ष्यनिरूपणम्	१८३
तत्पदलक्ष्यनिरूपणम्	२३५
गुणोपसंहारः	३२५
अन्तरङ्गबहिरङ्गसाधननिरूपणम्	३३५
गृहस्थादीनामप्यधिकारः	३४९
ज्ञानफलनिरूपणम्	३५५
मोक्षे कर्मणामनुपयोगः	३७९
जीवन्मुक्तेरर्थवादत्वम्	३८१



॥ श्रीः ॥

सटीकसंक्षेपशारीरकस्य

द्वितीयोऽध्यायः ।

एवं वेदान्तानां सत्यज्ञानानन्दाद्वये ब्रह्मणि समन्वयो निरूपितः । नन्वेवं सति अद्वये समन्विततयाऽवगतवाक्यादेव तदवगमसंभवात् सिद्धमेव सर्वं विवक्षितमिति किमुत्तरलक्षणेनेत्याशङ्क्य, तेनाद्वये मानाभावप्रयुक्तासंभावनायां निरस्तायामप्यनादिभवसमुद्भूतद्वैतग्राहिप्रत्यक्षादिदृढप्रमाण्याभिमानेन प्रमेयासंभवं मन्वानस्य जातोऽप्यवगमोऽर्थसाधको न भवति, ततश्च भेदग्राहिप्रत्यक्षाद्यविरोधनिरूपणायाध्यायान्तरमारम्भणीयमित्याशयेन प्रथममुक्तसमन्वयमाक्षिपति—

एवं समन्वयनिरूपणयाऽवबोधो
जातोऽप्यखण्डविषयो ननु वाक्यजन्यः ॥
मानान्तरेण परिपीडित एव जातो
भेदप्रकाशनकृताक्षनिबन्धनेन ॥ १ ॥

एवं समन्वयेति । नन्विति चोद्ये । प्रथममापाततो वाक्यजन्योऽनन्तरं समन्वयनिरूपणयाऽखण्डविषयनिश्चयो जातोऽपि मानान्तरेण परिपीडित एव संजात इति संबन्धः । विरोधार्थं मानान्तरं विशिनष्टि—भेदप्रकाशनकृतेति । भेदप्रकाशकेन, अक्षं प्रत्यक्षम् । तच्चानुमानादेरप्युपलक्षणम्, तन्निबन्धनं कारणं यस्य तेन ॥ १ ॥

ननु मानान्तरविरोधस्फूर्त्तौ शाब्दबोध एव न जायते, तदस्फूर्त्तिदशायां तदुत्पत्तिश्चेत् तर्हि समन्वयावगमानन्तरं सकृदुत्पन्नादेव ततः पुरुषार्थसिद्धेः किं लक्षणान्तरेणेत्याशङ्क्य अयोग्यतानिश्चयस्य शाब्दनिश्चयप्रतिबन्धकत्वेऽपि न शाब्दज्ञानमात्रप्रतिबन्धकत्वम्,

उपेक्षामूलकवाक्यादपि तदर्थप्रतीतिदर्शनादित्याशयेनाह—

मज्जत्यलाबु सहसाऽप्सु शिलाः प्लवन्त
इत्यादिकादभिहितादिव वाक्यजातात् ॥
जातापि बुद्धिरपबाधितगोचरैव-
मद्वैतबुद्धिरपि भेददियाऽऽत्मनि स्यात् ॥ २ ॥

मज्जतीति । अलाबु शुष्कम् । वाक्यजातात् वाक्यसमूहात् । दार्ष्टान्तिकमाह—एवमिति । अद्वैतबुद्धिरपि वेदान्तजन्या भेददियाऽपबाधितगोचरैव स्यादित्यर्थः ॥ २ ॥

नन्वेकस्मिन् विरुद्धधर्मद्वयग्राहकं चेत् प्रमाणद्वयं स्यात् तदैकेन बलवताऽपरं दुर्बलं बाध्येत । न चौपनिषदात्मनि श्रुतिगम्ये प्रत्यक्षादिप्रवृत्तिः संभवतीति कथं तेन श्रुतिबाधः स्यादित्याशङ्क्य जीवस्वरूपे प्रत्यक्षादिप्रवृत्तिः संभवतीत्याशयेनाह—

अध्यक्षगोचरमनर्थमवैमि वाक्यं
निर्मुक्तमाह मम रूपमनर्थहेतोः ॥
एवं च वेदशिरसोऽक्षनिबन्धनेन
ज्ञानेन बाधनमतीव हि दुर्निवारम् ॥ ३ ॥

अध्यक्षगोचरमिति । ममाहमिति प्रत्यक्षसिद्धं स्वरूपमनर्थमवैमि प्रमातृत्वकर्तृत्वविविधदुःखादिभोक्तृत्वरूपानर्थकलुषितमवगच्छामि । "योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति" "न लिप्यते लोकदुःखेन बाह्यः" "अनन्वागतस्तेन भवत्यसंगोऽयं पुरुषः तत्त्वमसि" इत्येवमादिवाक्यं मम रूपमनर्थहेतोरविद्यातत्कार्ययोगान्निर्मुक्तमाह । न चैवं विरुद्धविषयं द्वयमपि सत्यं भवितुमर्हतीति सकलमहाजनसंमतेन प्रथमप्रवृत्तेनाध्यक्षादिनिबन्धनेन ज्ञानेन वेदशिरसोऽतीव बाधनं दुर्निवारमेव । यद्यपि ब्रह्म सत्यज्ञानानन्दात्मकं मानान्तराप्रयोग्यमेव, औपनिषदत्वश्रुतेः । तथापि प्रत्यक्षादिसिद्धप्रपञ्चसत्यत्वविरोधेन न तस्यानन्त्यं सिध्येत् । एवमनुभवसिद्धप्रमात्रादिस्वभावभेदोऽपि तस्य न सिद्ध्येदिति तत्रापि विरोधो दुर्निवार इति भावः ॥३॥

ननु श्रुतिविरोधे परमार्थसत्यत्वांशेन तदनुपजीव्यं प्रथमप्रवृत्तमपि प्रत्यक्षादिकमेव रजताभावज्ञानेन रजतप्रत्यक्षमिव बाध्यते इति चेत् न। स्वसमकक्षकर्मकाण्डविरोधेन स्वविषयेऽप्रतिष्ठितस्योपनिषत्प्रमाणस्य प्रत्यक्षादिबाधकत्वायोगादित्याशयेनाह—

कर्तृत्वमाह मम कर्मविधिर्नियोग-
संबन्धपूर्वकमपास्तसमस्तभेदम्॥
मामाह वेदशिरसो वचनं तथा च
सत्यस्य दुस्थितमिवापतति प्रमात्वम्॥ ४॥

कर्तृत्वमिति। दर्शपूर्णमासादिकर्मविधिर्मम नियोगसंबन्धपूर्वकं कामिनो जीवनादिमतो वा मम नियोगान्वयप्रतिपादनपूर्वकं तदनुपपत्त्या कर्तृत्वमाहेत्यर्थः। कर्तृत्वग्रहणं भोक्तृत्वस्याप्युपलक्षणम्। नन्वेतावता कर्मविधिना को विरोध उक्त इति तमाह—अपास्तेति। कर्तृत्वादिविशेषरहितं निर्विशेषमित्यर्थः। अस्य वेदशिरोवचनस्य। प्रत्यक्षाद्यनुग्रहलब्धप्राबल्यकर्मवचनविरोधे श्रुतिशिरःप्रभवज्ञानस्य प्रामाण्यमत्यन्तं दुस्थितमेव स्यादित्यर्थः॥ ४॥

ननु प्रत्यक्षादिवच्छ्रुतिशिरसाऽपि समन्वयाध्यायेनाद्ये विध्यविरोधेन निरूपितप्रामाण्यस्य कथं तेन बाध इत्याशङ्क्य, एकस्य वस्तुनो युगपद् द्वैरूप्यायोगादन्यतरार्थस्य बाधे वक्तव्ये प्रत्यक्षादिसमुदायस्यैव श्रुतिबाधकत्वं युक्तम्। दृश्यते हि समबलसेनयोरपि राज्ञोरेकस्य रथगजाश्वाधिक्येनापरबाधकत्वमित्याशयेनाह—

प्रत्यक्षकर्मवचसोरुभयोः समूहः
सामर्थ्यवानुपनिषद्विषयापहारे॥
एकैकमेव तु न पारयतेऽपहर्तुं
स्वार्थप्रकाशनविधावुभयोः समत्वात्॥ ५॥

प्रत्यक्षेति। पारयते शक्नोति। कुतो न पारयति तत्राह—स्वार्थेति। उभयोर्वेदांतस्य प्रत्येकं प्रत्यक्षादेश्चेत्यर्थः॥ ५॥

ननु प्रमाणसमुदायो न पृथक् प्रमाणं न वा प्रत्यक्षादे युगपदेव स्वंस्वमर्थं साधयति, अत एवोक्तदृष्टान्तो विषम इत्याशङ्क्य कर्मकाण्डसमुपबृंहितं प्रत्यक्षमनेन श्रुतिशिरोबाधकं प्रत्यक्षाद्युपोद्बलितकर्मवाक्यं वा तदस्त्वित्याशयेनाह—

ज्यैष्ठ्यात् समर्थमथवाऽक्षजमेकमेव
तस्यैव कर्मविधिरस्तु सहायभूतः ॥
प्रत्यक्षमेव विधिवाक्यसहायमेवं
ब्रह्मात्मवस्त्वपहरिष्यति को विरोधः ॥ ६ ॥

ज्यैष्ठ्यादिति । अनपेक्षतया प्रथमप्रवृत्तेरित्यर्थः । अथवेति । समूहपक्ष उक्तमस्वारस्यं द्योतयति—सहायभूत इति । प्रत्यक्षादिप्रमेयस्य कर्मवाक्येनाप्युपदर्शने प्रत्यक्षाद्यप्रामाण्यशङ्काशून्यं भवतीति कर्मविधिस्तत्सहायभूत इत्यर्थः । एवमेव प्रत्यक्षादेरपि विधिवाक्यसाहाय्यं द्रष्टव्यम् । उभयथाऽप्युक्तसमन्वयबाध एवेत्याह—एवमिति ॥ ६ ॥

उच्यते—प्रत्यक्षादेः खलु व्यवहारोपयुक्तार्थनिवेदनशक्ततया व्यावहारिकमेव प्रामाण्यं न तत्त्ववेदकत्वरूपं, तदर्थस्य वक्ष्यमाणयुक्तिभिः श्रुतिभिश्च बाध्यमानत्वात् । वेदान्तानां त्वव्यवहार्यब्रह्मविषयाणां तत्त्ववेदकत्वमेव प्रामाण्यमिति तैः प्रत्यक्षादिविषयसत्यत्ववाधेऽपि न तद्व्यावहारिकत्वं बाध्यते येन श्रुत्या संमते तेषां विरोधो भवेत्, अतः कर्तृत्वादिप्रपञ्चस्य प्रत्यक्षादिसिद्धत्वेऽपि तस्य व्यावहारिकत्वादात्मनस्तत्त्वतो नित्यमुक्तत्वादिप्रतिपादकश्रुतेर्न काचित् क्षतिरित्याशयेन समाधत्ते—

अत्रोच्यते न खलु वेदशिरांसि मुक्त्वा
किंचित् प्रमाणमिह तत्त्वनिवेदनाय ॥
शक्नोति येन भवतीह विरोधशङ्का
वेदान्तवाक्यमुखतोऽवगते प्रतीचि ॥ ७ ॥

अत्रोच्यत इति। इह प्रतीचीति संबन्धः। मुखतस्तात्पर्यत इत्यर्थः॥ ७॥

प्रत्यक्षादेरनात्मग्राहिणस्तत्त्वनिवेदनाशक्तत्वमेवोक्तमुपपादयति—

अज्ञातमर्थमबबोधयदेव मानं
तच्च प्रकाशकरणक्षममित्यभिज्ञाः॥
न प्रत्यगात्मविषयादपरस्य तच्च
मानस्य संभवति कस्यचिदत्र युक्त्या॥ ८॥

अज्ञातमिति। अभिज्ञा भट्टपादा ब्रह्मावेदश्च। अनधिगतार्थबोधकं प्रमाणमिति हि ते संगिरन्ते। युक्तं चैतत्। साधकाभावनिमित्तां मेयासत्त्वशङ्कां यद् व्यवच्छिनत्ति तदेव मानं, तच्चानधिगतगोचरमेव। अत एव "मानाधीना मेयसत्ता" इत्याहुः। अन्यथा प्रमाणोपन्यासवैयर्थ्यं स्यादित्यनधिगतमेयगमेव प्रमाणमिति। ततः किं तत्राह—न प्रत्यगिति। तत् अनधिगतबोधनम्। अत्र जगत्यनात्मनोऽज्ञातत्वासंभवान्न तन्मानं तथाविधमित्यर्थः।

इदमिहाकूतम्—न तावत् प्रत्यक्षादिप्रमाणानां प्रामाण्यं विद्यमानार्थत्वम्, शुक्तिरजतादिप्रत्यक्षेऽपि तत्सत्त्वात्। नापि सदर्थकत्वम्, अर्थक्रियायोग्यत्वस्य सत्पदार्थत्वेऽनिर्वचनीयप्रपञ्चेऽपि तत्संभवेन तद्ग्राहकप्रत्यक्षादेः प्रपञ्चतात्त्विकत्वनिषेधश्रुतिविरोधाभावात्। नाप्यबाध्यत्वं प्रपञ्चस्य सत्त्वम्, तात्कालिकाबाध्यत्वस्य स्वप्नदृष्टेऽपि सत्त्वात्, बाधाभावस्य चक्षुराद्यप्रमेयत्वाच्च। अत एव त्रैकालिकाबाध्यत्वं सत्त्वमित्यपि न। अनागतबाधाभावस्येदानीं ग्रहीतुमशक्यत्वाच्च। प्रपञ्चोऽपि न सत्यः, दृश्यत्वादिभ्यः शुक्तिरजतवदित्याद्यनुमानैरद्वैतश्रुतिश्रुतार्थापत्तिभ्यां च तस्य बाध्यमानत्वाच्च। तस्मादज्ञातार्थग्राहकत्वं प्रमाणानां प्रामाण्यं वाच्यम्। अज्ञानं चात्मनि प्राङ् निरूपितमिति नासंभवः। न वा पटादिप्रमाणेष्वव्याप्तिस्तस्यापि तदवच्छिन्नाज्ञातात्मगोचरस्य तदंशे प्रमाणत्वात्। न चैकस्मिन् ज्ञाने स-

ति तद्गोचरज्ञानान्तरसत्त्वे प्रमाणमस्तीति न तत्राप्यव्याप्तिः । अज्ञाननिवृत्तिव्यतिरेकेण प्रमाणफलासंभवाच्च व्यवहारस्य तां विनाऽसंभवात् । परोक्षज्ञानेऽपि संशययोग्यतादिनिवृत्तिः फलमस्त्येव । सा चाज्ञातता चिदात्मन एव न जड़स्येत्युक्तमिति न जड़ग्राहकं प्रमाणमस्ति ततो नात्मैकत्वश्रुतेः प्रत्यक्षादिबाध इति । तदिदमुक्तं युक्त्येति ॥ ८ ॥

ननु तर्हि कर्त्रादिस्वभावात्मनोऽज्ञाततासम्भवात्तद्ग्राहिप्रत्यक्षादिप्रमाणविरोधादात्मनो नित्यमुक्तत्वादिग्राहकश्रुतेर्बाध इति चेत्तत्राह—

सर्वं परार्थविषयमेव हि मानजातं
वेदावसानवचनानि तु वर्जयित्वा ॥
यद्भौतिकं किमपि भौतिकगोचरं त-
द्रूपप्रदीपकनिदर्शनतः प्रसिद्धम् ॥ ९ ॥

सर्वमिति । वेदावसानवचनानि वर्जयित्वा वेदान्तातिरिक्तं सर्वं कर्त्रादिविषयं मानजातं परार्थविषयमेव, अनात्ममात्रविषयं वेदान्तातिरिक्तानुभवकारणत्वाद् घटादिप्रत्यक्षवत् । न चैवं बाधः कर्तृत्वादिधर्मकाहङ्कारस्य तद्विशिष्टस्य च शुद्धात्मनि कल्पिततया परोक्षत्वात् तत्साक्षिण एव शुद्धस्यात्मत्वात् । न च तस्मिन् स्वप्रकाशे भेदग्राहकं किं चिदस्तीति न तच्छ्रुतिविरोधः । अत एव दृष्टान्तेऽपि तत्तद्विशिष्टचैतन्यविषयत्वेऽपि न साध्यवैकल्यमिति भावः । तुशब्देन वेदावसानस्याध्यक्षादितो विशेषमाह । तच्च शुद्धात्मतत्त्ववेदनं स्पष्टम् । किं च प्रत्यक्षादिकं भौतिकमात्रगोचरं भौतिकत्वे सति प्रकाशकत्वात्, रूपादिप्रकाशकप्रदीपादिवदित्याशयेनाह—यद्भौतिकमिति । यत्किमपीति संबन्धः । रूपप्रदीपकः प्रकाशकस्तद्दृष्टान्तत इत्यर्थः । न च सिद्धान्ते वेदान्तवाक्यानामपि शब्दमयत्वेन भौतिकत्वात्तत्र व्यभिचार इति वाच्यम् । आनुपूर्वीस्वराः

दिविशेषवद्वान्त्यात्मनो वेदस्य रज्जुसर्पादेरिवाज्ञातब्रह्मविवर्त्तत्वेनाभौतिकत्वात् । नापि सिद्धान्ते मनसि व्यभिचारः । तद्ग्राह्यस्य घटादेरपि भौतिकत्वादात्मनः स्वप्रकाशस्य तत्साक्षिणस्तदग्राह्यत्वादिति ॥ ९ ॥

नन्वभौतिकगोचरत्वेऽपि भौतिकत्वसंभवादप्रयोजकमिदमनुमानमित्याशङ्क्य व्यङ्ग्यव्यञ्जकयोः साजात्यनियमं सदृष्टान्तमाह—

यद्व्यञ्जकं किमपि लौकिकमीक्षितं तद्
व्यङ्ग्येन तुल्यमवलोकितमत्र जात्या ॥
दीपः प्रकाशकतया विदितो हि लोके
रूपेण तैजसतया सदृशः प्रसिद्धः ॥ १० ॥

यद्व्यञ्जकमिति । अत्र लौकिकं व्यञ्जकमिति वेदान्तातिरिक्तप्रमाणमिति दर्शितम् । अतो न वेदान्ते व्यभिचारः । अत्र लोके । जात्या व्यङ्ग्येन तुल्यं व्यङ्ग्यसजातीयमित्यर्थः । प्रकाशकतया रूपस्येति शेषः । तैजसतया तेजस्त्वेन, सर्वं हि रूपं तेज एवेति वेदान्तमर्यादयैवमुक्तं तेजःप्रकृतित्वात् साङ्ख्यमतेन वा ॥ १० ॥

ननु मनोग्राह्यं सर्वं न च तत्सर्वसजातीयमेकस्य तदसंभवादित्याशङ्क्याह—

बुद्धिः समस्तविषयावगमे प्रवृत्ता
सापि प्रकाशविषयेण समानजातिः ॥
बुद्धिश्च भौतिकतया श्रुतिषु प्रसिद्धा
तेनास्तु सापि खलु भौतिकगोचरैव ॥ ११ ॥

बुद्धिरिति । मन इत्यर्थः । बाह्यकरणादिसहायेन बुद्धिः समस्तविषयावगमे प्रवृत्तेत्यर्थः । प्रकाशविषयेण स्वजन्यप्रकाशविषयेण । तस्याः प्रकाश्यसाम्यमेवाह—बुद्धिश्चेति । श्रुतिषु "अन्नमयं हि सोम्य मनः" इत्यादिषु । अस्त्विति समर्थने लोट् । श्रुतिषु भौतिकत्वेन प्रसिद्धेर्भौतिकगोचरत्वमेव तस्याः समर्थनम् । सा बुद्धिर्भौति-

कगोचरैव न तु परेषामित्यात्मसुखादिगोचरेत्यर्थः। एवं च सर्वस्यापि मनोग्राह्यस्य भूतात्मत्वान्मनसोऽपि तथात्वात् प्रकाश्यसाम्यमित्यर्थः ॥ ११ ॥

एवमात्मन एवाज्ञातत्वादज्ञातगोचराणामेव प्रमाणत्वान्न प्रपञ्चस्य प्रमाणगम्यत्वं संभवति, प्रत्यक्षस्य रूपादिविशेषवत्येव प्रवृत्तेर्निर्विशेषे चात्मनि तदयोगादनुमानादेश्च प्रत्यक्षोपजीवितया सविशेषमात्रविषयत्वात् सामान्यतो दृष्टस्य विशिष्य वस्त्वनिश्चायकत्वाच्चाध्यक्षादेरनात्ममात्रगोचरतेत्याशयेनोपसंहरति—

एवं प्रमाणमखिलं बहिरर्थनिष्ठं
वेदान्तवाक्यमपहाय यथोक्तहेतोः ॥
न प्रत्यगात्मविषयं श्रुतिरप्युवाच
स्पष्टं पराञ्चिवचसार्थमिमं यथोक्तम् ॥ १२ ॥

एवमिति। यथोक्तहेतोः वेदान्तातिरिक्तानुभवकरणत्वादिहेतोः। न प्रत्यगात्मविषयमिति। तथा च भिन्नविषयत्वान्न तस्य तद्बाधकत्वमित्यर्थः। श्रुतिरप्येतद् दर्शयतीत्याह—श्रुतिरिति। पराञ्चिवचसा पराञ्चीतिवचनेन ॥ १२ ॥

तामेव श्रुतिं पठति—

पराञ्चि खानि व्यतृणत् स्वयंभू-
स्तस्मात् पराङ् पश्यति नान्तरात्मन् ॥
कश्चिद्धीरः प्रत्यगात्मानमैक्ष-
दावृत्तचक्षुरमृतत्वमिच्छन् ॥ १३ ॥

पराञ्चीति। पराग्विषयाणीत्यर्थः। खानीन्द्रियाणि। व्यतृणद्धिंसितवान्, नानाविधानर्थोपेतपराग्विषयत्वमेव तेषां हिंसा। स्वयंभूः प्रजापतिः। इन्द्रियादिप्रमाणानि परागविषयाण्येव सृष्ट्वानित्यर्थः। पराङ् पराञ्चम्। नान्तरात्मन्नान्तरात्मानम्। कश्चिदाराधितेश्वरः अत एव धियमीरयतीति धीरः, अमृतत्वं मोक्षमिच्छन्नावृत्त-

चक्षुः, चक्षुर्ग्रहणमुपलक्षणं निगृहीतसर्वेन्द्रिय इत्यर्थः। प्रत्यगात्मानमैक्षदपश्यत् पश्यतीत्यर्थः। तथा च प्रत्यगात्मा नेन्द्रियगोचरोऽत एव नानुमेयोऽपि, अत्यन्तातीन्द्रियेऽर्थे व्याप्त्याद्यसंभवादिति भावः॥ १३॥

किं च कर्त्रादिप्रपञ्चस्य दृश्यत्वं सर्वाविवादम्। एवंच यत् प्रत्यक्षादि मानं निजप्रमेये कर्मभावं दृश्यत्वमनपास्येह जगति संवित्तिसाधनतया प्रसिद्धं तज्जडार्थविषयमनात्मविषयमभ्युपेयं नयनादिवदिति नियममभिप्रेत्याह—

यत् कर्मभावमनपास्य निजप्रमेये
संवित्तिसाधनतया जगति प्रसिद्धम्॥
मानं जडार्थविषयं तदिहाभ्युपेयं
न प्रत्यगात्मविषयं कथितोपपत्तेः॥ १४॥

यत् कर्मेति। फलितमाह—न प्रत्यगिति। तन्मानमित्यनुषङ्गः। कथितोपपत्तेः, यत् कर्मभावमित्यादिनैतच्छ्लोकपूर्वभागेनोक्तयुक्तेः। दृश्यस्यानात्मत्वनियमेन तन्मानस्यानात्मविषयत्वादात्मनोऽदृश्यत्वात् तदिदमभ्युपेयमित्यनेन सूचितमिति॥ १४॥

अस्त्वेवं ततः किमित्याशङ्क्यात्ममात्रप्रवृत्तवेदान्तानां भिन्नविषयतया न प्रत्यक्षादिबाध इत्याशयेन तेषामात्मविषयत्वं साधयति—

यत्तु प्रमाणमवधीर्य निजप्रमेये
कर्मत्वमर्थमवबोधयितुं प्रवृत्तम्॥
तत् प्रत्यगात्मविषयं भवितुं क्षमेत
तत्त्वंत्वमादिवचनं न ततोऽन्यदस्ति॥ १५॥

यत्तु प्रमाणमिति। वेदान्ता हि स्वप्रकाशे प्रत्यगात्मनि घटादाविव चक्षुरादिस्फुरणमनाधायैव तदविद्यानिवृत्तये तदाकारां वृत्तिं जनयन्तीति न्यायत उपपादितम्। तदिदमाह—अवधीर्येत्यादिना। क्षमेत युज्येत। किं तत्तादृशं मानमित्यत आह—तत्त्वंत्वमादीति॥ १५॥

नन्वज्ञातार्थबोधकं मानमज्ञातत्वं चात्मन एवेत्युक्तमयुक्तम् । इदं न जानामीत्यनात्मन्यपि तदवगतिदर्शनादित्याशङ्क्य किं घटादौ चक्षुरादिप्रवृत्तेः पूर्वमेव तज् ज्ञायते किं वा मानेन तस्मिन् प्रमिते तदन्यथानुपपत्त्या तज् ज्ञायते । नाद्य इत्याह—

नाज्ञाततावगतिरस्ति जडेषु पूर्वं
मेयेषु तत्स्फुरणकारणवर्जितत्वात् ॥
मानोदयान्न हि पुरा किमपीह मानं
नापि प्रमेयबलतो जडता हि तस्य ॥ १६ ॥

नाज्ञाततेति । कुतो नास्तीत्यत आह—तत्स्फुरणेति । चक्षुरादिप्रवृत्तेः पूर्वं ततस्तज्ज्ञानासंभवात्, परमते तदा तत्साधकसाक्षिणोऽभावाच्चेत्यर्थः ॥ १६ ॥

नन्वात्मवद् घटादिकमेव स्वनिष्ठाज्ञानप्रकाशकमास्त्वित्याशङ्क्याह—

नाज्ञाततावगतये स्वयमेव बाह्यं
मेयं समर्थमवबोधविलक्षणत्वात् ॥
नापि प्रमाणमवबोधकमस्ति किञ्चित्
मानोदयात् पुर इति स्फुटमभ्युपेयम् ॥ १७ ॥

नाज्ञाततेति । किं च न तावच्चक्षुरादिना तदवगतिः संभवति अज्ञानस्य तदयोग्यत्वात् । नापि मनसा, तद्व्यापारविरहेऽपि सुषुप्त्यादौ तदवगमात् । नाप्यनुमानादिना, तदनुभवस्य प्रत्यक्षतयाऽतत्फलत्वादित्याशयेनाह—नापीति । स्फुटमपरोक्षं यथा स्यात्तथाऽवबोधकमिति संबन्धः । पुरः पृथक् । नापि घटादौ प्रमिते तदन्यथानुपपत्त्या तदवगतिः । घटादेरज्ञातत्वज्ञानं विना तज्ज्ञाने प्रमात्वासिद्ध्या तत्प्रमितत्वस्यैवासिद्धेरिति भावः ॥ १७ ॥

किं च प्राग् घटादेरज्ञाततज्ज्ञानाभावे तत्प्रमित्सापूर्वं प्रमाणप्रवृत्त्यसंभवेन मेयावगतिर्न स्यात् । न हि प्रमातुः प्रमित्सां विना तत्प्रमितये चक्षुरादिव्यापारयितृत्वं संभवति । अपि च प्राग् घटा-

देरज्ञाततात्ज्ञानाभावे तत्स्फुरणस्य मानफलत्वं न सिद्ध्येत् तस्य घटा-दिस्वभावत्वशङ्काया दुरपह्नवत्वादित्याशयेनाह—

नाज्ञाततामनवगम्य पुरा प्रवेशात्
मानस्य किं चिदपि मानबलेन बोद्धुम्॥
शक्नोति कश्चिदपि मानबलेन बुद्धं
किं वा स्वभाव इति निश्चयहेत्वभावात्॥ १८॥

नाज्ञाततामिति। मानस्य प्रवेशाद् व्यापारात् पुरेति संबन्धः। मानबलेनेदं बुद्धमिति बोद्धुमित्यनुषङ्गः। कुतस्तत्राह—मानबलेनेति। स्वभाव इति। अस्य स्फुरणमिति शेषः। न च चक्षुरादिव्यापारानन्तरभावितया ज्ञानस्य तज्जन्यत्वनिश्चय इति वाच्यम्। प्राक् प्रमेयस्याज्ञातत्वज्ञानाभावे चक्षुरादिव्यापारानन्त-र्यस्यापि दुर्बोधत्वादिति भावः॥ १८॥

उक्तार्थे दृष्टान्तमाह—

प्रक्षालनेन धवलं किमिदं बभूव
किं वा पुरापि धवलं स्वयमेव वस्त्रम्॥
इत्येवमेष न विवेक्तुमलं कदाचिद्
यो दृष्टवान्न मलिनं वसनं पुरस्तात्॥ १९॥

प्रक्षालनेनेति सुबोधम्॥ १९॥

दार्ष्टान्तिकमाह—

एवं पुराऽनधिगतं यदि नानुभूतं
मानेन बोधितमिदं प्रतिभाति मेयम्॥
न स्वप्रकाशमिति शक्यमिदं विवेक्तुं
केनापि नैव तदवस्थतयैव दृष्टेः॥ २०॥

एवं पुरेति। इदं मेयं मानेनैव बोधितं प्रतिभाति न तु स्वप्रकाशमिति केनापि विवेक्तुं नैव शक्यमिति संबन्धः। विवेक्तुं कुतो नैव शक्यमित्यत आह—तदवस्थेति। स्फुरदवस्थतयैवे-

त्यर्थः ॥ २० ॥

ननु सिद्धान्ते घटाद्यज्ञाततायाः साक्षिभास्यत्वसंभवाद् घटादि-ग्राहकमपि प्रमाणं किं न स्यादिति चेत्, न । जडस्य तदयोगात् । तत्सत्त्वेऽप्यज्ञानादेः साक्षिण्यध्यस्तत्वं वाच्यम् । साक्षिणो वस्तुतः साक्ष्यसंबन्धासंभवात् । न वा साक्षी स्वासंबद्धमप्यनुभवितुं शक्नोतीति नानात्मग्राहकं प्रमाणमस्तीत्याशयेनोपसंहरति—

अज्ञातमर्थमवबोधयितुं न शक्त-
मेवं प्रमाणमखिलं जडवस्तुनिष्ठम् ॥
किं त्वप्रबुद्धपुरुषं व्यवहारकाले
संश्रित्य संजनयति व्यवहारमात्रम् ॥ २१ ॥

अज्ञातमर्थमिति । जडवस्तुनिष्ठं जडवस्तुविषयम् । तर्हि प्रत्यक्षाद्यभ्युपगमवैयर्थ्यमित्याशङ्क्य घटाद्यवच्छिन्नमज्ञातमात्मानं संश्रित्य विषयीकृत्य व्यवहारकाले तदज्ञाननिवृत्तावभिव्यक्तचिद्रास्यघटादिव्यवहारजननान्न तदानर्थक्यमित्याह—किं त्वित्यादिना । अथवाऽप्रबुद्धपुरुषसंज्ञं व्यवहर्तारमित्यर्थः । अत्रापि प्रागुक्तमार्गेणैव व्यवहारजनकत्वं द्रष्टव्यम् । तस्मात् सर्वमेव जडविषयं चक्षुरादि न प्रमाणमिति कुतस्ततो वेदान्तबाध इति भावः ॥ २१ ॥

नन्वेवं सर्वजडानां मिथ्यात्वे घटादीनां शुक्तिरजतादीनां सत्यमिथ्याविभागः सकलमहाजनसिद्धो न सिद्ध्येत् । एवं तद्ज्ञानानां प्रमाणाप्रमाणकत्वनिवर्त्तकत्वनिवर्त्यत्वविभागोऽपीत्याशङ्क्य अध्यस्तत्वेऽपि सर्वस्य तथातथा पूर्ववासनादिजन्यत्वावान्तरविशेषेण तदुपपद्यत इति दृष्टान्तेनाह—

आबोधतः सकलमेव हि सत्यमिथ्या-
भ्रान्तिप्रमाणविनिवर्त्यनिवर्त्तकत्वम् ॥
स्वप्नेऽपि दृष्टमिदमेवमिहापि जाग्र-
त्काले भवत्वखिलमापरमात्मबोधात् ॥ २२ ॥

आबोधत इति । जाग्रत्पर्यन्तमित्यर्थः । आबोधतः सत्यमिथ्यादि सकलं दृष्टमेवेति सम्बन्धः । दार्ष्टान्तिकमाह–इदमिति । इदमखिलमिहापीति सम्बन्धः । इहापीत्यस्य विवरणं-जाग्रत्कालेऽपीति । ननु कथं जाग्रत्कालीनपटादेरर्थक्रियाकारिणः स्वप्नतुल्यत्वमिति शङ्कां तुशब्देनाशङ्क्य निषेधति—न त्विति । स्वप्नेऽपि दृष्टस्य तत्काले व्यवहारदर्शनान्न कोऽपि जाग्रति दृष्टघटादेर्विशेष इत्यर्थः । कालेऽपि न त्विति पाठे एवं योजितः । काले भवात्विति पाठस्तु सुगमः । ननु "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इति श्रुतिः सर्वमपि दर्शनादिव्यवहारं प्रतिषेधति तत् कथमिदमखिलमिहापीत्युच्यत इति चेत्, सत्यम् । आत्मसाक्षात्कारे सति तथैव, तावत्पर्यन्तं तु व्यवहारोऽनुवर्त्तत एवेत्याशयेनाह–आपरमात्मबोधादिति ॥ २२ ॥

स्वप्नदृष्टान्ते उक्तमेव विभागमुदाहरणविशेषमाश्रित्य विशदयति–

स्वप्ने तप्तशिलाधिरोहणगता निःश्रेयसोपायता
मिथ्या ब्राह्मणतर्पणादिनिलया सत्या तथा लौकिकी ॥
सद्यः सत्या तदहिर्मृषैव विदितो निद्रानिवृत्तौ पुनः
स्वप्ने दृष्टमशेषमेव वितथं ग्राह्यं तथा जागरे ॥ २३ ॥

स्वप्न इति । तप्तशिलाधिरोहणेति बाह्यागमप्रसिद्धमुक्तम् । तत्रैव लौकिकमपि विभागमाह—तथा लौकिकीति । नन्वेवं यथादर्शनं तदपि सत्यमस्तु, न । प्रबोधे सति सर्वस्यापि बाधादित्याशयेनाह–निद्रानिवृत्ताविति । दार्ष्टान्तिकस्य सङ्क्षेपाभिधानं–ग्राह्यं तथा जागर इति ॥ २३ ॥

तदेव प्रपञ्चयति—

श्रेयःसाधनताऽग्निहोत्रनिलया सत्येति संगृह्यते
मिथ्या तप्तशिलाधिरोहणगता शिष्टैः परित्यज्यते ॥

रज्जुः सत्यतया स्थितैव तदहिर्मिथ्यैव तावद् भवेद्
यावन्मूलतमोविदारणपटुर्विद्योदयो नागमत् ॥ २४ ॥
श्रेयःसाधनतेति । सुबोधः ॥ २४ ॥

ननु सर्वस्यापि वियदादिप्रपञ्चस्य स्वप्नतुल्यत्वे तद्बुद्धिज्ञानात्मकमेव सर्वं वक्तव्यं ततश्च विज्ञानवादिसमयप्रवेशापत्तिरिति शङ्कते—

ननु शाक्यभिक्षुसमयेन समः
प्रतिभात्ययं च भगवत्समयः ॥
यदि बाह्यवस्तु वितथं नु कथं
समयाविमौ न सदृशौ भवतः ॥ २५ ॥

नन्विति । शाक्यो जिनबौद्धो विज्ञानवादी तत्सिद्धान्तेनेत्यर्थः । भगवतो व्यासभगवत्पादादेः समय इत्यर्थः । ननु विज्ञानवादिना वेदप्रामाण्याद्यनभ्युपगमात् कथं तदभ्युपगन्तृभगवत्समयस्य तत्समयतुल्यतेति चेत् सत्यम् । तथापि विज्ञानातिरिक्तविज्ञेयानभ्युपगमे कथं न तत्तौल्यं, तेनापि तथैवाङ्गीकारादित्याह—यदीति । बाह्यं विज्ञानातिरिक्तं वस्तु वितथमलीकं कथं न्विति सम्बन्धः॥२५॥

व्यतिरेकमुखेनोक्तमतद्वयसाम्यमन्वयेनाप्याह—

यदि बोध एव परमार्थवपु-
र्न तु बोध्यमित्यभिमतं भवति ॥
ननु चाश्रितं भवति बुद्धमुने-
र्मतमेव कृत्स्नमिह मस्करिभिः ॥ २६ ॥

यदि बोध इति । अभिमतमिति । भवतामिति शेषः । मस्करिभिरेकदण्डिभिः ॥ २६ ॥

विज्ञानवादिनो हि ज्ञेयं ज्ञाने प्रतिभासमानत्वाज् ज्ञानाभिन्नमेव ज्ञानवत् । अन्यथा ज्ञानज्ञेयसम्बन्धासंभवेन ग्राह्यग्राहकतानुपपत्तेरिति ज्ञानमेव सत्यं तदतिरिक्तं ज्ञेयं त्वनादिवासनाप्रापितमलीकं ज्ञानात्मकमिति वदन्ति । एवं भवद्भिरपि ज्ञानस्वभावात्मनि तदन्यत्

सर्वमध्यस्तं तदभिन्नमित्युच्यते चेत् कथं नोभयोः साम्यमिति । ज्ञानात्मनि दृश्यस्य कल्पितत्वोक्तिमात्रेण ब्रह्मवादिसमयस्य बौद्धमतसाम्यं चेत् सर्वेषां मतानां तत्साम्यप्रसङ्गः । अस्ति हि सौत्रान्तिकवैभाषिकाभ्यां बाह्यार्थाभ्युपगमेन न्यायवैशेषिकादेः साम्यम् । विज्ञानस्याशुविनाशित्वाभ्युपगमेन विज्ञानवादिनोऽपि । सर्वसाम्यं तु नास्माकमपि तेनास्ति, तेन हि प्रदीपदृष्टान्तेन ग्राह्यग्राहकग्रहणानामभेदो वस्तुतोऽभ्युपेयते । ब्रह्मवादिना तु कर्तृकरणक्रियाकर्मणामन्योऽन्यविरुद्धस्वभावानामभेदासम्भवादहं चक्षुषा रूपं पश्यामीति तद्भेदानुभवाच्चैकस्य ग्रहीतृग्राह्यक्रियाकरणत्वमनुपपन्नं प्रदीपस्यापि न प्रदीपप्रकाश्यत्वं तस्यैव प्रकाशात्मत्वात् प्रदीपसाध्यतमोनिवृत्तेस्तत्रासम्भवाच्चेति मातृमानविषयादीनां परस्परं धर्मिसमानसत्ताको विभागोऽभ्युपगम्यते ज्ञानं चाद्वयमिति न कथमपि सर्वसाम्यमित्याशयेनाह——

ननु मातृमानविषयावगती-
रपरस्परं प्रति विभागवतीः ॥
उपयन् भदन्तमुनिना सदृशः
कथमेष वैदिकमुनिर्भवति ॥ २७ ॥

नन्विति निश्चये । माता अन्तःकरणविशिष्टः प्रमाता, मानं चक्षुरादि, विषयो रूपादिः, अवगतिः रूपाद्याकारा चक्षुरादिजन्याऽन्तःकरणवृत्तिस्ता इत्यर्थः । अपरस्परमन्योऽन्यम् । उपयन्नङ्गीकुर्वन् । भदन्तो बौद्धस्तन्मुनिना विज्ञानवादिनेति यावत् । वैदिकमुनिर्वेदोक्तसंन्यासी श्रीशङ्कराचार्य इति यावत् ॥ २७ ॥

ननु भवताऽपि परस्परं मातृमानादिप्रपञ्चोऽभ्युपगतश्चेत् कथमात्मनो निष्प्रपञ्चाद्वयत्वमित्याशङ्क्य तस्यात्मनि तदज्ञानकल्पितत्वान्न चाद्वैतक्षतिर्न वा विज्ञानवादादविशेष इत्याशयेनाह——

परमात्मसंश्रयतमोजनितं
प्रविभक्तमेव तु परस्परतः ॥
स्थिरमभ्युपेतमिह नः समये
ननु मातृमानविषयप्रभृति ॥ २८ ॥

परमात्मेति । तुशब्देन पराभिमतात्मादेरत्र सूचितं विशेषमाह–प्रविभक्तमिति । स्थिरमिति च मात्रादेर्ज्ञानस्य च स्थायित्वमपि ततो विशेषान्तरं सूचितम् । अत्रापि नन्विति निश्चये । प्रभृतिशब्देन प्रमितिग्रहणम् ॥ २८ ॥

ननु यदि प्रमात्रादिचतुष्टयं परस्परं विभिन्नं व्यवहाराङ्गमभ्युपेयते तर्हि प्रमात्रादिव्यवहारार्थमपि तदभ्युपेयमित्यप्रामाणिकं तदानन्त्यं प्रसज्येत। न हि तेनैव प्रमात्रादिना तद्ग्रहणं संभवति कर्तृकर्मादिभावविरोधादित्याशङ्क्य प्रमाणव्यापारेण यद् वस्त्ववभासते तत्रैव प्रमात्रादिचतुष्टयापेक्षा, प्रमात्रादिकं तु सुखदुःखादिवच्छुक्तिरजतादिवच्चाविद्याविनिर्मितत्वात् साक्षिमात्रभास्यं, साक्षी चोदासीनबोधाद्वयात्मस्वरूप एवेति न करणादि किंचिदपेक्षत इत्याशयेनाह–

तमसा विनिर्मितमिदं सकलं
चतुरः स पश्यति परः पुरुषः ॥
अविकारिबोधवपुरद्वयकः
करणैर्विना सकलसाक्षितया ॥ २९ ॥

तमसेति । इदं सकलमित्यस्य विवरणं-चतुर इति । प्रमात्रादिचतुष्टयात्मकं सर्वं जगदित्यर्थः । चतुर इति पुरुषविशेषणं वा । तदेव विवृणोति–अविकारीति । यः परः पुरुषोऽविकारिबोधवपुरद्वयकः स करणैश्चक्षुरादिभिर्विनेदं सकलं पश्यतीति सम्बन्धः । अत्राविकारिबोधवपुरित्यनेनौदासीन्यबोधाभ्यां तस्य साक्षिशब्दार्हत्वमुक्तम् । ननु दर्शनक्रियायाः करणसाध्यत्वेन कथं तैर्विना पश्यतीत्युच्यते, कथं वा तत्कर्तुरौदासीन्यमिति तत्राह–सकलेति ।

उदासीनस्यैव लोके साक्षित्वप्रसिद्धेर्निर्व्यापारनित्यचैतन्येनैव तस्य द्रष्टृत्वान्नोक्तदूषणद्वयमिति भावः ॥ २९ ॥

ननु लोके प्रमातुरेव साक्षित्वं दृश्यते, प्रमातृत्वं च प्रमाणव्यापारसाध्यमिति कथं करणैर्विना पश्यतीत्युक्तमित्याशङ्क्य, लोकेऽपि हि यत्र यः साक्षी व्यवह्रियते स तदसङ्ग्येव तदकर्तृतया प्रसिद्धः, अन्यथा तत्कर्तृत्वेन तत्साक्षित्वव्यवहारायोगात्। एवमिहापि साक्ष्यमातृत्वादिप्रपञ्चशून्यस्यैव साक्षित्वं, तच्च स्वरूपचैतन्येनाविद्यावृत्त्या वेक्षणेनेति न प्रमाणव्यापारापेक्षेत्याशयेनाह—

निजमायया परिगतः पुरुषः
परतन्त्रया तु निजया प्रभया ॥
परिकल्पितं सकलमाकलयन्
स हि साक्षितामुपगतो भवति ॥ ३० ॥

निजमाययेति। स्वविषयमाययेत्यर्थः। मायायाः स्वातन्त्र्येण तत्कार्यस्याप्यात्मातन्त्रत्वेनासंबन्धात्तत्साक्षित्वं न स्यादिति तद्वारयंस्तां विशिनष्टि—परतन्त्रयेति। निजया प्रभया स्वरूपप्रकाशेन प्रपञ्चाकाराविद्यावृत्तौ स्वीयचिदाभासेनेति वा। यः पुरुषः स हि स्वाध्यस्तमायया शबलतया स्वस्मिन् परिकल्पितं सकलं दृश्यं निजया प्रभयाऽऽकलयन् साक्षितामुपगतो भवतीति संबन्धः। इदं चेश्वरस्य सर्वज्ञतारूपं सर्वसाक्षित्वमुक्तम्। जीवस्य सुखादिसाक्षित्वं त्वविद्याशबलस्यैवान्तःकरणोपधानेनेति द्रष्टव्यम्, अन्यथाऽतिप्रसङ्गात् ॥ ३० ॥

ननु "स्थिरमभ्युपेतमिह नः समयः" इति दृश्यस्य स्थायित्वमुक्तं तदसङ्गतम्। तन्न तावत् प्रत्यक्षेण सिध्यति, स्वसमये स्वविषयग्राहिणा तेनानेकक्षणावच्छिन्नरूपस्थायित्वस्यासिद्धेः। नापि लिङ्गेन, तस्याप्रिग्रहस्थलाभावादात्मनोऽपि विप्रतिपन्नत्वात्। न च प्रसभिज्ञया तत्सिद्धिरिति वाच्यम्। स्वप्रकाशात्मनि तदसंभवाज्ज्वालाप्रसभि-

ज्ञायाश्च स्थायित्वाविषयत्वादन्यत्रापि तस्यास्तदविषयत्वात्। न वा प्रत्यभिज्ञायाः करणं किं चिदस्ति, चक्षुरादेर्वर्त्तमानस्वसन्निकृष्टमात्रज्ञाने कारणत्वेन तत्तांशेऽसमर्थत्वात्। संस्कारस्य स्मृतिमात्रजनकत्वादिदमोऽनुभवेऽसमर्थत्वात्। अभिज्ञास्मृतिजनने परस्परमनपेक्षयोस्तयोश्चक्षुःसंस्कारयोर्मेलनायोगाच्च। नापि तद्विषयः संभवति, तत्तेदन्ताविशिष्टयोर्यौगपद्यायोगेनाभेदासंभवात्। तत्स्वरूपं चैकं न संभवति, सः अयमित्याकारभेदे रूपरसादिज्ञानवदेकत्वायोगादिति प्रमाणाभावान्न प्रमात्रादेः स्थायित्वमित्याशङ्क्याह—

ग्राह्यग्राहकयोः स्थिरत्वगमनी तत्प्रत्यभिज्ञा प्रमा
नोपापत्स्यत चेदसेत्स्यदपि नौ' सिद्धान्तयोस्तुल्यता ॥
सा निर्वक्ष्यति सिध्यतीति जगतः स्थैर्यं स्वरूपात्मकं
चैतन्यस्य च भङ्गुरत्वमिव मे सर्वस्य ते दर्शने ॥ ३१ ॥

ग्राह्यग्राहकयोरिति। प्रमातृप्रमेययोरित्यर्थः। स्थिरत्वमनेककालस्थायित्वं गमयतीति स्थिरत्वगमनी तयोः प्रत्यभिज्ञा तत्प्रत्यभिज्ञा। नोपापत्स्यत चेत् उपपन्ना न भविष्यति चेत्। असेत्स्यत् सिध्येत्। किं तदित्यत आह—नौ आवयोः सिद्धान्तयोस्तुल्यता। यदि प्रमात्रादिस्थायित्वविषयिणी प्रत्यभिज्ञा त्वदुक्तप्रकारेण न स्यात्, सा यदि वाऽप्रमाणं स्यात् तदा सर्वस्य क्षणिकत्वादावयोः सिद्धान्तसाम्यं स्यात्। न च सा तस्याः प्रमात्वं वा न निर्वहतीति जगतः स्थायित्वमपि सिद्ध्यतीत्याह—सा निर्वक्ष्यतीति। प्रत्यभिज्ञारूपा प्रमा निर्व्यूढा भविष्यति, उपपन्ना भविष्यतीति यावत्। सा निर्वक्ष्यतीति मे मम जगतः स्थैर्यं सिध्यतीति संबन्धः। न च ज्वालादौ व्यभिचार इत्यत्रापि सा तद्विषयिणी न भवतीति वाच्यम्। बाधाबाधाभ्यां विशेषात्। अन्यथा स्वजीवनानुपपत्तेः। तदुक्तम्—

उत्प्रेक्षते हि यो मोहादज्ञातमपि बाधनम्।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत्॥ इति। न च तत्कार-

णासंभव एव तद्बाधः । इन्द्रियसंस्कारयोरेव मिलितयोस्तद्धेतुत्वात् । अभिज्ञायां स्मृतौ चान्योऽन्यानपेक्षयोरपि कार्यविशेषे तदपेक्षोपपत्तेः । दृश्यते हीन्द्रियालोकयोर्ग्राह्यसंयोगे तमोनिवृत्तौ चान्योऽन्यनिरपेक्षयोरपि रूपज्ञानेऽपेक्षा, ततः कारणसंभवात् प्रत्यभिज्ञास्वरूपैक्यमपि संभवतीति भावः । यत्तु तत्तेदन्ताविशिष्टाभेदासंभवात्तदात्मकस्थैर्यं तद्विषयो न संभवतीति, तत्राह–स्वरूपात्मकमिति । तत्तेदन्तोपलक्षितवस्तुस्वरूपात्मकस्थैर्यमित्यर्थः । यत्तु स्वप्रकाशचैतन्ये तदसंभवान्न च स्थायित्वं सिद्ध्यतीति,तन्न,तत्र तस्य न जायते म्रियते वेत्यादिश्रुतिसिद्धत्वादित्याशयेनाह–चैतन्यस्य चेति । स्वरूपात्मकं स्थैर्यं सिद्ध्यतीत्यनुषङ्गः । स्थैर्यस्य वस्तुस्वरूपत्वे तत्संमतं दृष्टान्तमाह–भङ्गुरत्वमिति । क्षणिकत्वमित्यर्थः । न हि क्षणिकत्वं तव मते विज्ञानादतिरिक्तम्, विज्ञानमात्रत्वमतहानात् । अत एवाकारभेदात् प्रत्यभिज्ञाभेद इति निरस्तम् । ज्ञानं क्षणिकमिति ज्ञानाकारभेदेऽपि तव तदैक्यवत् तदुपपत्तेरिति । न चैवं क्षणिकत्वस्थायित्वयोर्वस्तुस्वरूपमात्रत्वे मतद्वयाविशेषापत्तिः । स्वरूपविशेषादेव तद्विशेषोपपत्तेः । स्थायित्ववादे हि कालद्वयोपलक्षितभेदाभावात्मकं वस्तुस्वरूपम् । क्षणिकत्ववादे तु तादृशभेदात्मकं वस्तुस्वरूपम् इति महान् विशेष इति भावः ॥ ३१ ॥

एवं सर्वस्य कल्पितत्वेऽपि विज्ञानवादिमतसाम्यं परिहृतम् । इदानीं "स्वप्नेऽपि दृष्टमिदमवमिहापि" इत्यत्रोक्तं स्वप्नसाम्यमनुपपन्नं, जाग्रत्स्वप्नयोः परस्परवैलक्षण्यानुभवात् "वैधर्म्याच्च न स्वप्नादिवत्" इति सूत्रकारेणापि जाग्रद्दृष्टघटादेस्ततो वैलक्षण्योक्तेश्चेति स्वप्नेविलक्षणं तत् सत्यमेवेत्याशङ्क्य—

ननु कल्पितं यदि हि जागरितं
वद कीदृशी खलु विलक्षणता ॥
स्वपनादमुष्य भवतोऽभिमता
परिकल्पितत्वमुभयोस्तु समम् ॥ ३२ ॥

नन्विति । तद्विलक्षणत्वाभावे "ननु कल्पितम्" इत्यनुवादोक्तमेव हेतुमभिप्रेत्याह—परिकल्पितत्वमिति । उभयोर्जाग्रत्स्वप्नयोः ॥ ३२ ॥

तयोर्मिथ्यात्वाविशेषेऽपि जाग्रत्पपञ्चस्याविद्यातिरिक्तदोषाजन्यतया व्यावहारिकत्वं, स्वप्नस्य तु निद्रादिजन्यस्याविद्यातिरिक्तदोषजन्यत्वेन प्रातीतिकत्वमिति नानुभवादिविरोधः । तत्र यद्यपि व्यावहारिकत्वं न व्यवहारजनकत्वं तदवस्थायां स्वप्नेऽपि तदर्शनात् । अवस्थान्तरे जाग्रद्घटादेरपि तदभावात् । नाप्यविद्यातिरिक्तकारणाजन्यत्वम्, गगनादेरपि कर्मादिजन्यस्य तदभावात् । तथापि प्रमातरि सति अबाध्यमानत्वं व्यावहारिकत्वं, तस्मिन् सति बाध्यत्वं प्रातीतिकत्वमिप्राशयेनाह—

न प्रमातरि सति प्रबाध्यते
जागरः स्वपनदृष्टवस्तुवत् ॥
मातृमानविषयोपलब्धिभिः
साकमेव तमसो निराकृतेः ॥ ३३ ॥

न प्रमातरीति । अन्तःकरणविशिष्ट इत्यर्थः । अत्र जडत्वे सतीति विशेषणं द्रष्टव्यम् । अतो नात्मन्यतिव्याप्तिः । स्वपनेति वैधर्म्यनिदर्शनम् । यथा स्वप्नो जाग्रति प्रमातरि सत्येव बाध्यते न तथा जाग्रद्घटादिः । कथं तर्हि तद्बाधस्तत्राह—मातृमानेति । माता च मानं च विषयश्चोपलब्धिश्च ताभिरित्यर्थः । ब्रह्मात्मैक्यसाक्षात्कारेण ह्यविद्या तत्कार्यमात्रोदीभः सहैव निवर्त्यते न तु स्वप्न इवान्तःकरणविशिष्टे सत्येवेत्येतदेव स्वप्नवैलक्षण्यं जाग्रद्दृष्टस्यानुभवसूत्राभ्यां सिद्ध्यति । ननु बाधो यदि निवृत्तिमात्रं तदा प्रमातरि सति स्वप्नवद्घटादेरपि तदस्त्येव । नापि ज्ञानान्निवृत्तिः स इति वाच्यम् । जाग्रद्घटादेरपीश्वरज्ञाननिवर्त्यत्वात्स्वप्नस्यापि सुषुप्त्यवस्थायामिव जाग्रत्यप्यन्यतो नाशसंभवेन ज्ञानानाश्यत्वाच्च । ना-

प्यविद्यया सह ज्ञानान्निवृत्तिर्बाधः, स्वप्नेऽपि तदभावात् । ब्रह्मज्ञाने सत्येव जाग्रति स्वप्नस्य निवृत्तेः । न च ब्रह्मगोचरसमानकालीनाज्ञानद्वय एकस्य प्रमाणमस्ति प्रयोजनं वा । न वा स्वप्नसाक्षिण्यप्यज्ञानं संभवति । नापि मिथ्यात्वनिश्चयो बाधः, घटादेरन्तःकरणमिथ्यात्वनिश्चयाभावेऽपि तन्निश्चयसम्भवेन स्वप्नवत् प्रमातरि सति बाध्यमानत्वात् तस्माद् यत् किंचिदेतदिति चेत् । उच्यते । जाग्रत्काले प्रमातरि सति स्वप्नो मिथ्येति ज्ञायते इति सर्वाविवादम् । तथा च प्रमातरि सति विरोधिज्ञानाधीनमिथ्यात्वनिश्चययोग्यत्वं स्वप्नशुक्तिकारजतादेः प्रातीतिकत्वम् । यत्र दैवाज्जाग्रति भ्रमानन्तरं निद्रा भवति तत्संग्रहार्थं योग्यत्वमित्युक्तम् । एतदभावो यत्र तत्प्रमातरि सति अबाध्यम्, जाग्रद्घटादौ चैतदस्तीति स व्यावहारिक इति भावः ॥ ३३ ॥

एवं देशे कालादौ वा सति यद् बाध्यते तत् प्रातीतिकम्, यन्न बाध्यते तद् व्यावहारिकमिति लक्षणान्तरमभिप्रेत्याह—

देशकालपुरुषैरवस्थया जागरस्य खलु कारणं तमः ॥
साकमेव सहसा निरस्यते वेदवाक्यजनितात्मसंविदा॥३४॥

देशकालेति । अत्र देशकालमात्रं विवक्षितमिति स्वप्नदृष्टदेशादिबाधेऽपि न तत्रातिव्याप्तिः । पुरुषो जीवः, अवस्था जाग्रदाद्याः, सहसा युगपत् कार्येण सहैवेत्यर्थः । एतच्चाविद्यातत्कार्ययोर्युगपदेव ज्ञानान्निरास इति मतेनोक्तम् । बाधपरिहाराय वेदवाक्येत्युक्तम् । तथा च मुख्याधिकारिणो वेदान्तजन्यात्मज्ञानात् समूलसंसारो निवर्त्तिष्यत इति नेदानीं बाध इति भावः ॥ ३४ ॥

"स्वप्नदृष्टवत्" इत्युक्तं वैधर्म्यदृष्टान्तं व्यावहारिकलक्षणस्यातिव्याप्तिपरिहाराय विवृणोति—

स्वप्नदृष्टमिह रज्जुसर्पवद् देशकालपुरुषेषु बाध्यते ॥
जागरः पुनरयं तथाविधं बाधकं न लभतेऽसमीक्षणात् ॥३५॥

स्वप्नदृष्टमिति । पुरुषेषु प्रमातृषु सत्स्वाति शेषः । एवं च मिथ्यात्वाविशेषे जाग्रत्प्रपञ्चस्य स्वप्नवैलक्षण्यं सुस्थमित्याशयेनाह—जागर इति । तथाविधं देशकालयोः सतोर्जायमानम् । असमीक्षणादिति । प्रत्यक्षेण तदन्येन वा प्रपञ्चस्य तथाविधबाधानानुभवादित्यर्थः ॥ ३५ ॥

मिथ्यात्वाविशेषेऽपि जाग्रत्स्वप्नयोरुक्तवैलक्षण्येन सत्यासत्यव्यवस्थितव्यवहार उपपन्न इति दृश्यस्य प्रपञ्चस्य सत्यत्वं ततः सिद्ध्यतीत्याशयेनोपसंहरति—

तेन सत्यमिह जागरं विदुः
स्वप्नविभ्रमविरुद्धधर्मकम् ॥
आपरात्मपरमार्थदर्शनात्
तेन बाधितवपुर्न सत् क्वचित् ॥ ३६ ॥

तेनेति । उक्तव्यावहारिकलक्षणयोगेनेत्यर्थः । दर्शनावधौ निमित्तमाह—तेनेति । न सत् क्वचिदिति । यथा स्वप्नस्य बाधितस्यापि पुनर्दर्शनं प्रमातुर्विद्यमानत्वात्, नैवं तत्त्वज्ञानबाधितजागरस्य सहैव प्रमात्रा बाधितत्वादित्यर्थः ॥ ३६ ॥

एवं व्यवस्थितव्यवहारोपपादनेन सर्वस्यापि दृश्यस्य मिथ्यात्वसमर्थनफलमाह—

तत्र सत्यमनृतं च भेदतः
प्रत्यगात्मतमसा विकल्पितम् ॥
प्रक्षिणोति परमात्मवस्तुगा
बुद्धिवृत्तिरविचालिनी सती ॥ ३७ ॥

तत्रेति । जाग्रद्दृश्यस्य स्वप्नवैलक्षण्येऽपि मिथ्यात्वे सतीत्यर्थः । सत्यमनृतं चेति लोकदृष्टिमाश्रित्योक्तम् । उक्तवैलक्षण्यमाश्रित्य वा विकल्पितं परस्परविरुद्धतया कल्पितम् । प्रक्षिणोति प्रकर्षेण मूलाज्ञानेन सह नाशयति । अविद्यातत्कार्यदृश्यजातमुक्ताबि-

भागेनात्मनि कल्पितं मिथ्यात्वाद् वाक्यजन्यात्मसाक्षात्कारो नाशयतीत्यर्थः ॥ ३७ ॥

नन्वविद्याया अनादिकालमारभ्यात्मनि स्थितायास्तत्कार्यस्य च चिरकालाहितदृढवासनाभ्यो रूढमूलस्य कथं क्षणमात्रस्थायिवाक्यजजडसाक्षात्कारेणाविद्याकार्येण निवृत्तिः संभवतीत्याशङ्क्य न चिरकालवृत्तित्वाद्यनिवर्त्यत्वे निमित्तं, परमते प्रागभावस्य निवर्त्यत्वात् । न वा चिरस्थत्वादि निवर्तकत्वे, किं तु सत्यत्वमनिवर्त्यत्वे निमित्तम् आत्मनस्तथादर्शनात् । अज्ञातविषयत्वं च ज्ञानस्य निवर्तकत्वे, अज्ञानस्य स्वविषयगोचरज्ञाननिवर्त्यत्वात् । अविद्यातत्कार्यं चाद्वयबोधात्मनि वस्तुतोऽसंभवादध्यस्तमिति तद्गोचरज्ञानव्यक्तचैतन्येन निवर्तयितुं शक्यमेवेत्याशयेनाह—

नित्यबोधपरिपीडितं जगद्विभ्रमं नुदति वाक्यजा मतिः ॥
वासुदेवनिहतं धनञ्जयो हन्ति कौरवकुलं यथा पुनः॥३८॥

नित्यबोधेति । नित्योऽद्वयो यो बोधस्तेन परिपीडितमपहृतसत्त्वमित्यर्थः । एवंभूतं जगद्विभ्रमं वाक्यजा मतिरहं ब्रह्मेति वाक्याज्जाताऽखण्डब्रह्माकारान्तःकरणवृत्तिर्जडापि तप्तायोगोलकवत् तत्स्वभावमापन्ना नुदति नाशयति । वाक्यजन्यं हि ज्ञानं स्वनिवर्त्यस्यानिर्वचनीयत्वमपेक्षते, तच्च तस्य तदधिष्ठानाचिद्द्वयत्वकृतमित्याशयेनैवमुक्तमिति द्रष्टव्यम् । ईश्वरसामर्थ्येन पीडितस्यागन्तुकनिमित्तेन स्वकार्येणापि बाधे दृष्टान्तमाह—वासुदेवेति । कालात्मनेश्वरेण ग्रस्तं धनञ्जयोऽर्जुनः कुरुवंश्योऽपि पुनर्यथा हन्ति तथाऽत्रापि । उक्तं च भगवता—

मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ।
इति ॥ ३८ ॥

एवं स्वमते सत्यं चानृतं च सत्यमभवदितिश्रुतेर्लोकप्रसिद्धसत्यासत्यविभागं तस्य ज्ञानान्निवृत्तिं च दर्शयित्वा परमतेऽयं सत्यासत्य-

विभागो न सिद्ध्यतीत्याह—

सत्यमेवमनृतं च दुर्लभं
ब्रह्मवादिसमयाद् बहिः पुनः ॥
सत्यतो यदि मृषा पृथग् भवेत्
सत्यमेव तदपि प्रसज्यते ॥३९॥

सत्यमेवेति । बहिरन्यत्र, सत्यप्रपञ्चमत इति यावत् । कुतो दुर्लभमिति चेत्, किं मृषावस्तु शुक्तिरजतादि सत्याद् वस्तुतः पृथक् उतापृथक् आहो पृथगपृथगात्मकम्, अनिर्वचनीयस्य परानङ्गीकारादिति विकल्प्याद्यं दूषयति—सत्यत इति । सत्यमेवेति । अन्यथा तात्त्विकसत्यभेदाश्रयत्वायोगादित्यर्थः ॥ ३९ ॥

द्वितीयतृतीयकल्पौ दूषयति—

सत्यतो यदि मृषा न भिद्यते सत्यमेव सुतरां तदिष्यताम् ॥
न द्वयात्मकतयाऽनृतं मतं पक्षयोः कथितदूषणद्वयात्॥४०॥

सत्यतो यदि मृषेति। सत्याभिन्नस्य मृषात्वायोगात् तदपि सत्यमेव स्यात्, तदभिन्नस्येतरस्य वा मृषात्वापत्तेर्द्वितीयकल्पे सत्यासत्यविभागो न स्यात् । द्वयात्मकतया पृथगपृथगात्मतया । पक्षयोः प्रत्येकं भिन्नाभिन्नत्वपक्षयोः । एकैकपक्षोक्तदोषस्य समुच्चयेऽप्यंशतः प्राप्तेरित्यर्थः । एतच्चोपलक्षणम् । विरोधादयं पक्ष एवानुपपन्न इति भावः ॥ ४० ॥

एवं शुक्तिरजतादेः सर्वप्रसिद्धमत्यासत्यविभागो लौकिकः परपक्षे न सिद्ध्यतीत्युक्त्वा एवमन्योऽपि तत्र तद्व्यवहारो न सिध्येदित्याह—

वेदवाक्यविषयस्य सत्यता
बुद्धवाक्यविषयो मृषा भवेत् ॥
इत्यतः कथयितुं न शक्नुयाद्
ब्रह्मवादिसमयाद् बहिर्मुखः ॥ ४१ ॥

वेदवाक्येति। अग्निहोत्रादेरिति शेषः। बुद्धेति चैत्यवन्दनादिरिति शेषः। इतीत्थम्। अतः पूर्वोक्तविकल्पदूषणाद्धेतोः। ब्रह्मवादिसमयाद्द्वयब्रह्मणो बहिरन्यत्र मुखमभिनिवेशो यस्य, सत्यप्रपञ्चाभिमानीत्यर्थः ॥ ४१ ॥

"ब्रह्मवादिसमयाद् बहिर्मुखः" इत्यनेन सूचितमुक्तप्रकारेण सत्यासत्यविभागं कथयितुं ब्रह्मवादी शक्नुयादित्येतद् विवृणोति—

सत्यमेवमनृतं च भेदतः कल्पितं भवतु वर्णितान्नयात्।
तत्र तद् घटयितुं हि शक्यते नेतरत्र कथितोपपत्तिभिः ४२॥

सत्यमेवमनृतमिति। भवतु भवेत्। तत्र ब्रह्मवादे, तत् भेदेन सत्यासत्यकल्पनं वर्णितान्नयाद् घटयितुमिति संबन्धः। इतरत्र मतान्तरे एवं नेति संबन्धः ॥ ४२ ॥

एवं प्रत्यक्षादिप्रमाणविषयस्य तत्तदुचितव्यवहारसमर्थस्यापि मिथ्यात्वात् तद्बोधकप्रत्यक्षादेर्व्यावहारिकप्रमाणत्वमेव न तु वेदान्तवत् तात्त्विकमबाधितानधिगतबोधनलक्षणं प्रामाण्यं, वेदान्तैरेवाद्वयब्रह्मपरैरनवकाशैरर्थतो बाधितविषयत्वादबुद्धबोधकत्वाभावाच्चेत्यवान्तरप्रमेयमुपसंहरति—

व्यावहारिकमतोऽवगम्यतां
मानजातमखिलं न तात्त्विकम्।
बाह्यवस्तुविषयं विरोधतो-
ऽबुद्धबोधविधिशक्त्यसंभवात् ॥ ४३ ॥

व्यावहारिकमिति। व्यवहाराङ्गमित्यर्थः। यतो बाह्यवस्तुविषयमखिलं मानजातं न तात्त्विकम् अत व्यावहारिकं गम्यतामिति संबन्धः। अतात्त्विकत्वे हेतुमाह-विरोधत इति। पराञ्चि खानीति श्रुतिविरोधादित्यर्थः। अबुद्धबोधेति छेदः ॥ ४३ ॥

इदानीं साधितमर्थं हेतुत्वेन मनसि निधाय तदनुवादेन परमप-

कृतमुपसंहरति—

एवं न तत्त्वविनिवेदनशक्तियोगः
संभाव्यतेऽनधिगताधिगतेरयोगात् ॥
मानान्तरस्य सकलस्य ततश्च तेन
बाधस्त्रयीशिरसि वर्णयितुं न शक्यः ॥ ४४ ॥

एवमिति । सुबोधम् ॥ ४४ ॥

ननु निर्विकल्पकसविकल्पकसाधारण्येनानात्मविषयप्रमाणमात्रस्याप्रामाण्यं वक्तुमयुक्तम् । यतः सूत्रकृता "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति सूत्रेण विकारविकल्पबुद्धेरेवाभासत्वं प्रदर्श्य मृदादिकारणनिर्विकल्पकबुद्धेः प्रामाण्यमङ्गीकृतम् । अन्यथा घटादेर्मृदादिमात्रत्वोक्तिविरोधात्, मृत्तिकेत्येव सत्यमित्यादिश्रुतिविरोधाच्चेत्याशङ्क्य तदाशयमाह—

आरम्भणादिवचसा खलु निर्विकल्प-
प्रत्यक्षबुद्धिमनुसृत्य विकल्पबुद्धेः ॥
आभासतां मुनिरुवाच तदास्य भावो
विज्ञायते स्फुटतरो गुडजिह्विकायाम् ॥ ४५ ॥

आरम्भणादीति । निर्विकल्पस्य कारणमात्रस्य प्रत्यक्षबुद्धिमनुसृत्य प्रामाण्यमङ्गीकृत्येत्यर्थः । विकल्पस्य घटादिविकारस्य बुद्धेराभासतां मिथ्यार्थविषयत्वमित्यर्थः । मुनिर्बादरायणः । भाव आशयः । जगन्मूलकारणनिरूपणाय प्रवृत्तोऽयं मुनिर्यदा घटादिबुद्धेरप्रामाण्यं सूचयन् मृदादिबुद्धौ प्रामाण्यमुवाच तदा गुडजिह्विकायामस्य स्फुटतरो भावो विज्ञायते । यथा माता बालहितैषिणी तमतितिक्तरसाद्यौषधं पाययन्ती पिबैतदौषधं तव जिह्वायां गुडं स्थापयिष्यामीति तं प्रलोभयति, एवं सूत्रादिभिरपि त्यजतु तावदयं घटादिविकल्पबुद्धिप्रामाण्यमङ्गीकृतम् । घटादिबुद्धेः कारणस्यानिर्वचनीयान्यथाभावमात्रालम्बनतयाऽन्यथासिद्धत्वप्रदर्शनमन्तरेण विकारबुद्धेराभासत्वस्योपपादयितुमशक्यत्वादिति भावः ॥ ४५ ॥

ननु "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षं विद्यमानोपलम्भनात्" इति सूत्रेण जैमिनिः सविकल्पनिर्विकल्पयोरात्मानात्मविषयोश्च प्रत्यक्षयोः साधारणमेव लक्षणमवोचत् । तत्र च सदिति सत्त्वार्थस्य सत्त्वाभिधानात् सर्वमेव प्रत्यक्षं तत्त्वावेदकमिति तन्मतमिति बादरायणस्यापि तदनुसारेणैवाशयो वर्ण्यतामित्याशङ्क्याह—

सत्संप्रयोग इति जैमिनिरप्युवाच
यल्लक्षणं तदुभयोः सममेव विद्यात् ॥
आपाततस्तदथ युक्तिनिपीडितं सत्
सन्मात्रसंविदि निषीदति निर्विशङ्कम् ॥ ४६ ॥

सत्संप्रयोग इति । लक्षणं प्रत्यक्षस्येति शेषः । उभयोः सविकल्पकनिर्विकल्पकयोश्चात्मानात्मविषययोर्वा आपाततोऽविचारितमेव समं विद्यादिति सम्बन्धः । अविचारदशायामेव घटादेः पृथक्त्वानुभवात् । कुत एवं तत्राह—अथेति । अर्थान्तरे । युक्तिनिपीडितं युक्त्याऽऽलोचितं सत् तल्लक्षणं सन्मात्रस्य सत्सामान्यात्ममात्रस्य संविदि निषीदति पर्यवस्यति । सर्वप्रपञ्चाधिष्ठानसत्तयैव घटादेः सद्बुद्ध्युपपत्तेस्तस्य न ततः पृथक्त्वं कल्पनीयमिति सदेवेत्यादिश्रुतिबलादात्मैव सन् जैमिनीयप्रत्यक्षलक्षणसूत्रेऽपि विवक्षित इति प्रपञ्चसत्त्वमापातदृष्ट्यैव प्रतीयत इति न तद्बलाच्छ्रुतिन्यायमूलं बादरायणसूत्रमन्यथायितव्यमिति भावः ॥ ४६ ॥

किं च जैमिनीयसूत्रान्तरपर्यालोचनयाऽप्येवमेवेत्याह—

तत्रापि दुर्घटमवैति यदा तु तत्त्व-
बोधं विवक्षति विसृज्य विकल्पजालम् ॥
किं कारणं वदति येन स तत्त्वगामि-
विज्ञानमर्थमवबोधयदप्रबुद्धम् ॥ ४७ ॥

तत्रापीति । अपिरवधारणे । जैमिनिः खल्वापातदृष्ट्या प्रत्यक्षमात्रस्य सत्संप्रयोगजन्यत्वमभिधाय यदा तत्र प्रत्यक्षमात्र इदं लक्षणं दुर्घटमवैति तदा विकल्पजालमनात्मप्रत्यक्षं विसृज्य तत्त्वबो-

धर्मेव विवक्षतीति सम्बन्धः । नन्वेतत् किंबलाज् ज्ञातमिति पृच्छति-किं कारणमिति । कस्मात् कारणादित्यर्थः । उत्तरं-वदतीति । स जैमिनिर्येन हेतुनाऽप्रबुद्धमर्थं बोधयद् विज्ञानं तत्त्वगामीति वदतीति सम्बन्धः । एवं चाज्ञातार्थविषयबोधस्यैव प्रमाणत्वं तत्संमतमिति प्रत्यक्षसूत्रे आपातदृष्ट्यैवानात्मप्रत्यक्षलक्षणाभिधानम् आत्मनोऽन्यस्याज्ञातत्वासम्भवस्योक्तत्वादिति भावः ॥ ४७ ॥

ननु जैमिनिनाऽप्रबुद्धार्थज्ञानं प्रमाणमिति कुत्रोक्तमित्याकाङ्क्षायामाह—

औत्पत्तिके हि भगवानयमप्रबुद्ध-
मर्थं प्रमाणविषयं कथयांबभूव ॥
अत्राह तत्र ननु धर्मगतं प्रमाणं
तत्त्वार्थगामि कथितं न परात्मगामि ॥ ४८ ॥

औत्पत्तिक इति । अयं जैमिनिर्भगवान् औत्पत्तिकसूत्रे "अर्थेऽनुपलब्धे तत्प्रमाणम्" इति भागेनाप्रबुद्धमर्थं प्रमाणाविषयं कथयांबभूव हीति संबन्धः । नन्वनेन सूत्रेण धर्मप्रमाणस्य चोदनाया एवाज्ञाताऽर्थबोधकतया तत्त्ववेदनप्रामाण्यमुक्तं, धर्मस्यैव जिज्ञास्यत्वेन प्रक्रान्तत्वात्, न तु परमात्मप्रमाणस्य, तस्य तत्रानुपक्रमादिति शङ्कते—अत्राहेति । तत्र औत्पत्तिकसूत्रे । नन्विति प्रसिद्धौ ॥ ४८ ॥

सत्यं, तत्सूत्रं धर्मचोदनाविषयं न तु तावन्मात्रगोचरं तदपि व्यावहारिकदृष्ट्यैव मुख्याज्ञाततायाः स्वप्रकाशात्मनोऽन्यत्रासम्भवात् । एतदपि तत्र जैमिनिसम्मतमेव "अर्थेऽनुपलब्धे तत् प्रमाणं बादरायणस्य" इति तस्य बादरायणसम्मतत्वप्रदर्शनात् । तस्य चोक्तन्यायेनात्मप्रमाणस्यैवानुपलब्धार्थतया तत्त्ववेदकत्वसम्मतेरित्याशयेन परिहरति—

सत्यं यथाह पितृमान् व्यवहारदृष्टि-
माश्रित्य तत् कथितवान् प्रकृतोपयोगात् ॥
दूरप्रसारितनिसृष्टनिगूढभाव-
स्तद्बादरायणमतानयनात् प्रतीमः ॥ ४९ ॥

सत्यमिति। पितृमान् पित्रादिशिक्षितबुद्धिः। प्रकृतोपयोगात् प्रस्तुतधर्मविचारोपयोगाद् व्यवहारदृष्टिमाश्रित्य जैमिनिस्तत् कथितवानिति वयं प्रतीमः। कुतस्तत्राह—तद्बादरायणेति। तत्र सूत्रे बादरायणमतस्यानियनादाकर्षणादिति सम्बन्धः। ननु बादरायणस्यापि चोदनायास्तत्त्ववेदनप्रामाण्यं सम्मतमेवेति सूचनार्थं तत्र तदुपन्यासः किं न स्यादित्याशङ्क्याह—दूरप्रसारित इति। दूरे उत्तरमीमांसायां प्रसारितः प्रकटीकृतो योऽर्थस्तस्मिन्निसृष्टो नितरां क्षिप्तो नैसर्गिको निगूढो भावोऽभिप्रायो यस्य जैमिनेः स तथा। आरम्भणाधिकरणादौ निरूपितात्मतत्त्वस्य श्रुतिन्यायसम्मततयाऽन्यथाभावासम्भवेन न बादरायणस्य चोदनातत्त्ववेदकत्वं संमतम्, अतो जैमिनेरपि तदुदाहरणेन तथैव भावो यद्यपि, तथापि, कर्मसु प्रवृत्त्यङ्गतया सामान्येनैव तदभिधानमिति भावः॥ ४९॥

ननु "आत्मा वा अरे द्रष्टव्यः" इति वेदान्तेषु विधिश्रवणाज्जैमिनेरिव तदर्थनिरूपकव्यासस्यापि चोदनातात्त्विकप्रामाण्यमेव संमतमस्त्वित्याशङ्क्याह—

द्रष्टव्य इत्यपि विधिर्न विधिप्रमेय-
मात्मानमेव विनियच्छति तत् कुतश्चैत्॥
अज्ञातता च परमात्मन एव यस्माद्
यस्माच्च कर्तृवशवर्ति न दर्शनं तत्॥ ५०॥

द्रष्टव्य इति। एतद् वाक्यमपि न विधिरित्यर्थः। किंपरं तर्हीदं वाक्यमित्याशङ्क्याह—विधिप्रमेयमिति। विधीयते ज्ञाप्यतेऽज्ञातोऽर्थोऽनेनेति विधिः प्रमाणं तस्यात्मानमेव प्रमेयं तद् वाक्यं विनियच्छति विशेषेण नियमयतीत्यर्थः। तदेव शङ्कापूर्वकमुपपादयति—तत् कुतश्चेदित्यादिना। यदज्ञातं तदेव प्रमित्सापूर्वकं प्रमाणेन ज्ञायते सर्वैः; विशेषतो मुमुक्षुणाऽज्ञातं चात्मतत्त्वमेवेति तदेव प्रमाणानां विषय इत्येतद् वाक्यं दर्शयतीत्यर्थः। ननु तव्यप्रत्ययाद् विध्यर्थतैव तस्यास्त्वित्याशङ्क्य तस्याः प्रथमाध्याय एव निरस्तत्वात् तद्वाक्यस्य न तदर्थत्व-

मित्याह—यस्माच्चेति । कर्तृवशवर्ति कर्त्रधीनं कर्तृव्यापारसाध्यमिति यावत् । चकार उक्तशङ्कानिवृत्त्यै ॥ ५० ॥

ननु कथं तस्य वाक्यस्यात्मप्रमेयतानियामकत्वम्, "कृत्याश्च" इति तव्यस्य विध्यर्थतासूत्रविरोधादित्यत आह—

अर्हे कृत्यतृचश्च पाणिनिवचः स्पष्टं विधत्ते यत-
स्तस्माद् दर्शनयोग्यतां वदति नस्तव्यो न तत्त्वान्तरम् ॥
तस्मादात्मपदार्थमात्रनियतं मेयत्वमेकान्ततो
द्रष्टव्यादिवचो वदत्यनुभवादज्ञात आत्मा यतः ॥ ५१ ॥

अर्ह इति । चकारात् परतः इतिशब्दो द्रष्टव्यः। विधत्ते "अर्हे-कृत्यतृचश्च"इति सूत्रमर्हार्थे कृत्यादिप्रत्ययमिति शेषः। यत एवं तस्मात् कृत्यात्मकतव्यप्रत्ययो नोऽस्मान् प्रति आत्मनोऽज्ञातत्वपुरुषार्थत्वाभ्यां दर्शने योग्यतां वदति न तत्त्वान्तरं विधिरूपमर्थान्तरमित्यर्थः। तस्मान्न बादरायणस्य चोदनातात्त्विकप्रामाण्यं संमतम्, किं त्वात्ममात्रस्य प्रमाणविषयत्वमितीत्याशयेनाह—तस्मादात्मेति । द्रष्टव्यादिवच आत्मा द्रष्टुं योग्य इत्यनया वचोभङ्ग्या मेयत्वमात्मपदार्थनियतमिति निश्चित्य वदतीति सम्बन्धः । नन्वज्ञातता घटादेरप्यनुभूयत इत्याशङ्क्य तदवच्छिन्नात्माज्ञाततैव तत्रानुभूयत इत्याशयेनाह—अनुभवादिति । यतो मामहं न जानामीत्यनुभवादात्मैवाज्ञातोऽतः उक्तरीत्याऽन्यस्याज्ञातत्वे प्रमाणाभाव इत्यर्थः ॥ ५१॥

किञ्च सत्संप्रयोगसूत्रपर्यालोचनयाऽपि नानात्मप्रत्यक्षस्य तात्त्विकप्रामाण्यं लभ्यते, तत्र हि विद्यमानोपलम्भनादित्यर्थस्य विद्यमानतामात्रं हेतुः प्रतीयते । न तु परमार्थसत्त्वम् । यद्यपि शुक्तिरजतादेरपि विद्यमानताऽस्त्येव तथाऽप्यर्थक्रियाविशेषयोग्यताविशिष्टं विद्यमानत्वं तत्र नास्तीति तदपेक्षया शुक्तिका सतीति तत्प्रत्यक्षं सत्संप्रयो-

गजन्यमित्युक्तमित्याशयेनाह—

रूप्यादिविभ्रममपेक्ष्य हि शुक्तिकादौ
सत्संप्रयोगजनितैव तु बुद्धिवृत्तिः ॥
तामप्यपेक्ष्य सति संहृतसर्वभेदे
सत्संप्रयोगजनिता मतिरभ्युपेया ॥ ५२ ॥

रूप्यादीति । शुक्तिकादौ हि बुद्धिवृत्ती रूप्यादिभ्रममपेक्ष्यैव सत्संप्रयोगजनितेति सम्बन्धः । तुशब्दोऽप्यमुमेव विशेषं शुक्तिकादिबुद्धिवृत्तेर्दर्शयति । ननु किमिति शुक्तिकादेरापेक्षिकमेव सत्यत्वमुच्यते परमार्थतैव किं न स्यात्, तत्राह—तामपीति । शुक्तिकादेरपि श्रुत्यादिभिर्निषिध्यमानत्वेन सर्वप्रपञ्चनिषेधावधावात्मनि सति या मतिः सा तां शुक्तिकामप्यपेक्ष्य सता निरतिशयसत्ता तेन संप्रयोगजनितेऽभ्युपेयेति सम्बन्धः । अत्रात्ममतेः सत्संप्रयोगजन्यत्वं परैरित्युक्तम् । एवं च जैमिनीयप्रत्यक्षलक्षणबलादपि नानात्मप्रमाणस्य तात्त्विकत्वं सिद्ध्यतीति भावः ॥ ५२ ॥

ननु सद्रूपशुक्तिकादेरपि सापेक्षं चेत् सत्त्वं तर्ह्यात्मापि सत्त्वात् तद्वत् सापेक्षसत्त्व एव स्यादित्याशङ्क्य,अविद्यातत्कार्यान्यतरत्वं तत्रोपाधिरित्याशयेनाह—

वेदान्तवाक्यजनितां परमात्मबुद्धि-
वृत्तिं व्यपेक्ष्य पुनरत्र न काचिदस्ति ॥
सत्संप्रयोगजनिता भुवनत्रयेऽपि
बुद्धिस्तमोविरचितं हि जगत् समस्तम् ॥ ५३ ॥

वेदान्तेति । तन्नास्तित्वे हेतुमाह—तमोविरचितामिति । तथा च सर्वस्यात्मज्ञाननिरस्यत्वादात्मैव सन्न ततोऽन्यत् सदस्तीत्यर्थः ॥ ५३ ॥

एवं धर्मेऽपि चोदनाप्रामाण्यं व्यावहारिकमेव न तु तात्त्विक-

मित्याशयेनाह—

धर्मेऽपि तत्त्वमतिरेव तु चोदनायाः
सत्त्वादिवस्तुनि यथाऽक्षनिबन्धना धीः ॥
अज्ञाततापि सदृशी व्यवहारकाले
तत्त्वावबोधसमये न तु तत्त्वबुद्धिः ॥ ५४ ॥

धर्मेऽपीति । सतो भावस्य भावः सत्त्वं तदादिर्यस्याभावस्य तद्रूपं यद् वस्तु तस्मिन् । सत्त्वमिति भावो न विवक्षितः। भावाभाववस्तुन्यक्षादिजन्या धीर्यथा यादृशी स्वप्रमेयवस्तुतत्त्वशून्या, तुशब्दस्तथार्थे, तथा चोदनायाः सकाशाद्धर्मेऽपि तत्त्वमतिरेव धर्मे स्वरूपमतिरेव भवति न तु धर्मस्य तावता तत्त्वं सिद्ध्यतीत्यर्थः । ननु धर्मस्य ब्रह्मवदज्ञातत्वात् कथं तत्प्रमाणस्य घटादिप्रमाणसाम्यमित्यत आह—अज्ञाततापीति । ब्रह्मणोऽन्यस्यास्वप्रकाशतया तत्तुल्याज्ञाततायोगाद् घटादितुल्यैव तस्य साऽपीति भावः । धर्मप्रमाणस्यापि घटादिप्रमाणतुल्यत्वे हेतुमाह—तत्त्वावबोधेति । तत्त्वबुद्धिः परमार्थत्वबुद्धिः धर्मस्येति शेषः । तत्त्वविचारसमये धर्मस्यापि घटादिवन्न तत्त्वबुद्धिरिति तत्प्रमाणयोर्न कोऽपि विशेष इति भावः ॥ ५४ ॥

ननु सच्च त्यच्चाभवदिति तावत् सत्परिणामः प्रपञ्चः श्रूयते, अन्यथा अभवदित्ययोगात् । परिणामश्च परिणामिसमानसत्ताक इति प्रपञ्चो ब्रह्मवत्सत्त्वेति कथं तत्प्रमाणं तत्त्वावेदकं न भवेदित्याशङ्क्य अन्यथाभावमात्रं तत्र भवनशब्दार्थः । अन्यथाभावश्च विवर्तत्वेऽप्यस्ति, अन्यथा सत्यं चानृतं च सत्यमभवदिति तद्वाक्यशेषे सत्यस्यानृतभवनोक्त्यनुपपत्तेः । किं च वाचारम्भणं विकारो नामधेयमित्यादिश्रुतिरपि प्रागुक्तन्यायेन विवर्तवादमाश्रित्य सत्यपरिणामनिवारणेन प्रत्यक्षादिबुद्धिविषयात्तत्त्वं परमार्थत्वमुच्चैरपहर्तुं प्रवृत्ता

रोधादपि न परिणामवादः श्रुतिसंमत इत्याशयेनाह—

आरम्भणादिवचनं सकलं प्रवृत्तं
प्रत्यक्षबुद्धिविषयादपहर्तुमुच्चैः ॥
तत्त्वं यथोदितनयेन विवर्तवाद-
माश्रित्य सत्यपरिणामनिवारणेन ॥ ५५ ॥

आरम्भणादिवचनमिति। वाचारम्भणं विकारो नामधेयमिति श्रुतिर्हि विकारस्य घटादेः शब्दालम्बनमात्रत्वमाह। मृत्तिकेत्येव सत्यमित्युत्तरवाक्यं चैवकारेण विकारं व्यावर्त्य कारणमात्रस्य मृदादेः सत्यत्वोक्त्या प्रत्यक्षादिविषयात्तत्त्वमपहरति। ततो घटादेः श्रुत्या विवर्तत्वमाश्रितं सत्यपरिणामित्वं च निवारितमिति तद्बलादक्षादेरपि विवर्तमात्रविषयत्वसिद्धेर्नाक्षादेस्तात्त्विकप्रामाण्यमित्याशयः॥ ५५ ॥

ननु तदनन्यत्वमिति सूत्रेण सूत्रकारः कार्यस्य कारणाभेदमाह। कारणं च सत्यमिति तदभिन्नं कार्यमपि तथैवेति तात्त्विकान्यथाभावं दर्शयता तेन परिणाम एवाश्रितस्ततः "सत्यपरिणामनिवारणेन" इत्येतदसङ्गतमिति चेत्तत्राह —

वाक्यप्रवृत्तिमनुसृत्य च सूत्रकारः
सिद्धान्ततामनयदत्र विवर्तवादम् ॥
तत्त्वप्रकाशनविधावपहृत्य शक्ति-
मारम्भणादिवचनादपरप्रमायाः ॥ ५६ ॥

वाक्यप्रवृत्तिमिति। सूत्रकारो हि येनाश्रुतं श्रुतं भवतीत्यादिनैकविज्ञाने सर्वविज्ञानप्रतिज्ञया सर्वात्मत्वविषयवाक्योपक्रममनुसृत्यारम्भणादिवचनादनात्मप्रमायास्तत्प्रमाणस्य तत्त्वप्रकाशनोत्पादनशक्तिमपहृत्य विवर्तवादं सिद्धान्ततामनयदिति सम्बन्धः। सूत्रकारो हि तदनन्यत्वे कार्यस्यारम्भणशब्दादिभ्य इति हेतुं वाचारम्भणादिश्रुत्यर्थमेवाह। तस्याश्च विकारमृषात्वमर्थ इत्युक्तं, ततश्च तदनन्यत्वं न तदभिन्नत्वं किं तु ततः पृथक् सत्त्वाभाव एव, स च परिणा-

मवादेऽनुपपन्नः,तत्रेषदभेदेऽपि कार्यकारणयोः पृथक्त्वस्यापि सत्त्वात्। विवर्तस्य तु न ततः पृथक्त्वमिति प्रतीयमानभेदस्य मृषात्वमेव सूत्रकारस्यापि संमतमिति विवर्तवाद एव सिद्धान्त इति भावः ॥५६॥

ननु भोक्त्रापत्तेरिति पूर्वसूत्रे स्याल्लोकवदिति समुद्र इव वीचीतरङ्गबुद्बुदादिविकाररूपेण ब्रह्मान्योऽन्यविलक्षणचेतनाचेतनविचित्रप्रपञ्चात्मनाऽनेकरसमिति दर्शितमिति तेन समम्,एवं सति विरोधः स्यादिति चेत्, सत्यं विरोधः स्यात्,उभयस्यापि तत्संमतत्वेन चैतदपि तत्संमतं भवति विरुद्धयोस्तदयोगात्। अत एकमभ्युपगमवादेनेति वक्तव्यम्। तत्राप्यद्वैतविरोधिपरपक्षव्याहत्तये स्वसिद्धान्तानुकूलतया च पूर्वं विकारवादोऽभ्युपगत इति न तेनास्य सिद्धान्तस्य विरोध इत्याशयेन वादिनां कार्यविषयाभ्युपगमप्रकारचातुर्विध्यमाह—

आरम्भसंहतिविकारविवर्तवादा-
नाश्रित्य वादिजनता खलु वावदीति ॥
आरम्भसंहतिमते परिहृत्य वादौ
द्वावत्र संग्रहपदं नयते मुनीन्द्रः ॥ ५७ ॥

आरम्भेत्यादिना। कारणात्तन्त्वादेः सकाशादत्यन्तभिन्नस्योत्पत्तेः प्रागसतः कार्यस्य समवाय्यसमवायिनिमित्तेनोत्पत्तिरित्यारम्भवादः।

अणूनां समुदाय एव घटादिलक्षणं कार्यं न तु तदुत्पन्नं वस्त्वन्तरमिति संहतिवादः।

मृदादेस्तात्त्विकोऽन्यथाभावो घटादिरिति विकारवादः।

अतात्त्विकोऽन्यथाभावो रज्जोरिव सर्पादिरिति विवर्तवादः।

तानेतानाश्रित्य वादिजनता तत्समूहो वावदीति अतिशयेन वदति मुखरीभवतीति यावत्, खल्विति सम्बन्धः। एतन्मतभेदप्रदर्शनस्य प्रस्तुतमुपयोगमाह—आरम्भसंहतिमते इति। एतन्मतद्वयमुपेक्ष्याद्वयब्रह्मणो जगत्कारणवादिसमन्वयस्यात्यन्तिकभेदाश्रयारम्भसंहतिपक्षोत्थितविरोधशङ्कां परिहर्तुं समुद्रतरङ्गादेरिवा-

भेदेपीच्छेदेन कार्यकारणभाव उपपद्यते, लोके तथादर्शनादिति नास्यन्तभेदस्तद्बलात्सिध्यतीति पराश्रितपरिणामवादं, सिद्धान्ततया विवर्तवादं च द्वयं सूत्रकृत्संग्रहपदं नयते संगृह्णातीत्यर्थः ॥ ५७ ॥

ननु परमतनिवृत्तये विकारवादोऽपि संगृहीतश्चेत् तर्हि सोऽप्यावश्यक एवेति कथं तस्याभ्युपगमवादत्वमिति चेत्, न । एवं विवर्तेनापि तत्परिहारसंभवात् । किमिति तर्हि तत्संग्रह इति चेत्, मन्दजनप्रतीतिविरोधं परिहर्तुमित्युक्तमेव विवृणोति—

तत्रापि पूर्वमुपगम्य विकारवादं
भोक्त्रादिसूत्रमवतार्य विरोधनुत्त्यै ॥
प्रावर्तत व्यवहृतेः परिरक्षणाय
कर्मादिगोचरविधावुपयोगहेतोः ॥ ५८ ॥

तत्रापीति । तत्रापि विकारविवर्तयोर्मध्येऽपि विवर्तवादात्पूर्वमद्वये जगद्योनौ वेदान्तसमन्वयस्य भोक्तृभोग्यादिभेदग्राहिप्रमाणविरोधशङ्कापनुत्त्यै विकारवादं परकीयमभ्युपगम्य तद्विषयं "भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्" इति सूत्रमवतार्य मुनीन्द्रः सूत्रकारः प्रावर्तत विरोधपरिहारे प्रवृत्तवानिति सम्बन्धः । ननु किं विवर्त्तवादेन सा शङ्का परिहर्तुमशक्येत्याशङ्क्य पक्षयति प्रति तेन सा सुपरिहरापि भेदाभिनिविष्टचित्तं प्रति विकारवादेनैव तत्परिहारः सुकर इत्याशयेनाह—व्यवहृतेरिति । लोक उदकाहरणादितत्तदर्थिनो नियमेन घटादौ प्रवृत्त्यादिव्यवहारस्य दृष्टस्य संरक्षणात्कर्मकाण्डावगताग्निहोत्राद्यनुष्ठानस्य ब्रह्मवधादिनिवृत्तेश्च प्रापकविधिनिषेधोपयोगाच्च हेतोर्विकारवादमुपगम्येत्यनेन सम्बन्धः । तत्र हि भेदाभेदसत्त्वाल्लोकप्रसिद्धभेदो न निषिध्यते कारणाद्वयत्वं चोपपादितं भवतीति भगवता सोऽभ्युपगत इति भावः ॥ ५८ ॥

ननु प्रथममुक्तत्वादपेक्षितत्वाच्च परिणामवाद एव सिद्धान्तोऽस्तु अन्यथा स्वाभिमतविवर्त्तस्यैव प्रथमाभिधानं किं न स्यादित्य-

त आह—

साक्षादिहाभिमतमेव विवर्तवाद-
माहत्य सूचयति पूर्वमपेक्षमाणः ॥
आरम्भणादिवचनेन विवर्तवादं
शक्नोति वक्तुमुदिते परिणामवादे ॥ ५९ ॥

साक्षादिति । इहास्मिन्शास्त्रे विवर्तवादः साक्षादभिमतः स्वप्रतिज्ञातशुद्धाद्वैतसमन्वयोपपादकत्वात् । विकारस्तु नैवमिति विवर्तमेव सूत्रकार आहत्य मुखत एव सूचयति । तत्रापि परिणामवादमुखेन कार्यकारणयोरत्यन्तभेदं निराकृत्य तत्संमतमपि भेदं निराकुर्वन्विकारवादमप्युपेक्षते । अन्यथा स्वस्यैवोभयत्र व्यापारे गौरवाद्विवर्तवादस्य विकारपूर्वकत्वाच्च प्राक्तनयुक्त्यैवायं वक्तव्य इति स प्रागभ्युपगतोऽतो न तस्य प्रागुक्तिमात्रेण सिद्धान्तत्वमित्याशयेनाह—पूर्वमपेक्षमाण इति । एतदेव विवृणोति—आरम्भणेति । प्रथमं परिणामवाद उदिते उक्ते सति आरम्भणादिवचनेन विवर्तवादं वक्तुं शक्नोति नान्यथा, कार्यकारणस्वरूपस्यावतीतौ तस्य मिथ्यात्वप्रतिपत्त्ययोगादित्यर्थः ॥ ५९ ॥

लौकिकदृष्टान्तेनाप्यमुमर्थमाह—

आरुह्य भूमिमधरामितराऽधिरोढुं
शक्येति शास्त्रमपि कारणकार्यभावम् ॥
उक्त्वा पुरा परिणतिप्रतिपादनेन
संप्रत्यपोहति विकारमृषात्वसिद्ध्यै ॥ ६० ॥

आरुह्येति । यथा प्रासादमारुरुक्षुणा तदुपायसोपानस्याधरामधःस्थितां भूमिं पदन्यासस्थानमधस्तनसोपानपर्वेति यावत् । तामारुह्येतरोपरितना भूमिरधिरोढुं शक्येति प्रसिद्धमिति शेषः । एवं शास्त्रमपीत्यादिना सम्बन्धः । परिणतिप्रतिपादनेन भोक्त्रादिसूत्रेणेति शेषः । संप्रति आरम्भणाधिकरण इत्यर्थः । विवर्तत्वव्युत्पादनं हि कारणात्कार्यस्य भेदादिसत्यत्वनिषेध एव स्यात् । स च ब्रह्मणि

प्रपञ्चभेदप्रसङ्गे सत्येव भवतीति भेदप्रसञ्जकपरिणामवादस्य तन्निषेधकविवर्तवादस्य च क्रमो युज्यते । श्रुतावपि सृष्टिवाक्येनारोपितप्रपञ्चस्य ब्रह्मणि नेतिनेतिवाक्येन निषेधादिति भावः ॥ ६० ॥

परिणामविवर्तवादयोर्दृष्टान्तसाम्यं दर्शयन्नुक्तमर्थं विशदयति—

विवर्तवादस्य हि पूर्वभूमि-
र्वेदान्तवादे परिणामवादः ।
व्यवस्थितेऽस्मिन् परिणामवादे
स्वयं समायाति विवर्तवादः ॥ ६१ ॥

विवर्तवादस्य हीति । वादे शास्त्रे । परिणामवादे व्यवस्थिते प्रसक्ते सति विवर्तवादः स्वयं समायातीति भेदाभेदाश्रयणेनात्यन्तभेदाद्विमुखचित्तस्य वक्ष्यमाणन्यायेनानायासेनैव तदपि निराकर्तुं शक्यमित्यर्थः ॥ ६१ ॥

ननु "कथं नु भगवः स आदेशो भवति" इति श्रुतिरेकविज्ञानात्सर्वविज्ञानमाक्षिपन्ती शुद्धाद्वैतमाक्षिप्य मृदादिदृष्टान्तोपादानेन परिणामं विवक्षति । एकस्मिन् वाक्ये च पूर्वानुरोधेनैवोत्तरं नेतव्यम् । अतस्तन्मूलं सूत्रमपि तदाशयं किं न स्यादित्याशङ्क्य कथं न्विति वाक्यस्य पूर्वपक्षतया शुद्धाद्वयस्य वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिना विकारमृषात्ववर्णनेनोपपद्यमानतया च न विकारवादस्य प्रथमं श्रवणेऽपि संमतत्वं किं तूक्तविधया विवर्तत्वव्युत्पादनहेतुतया पूर्वपक्षतया च श्रुतिसूत्रकाराभ्यां प्रथमं स आहृत इति दृष्टान्तान्तरेणाह—

उपायमातिष्ठति पूर्वमुच्चैरुपेयमाप्तुं जनता यथैव ॥
श्रुतिर्मुनीन्द्रश्च विवर्त्तसिद्ध्यै विकारवादं वदतस्तथैव ॥६२॥

उपायमिति । आतिष्ठति अनुतिष्ठति करोतीति यावत् । उपेयं फलम् । जनता जनसमूहः ॥ ६२ ॥

कस्य तर्हि विकारवादः संमतो य इहाभ्युपगत इत्युच्यत इत्या-

शङ्का प्रागुक्तारम्भादिमतानामभ्युपगन्तॄनाह—

आरम्भवादः कणभक्षपक्षः
संघातवादस्तु भदन्तपक्षः ॥
सांख्यादिपक्षः परिणामवादो
वेदान्तपक्षस्तु विवर्त्तवादः ॥ ६३ ॥

आरम्भवाद इति । कणभक्षो वैशेषिकस्तदिष्ट इत्यर्थः । भदन्तो बौद्धः, सांख्यः कपिलः । आदिपदात् पतञ्जलिः ॥ ६३ ॥

विकारवादस्य परकीयमतत्वकीर्तनफलमाह—

विकारवादं कपिलादिपक्ष-
मुपेत्यवादेन तु सूत्रकारः ॥
श्रुतिश्च संजल्पति पूर्वभूमौ
स्थित्वा विवर्त्तप्रतिपादनाय ॥ ६४ ॥

विकारवादमिति । उपेत्यवादेन अभ्युपगमसिद्धान्तेनेत्यर्थः । अन्यत्स्पष्टम् ॥ ६४ ॥

ननु कारणस्य रूपान्तरापत्तिः परिणामो यथा मृदो घटाद्यात्मता, सा च विवर्तेऽप्यस्ति, रज्ज्वादेः सर्पाद्यात्मतादर्शनात्तत्कथं तयोर्भेद इत्याशङ्क्य विवर्तविलक्षणं परिणामस्वरूपमाह—

अभेदिनः सावयवस्य सत्य-
विचित्ररूपान्तरदर्शकत्वम ॥
वदन्ति धीराः परिणाममस्या
वसुन्धराया इव सस्यसृष्टिम् ॥ ६५ ॥

अभेदिन इति । एकस्येत्यर्थः । एतच्चारम्भवादवैलक्षण्यार्थमुक्तम् । एकस्यारम्भकत्वानङ्गीकारादारभ्यारम्भकयोर्भेदाच्च । सावयवस्येति ब्रह्मविवर्तवैलक्षण्याय । सत्त्वादयो हि गुणाः प्रधानावयवतया परस्परसंसृष्टा एकं सत्प्रधानमित्यभेदिनः सावयवस्येत्युक्तम् । एवं यथा कारणं तथा महदादेरपि परिणामिनः स्वरूपं द्रष्टव्यम् । निरवयवस्य परिणामो न सम्भवति, लोके तथा दर्शनादि-

ति, नैतदसम्भावि । सत्येति कार्यस्वरूपतोऽपि शुक्तिरजतव्यावृत्तय उक्तम् । विचित्रेति तत्स्वरूपकीर्तनम्, विवर्तपरिणामयोरुभयत्र समत्वात् । रूपान्तरेति संघातव्यावृत्त्यर्थम्, संघातस्य संहन्तृभ्यो रूपान्तरत्वाभावात् । अथ वाऽभेदिन इत्यनेन संघातस्यापि व्यावृत्तिः, संहन्तृणामनेकत्वात् । दर्शकत्वमिति तत्र प्रमाणाभिप्रायम् । कारणस्य तात्त्विककार्यात्मत्वं परिणामः, सावयवस्य सतः कार्यात्मत्वं वेति तल्लक्षणं द्रष्टव्यम् । धीरा इति विरुद्धतत्त्वयोस्तत्त्वतो भेदाद्यसंभवापह्नवधार्ष्ट्यं सूचयति । तदुदाहरति—वसुन्धराया इति ॥ ६५ ॥

विवर्तस्य विकाराद्व्यावृत्तं स्वरूपमाह—

अभेदिनो निर्विकृतेरनेक-
मृषास्वरूपान्तरदर्शकत्वम् ॥
विवर्तशब्दार्थ इह प्रसिद्ध-
स्तरङ्गभेदादिव चन्द्रभेदः ॥ ६६ ॥

अभेदिनो निर्विकृतेरिति । निर्विकृतेरित्यनेन पूर्वरूपपरित्यागलक्षणो विकारो निषिध्यते । अनेकेति च ब्रह्मविवर्ताभिप्रायम्, अन्यत्र तदनियमात् । इह सिद्धान्ते कारणस्य पूर्वरूपापरित्यागेनाभिन्नं रूपान्तरम् अतात्त्विकरूपान्तरभेदो वा विवर्तवाद इति विवक्षितम् । परिणामे आरम्भे च प्रसङ्गवारणाय पूर्वरूपेत्यादि । उदाहरति—तरङ्गेति ॥ ६६ ॥

एवं प्रसङ्गागतं विचारं समाप्य "श्रुतिर्मुनीन्द्रश्च विवर्तसिद्ध्यै विकारवादं वदतस्तथैव" इत्यनेन या श्रुतिरभ्युपगम्य परिणामवादं वदतीत्युक्तम् । तत्रापातदृष्ट्या सृष्टिविषया श्रुतिः सेत्यभिप्रेत्याह—

अहं प्रजायेय बहु स्वयं स्या-
मित्यादिनाऽऽदौ परिणाममुक्त्वा ॥
विकारमिथ्यात्वमथ ब्रुवाणा
विवर्तवादं श्रुतिरानिनाय ॥ ६७ ॥

अहं प्रजायेयेति । बहुस्यां प्रजायेयेत्यादिश्रुतेरयमर्थतोऽनुवादः। अहं स्वयं प्रपञ्चात्मना प्रजायेय अतो बहु स्यामिति योजना। अहमिति च सतो मूलकारणस्योक्तिः । विकारामिथ्यात्वमथ ब्रुवाणोति । अथेत्यर्थान्तरे "यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं" "वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्" इत्यग्न्यादेर्मिथ्यात्वं ब्रुवाणा श्रुतिर्विवर्तवादमानिनायानीतवतीत्यत्र परिणामद्योतकाभावादियं परिणामश्रुतिरिति परस्य भ्रान्तिरेव । न च सत एवेक्षणपूर्वकं कार्यात्मना जनिश्रवणादयं परिणाम इति वाच्यम् । विवर्तत्वेऽपि तदुपपत्तेः। "सत्यं चानृतं च सत्यमभवदिति रथान् रथयोगान् पथः सृजते" इति विवर्तेऽपि तच्छ्रवणात् । तत उत्तरत्र विकारमिथ्यात्वप्रतिपादनात्संमुग्धारेण तस्यैवेयं सृष्टिश्रुतिः,अन्यथा तदेकवाक्यतायोगादिति ग्रन्थकारः परभ्रान्तिमाश्रित्य परिणाममुक्त्वेत्यवोचत् । अत एव सिद्धान्तं निषेधन्ती कथं नु भगव इत्याद्या श्रुतिः पूर्वपक्षतया परिणामपरेत्यवोचाम, तस्मात् सैवात्र द्रष्टव्या ॥ ६७ ॥

एवं छान्दोग्यसृष्टिश्रुतिपूर्वोत्तरवाक्यपर्यालोचनया विवर्तवाद एव प्रामाणिक इत्युक्तम् । इदानीमेतत्फलम् ,एवं सति तत्पर्यायमायामयत्वादि प्रपञ्चस्य ब्रुवतः श्रुत्यादिवचनस्य प्रामाण्यमुपपन्नं भवतीत्याह —

मायाश्रुतिस्मृतिवचः सकलं तथा च
वस्तुत्वमर्दनपरं घटते विवर्ते ॥
सर्वस्य कारणविकारविभागभाजः
प्रागादृतस्य परमार्थतया प्रतीतेः ॥ ६८ ॥

मायाश्रुतीति। "इन्द्रो मायाभिः पुरुरूप ईयते" "मायां तु प्रकृतिं विद्यात्" "ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः । तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्"॥ इत्यादि मायाश्रुतिस्मृतिवच इत्य-

र्थः। तथा च विवर्तवादे आश्रिते सति सन् घट इत्यादिप्रतीतिबलात्प्रागविचारदशायां परमार्थतयाऽऽहतस्य कारणविकारविभागभाजः कार्यकारणात्मना विभक्तस्य सर्वप्रपञ्चस्य वस्तुतत्त्वमर्दनपरं सकलं मायाश्रुतिस्मृतिवचो घटत इति पक्षयोरित्याशयेन सर्वस्येत्याद्युक्तम् ॥ ६८ ॥

किंच तयोः संघातारम्भवादयोर्युक्त्यसहतया सूत्रकारेण निरस्तत्वादपि तत्त्वजिज्ञासुना तौ दूरतो वर्जनीयावित्यभिप्रेत्य सकलशिष्टैः परित्यक्तत्वात्संघातवादं प्रथमं दूषयति—

संघातवादमुपगम्य तु तत्र पक्षे
संहन्त्रभाव इति सूत्रकृदाह दोषम् ॥
स्थायी भदन्तसमये न हि कश्चिदत्र
संघातसंजननशक्तिसमन्वितोऽस्ति ॥ ६९ ॥

संघातवादमिति। उपगम्यानूद्य। संहन्तुः संहन्यमानानां मेलकस्याभावः।

एतदुक्तं भवति—सौत्रान्तिकवैभाषिकाभ्यां हि बुद्धशिष्याभ्यां बाह्याभ्यन्तरपदार्थाः क्षणिकाः सन्तीत्यभ्युपगतम्। तत्र भूतं पृथिव्यादिचतुष्टयम्, भौतिकं रूपादि चक्षुरादि च, भूतभौतिके च खरस्नेहोष्णेरणस्वभावानां सकृदेव कार्यजनकतया क्षणिकानां चतुर्विधपरमाणूनां संघातरूपे न तु वैशेषिकाणामिव ततोऽन्ये तदारब्धे। तत्र खरः पृथिवीपरमाणुः स्नेहोष्णौ प्रसिद्धौ, ईरणो वायुपरिमाणुः। तथा रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञितानां च पञ्चस्कंधानामपर आध्यात्मिकः संघातः सकललोकयात्रावहः। रूप्यन्ते एभी रूप्यन्त इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः, अहमित्याकारं रूपादिविषयं वा ज्ञानं विज्ञानस्कन्धः, चित्तस्य या प्रियाप्रियानुभयात्मकविषयवेदनेन सुखदुःखतद्रहितविशेषावस्था जायतेऽसौ वेदनास्कन्धः, सविकल्पकप्रत्ययः संज्ञास्कन्धः, रागादयः

क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्धः। तदिदमनुपपन्नं समुदायिनामचेतनत्वेन स्वतः समुदायायोगात्। लोके चेतनव्यापारं विनाऽचेतनेषु तददर्शनात्। ननु तन्मतेऽपि चित्तं चेतनमस्ति, तज्ज्ञात्वा संयोजयिष्यतीति चेत्,न। शरीरादिसंघातोत्पत्तेः पूर्वं तस्य ज्ञातृत्वायोगात्। नन्वालयविज्ञानमहंकारास्पदं तदेव सकलव्यवहारे कारणमिति चेत्,न। तस्यापि विषयविज्ञानादृते तदयोगात्। विषयविज्ञानं च न संघातं विनेत्युक्तम्। किं चालयविज्ञानं स्थायि चेत्, नामान्तरेणास्मदात्मैव स्यात्। क्षणिकं चेत्,तेनापि कथं संघातो जननीयः। ज्ञानपूर्वेच्छाधीनप्रयत्नवच्चेतनाधिष्ठितकायव्यापारेण हि कुलालादय एकेनापरं संयोजयन्ति वियोजयन्ति च। ज्ञानादीनां चैकाश्रयाणामेव कार्यकारणभावो लोके सिद्ध इति कथं क्षणिकात्मनि तदुत्पत्तिः स्यात्। एवं क्रियाविभागाद्याश्रयानेकक्षणस्थायिन एवैकस्यापरेण संयोगः संभवतीति न क्षणिकानामणूनामन्योऽन्यसंबन्धोऽपि सिध्येत्। यत्तु सकृदेव कार्यजनकत्वादणूनां क्षणिकत्वमिति, तन्न। असिद्धेः,एकस्यापि सहकारिसमवधानक्रमेणानेककार्यजनकत्वस्य लोकेऽनुभवात्। अतोऽत्यन्तमयुक्त एवायं पक्ष इति "समुदायोभयहेतुकेऽपि तदप्राप्तिः" इतिसूत्रेण तत्र दोषं सूत्रकार आहेति संहन्त्रभावमेवाह—स्थायीति। उक्तरीत्या ज्ञानाद्यनेकक्षणावस्थायी संघातजननशक्तिसमन्वितो भवतीति बौद्धमते स न सिद्ध्येदित्यर्थः॥ ६९॥

वैशेषिकास्तु—स्वमनीषाविलसितानणून् जगत्कारणान्याहुः। तन्तवो हि पटसमानजातीयानेकसंवलिता एव पटमारभन्ते। एवंविधेभ्य एव सर्वत्र कार्यद्रव्यदर्शनात्। कारणगतगुणाश्च सजातीयान् कार्ये गुणानारभन्ते, तन्तुरूपादौ तथा दर्शनात्। कार्यगतमहत्त्वं च कारणगतबहुत्वमहत्परिमाणादृढसंयोगारब्धम्, न्यूनाधिकसंख्यतन्त्वारब्धयोः पटयोः समसंख्यादिमत्स्थूलसूक्ष्मतन्त्वारब्धयोः शिथि-

लाशिथिलसंयोगवत्स्थूलपिण्डारब्धपिण्डयोश्च महत्त्वविशेषस्योक्तहेतुकत्वात्। एवं कार्यपरिमाणान्यूनपरिमाणापकर्षपर्यवसानभूमयः परमाणवः सिध्यन्ति द्व्यणुककारणानि। द्व्यणुकपरिमाणे च परमाणुद्वित्वमसमवायिकारणं त्र्यणुकपरिमाणे तु द्व्यणुकबहुत्वमिति तत्प्रक्रिया। एवं च कथमद्वितीयात्परममहतश्चेतनाद्ब्रह्मणः परिच्छिन्नजडवियदादिकार्यद्रव्यस्योत्पत्तिरितीममपेक्ष्य सूत्रसूचितयुक्त्या दूषयति—

आरम्भवादमुपगम्य तदीययुक्ते-
स्तत्प्रक्रियामनुसरन् व्यभिचारमाह ॥
वैशेषिकं प्रति महद्ब्रदिदं हि योज्यं
यद्ब्राऽपि दीर्घवदिदं जडमित्यनेन ॥ ७० ॥

आरम्भवादमिति। तदीययुक्तेर्वैशेषिकस्य कारणगुणारम्भकत्वविषययुक्तेस्तत्प्रक्रियामनुसरन्नेव तत्प्राक्रिययैव वैशेषिकं प्रति सूत्रकारो व्यभिचारमाहेत्यर्थः। तत्प्राक्रियायां व्यभिचारं दर्शयन्नेव स्वमतेऽविरोधपरं सूत्रमर्थतः पठति—महद्ब्रदिति। किं कारणगुणानामविशेषेण कार्ये समानजातीयगुणारम्भकत्वं किं वा तद्विशेषगुणानाम्। नान्त्यः, चित्ररूपादिमदवयव्यारम्भकावयवरूपादौ तदभावात् विशेषगुणत्वानिरूपणस्य वृद्धैर्दर्शितत्वाच्च। नाप्याद्यः, द्व्यणुकैस्त्र्यणुकस्य महत आरम्भ इति वैशेषिकैरभ्युपगमात्। न च तत्र समवायिगतं परिमाणं सजातीयं तदारभते, तद्वदिदं चेतनं ब्रह्मापि जडं जगज्जनयतु न तु तच्चैतन्यान्तरमिति योज्यमुपपादनीयम्। किं च तानि द्व्यणुकानि ह्रस्वानीति वैशेषिकसंमतं त्र्यणुकं च दीर्घमिति। एवं च यथा कारणगतं ह्रस्वपरिमाणं त्र्यणुके स्वसमानपरिमाणं न जनयति तद्वदपीदं ब्रह्म जडं जनयिष्यतीत्यपि योज्यमित्यनेनैतदर्थेन "महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्" इति सूत्रेण व्यभिचारमाहेति संबन्धः। एतच्च चकारार्थेन सौत्रवाशब्देन सूचितम्। परमाणु-

पारिमाण्डल्यस्य द्व्यणुके सजातीयानारम्भकत्ववदित्येतामुपलक्षयतीति द्रष्टव्यम् ॥ ७० ॥

महद्वदित्यादि विवृणोति—

ह्रस्वारब्धं त्र्यणुकमणुभिस्तद्वदारब्धमेतद्
ह्रस्वं नो तन्न च तदणुवत्संमतं तद्वदेतत् ॥
सर्वं कार्यं गगनधरणीमध्यगं चेतनोत्थं
निश्चित्कं नो जडिमघटितं युक्तमित्याचचक्षे ॥७१॥

ह्रस्वारब्धमिति । त्र्यणुकं हि दीर्घं ह्रस्वैर्द्व्यणुकैरारब्धं तद्वदेतदेव महदणुभिर्द्व्यणुकैरारब्धं तथापि तत् त्र्यणुकं नो ह्रस्वं, ह्रस्वं न भवति, न च तदणुवत् अणुसदृशमणुपरिमाणं, न तु परमाणुद्व्यणुकयोः परिमाणं द्व्यणुकत्र्यणुकगतपरिमाणारम्भकसामग्र्यां तत्संमतमेवमेतदसंमतमपि । एतदेव विवृणोति–सर्वमित्यादिना । ननु परमाणुद्व्यणुकयोर्द्व्यणुकत्र्यणुकगतपरिमाणारम्भकसामग्र्यन्तरसत्त्वात्तद्बलात्पारिमाण्डल्यादिद्व्यणुकादौ सजातीयं नारभत इति चेत्, न । वैपरीत्यस्यापि संभवात्। अणुत्वादिसामग्रीप्राबल्यकथनं तु तथात्वादभ्युपगमायत्तमिति भावः । नोऽस्माकं निश्चित्कम् अत एव जडिमघटितं जाड्यविशिष्टमित्यर्थः ॥ ७१ ॥

सूत्रस्थवाशब्दसमुचितं व्यभिचारं दर्शयन् द्व्यणुकत्र्यणुकपरिमाणयोस्तदभितं कारणमाह—

ह्रस्वाणुत्वे कारणद्वित्वहेतो-
र्जाते नैते पारिमाण्डल्यहेतोः ॥
दीर्घत्वं यद् यच्च दीर्घे महत्त्वं
द्रव्ये ते द्वे कारणत्रित्वहेतोः ॥ ७२ ॥

ह्रस्वाणुत्वे इति । द्व्यणुकगतह्रस्वत्वाणुत्वे इत्यर्थः । कारणद्वित्वहेतोः परमाणुसमवेतद्वित्वाद्धेतोर्जाते भवतः, नैते पारि-

माण्डल्याद्धेतोरिति। पारिमाण्डल्यस्य परमाणुपरिमाणस्यानारम्भकत्वाङ्गीकारात्। अन्यथा द्व्यणुकस्यापि परिमण्डलत्वापत्तेरिति हि तेषां मतम्। एवं दीर्घे द्रव्ये त्र्यणुके यद् दीर्घत्वं यच्च महत्त्वं ते द्वे द्व्यणुकगतबहुत्वादेव हेतोर्जाते इत्यपि तेषां मतम्। तथा च कुतस्तदुक्तो नियम इति भावः॥ ७२॥

किंच एकत्राभ्युपेतमन्यत्राभ्युपगन्तव्यमिति न तेषामप्यस्ति नियमः। तथा सति हि परमाणुद्वयादेव द्व्यणुकं द्व्यणुकद्वयादपि किंचित् कार्यं स्यात्। न च तदप्यणवेव स्यात्। इत्यारम्भेऽप्यर्थाद् द्व्यणुकद्वयमारम्भकं नेति वाच्यम्। द्वित्वसंख्या हि परमाणुगता स्वाश्रयपरिमाणादधिकपरिमाणमारभत इति कल्प्यम्। एवं च द्व्यणुकद्वित्वं च तादृशमेव परिमाणमारभेत, तच्च महत्त्वमेव स्यात्। न हि द्व्यणुकपरिमाणादधिकपरिमाणं महत्त्वादन्यत् सम्भवति। एवमपि यदि कारणबहुत्वमेव कार्यमहत्त्वारम्भकामिति तदीयो नियमः स्यात् तदैतन्न स्यात्। न च सोऽस्ति, द्व्यणुकत्र्यणुकपरिमाणातिरिक्तकार्यपरिमाणे तैरपि कारणसंख्याविशेषनियमानभ्युपगमात्। तथा च तद्वदेवेदमपि किं न स्यादित्याशयेनाह—

द्व्यणुकस्य जन्म परमाणुयुगात्
परिमण्डलादिति कणादमतम्॥
द्व्यणुकत्रयात् त्र्यणुकजन्म पुन-
र्नियमं न कश्यपसुतो वदति॥ ७३॥

द्व्यणुकस्य जन्मेति। परिमण्डलादिति परिमाणविशेषणम्। तद्द्वित्वारब्धं परिमाणं तदधिकमिति तन्मते प्रसिद्धिं दर्शयितुमितीति द्रष्टव्यम्। त्र्यणुकजन्मेत्यत्रापि कणादमतमित्यनुषञ्जनीयम्। पुनः पश्चात्। ततोऽन्यत्र कार्यपरिमाणेषु कश्यपसुतो वैशेषिकः। एवं च तन्तुरूपादिसाम्येन ब्रह्मचैतन्यस्य तत्कार्यसजातीयारम्भकत्वमापादयितुं कथं स शक्नुयादिति भावः॥ ७३॥

तस्माद् वैशेषिकेण कारणगुणारम्भकत्वविषयनियमेन न ब्रह्मकारणवादः प्रक्षेप्तुं शक्य इत्याशयेनाह—

द्व्यणुकत्र्यणुकव्यपाश्रयं परिमाणं प्रति कारणाश्रयः ॥
न तु कारणमिष्यते गुणस्तदवष्टभ्य वयं जिगीषवः ॥७४॥

द्व्यणुकेति । कारणाश्रयो गुण इति सम्बन्धः । गुणः परिमाणम् । तथा सति तव किं स्यात् तदाह—तदवष्टभ्येति । तदाश्रित्य तं वयं जिगीषवो जेतुमिच्छामः । तद्वच्चेतनकारणत्वं तदाक्षेपं निराकृत्य वयं समर्थयितुं समर्था इत्यर्थः ॥ ७४ ॥

यदि पुनर्वैशेषिको ब्रह्मकारणतापद्वेषादुक्तदोषपरिहाराय तत्रापि कारणपरिमाणादेव कार्ये परिमाणारम्भं ब्रूयात् तत्राह—

यदि कारणसंश्रयाद् गुणाद् द्व्यणुकादेः परिमाणमिच्छति
द्व्यणुकादिसमाश्रये तदा परिमाणेऽतिशयो विरुध्यते ॥७५॥

यदि कारणेति । गुणाद् परिमाणगुणात् । परिमाणस्य सजातीयपरिमाणारम्भकत्वनियमेन द्व्यणुकेऽप्यणुकयोरपि पारिमाण्डल्यमेव स्यात् । न तु ततपरिमाणे ततोऽतिशयः स्यात् । ततश्च त्र्यणुकादेरप्यतीन्द्रियतापत्तिः । नित्यपरिमाणस्यानारम्भकत्वनियमोऽपि तदीयो विरुध्येत । वस्तुतस्त्वियं द्व्यणुकादिकल्पनैव निष्प्रमाणा । न तावद् द्व्यणुकादि प्रत्यक्षेण सिध्यति, अमहत्त्वात् । ननु त्र्यणुकं कार्यद्रव्यावस्थं जन्यमहत्त्वाधिकरणत्वात् पटवदिति द्व्यणुकसिद्धौ तत्कारणतया परमाणुरपि सिध्यतीति चेत्, न । अप्रयोजकत्वात् । महत्त्वांशानर्थक्याच्च । तस्य द्व्यणुकव्यावृत्त्यर्थत्वे चान्योऽन्याश्रयात् । ननु त्र्यणुकस्य कार्यद्रव्यत्वेन तन्न्यूनपरिमाणकारणसिद्धौ तस्यातीन्द्रियस्यामहत्त्वादणुद्रव्यं तावत् सिद्धम् । तद् यदि सावयवं तर्हि सिद्धमेव द्व्यणुकम् । अथ निरवयवं तर्हि परमाणवः सिद्धाः । तथापि तन्तुद्वयवत् तद्वयमपि किंचिद् द्रव्यं जनयेदिति तदेव द्व्यणुकं सिध्यतीति द्व्यणुकपरमाण्वोः सिद्धिरिति चेत्,

भवत्वेवं तत्सम्भावना, तत्सत्ता तु प्रमाणं विना न सिध्यतीति । द्व्यणुके कार्यत्वं चासिद्धमिति केचित् । अस्मन्मते तु यद्यपि नासिद्धं तथाप्यप्रयोजकम् । आत्मन आकाशः सम्भूत इत्युपक्रम्य अद्भ्यः पृथिवीति श्रुताया एवापरिच्छिन्नाया एकस्याः पृथिव्यास्तदारम्भोपपत्तेः । न चैवं सर्वत्र तदुपलम्भापत्तिः । घटशरावापिण्डतदवयवकपालादिषु तद्विकारेषु तस्या उपलभ्यमानत्वात् । न हि घटशरावाद्यात्मना मृज्ञोपलभ्यते । न च यत्र कार्यं नास्ति तत्रापि सा विद्यते चेत् कथं नानुभूयेत, न चेत् ,कथं सैका स्यादिति वाच्यम् । तत्र सत्त्वेऽपि तस्याः पराभिमतजातिवदनुपलम्भसम्भवात्, कार्यगतरूपादिष्वेव व्यवहारानुरोधेनादृष्टनिमित्तोद्भूतत्वसम्भवेन तदात्मनैव तस्याः प्रत्यक्षत्वात् । परेषामपि द्व्यणुकोपादानगतोद्भूतरूपादौ प्रमाणाभावात् । अन्यथा तस्यैव लाघवेन प्रत्यक्षत्वनिमित्ततया द्व्यणुकादेरपि प्रत्यक्षत्वापत्तेः । द्व्यणुकादौ त्वदृष्टवशादुद्भूतरूपादि भविष्यति । दृश्यते हि श्यामावयवारब्धेऽपि घटादौ पाकाल्लौहित्यम् । द्व्यणुककारणैकत्वानङ्गीकारे चानन्तद्व्यणुकान्यनन्ताश्च परमाणवः । तत्र च पृथिवीत्वमेकजातिरित्यनेककल्पनागौरवप्रसङ्गात् । अस्मन्मते तु प्रकृतिरेकैव सर्वविकारानुगता मृच्छराव इत्यादिबुद्ध्यालम्बनमिति सैव सामान्यमित्युच्यते न ततः पृथक् पृथिवीत्वमस्ति । सर्वमुक्तौ प्राकृते वा प्रलये न हि तत्सत्त्वे किंचिन्मानमस्ति येन तदिदानीमसत्याः पृथिव्यास्तदतिरिच्येत, प्रत्युत धर्मिणं विना धर्मासम्भवेन तदानीं तदभावश्च । परमाण्वादेरपि विभक्तस्य तदा सत्त्वासम्भवात् । सदेव सोम्येत्यादिश्रुतिविरोधाच्च । एतेनाप्त्वादिकमपि व्याख्यातम् । ननु द्व्यणुककारणस्यान्यत्र दर्शनानुरोधेन तदल्पपरिमाणत्वमनेकत्वं चेति कथमेतदिति चेत्,न । यत्कारणं तन्महदिति तन्त्वादावगतनियमस्याद्भ्यः पृथिवीति श्रुतैकत्वसामर्थ्यावगतमहत्त्वानुरोधिनो बलवत्तया तद्विरोधिनः कार्यक्षुद्रारब्धत्वनियमस्य बा-

धितत्वात् । अत एवानेकारब्धत्वमपि न ग्राह्यम् । उक्तरीत्या द्व्यणुकेऽसंभवात् । किं च लोके समुद्रावयविन एकस्मादतिक्षुद्रो बुद्बुदादिर्दृश्यते, त्वन्मते च दीर्घेभ्यस्तन्तुभ्यो ह्रस्वः पटो भवति, दीर्घादेकस्मादपि सूत्रादल्पं त्रिवृत्सूत्रं लोकशास्त्रसिद्धम् । अस्मन्मते तु विवर्त एवेति न कोपि नियमः । अपि च प्राक् सदसद्वा स्वसामग्रीतो जायमानं यथाऽनेककारणे समवैति तथैकस्मिन्नपि तत्समवाये किं बाधकम्, अनेकत्र तत्समवायदर्शनस्य सावयवसमवायदर्शनतुल्यत्वात् । अनेकावयवत्वसावयवत्वयोरविशेषात् सहकारिसन्निधिक्रमेणैकस्मादप्युपादानात् क्रमकार्योपपत्तेः । तन्नाशश्चादृष्टनाशायत्त इति न किं चिदवद्यम् । किंच द्विरवयवपरमाणुसंयोगासंभवादपि न तेषां कारणता भवेत् । न हि विश्लिष्टा एव ते जगज्जनयेयुः । संयोगश्चाव्याप्यवृत्तिरेव लोके समधिगतः । न हि कुड्यादेर्वस्त्वन्तरेण संयोगस्तस्य परभागस्थमपि व्याप्नोति । न च निरवयवसंयोगः स्वाश्रयं व्याप्नुयादिति वाच्यम् । तथा सति कर्णशष्कुलीसंयोगो गगनमात्रवृत्तिरिति तन्मात्रं श्रोत्रं सर्वदेशस्थानपि शब्दानुपलम्भयेत् । परमाणुसंयोगस्यापरपरमाणुव्यापने च परमाणुद्वयमेकपरमाणुमात्रं स्यादिति न तत्कार्ये परिमाणोपचयो भवेत् । अव्याप्यवर्तनं च संयोगस्य निरवयवे न संभवति विरोधादित्यन्यत्रोपपादितम् । एवं कार्यस्य प्रागुत्पत्तेरसत्त्वे नरशृङ्गादविशेषादुत्पत्तिर्न स्यात् । प्रागभावप्रतियोगित्वादि तद्विशेषणं तदाऽसतोऽनुपपन्नम् । धर्मकाले विद्यमानस्यैव धर्मिणोऽतदधिकरणत्वेन यदा कदाचित् स तदधिकरणमिति तु बालभाषितम् । एवमसतः कारणविशेषसम्बन्धान्तरासम्भवादपि न तदर्थं कारणविशेषे प्रेक्षावत्प्रवृत्तिरुपपन्नेत्यारम्भवादोऽनुपपन्न एवेति भावः ॥ ७९ ॥

अस्तु तर्हि परिणामवादः, तत्र च मृद् घट इति प्रत्यक्षं प्रमाणम् । मृद्घटयोरत्यन्तभेदे गवाश्वयोरिव सामानाधिकरण्यप्रतीत्यनुप-

पत्तेः । एवमत्यन्ताभेदेऽपि न हि भवति घटो घट इति धीः, तस्मात् कार्यकारणयोर्भेदाभेदस्तात्त्विक इति परिणामवादः प्रामाणिक इति तत्राह—

परिणामवादमुपगम्य तथा रचनाद्यसंभवमुवाच मुनिः ॥
परमेश्वरं न हि विना घटते जडरूपवस्तुपरिणाम इति॥७६॥

परिणामवादमिति । यथा सङ्घातादिवादस्यासंभवमुवाच, तथा "रचनानुपपत्तेश्च नानुमानम्" इत्यादिभिः सूत्रैः परिणामवादेऽपि रचनाद्यसंभवं मुनिरुवाचेत्यर्थः । रचना कार्यगतावयवविन्यासः, आदिपदेन कार्योत्पादनादिलक्षणप्रवृत्त्यादिरुच्यते । कुतस्तन्मते रचनाद्यसंभवस्तत्राह—**परमेश्वरमिति** । लोके हि कुलालादिश्चेतनोऽचेतनमृदादि परिणमयति । साङ्ख्यमते च जगत्परिणामकर्ता परमेश्वरो नास्तीति कथं लौकिकन्यायसिद्धं परमेश्वरं विना जडरूपवस्तुनः प्रधानस्य जगत् परिणामो घटेत । न हि जीवास्तत्परिणमयितारः तेषां निर्विशेषाणां तन्मत उदासीनत्वात् । न हि किंचिदपि वस्तु स्वयमेव परिणममानमुभयसंप्रतिपन्नमस्ति, अतः स वादोऽनुपपन्न एव । घटादेः कार्यस्य वस्तुतो मृदादिकारणाभेदे मृदादिरिव कुलालादिव्यापारात् प्राक् सोऽपि किमिति नोपलभ्यते, कुलालादिव्यापारो वा किमर्थः । ननु मृदादिगतपिण्डाद्यवस्थयाऽऽवरणात् तदा विद्यमानोऽपि घटादिर्नानुभूयते, आवरणभङ्गार्थश्च कुलालादिव्यापार इति चेन्न । सर्वस्यापि तत्कार्यस्य सर्वदा तत्कारणात्मना सत्त्वेन सर्वं सर्वस्यावरकमिति तदा किमपि नानुभूयेत । वक्तव्यो वा घटादेः स्थित्यवस्थातः प्रागवस्थायां विशेषः । पिण्डाद्यावरणभङ्गेऽपि प्राक् सन्नेव जन्यत इति कृतं कुलालादिव्यापारेण । असंश्चेदसतोऽप्युत्पत्तौ घटादिरपि तथैव भवितुमर्हतीति किं प्राक् सत्त्वकल्पनया । यत्तु मृद् घट इति प्रतीत्या तयोर्भेदाभेद इति । तन्न, तयोः परस्परभावरूपयोरेकदैकत्रानुपपत्तेः । न वा प्रतीयमानाभेदस्याभावं

काश्चिदनुभवति । ननु भेदो नाभावः किं तु व्यावृत्तघटादिस्वरूपमेव, अभेदस्तु घटपटादौ सर्वत्रानुगता पृथिवीति पृथिव्यात्मना घटपटाद्यभिन्नं घटाद्यात्मना च भिन्नमिति भेदाभेदव्यवहार इति चेत्, भवत्वेवं सर्वत्र पृथिव्येका घटादेस्तस्याश्च भेद एव चेद् भेदवादिमतमेव समर्थितं स्यात् । तथा च प्रागुत्पत्तेर्घटादेः सत्त्वासत्त्वाद्याश्रितदोषस्तदवस्थ एव, अभेदे च तस्याः प्रागुत्पत्तेरुपलम्भप्रसङ्गादिदोषो न निवर्तेत । सर्वस्य पृथिव्यात्मनैव घटाद्यात्मनाऽप्यभेदः स्यात् । पटाद्यभिन्नपृथिव्यभिन्नत्वाद् घटादेस्तयोर्भेदाभेद इति चेत्, तस्यैवेदानीं दुर्निरूपत्वात् । तस्मान्नास्त्येव भिन्नाभिन्नं वस्तु । एवं च कारणाभिन्नकार्यस्य कारणातिरिक्तसत्ताशून्यत्वमेव कारणतादात्म्यम्, तदेव च मृद् घट इत्यादिसामानाधिकरण्यप्रतीत्यालम्बनमिति विवर्तवाद एव प्रमाणसिद्धो न वादान्तरमिति भावः॥ ७६ ॥

नन्वारम्भादिपक्षत्रयनिराकर्तुः सूत्रकारस्य किं सर्वत्राविशिष्ट एवाशयः किं वा क्वचिद् विशेषोऽस्तीति जिज्ञासायामाह—

क्वचिदभ्युपेत्य कथनं कुरुते परपक्षदूषणकथावसरे ॥
निजपक्षदोषपरिहारपरः क्वचिदभ्युपेत्य वदतीह मुनिः७७॥

क्वचिदभ्युपेत्येति । परदूषणकथावसरे परपक्षदूषणप्रधाने तर्कपादे क्वचिद् वैशेषिकाधिकरणे तदुक्ताणुकारणप्रक्रियामभ्युपेत्य तेनैव न्यायेन चेतनब्रह्मकार्यं जगदिति स्वपक्षे वैशेषिकोक्तकारणगुणारम्भदोषपरिहारपरः सन् महद्दीर्घवदित्यादिना कथनं कुरुते । क्वचिद् रचनानुपपत्त्याद्यधिकरणे तन्मतं केवलमुपेत्योपन्यस्येह शास्त्रे मुनिर्दूषणमात्रं वदतीति विशेष इत्यर्थः । वैशेषिकाणां हि कारणगुणारम्भाश्रयं दोषं तदभ्युपगमेनैव व्यभिचारेण परिहर्तुं प्रथममेवाधिकरणं विरच्य "उभयथाऽपि न कर्मातस्तदभावः" इत्यधिकरणान्तरेण तदीयं मतं दूषयामास न तथेतरयोः, केवलतन्मतदूषणस्यैव तत्र कृतत्वादिति भावः ॥ ७७ ॥

उक्तमेव विवेचयति—

परपक्षनिषेधमाचरन् क्वचिदङ्गीकरणं करोति सः ॥
परदर्शितदोषनुत्तये क्वचिदित्येष विशेष ईरितः ॥ ७८ ॥

परपक्षेति ।-परिणामादिपक्षनिषेधमित्यर्थः । आचरन्निति हेतौ शतृप्रत्ययस्तेन परपक्षनिषेधहेतोस्तदर्थमङ्गीकारः क्वचित् परोक्तदोषपरिहारार्थमित्यर्थः । अङ्गीकरणं करोति परपक्षस्यानुवादमात्रं करोति, न तु तद्दृष्टान्तमाश्रित्य स्वपक्षे कं चिद् दोषं परिजिहीर्षतीत्यर्थः । उत्तरार्द्धे क्वचिदिति वैशेषिकाधिकरण इत्यर्थः ॥ ७८ ॥

यस्मादेवं सूत्रकारः संघातादिवादामिव परिणामवादमपि निराचकार तस्माद् भोक्त्रापत्तेरविभागश्चेदित्यादिसूत्रे यद् वादिभिरद्वैतसमन्वये भोक्तृभोग्यादिसांकर्यं प्रसञ्जितं तत् परिजिहीर्षुर्भेदाभेदघटितं परिणामवादमभ्युपगम्य स्याल्लोकवदिति तत्परिहारं मुनिराह न तु स्वसिद्धान्ततया, तथा सति तत्प्रतिषेधायोगात् । स्वसिद्धान्तसिद्धिस्तूत्तरत्र "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यत्र द्रष्टव्येत्याह—

भोक्त्रादिसूत्रे परिणामवाद-
माश्रित्य तद्वादिभिरुक्तदोषम् ॥
समादधानो मुनिराह तस्मात्
सिद्धान्तसिद्धिः पुनरुत्तरत्र ॥ ७९ ॥

भोक्त्रादीति ॥ ७९ ॥

ननु निरसिष्यमाणस्यापि विकारवादस्यैव तत्प्रसक्तस्याऽङ्गीकारश्चेदारम्भवादोऽपि स्वभाववादादिमतनिराकरणेन कार्यकारणत्वादिसमर्थनाय किमिति नाङ्गीकृत इत्याशङ्क्य तन्न । न हि कार्यकारणादिरिह प्रतिपिपादयिषितः तस्य मायामात्रत्वात्, किं त्वद्वैतं ब्रह्म । तत्र च भेदाभेदाश्रयः परिणामवादोऽभेदांशेनाद्वैतसमर्थन उपकरोति, भेदांशेन च प्रत्यक्षादिकं चानुसरतीति प्रथमं प्रत्यक्षादिप्रामाण्याश्रयणेऽपि नाद्वैतसमन्वये कश्चन बाधोऽस्तीति दर्शयितुं विकारवाद ए-

वासंमतोऽप्याश्रित इत्याशयेनाह—

प्रत्यासन्ना परिणतिरियं विप्रकृष्टस्तु पूर्वः
संघातादिः सकल उदितो वेदसिद्धान्तसिद्धेः ॥
एतावत्त्वादियमभिमता सूत्रकारस्य भाति
भ्रान्तिभ्रष्टस्फुटनिजमनःकौशलानां नराणाम् ॥८०॥

प्रत्यासन्नेति । वेदसिद्धान्तसिद्धेर्वेदान्तसिद्धान्तसिद्ध्यर्थमियं परिणतिः परिणामवादः प्रत्यासन्ना, विवर्तं प्रत्युपायत्वात । पूर्व उदितः पूर्वपक्षत्वेनोक्तः । पूर्वमुदित इति वा पाठः । संघातादिस्तु विप्रकृष्टो व्यवहारमात्रोपयुक्तत्वाद् वेदार्थनिर्णयानुपयोगी । अयमेव तुशब्दसूचितो विशेषः । इयमिति विशेषणेन परिणामस्य प्रत्यक्षसिद्धत्वाद् व्यवहारोपयुक्तत्वमप्यस्तीति दर्शयति । ननु सूत्रव्याख्यातृभिः कैश्चत् परिणामवादः सूत्रकारसंमत इति स्वग्रन्थे लिखितं तत् कथं तत्र तदसंमतिरिति चेत्, लिखन्तु नाम तेषां सूत्रकृत उक्ताशयानभिज्ञतया भ्रान्त्यैव तदित्याशयेनाह–एतावत्त्वादिति । सिद्धान्तप्रत्यासन्नत्वादित्यर्थः । सूत्रकारस्येयमभिमतेति भातीति सम्बन्धः । सविशेषाद्वैतमेव सूत्रकृत्संमतमिति भ्रान्त्या भ्रष्टं स्फुटं निःसंदिग्धं निजमनःकौशलं विचारदक्षत्वं येषां तेषामित्यर्थः ॥ ८० ॥

न केवलं श्रौताद्वयप्रत्यासत्त्या परिणामवादाभ्युपगमः किं तु तेन विना शिष्यं प्रति शुद्धाद्वयोपपादनासम्भवादपि सोऽभ्युपेत इत्याशयेनाह—

आरोपदृष्टिरपवादकदृष्टिरेवं
व्यामिश्रदृष्टिरिति दृष्टिविभागमेनम् ॥
संगृह्य सूत्रकृदयं पुरुषं मुमुक्षुं
सम्यक् प्रबोधयितुमुत्सहते क्रमेण ॥ ८१ ॥

आरोपदृष्टिरिति । क्रमेणैनमुक्तदृष्टिविभागं संगृह्यायं सू-

त्रकृत् सम्यगबाधितं पुरुषं परमात्मानं मुमुक्षुं परं प्रति बोधयितु-मुत्सहत इति सम्बन्धः । सम्यगक्लेशेनेति वा ॥ ८१ ॥

उक्तदृष्टित्रयं परस्परं विभज्य दर्शयति—

आरोपदृष्टिरुदिता परिणामदृष्टि-
र्द्वैतोपशान्तिरपवादकदृष्टिरन्त्या ॥
मध्ये विवर्तविषया त्रयमिश्रदृष्टिः
व्यामिश्रदृष्टिरधरोत्तरभूमिभावात् ॥ ८२ ॥

आरोपदृष्टिरिति । पूर्वश्लोकोदिता याऽऽरोपदृष्टिः सा परि-णामदृष्टिर्ब्रह्मणि प्रपञ्चाध्यारोपितदृष्टिस्तया हि ब्रह्मणः प्रपञ्चात्म-त्वं विषयीक्रियते । एवं तत्रोदिता या अपवादकदृष्टिः साऽन्त्या च-रमा कार्यरूपा द्वैतोपशान्तिः सविलासाविद्योपशमकाद्वैतब्रह्मसाक्षा-त्कारः । एवं तत्रैवोदिता या व्यामिश्रदृष्टिः सा मध्ये परिणामद्वैतो-पशमदृष्ट्योर्मध्ये विवर्त्तविषया त्रयमिश्रदृष्टिः, अतत्त्वतोऽन्यथाभाव-रूपविवर्त्तत्वविषयाया दृष्टेर्ब्रह्मणि प्रपञ्चतदभावत्रयविषयत्वात् सा त्र-यमिश्रदृष्टिर्भवतीत्यर्थः । अन्त्यमध्यादिपदेन सूचित एतद्दृष्टीनां क्रमे हेतुमभिप्रेत्याह—अधरोत्तरेति । निकृष्टमध्यमोत्तमभूमित्वादि-त्यर्थः ॥ ८२ ॥

तद्दृष्टीनामधरोत्तरभावमेव विवृणोति—

तत्त्ववेदकमानदृष्टिरधमा तत्त्वक्षतिर्मध्यमा
तत्त्वप्रच्युतिविभ्रमत्वतिकरी तत्रान्त्यदृष्टिर्मता ॥
जीवैकत्वमुमुक्षुभेदगतितो व्यामिश्रदृष्टिर्द्विधा
भिन्ना तत्र च पूर्वपूर्वविलयादूर्ध्वोर्ध्वलब्धिर्भवेत् ॥८३॥

तत्त्ववेदकेति । प्रत्यक्षादेस्तत्त्ववेदकमानत्वदृष्टिरधमा भव-ति, अविवेकादिमत्पुरुषसाधारणत्वात् पुरुषार्थानुपयोगित्वादनर्थ-हेतुत्वादनात्मसत्यत्वविषयत्वाच्च साऽधमेत्यर्थः । तत्त्वक्षतिः प्रपञ्च-सत्यत्वक्षतिकरी या विवर्तदृष्टिः सा मध्यमा, ब्रह्मविचाराद्यधीनत्वि-

वर्तदृष्टेर्विवेकादिमत्पुरुषाश्रयत्वाद् परम्परया मोक्षोपयोगित्वादात्मतत्त्वविषयत्वाच्च सा पूर्वदृष्ट्यपेक्षयोत्तमा, तावत्या द्वैतोपशान्त्यसम्भवाद् द्वैतोपशान्त्यपेक्षया जघन्येति मध्यमेत्यर्थः। या पुनरन्त्या दृष्टिः सा तत्त्वप्रच्युतिविभ्रमक्षतिकरी, प्रपञ्चतत्त्वविरोधिनी प्रपञ्चभ्रमत्वगोचरा या विवर्तदृष्टिस्तस्याः क्षतिकरी, अतः सोत्तमपुरुषाश्रयत्वाद् सकलद्वैतभ्रमनिवर्तकतया साक्षान्मोक्षसाधनत्वान्निरतिशयानन्दात्ममात्रविषयत्वाच्च सर्वोत्तमा मतेत्यर्थः। अथवा तत्त्वस्थानारोपितरूपस्य केवलचिदानन्दस्य प्रच्युतिस्तिरस्कारो लेशतोऽपि ब्रह्मान्यवस्तुदर्शनरूपा या विवर्तदृष्टिः सा चातत्त्वतोऽन्यथाभावत्वेन भ्रमरूपा तस्याः क्षतिं बाधं करोतीति सा तथा। तत्र तासां मध्येऽन्त्या परां काष्ठां प्राप्ता एवंभूताऽपवाददृष्टिर्मता संमता वाक्यार्थावगतिं प्रसवन्तं संनिकृष्टत्वादित्यर्थः। विवर्तदृष्टेरपि जीवैकत्वनानात्वविषयतया द्वैविध्यमाह—जीवैकत्वेति। बहवो जीवास्ते च क्रमेण मुमुक्षवोऽनाद्यनन्तश्च संसारमोक्षमार्ग इति विवर्ते प्रथमा दृष्टिः, द्वितीया च अहमेक एव सर्वकार्यकरणेष्वन्तःसाक्षी मदविद्याकल्पितं च मुक्तामुक्तविद्वदज्ञानेकजीवेशादिभिन्नं जगदवभासते मद्बोधाच्च निवर्त्तिष्यत इति। गतितोऽवगतितः। उक्तदृष्टीनां कालतोऽप्यधरोत्तरभावं दर्शयति—तत्र चेति। दृष्टीनां मध्य इत्यर्थः। चोऽवधारणे। पूर्वपूर्वदृष्टिविलयादेवोर्ध्वोर्ध्वदृष्टिलब्धिर्भवेन्नान्यथेति तासां पूर्वापरीभावः। यद्यप्युत्तरोत्तरदृष्ट्यैव पूर्वपूर्वविलयो भवेत्, तथापि परिणामादेर्युक्तितोऽसम्भवबुद्धिदशायामेव विवर्तत्वादिदृष्टिर्भवतीति पूर्वपूर्वविलयादित्युक्तमिति ॥ ८३ ॥

पूर्वपूर्वविलयादित्युक्तमेवोपपादयति—

परिणामबुद्धिमुपमृद्य पुमान् विनिवर्तयत्यथ विवर्तमतिम्॥
उपमृद्य तामपि पदार्थधिया परिपूर्णदृष्टिमुपसर्पति सः॥८४॥

परिणामेति। कूटस्थस्य तत्त्वतोऽन्यथाभावस्यासम्भवात् तां

बुद्धिमुपमृद्य विलाप्य पुमान् श्रवणाधिकारी अथानन्तरं विवर्तमतिं विनिवर्त्तयति विशेषेण निश्चित्य वर्तयत्युत्पादयति । तां विवर्तमतिम् । पदार्थधिया शुद्धतत्त्वंपदार्थनिश्चयेन, परिपूर्णदृष्टिं निष्पपञ्चप्रत्यग्ब्रह्माभेददृष्टिम् ॥ ८४ ॥

ननु मुमुक्षोः श्रवणाधिकारिणो मोक्षसाधनसाक्षात्कार एव साधनीयः, किं परिणामादिदृष्ट्या ! सत्यम् । स एव ताभ्यां विना न सम्भवतीत्याशयेनाह—

अथशब्दसूचितमुमुक्षुरिमं खलु दृष्टिभेदमुदितक्रमतः ॥
उपढौकते विगलिताखिलधीरवतिष्ठते निजमहिम्नि ततः ८५

अथशब्देति । अथातो ब्रह्मजिज्ञासेति सूत्रस्थाथशब्देन सूचितो यो विवेकवैराग्यादिमान्मुमुक्षुः श्रवणाधिकारी खल्विमं दृष्टिभेदं क्रमत उपढौकते प्राप्नोति यदा ततस्तदा विगलिताखिलधीः सन् निजमहिम्नि अवतिष्ठते स्वस्वरूपे स्थितो भवतीत्यर्थः । सूत्रकारस्याप्ययं क्रमिकदृष्टिभेदः संमत इति द्योतनायाथशब्देत्युक्तम् ॥ ८५ ॥

ननु मुमुक्षोः परिणामादिधियं विना शुद्धब्रह्मसाक्षात्कारः कथं न भवेत्, न हि विरुद्धयोर्हेतुहेतुमद्भावोऽस्तीत्याशङ्क्याह—

परिणाम इत्यथ विवर्त इति
बहवोऽहमेव च मुमुक्षुरिति ॥
परिपुष्कलं च परमं पदमि-
त्यवगत्य तिष्ठति महिम्नि निजे ॥ ८६ ॥

परिणाम इति । अथशब्दोक्तोऽधिकारी प्रथमं सृष्टिवाक्यादिसमन्वयालोचनेन ब्रह्मैव प्रपञ्चोपादानं मृदिव घटस्येत्यवगच्छति, उपादानतैव अत्र परिणामगिरा विवक्षिता । अथ तदनन्तरमारम्भणाद्यधिकरणन्यायेन निषेधवाक्यतात्पर्यालोचनेन सृष्टिवाक्यार्थो विवर्त इत्यवगच्छति पूर्वबुद्धिं विना ब्रह्मणि प्रपञ्चस्य विवर्तत्वनिश्चयासम्भवात् । यत्र यदवगतं तत्रैव तन्निषेधे तस्य मि-

थ्यात्वनिश्चयेन तस्य विवर्तत्वं निश्चीयेतेति ब्रह्मणि प्रपञ्चासञ्जक-परिणामधीरपेक्षितैव। न वा प्रपञ्चस्य विवर्तत्वधियमन्तरेण शुद्धात्मसाक्षात्कारो भवेत्। एवमविचारावस्थायां जीवबहुत्वज्ञानमपि दृष्टादृष्टद्वारेण मुमुक्षाद्वारा तत्रोपयुज्यत इत्याशयेनाह—बहव इति। मुमुक्षव इति विपरिणतानुषङ्गः, जीवा इत्यर्थः। इति चोति सम्बन्धः। इत्यनेन प्रकारेण परिपुष्कलं पूर्णं परमं शुद्धं पदं स्वस्वरूपमिति चावगत्य निजे महिम्नि तिष्ठति, अतः परिणामादिधियोऽप्यस्ति साक्षात्कार उपयोग इत्यर्थः ॥ ८६ ॥

"मध्ये विवर्तविषया द्वयमिश्रदृष्टिः" इत्युक्तं विवर्तधियो मध्यस्थत्वमुपपादयति—

परिणामधियो विवर्तधीरपवादात्मतया व्यवस्थिता ॥
सकलद्वयमर्दिनीं धियं प्रति सा ऽऽरोपगिराऽऽभिधीयते॥८७॥

परिणामधिय इति। ब्रह्मणः प्रपञ्चात्मत्वधियो विवर्तधीस्तत्र तदत्यन्ताभावमपि विषयीकुर्वाणाऽपवादतयाऽवस्थिता भवतीति सा तदुत्तरा। एवं सकलद्वयमर्दिनीं शुद्धाद्वयात्मधियं प्रति सा विवर्तधीरारोपगिराऽभिधीयत इत्यारोपस्य निषेधप्राग्भावित्वात्सा तत्पूर्वाऽपीति मध्यमेत्यर्थः। यद्यपि परिणामबुद्धिमुपमृद्येत्यनेनार्थादयमर्थः सिद्धः, तथापि स एवानेन विवृत इति द्रष्टव्यम्। अथवा पूर्वश्लोके विवर्तधियो निष्प्रपञ्चात्मसाक्षात्कार उपयोगानुक्तेरितरानुवादेन स एवानेन दर्शित इति द्रष्टव्यम् ॥ ८७ ॥

अत एव विवर्तदृष्टेर्व्यामिश्रत्वं प्रागुक्तमुपपन्नमित्याह—

उभयव्यतिमिश्ररूपतां भजते तेन विवर्तधीरियम् ॥
प्रथमोत्तमयोर्द्वयोः पुनर्व्यतिमिश्रभवनं न विद्यते ॥८८॥

उभयेति। परिणामोपशान्तदृष्टिद्वयव्यतिमिश्ररूपतामित्यर्थः। प्रपञ्चसंसर्गविषयत्वेन तदभावतत्त्वविषयत्वेन च तस्या उभयव्यामिश्ररूपत्वमित्यर्थः। येनैवं तेनेत्यादौ योजनीयम्। प्रथमोत्तमयोरा-

द्यन्तयोर्दृष्ट्योरित्यर्थः । न विद्यत इति । एकैकमात्रस्वरूपविषयत्वादित्यर्थः ॥ ८८ ॥

एवं परिणामादिदृष्टीनामेकाधिकारिणि क्रमवर्त्तिनीनां मोक्षोपयोग उक्तः । संप्रति विरुद्धदृष्टीनामेकपुरुषाश्रयत्वासंभवादधममध्यमोत्तमाधिकारिभेदाश्रयत्वं ये वदन्ति तन्मतमनुवदति—

कृपणधीः परिणाममुदीक्षते
क्षपितकल्मषधीस्तु विवर्तताम् ॥
स्थिरमतिः पुरुषः पुनरीक्षते
व्यपगतद्वितयं परमं पदम् ॥ ८९ ॥

कृपणधीरिति । प्रपञ्चादविरक्तबुद्धिः, प्रपञ्चः सर्वोऽपि ब्रह्मणस्तात्त्विकः परिणामोऽहं च वस्तुतः कर्ता भोक्ता तमेवाराध्य तत्प्रसादाच्छ्रेयः प्राप्स्यामीत्युदीक्षत इत्यर्थः । क्षपितो निरस्तः कल्मषः पापं यस्या धियस्तद्युक्तस्तु संसाराद्विरक्तो ब्रह्मशास्त्रं शृण्वन्संसारस्य विवर्ततामुदीक्षते । श्रवणमननध्यानादिभिः परिपक्वैः स्थिरमतिर्निश्चलीकृतबुद्धिः पुरुषः पुनर्व्यपगतद्वितयं शुद्धं परमं पदमीक्षत इत्यर्थः । स्थितमतिरिति पाठे स्थितप्रज्ञो जीवन्मुक्त इत्यर्थः॥८९॥

जीवैकत्वानेकत्वधीरपि पुरुषभेदेनैव भवेदित्यपि तन्मतमित्याह—

पुरुषभेदवशाद् विविधा भवेत्
क्षपितकल्मषधीरपि मध्यमा ॥
जगदनेकमुमुक्षुकमीक्षते
पुरुष एकतरो न तथेतरः ॥ ९० ॥

पुरुषभेदवशादिति । मध्यमोत्तमाधिकारवत्पुरुषभेदवशादित्यर्थः । क्षपितकल्मषस्य धीरित्यर्थः । तद्वैविध्यमाह—जगदिति । एकतरः पुरुषो जगदनेकमुमुक्षुकमीक्षते, इतरोऽपरो न तथा, बहुमुमुक्षकं नेक्षत इत्यर्थः ॥ ९० ॥

एवं परपक्षमुपसंहरन् दूषयति—

इति तु केचिदुशन्ति महाधिय-
स्तदपि सम्भवतीति न दुष्यति ॥
इह तु सूत्रकृताऽथगिरोदितः
पुरुष एकविधस्त्रिविधो न तु ॥ ९१ ॥

इतीति । महाधिय इत्युपहासः । अपिरवधारणे । नैव तत्सम्भवति यतो दुष्यतीति सम्बन्धः । अथवा तदपि न सम्भवतीति हेतोर्दुष्यतीत्यन्वयः । भिन्नाश्रयाणां हि तासां दृष्टीनामुपकार्योपकारकभावायोगात्तदाश्रयणं व्यर्थं स्यादित्यर्थः । वस्तुतस्तु सूत्रकारासंमतमेव तन्मतमित्याह—इहेति । तुरवधारणे । एकविध एवैक एवेति सम्बन्धः । अथवा उक्तमतमङ्गीकरोति—इति त्विति । संभाव्यन्त एवैतादृशाधिकारिणो मतिशुद्धितारतम्यदशापन्ना इत्यर्थः । अथशब्दसूचित एकविध एवाधिकारी तस्य क्रमभाविन्य एता दृष्टय इत्यस्मन्मतमित्याह—इहेति ॥ ९१ ॥

कुत एतदित्यत आह—

तिसृषु भूमिषु तस्य च तिष्ठतः
क्रमवशात् स्वयमुत्तमभूमिका ॥
समुपसर्पति तत्र च तिष्ठतः
समुपशाम्यति कारणकार्यधीः ॥ ९२ ॥

तिसृष्विति । परिणामादिदृष्टित्रयमुद्दिश्य क्रमेण प्रवृत्तस्य पूर्वदृष्टिद्वयपरिपाके पश्चात्स्वयमनायासेनोत्तमदृष्ट्यवस्था समुपसर्पति तं प्राप्नोति । तत्र साक्षात्कारभूमौ तिष्ठतश्च कारणादिसमस्तभेदधीः शाम्यतीत्यर्थः । सूत्रकारो ह्येकमेवाधिकारिणमाश्रित्य शास्त्रमारभमाणस्तस्यैव दृष्टित्रयं विवक्षति, सृष्ट्यादिवाक्यसमन्वयाविचारेणारम्भणादिन्यायेन "प्रकृतैतावत्त्वं हि प्रतिषेधाति" इत्यादिना निषेधवाक्यतात्पर्यनिरूपणेन "आनन्दादयःप्रधानस्य" इति ब्रह्मवाक्यपरिमितिनिश्चयेन "संप-

द्याविर्भावः स्वेन शब्दात्"इति मोक्षस्वरूपनिरूपणेन च दृष्टित्रयस्याप्येकस्मिन् सम्पादितत्वात् । अन्यथा सृष्ट्यादिवाक्येन ब्रह्मण्यप्रसक्ते प्रपञ्चे कस्य विवर्तत्वं न्यायत उपपादयेत्,निषेधवाक्येन किं वा प्रतिषेधयेत् । विवर्तत्वविषयं विना च कथं शुद्धात्मप्रतिपादकपदेयत्तां निरूपयेत् ,कथं वाऽन्ते चिन्मात्रस्वरूपावस्थानं निरूपयितुं शक्नुयादिति भावः ॥ ९२ ॥

एवं दृष्टित्रयस्यैकपुरुषाश्रयत्वसमर्थनमुपसंहरति—

श्रुतिवचांसि मुनिस्मरणानि च
द्वयविशारदगीरपि सर्वशः ॥
त्रयमपेक्ष्य दशात्रितयं विना
न हि घटामुपयान्ति कदाचन ॥ ९३ ॥

श्रुतिवचांसीति । सृष्टितत्प्रतिषेधादिविषयश्रुतिवचांसीत्यर्थः । मुनिस्मरणानि संप्रत्युपन्यस्तानि सूत्राणि, चकारः प्रागुक्तन्यायसमुच्चयार्थः । द्वयस्य श्रुतिसूत्रयोरर्थनिर्णयो विशारदा ये भाष्यकारादय एतेषां गीरपि सर्वश इति प्राचुर्याभिप्रायम् ।एकस्मिन्दृष्टित्रयमपेक्ष्य घटां घटनामुपयान्ति । एतदेव व्यतिरेकमुखेन द्रढयति—दशात्रितयमिति । तत्तद्दृष्ट्यवस्थादशात्रितयं विनोक्तश्रुत्यादयः कदापि न ह्युपपन्ना इत्यर्थः ॥ ९३ ॥

तस्माद्वेदान्तानामद्वये समन्वयेऽपि प्रत्यक्षादीनामविवेकिमहाजनसिद्धं तात्त्विकप्रामाण्यं सिध्यतीति न समन्वयस्य तेन बाध इत्याशयेन सूत्रकारो भोक्त्रादिसूत्रे स्याल्लोकवदिति लोकसिद्धदेहात्मभावतुल्यतां लोकग्रहणेन परिणामस्य दर्शयंस्तदङ्गीचकार न तु सिद्धान्ततयेति तदुपपादनमुपसंहरति—

अतोऽनपोह्यैव तु तत्त्वसंवि-
दुत्पादनेऽध्यक्षमितेः पुरस्तात् ॥
सामर्थ्यमक्षादिविरोधमस्य
निवारयामास समन्वयस्य ॥ ९४ ॥

अत इति । यत एवं परिणामवादस्याप्यत्रोपकारिताऽतो हेतोरित्यर्थः । स्वसिद्धान्तात्पुरस्तादध्यक्षादिमितेस्तत्त्वसंविदुत्पादने तत्त्वावेदने सामर्थ्यमनपोद्यैवास्याद्वयब्रह्मसमन्वयस्याध्यक्षादिविरोधं निवारयामासेति संबन्धः ॥ ९४ ॥

किं चोत्तराधिकरणे कार्यस्य कारणाद्वस्तुतो भेदाभावे वाचारम्भणं विकारो नामधेयमित्यादिश्रुतिं हेतुतया वदन् विकारमृषात्वस्य प्रामाणिकत्वं दर्शयतीति विवर्त्तवादमेव सूत्रकारः सिद्धान्ततया मेने नाक्षादिमानस्य तत्त्वावेदकत्वमित्यभ्युपगमं परित्यजति स इत्याशयेनाह—

इहाधुनारम्भणशब्दशक्तिं
संश्रित्य तत्त्वावगतिक्षमत्वम् ॥
अक्षादिमानस्य निराकरोति
समन्वयस्यापनयन् विरोधम् ॥ ९५ ॥

इहेति । "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्युत्तरस्मिन्नधिकरणे इत्यर्थः । अधुना शिष्यस्य प्रागुक्तविशेषादिभिः परिणामस्यासाधुत्वप्रतिसंधाने, आरम्भणशब्दशक्तिं वाचारम्भणं विकार इत्यादिवाक्यस्थारम्भणादिशक्तिम् । तेन हि वाक्येन विकारो नामधेयमिति विकारस्य घटपदादेः शब्दमात्रत्वं दर्शयता घटपटादिविकारस्य सत्ता निवारिता, अत एव मृत्तिकेत्येव सत्यमिति वाक्यशेषेणैवकारेण विकारासत्यत्वमनूद्य कारणमात्रस्य सत्यत्वाशयेन मृत्सत्येत्युक्तम् । अत एतद्बलादध्यक्षादिमानस्य तत्त्वावगतिक्षमत्वम् अद्वयसमन्वयस्य विरोधमपनयन्निराकरोतीति विवर्त एव प्रामाणिक इति भावः ॥ ९५ ॥

ननु परिणामवादाश्रयणेऽपि समन्वयविरोधपरिहारः सेत्स्यतीत्युक्ते किं तदर्थं विवर्ताश्रयणेनेति चेत्सत्यं, सप्रपञ्चाद्वयसमन्वयस्य परान्युपेतस्य तेनाक्षादिविरोधः परिहियेत । तं पुनरखण्डाद्वयसमन्व-

यस्य स्वसंमतस्येति समन्वयविशेषं श्रुत्यादिसंमतं दर्शयन्नाह—

अखण्डवाक्यार्थमनुव्रजन्ती
समन्वयोत्थापितबुद्धिवृत्तिः ॥
अक्षादिभिस्तत्त्वनिवेदने हि
सद्यः परिम्लायति निर्विशङ्कम् ॥ ९६ ॥

अखण्डेति । अनुव्रजन्ती विषयीकुर्वाणा परिम्लायति बाध्यते अतस्तद्बाधपरिहारार्थमक्षादिमानविषयस्यातात्त्विकमुत्तराधिकरणे दर्शयतीत्यर्थः ॥ ९६ ॥

ननूभयप्रामाण्यानुरोधेन सविशेषमेवाद्वयं किं नाङ्गीक्रियत इति चेत् न। मृषात्वेन श्रुत्युक्तविकारादिविशेषस्य श्रुतिसमन्वयगोचरत्वायोगात्। किंच "एकमेवाद्वितीयम्, अपागादग्नेरग्नित्वं,नेह नानास्ति" इत्यादिवचनैः "प्रकृतैतावत्त्वं हि प्रतिषेधति" इत्यादिसूत्रैस्तव्याख्यातृभाष्यकारादिवाक्यैश्चाखण्डतात्पर्यस्यैव श्रुतेराश्रयणीयत्वादित्याशयेन प्रथमाध्यायोक्तं स्मारयन्नाह—

अखण्डमेवाद्वयमात्मतत्त्वं त्रयीशिरोवाक्यमनुप्रविष्टाः ॥
वदन्ति शब्दा इति शब्दशक्तिनिरूपणे पूर्वमुदीरितं हि॥९७॥

अखण्डामिति । त्रयीशिरोवाक्यमनुप्रविष्टास्तत्त्वमादिवाक्यैकतां गताः सत्यज्ञानानन्दादिशब्दाः शब्दशक्तिनिरूपणे अखण्डमेव वदन्तीति पूर्वं प्रथमाध्याये निरूपितमित्यर्थः ॥ ९७ ॥

ततः किमित्याशङ्क्याह—

अतो विरोधस्य निराससिद्ध्यै
निरस्यतेऽक्षादिषु तत्त्वभागः ॥
संरक्ष्यतेऽसंव्यवहारशक्ति-
भागः पुनः सर्वमतोऽनवद्यम् ॥ ९८ ॥

अत इति । विरोधस्याखण्डार्थसमन्वयविरोधस्य अक्षादिप्रमाणेषु यस्तत्त्वभागः तत्त्वनिवेदनसामर्थ्यभागः। तर्हि तेषामप्रामाण्य-

मेव स्यादित्याशङ्क्याह—संरक्ष्यत इति । एवमपि तेषां सांव्यवहारिकप्रामाण्यमविरुद्धमित्यर्थः । तस्माद्वेदान्तानामखण्डब्रह्मसमन्वये न प्रत्यक्षादिसिद्धभेदव्यवहारापलाप इत्यभिप्रेत्योपसंहरति—सर्वमिति ॥ ९८ ॥

किं च प्रत्यक्षादि न तत्त्वावेदकं दोषजन्यज्ञानकरणत्वात् शुक्तिरजतादिज्ञानकरणवत्। न चासिद्धिः,अविद्यादोषजन्यत्वात्प्रपञ्चज्ञानस्य । न चाविद्याया विश्वजनन्याः कथं दोषत्वमिति वाच्यम्। स्वप्रकाशब्रह्मस्फुरणप्रतिबन्धकतया शुक्तिस्फुरणप्रतिबन्धकदोषवद्दोषत्वोपपत्तेरित्याशयेनाह—

चितिवस्तुनः स्वमहिमस्फुरणे
स्वयमेव कारणमिति प्रगतम् ॥
प्रतिबध्य तच्चितिगताग्रहणं
विपरीतबुद्धिमुपढौकयति ॥ ९९ ॥

चितिवस्तुन इति । चिद्वस्तुनः इत्यर्थः । स्वमहिम्नोऽद्वयानन्दब्रह्मस्वभावस्य स्फुरणे स्वयमेवोपचारात् कारणमिति प्रगतं स्वप्रकाशत्वावेदकश्रुत्यादिसिद्धम् । अत्र "स्वयं दासास्तपस्विनः" इतिवत्स्वयमेव कारणमित्यन्याव्याहृत्तिमात्रपरमिति वा द्रष्टव्यम् । ततश्च तस्य स्वत एव प्रकाशमसक्तावपि तदभानात्तत्प्रतिबन्धकमज्ञानमेव वक्तव्यमित्याह—प्रतिबध्येति । चितिगताग्रहणं तु चितिवस्तु प्रतिबध्य यथावत्स्फुरणमाच्छाद्य विपरीतबुद्धिं द्वैतप्रपञ्चबुद्धिमुपढौकयति प्रापयति । अतोऽधिष्ठानतत्त्वप्रकाशं प्रतिबध्य तद्विपरीतभ्रमजनकत्वादविद्यादोष एव, अतस्तज्जन्यज्ञानकरणत्वमक्षादेर्नासिद्धमिति भावः ॥ ९९ ॥

एवं तर्हि तस्य व्यवहारिकप्रामाण्यमपि न स्यादित्याशङ्क्य अविद्यया व्यवहारयोग्यप्रपञ्चजननात्तद्विषयाक्षादेर्न तद्विहन्यत इत्याश-

येनाह—

व्यवहारनिर्वहणशक्तिमसौ
न चिद्ग्रहोऽस्य विनिवारयति ॥
परमार्थवेदनविधिक्षमता-
मवखण्डयन्नपि मनःप्रभृतेः ॥ १०० ॥

व्यवहारेति । अस्य मनःप्रभृतेरिति संबन्धः । तस्य तर्हि तद्वृत्तत्त्वावेदनमपि मा निवारयतु, तत्राह-परमार्थेति । विधिरुत्पादनं तदक्षमतामित्यर्थः । दोषजन्यस्य तदयोगादिति भावः ॥१००॥

नन्वविद्या चेद्ब्रह्मप्रकाशप्रतिबन्धिका तर्हि तस्यां सत्यां तत्त्वमादिवचनाद्ब्रह्मसाक्षात्कारो न भवेदिति चेत्, दूरस्थत्वादिदोषे चक्षुरादिना तत्त्वादितत्त्वज्ञानप्रतिबन्धके सत्यप्याप्तवाक्यात्तत्त्वज्ञानोदयदर्शनेनात्मस्वरूपप्रयुक्तात्मतत्त्वज्ञानस्य तया प्रतिबन्धेऽपि तद्विषयशाब्दज्ञाने तस्या अप्रतिबन्धकत्वादित्याशयेनाह—

चितिवस्तुबुद्धिजनकस्य पुन-
र्वचसो न खण्डयति शक्तिमसौ ॥
स्वनिबन्धनस्फुरणमेव चितः
प्रतिबध्य तिष्ठति न वाचनिकम् ॥ १०१ ॥

चितिवस्त्विति । न खण्डयति प्रतिबध्नाति, शक्तिम् आत्मसाक्षात्कारजननसामर्थ्यम् । असौ चिद्ग्रहः । किं तर्हि स प्रतिबध्नाति ? तत्राह—स्वनिबन्धनेति । चैतन्यस्य स्वतःप्राप्तप्रकाशमेव निगमयति, न वाचनिकम्, वेदान्तवाक्यजन्यसाक्षात्कारमित्यर्थः ॥ १०१ ॥

नन्वेवमप्यविद्याया दोषत्वे तत्त्वमादिवाक्यजन्यब्रह्मसाक्षात्कारो भ्रमः स्यात् दोषजन्यत्वात् संमतवादित्याशङ्क्य तदोषत्वाधिष्ठानजन्यत्वस्य हेतुत्वे शुक्त्यादिगतरजतादिसादृश्यप्रत्यक्षप्रमायां व्यभिचारः । न च दोषत्वप्रयुक्ततज्जन्यताश्रयत्वं हेतुः, असिद्धेरित्याशयेनाह-

प्रत्यक्षादेरेव दोषस्ततोऽयं
वेदान्तानां नैव दोषानुबन्धः ॥
सत्यं वस्तु छादयन्नद्वितीयं
द्वैतं यस्मादानयत्येष दोषः ॥ १०२ ॥

प्रत्यक्षादेरिति । अयं चिदग्रहः । तर्हि प्रपञ्चज्ञानस्य कथं दोषजन्यत्वमित्याशङ्क्य तदधिष्ठानात्मतत्त्वाच्छादकतया काचादेरिव दोषतया प्रपञ्चज्ञानस्य दोषजन्यत्वम् । प्रपञ्चज्ञानस्य दोषत्वप्रयुक्तदुर्जन्यताश्रयत्वाद्रजतज्ञानवद् भ्रान्तित्वमित्याशयेनाह—सत्यमिति । अथवा ननु करणदोषानुबन्धश्चक्षुरादिष्विव न वेदान्तेष्वपि कुत इत्यत आह—प्रत्यक्षादेरिति । प्रतिज्ञातेऽर्थे हेतुमाह—सत्यमिति । यस्मात्सत्यमद्वितीयमाच्छादयन्नसत्यं द्वैतमानयत्येष दोषश्चक्षुरादिष्वेव दृश्यते ततोऽयं दोषानुबन्धो वेदान्तानां नैवेति सम्बन्धः । कार्योन्नेयधर्माणां यथाकार्यमुन्नयनादिति प्रत्यक्संविदवाच्छिन्नमज्ञानं प्रमाणाकारेण विवर्तते, तत्राज्ञानप्राधान्येन चक्षुरादिविवर्तः, संवित्प्राधान्येन वेदविवर्त इति भावः॥१०२॥

एवं प्रत्यक्षादेर्दोषजन्यज्ञानकरणत्वेन नाद्वैतब्रह्मप्रतिपादकवेदान्तबाधकत्वं सम्भवतीत्युक्तम् । इदानीं तस्यानात्ममात्रविषयत्वाद्वेदान्तानां चात्ममात्रे प्रवृत्तेर्भिन्नविषयतयाऽपि न प्रत्यक्षादिबाध्यतेत्याशयेनाह—

किं च प्रतीचि सकलोपनिषत् प्रवृत्ता
मानान्तरं सकलमेव तु तत्पराचि ॥
प्रत्यक्परागविषयगोचरयोश्च बुद्ध्योः
स्पर्द्धा न सम्भवति मेयविभागसिद्धेः ॥ १०३ ॥

किंचेति । तत्पराचि अनात्मनि । ततः किं तत्राह—प्रत्यगिति । स्पर्द्धा विरोधः । तत्र हेतुः मेयेति ॥ १०३ ॥

किं च प्रत्यक्षादिप्रमाणं किं निरपेक्षसन्मात्रपटादिविषयं तदु-

क्तसमन्वयविरोधीत्युच्यते किं वा घटादयं भिन्न इति, तत्र ततो भेदविषयमपि ? आद्य आह—

अभिन्न एवैष पटः समीक्ष्यते
न भेदगन्धोऽपि पटे समीक्ष्यते ॥
पटेऽपि भेदो यदि कल्प्यते तदा
पटो विदीर्येत कुतस्तदा पटः ॥ १०४ ॥

अभिन्न एवेति। अयं पट इत्याद्यनुभवेन स्वतो भेदाभावोपलक्षितस्वरूप एव सोऽनुभूयते न त्वल्पीयान्भेदोऽपि पटे दृश्यते, अयं पट इत्यनुभवे तदुल्लेखाभावादित्यर्थः। द्वितीयमुत्थापयति—पटेऽपीति। पटस्वरूपेऽपि घटादिप्रतियोगिको भेदो गृह्यते चेत् स किं पटादिस्वरूपमेव तदन्यो वा ? आद्य आह—पटो विदीर्येतेति। तदा हि घटादिसापेक्षतया प्रतीयमानस्य तस्य तन्निरपेक्षपटादिस्वरूपत्वं नोपपद्येत, सापेक्षनिरपेक्षयोरभेदायोगात्। ततः पटाद्यपेक्षयैव तस्य भेदात्मत्वं कल्प्येत, तदा विदारणात्मा भेदः पट एवेति पटः स्वस्मादेव विदीर्येत, अन्यथा तस्य भेदात्मत्वायोगात्। एवं च कुतस्तदा पटः सिध्येत्, विदारणस्याभावात्मतया भावस्वरूपविरोधित्वादिति भावः ॥ १०४ ॥

घटात् पटो भिन्न इति प्रतीयमानो भेदस्ततोऽन्य इति पक्षान्तरमुत्थाप्य प्रतिक्षिपति—

घटात् पटो भिन्न इतीष्यते यदि
स्फुटं प्रसज्येत विकल्पिता भिदा ॥
न सत्यमापेक्षिकमीक्षितं क्वचित्
तथा च यत्नेन निरूपयिष्यते ॥ १०५ ॥

घटात्पट इति। यदि भिदा घटादिसापेक्षा पट इष्यते सा तर्हि स्फुटं विकल्पिता आरोपिता प्रसज्येत। कुत इति चेत्, तत्राह—न सत्यमिति। आपेक्षिकं सापेक्षं वस्तु क्वचिदपि सत्यं नेक्षितम् अपि

तु मिथ्यैव, रज्जुसर्पादेः सापेक्षस्य नियमेन कल्पितत्वदर्शनाद्यत्सत्यं न तत्सापेक्षं यथात्मेति व्यतिरेकपरं वाऽस्तु, यथा चैतत्तथा यत्नेनैव तृतीये निरूपयिष्यते । ततः स्वरूपातिरिक्तोऽपि सापेक्षो भेदोऽलीक एव स्यादिति भावः ॥ १०५ ॥

किं च परस्पराश्रयप्रसङ्गाद् भेदबुद्धिरपि प्रामाणिकी न सिद्ध्यतीत्याह—

न भेदबुद्धिर्घटते प्रमाणतो
विना च धर्मिप्रतियोगिसंविदा ॥
न भेदबुद्धिं विरहय्य कल्पते
तथैव धर्मिप्रतियोगिधीरपि ॥ १०६ ॥

न भेदबुद्धिरिति । धर्मी भेदस्याश्रयः प्रतियोगी तदवधिः धर्मिप्रतियोगिसंविदा विना प्रमाणतो भेदबुद्धिर्न घटते, न चैव घटत इत्यर्थः । ततः किं तत्राह—न भेदबुद्धिमिति । तथैव भेदबुद्धिं विरहय्य धर्मिप्रतियोगिधीरपि न कल्पते न युज्यते परस्परापेक्षत्वान्न भेदबुद्धेः प्रमाणतैकस्या अपि बुद्धेरन्यतो असिद्धेः । न तावदिदमस्माद्भिन्नमित्यवधित्वविशिष्टाद्भेदज्ञानमवधित्वज्ञानं विना सम्भवति, तज्ज्ञानं च भेदज्ञानं विना न भवति । भेदावधित्वस्य भेदनिरूप्यत्वात्, अन्यथा धर्मिणोऽपि स्वस्माद्भेदग्रहप्रसङ्गाच्च । अस्ति च तन्निष्ठभेदेऽपि तत्प्रतियोगिकत्वमेकस्यैव भेदस्य विभागादिवद्धर्मिप्रतियोग्याश्रयत्वसम्भवे तदुभयवृत्तिभेदे प्रमाणाभावात् । नचैवं घटे घटभेदज्ञानं भ्रमो न स्यादिति वाच्यम् । तद्धर्मित्वविशिष्टे तत्प्रतियोगित्वाभावेन तत्र तद्गोचरभेदज्ञानस्य विभागादिज्ञानवद् भ्रान्तित्वसम्भवात् । धर्मिप्रतियोगित्वज्ञानात्पूर्वं भेदज्ञानानङ्गीकारे तयोरभेदभ्रम एव स्यात् । दोषस्यापि भेदधीविघटनद्वारेणैवाभेदभ्रमहेतुत्वात्तस्य साक्षाद् भ्रमहेतुत्वे प्रमाणाभावात् । तस्माद्धर्मिप्रतियोग्यादिज्ञानस्य भेदज्ञानस्य च परस्परापेक्षत्वान्न प्रामाणिकी भेदधीरिति भावः ॥१०६॥

नन्वस्तु वैलक्षण्यं भेदस्तच्च तयोर्विरुद्धो धर्मः, न च तदाश्र-

यभेदज्ञानं विना तद्धर्मयोर्विरोधज्ञानं न स्यादिति पुनरप्यन्योन्याश्रयतेति वाच्यम्। धर्मिणोः परस्परभावज्ञानादेव धर्मयोर्विरोधज्ञानोपपत्तेः। न चैवं परस्परभाव एव भेदोऽस्त्विति वाच्यम्। इदमस्माद्भिन्नमिति भेदज्ञानादिदमिदं न भवतीति ज्ञानस्य विलक्षणत्वेन तद्विषयपरस्परभावस्यापि ततो विलक्षणत्वादिति नोक्तान्योऽन्याश्रय इति चेत्तत्राह—

परस्परभावधिया न भेदधी-
र्विनोपपन्ना न तया विनेतरा॥
इतीदमन्योन्यसमाश्रयं यतो
मतिद्वयं तेन तदस्तु कल्पितम्॥ १०७॥

परस्परभावधियेति। तया भेदधिया, इतरा परस्परभावधीः। इदमिदमपि मतिद्वयम्। फलितमाह—तेनेति। न तावत्परस्परभावो भेदाद्विलक्षणो भवति। उक्तप्रतीतिविषययोर्वैलक्षण्यस्य परैरप्यनभ्युपेतत्वात्। अस्तु वा स यादृशस्तादृशस्तथापि त्वदुक्तभेदधियं विना स दुर्ग्रह एव, न हि वैलक्षण्यज्ञानादृते इदमिदं न भवतीति ज्ञानं भवति, अन्यथा शुक्तिरजतादेरपि तद्ग्रहप्रसङ्गेन क्वाप्यभेदभ्रमो न स्यात्। दोषस्यापि वैलक्षण्यधीविघटनेनैव तद्धेतुत्वात्। तस्मादेतयोरपि परस्परसापेक्षत्वान्न प्रमाणत्वमिति भेदज्ञानमात्रं भ्रान्तिरिति भावः॥ १०७॥

किं चानात्मप्रमाणस्य फलानिरूपणादपि न तत्प्रामाण्यं युज्यते, न हि फलरूपमतिशयं विना कस्यचित्प्रमाणता सम्भवति। तत्र न तावत्संशयादिनिवृत्तिः प्रमाणफलम्, असतः सतो वा सदसदात्मनो वा संशयादेर्निवृत्त्यसंभवादित्याशयेनाह—

असन्निवृत्तिर्न च सन्निवृत्तिर्न चोपपन्ना सदसन्निवृत्तिः॥
जडप्रमाणस्य फलं ततोऽपि न तेन वेदान्तजबुद्धिबाधः १०८

असन्निवृत्तिरिति। असतो निवृत्तिरित्यर्थः। एवमुत्तर-

त्रापि । असतः खपुष्पादेः कस्यापि निवृत्त्यदर्शनादसंभवाच्च । नापि सद्वस्तु ज्ञानान्निवर्तते आत्मनि तददर्शनात् । निवृत्त्यनन्तरमपि सत्स्वरूपस्यासत्स्वरूपत्वायोगे निवर्तकानर्थक्यप्रसङ्गाच्च । नापि सदसदात्मकं किञ्चित्संभवति, तदभ्युपगमेऽपि पक्षद्वयोक्तदूषणानपायात् । न वा परपक्षे तदुभयविलक्षणं किं चिदस्ति यत्प्रमाणं निवर्तयेत् । तस्मादक्षादिप्रमाणात्प्रागवस्थातो विषये निवृत्तिरूपातिशयासम्भवेन प्रामाण्यायोगान्न तेन वेदान्तबाध इति फलितमाह—ततोऽपीति ॥ १०८ ॥

अक्षादिप्रमाणात् स्वविषये संशयादिनिवृत्तिः फलं भवति किं वा प्राकट्यादिरूपातिशयोत्पत्तिरिति विकल्प्याद्यं निरस्य द्वितीयं पूर्ववद्विकल्प्य निरस्यति—

असत्प्रसूतिर्न च सत्प्रसूति-
र्न चोपपन्ना सदसत्प्रसूतिः ॥
जडप्रमाणस्य फलं ततोऽपि
न तेन वेदान्तजबुद्धिबाधः ॥ १०९ ॥

असत्प्रसूतिरित्यादिना । असतः शशशृङ्गादेः सत आत्मनः प्रसूत्यदर्शनात् असम्भवाच्च । नापि तदुभयात्मकं किंचित्संभवति यस्य प्रसूतिर्जडप्रमाणस्य फलं भवेत्ततोऽध्यक्षादेः प्रामाण्यासम्भवेन न वेदान्तबाधकतेति भावः ॥ १०९ ॥

किं च तत्प्राकट्यादि जड़रूपं स्वप्रकाशं वा, आद्येऽपि तदनुकूलव्यापारवतश्चक्षुरादेस्तत्फलम् उतोदासीनस्य । नाद्यः, जड़ेन प्रमाणफलेन साक्षाद्विषयावभासायोगेन तद्वैयर्थ्याज्जड़त्वाविशेषेण विषयस्यापि फलावभासकत्वप्रसङ्गात् । एवं तत्कुर्वतो व्यापारवतश्चक्षुरादेर्न फलं, व्यापारस्यापि कुर्वत्कार्यत्वप्रसङ्गेनानवस्थापातात् । नापि द्वितीयः, निर्व्यापारात्कारणात्फलोत्पत्तेः काप्यदर्शनेनात्र तामुदीरयन् मन्दमतिर्यतोऽर्भकैरपि विहस्यते । एतच्च कुर्वद्रूपादि विकल्पदूषणं

प्राकट्यादि स्वप्रकाशमिति पक्षेऽपि समानमित्याशयेनाह—

जडार्थसंविन्न च कुर्वतः फलं
तदा हि कुर्वत्त्वमपीदृशं भवेत्॥
अकुर्वतस्तत्फलमित्युदीरयन्
विहस्यते दुर्मतिरर्भकैरपि॥ ११०॥

जडार्थसंविदिति। जडेति संविद्विशेषणम्॥ ११०॥

ननु प्रमाणफलस्य स्वप्रकाशत्वं भवतोऽपि सम्मतमिति कथं तस्य प्रमाणादुत्पत्तिर्निराक्रियत इति चेन्न। अनिर्वचनीयधीवृत्तेरेव चक्षुरादेरुत्पत्तेः। प्रमाणफलं तु स्वप्रकाशचैतन्यं तन्नित्यसिद्धमपि धीवृत्त्यवच्छिन्नं तथा व्यवहियते न तु वस्तुतस्तदुत्पत्तिरस्तीत्याशयेन पूर्ववद् दूषयति—

सती न संवित् क्रियते हि सत्त्वा-
न्न चासती तद्वदसत्त्वहेतोः॥
न चोपपन्नं सदसत्त्वमस्या-
स्ततो न कार्यत्वमुपैति संवित्॥ १११॥

सतीति। संवित्स्वप्रकाशरूपा। अस्याः संविदः। फलितमाह—तत इति॥ १११॥

किं च यत्किंचित्प्रमाणफलमस्तु तत्किमुत्पादयितुं शक्यं सत्प्रमाणेनोत्पाद्यतेऽशक्यं वा नोभयथापि संभवतीत्याह—

न शक्यमुत्पाद्यमिति प्रशस्यते
तदा हि शक्तेरपि जन्यताऽऽपतेत्॥
अशक्यमुत्पाद्यमितीष्यते यदि
द्रुतं नभश्चूर्णय मुद्गरादिना॥ ११२॥

न शक्यमिति। शक्तिविशिष्टमित्यर्थः। शक्तेरपीति। तस्या अप्युत्पत्तिप्रसंगेन शक्तिविशिष्टायाः शक्तेरुत्पाद्यता प्रसज्येत तथा चानवस्था। द्वितीयं प्रत्याह अशक्यमिति। यत्केनापि कर्तुं न शक्यते तत्कथमुत्पादनीयं, न ह्यभसो मुद्गरादिनाऽतिकुशलोऽपि

चूर्णनं कुर्यादित्यर्थः ॥११२॥

तस्माज्जडप्रमाणफलानिरूपणान्न तत्प्रामाण्यं संभवति, ततो जडस्य तदधीनमेकत्वमनेकत्वं वा तत्त्वं न ततः सिध्येत्तत्श्चाक्षादिना घटादिस्वरूपासिद्धावद्वितीयात्मसमन्वितवेदान्तानामर्थाद्बाध इत्यनुपपन्नमित्याशयेनोपसंहरति—

जडप्रमाणस्य फलानिरूपणा-
ज्जडस्य तत्त्वं न निरूपणक्षमम् ॥
अतो न मानान्तरमर्थतोऽपि न-
स्त्रयीशिरोवस्तु निराकरिष्यति ॥ ११३ ॥

जडप्रमाणस्येति ॥ ११३ ॥

एवमात्मनोऽन्यस्य भावरूपाज्ञानविषयत्वासंभवेन तत्र प्रवृत्ताध्यक्षादीनां प्रामाण्यं न संभवति अनधिगतार्थत्वाभावात्। घटादिप्रपञ्चस्य स्वरूपेण कल्पितत्वात् फलानिरूपणाच्चेत्युक्तम। ननु ज्ञानाभावरूपाज्ञाततायाः प्रमाणप्रवृत्तिनिमित्तस्य सर्वत्र सुलभत्वाद्भवत्वक्षादेरपि तात्त्विकं प्रामाण्यम् । न हि शुक्तिरजतादेरिव घटादेरपि मिथ्यात्वं केन चिदनुभूयते। भावरूपाज्ञानमपि घटपटाद्यवच्छिन्नमात्मानमावृणोतीति ततोऽप्यक्षादेर्घटादौ प्रामाण्यमविरुद्धम्। एवं चावच्छेद्यावच्छेदकयोरात्मप्रपञ्चयोर्विचित्रयोः प्रमाणिकत्वान्नोक्तसमन्वयसिद्धिरिति चेत्तत्राह—

आत्मन्येव समस्तमस्तु यदि वा मानान्तरं तेन च
स्पष्टं वेदशिरोविरुद्धमिति च व्रीकुर्महे कामतः ॥
एवं सत्यपि पूर्वभावि सकलं मानान्तरं बाधते
पश्चात् कस्यचिदेव वेदशिरसं जाता परब्रह्मधीः ॥११४॥

आत्मन्येवेति । प्रपञ्चात्मन्येवेत्यर्थः । यदि वेत्यादौ योजनीयम । मानान्तरमध्यक्षादिमानं वेदशिरो निष्प्रपञ्चात्मग्राहकं वेदान्तवाक्यं कामतस्त्वदिच्छातः। अनेनानाभावरूपाज्ञानस्य कल्पितेऽ-

पि व्यवहारसंभवेन न तदर्थस्य तात्त्विकत्वे निमित्तमिति तदङ्गीकार-स्तदिच्छयेति सूचितम् । एवं तर्हि कथं त्वदभिमतब्रह्मसिद्धिस्तत्राह— एवं सत्यपीति । अध्यक्षादेर्वेदान्तस्य च विरोधे सत्यपीत्यर्थः । पूर्वभावि संगतिग्रहादिसापेक्षवेदान्तात्पूर्वभावि मानान्तरं पश्चादध्य-क्षादिप्रवृत्त्यनन्तरं कस्य चिद्विशिष्टाधिकारिणो जाता परब्रह्मधीरे-वेति संबन्धः । यद्यपि प्रत्यक्षादीनामपि प्रामाण्यमभ्युपगतं तथाप्य-नपेक्षतया वेदान्तात् प्रागेव तैरर्थस्य बोधितत्वात् पश्चाज्जाता पर-ब्रह्मधीरेव तेषां बाधिका, एकत्र विरुद्धयोर्युगपत् प्रामाण्यायोगादि-त्यर्थः ॥ ११४ ॥

नन्वेवं सति असंजातविरोधतया पूर्वस्यैव प्रबलत्वाद् विपरीतमेव किं न स्यादित्याशङ्क्य लोके पश्चाद्भाविन एव विरुद्धविषयज्ञानस्य बाधकत्वदर्शनान्नैवमित्याह—

पूर्वोत्पन्नमृगाम्बुविभ्रमधियो बाधं विना नोत्तरं
विज्ञानं समुदेतुमूषरभुवो याथात्म्यमावेदयत् ॥
शक्नोतीति यथा मृगाम्बुधिषणामुन्मृज्य दुत्पद्यते
तद्वद्वेदशिरोवचोजनितधीर्भेदभ्रमं ब्रह्मणि ॥ ११५ ॥

पूर्वोत्पन्नेति । मृगाम्बुविभ्रमधियो मरुमरीचिकासु कल्पितोदकधिय इत्यर्थः । तत्र हि पूर्वोत्पन्नतोयबुद्धिबाधमन्तरेणेयमूषर-भूरिति तद्याथात्म्यमावेदयद् विज्ञानं समुदेतुं न शक्नोति, न हि पूर्वापरीतज्ञानेऽबाधिते तद्विपरीतज्ञानं संभवतीति यथा मृगाम्बुधि-षणामुन्मृज्य निराकुर्वत्तदुत्पद्यते तद्वद् वेदान्तवाक्यजनितापि ब्रह्म-धीर्भेदभ्रमं निराकुर्वत्येवोत्पद्यते न्यायस्य तौल्यादित्यर्थः ॥११५॥

जैमिनेरपि वेदार्थविचारदक्षस्येदं संमतमित्याह—

पौर्वापर्ये पूर्वदौर्बल्यमाह
षष्ठेऽध्यायेऽवस्थितो जैमिनिर्यत् ॥
वक्ष्यामस्तत्सर्वमानीय तुभ्यं
बुद्धिं स्वीयां सम्यगत्रावधत्स्व ॥ ११६ ॥

पौर्वापर्य इति । यत्पूर्वदौर्बल्यमिति सम्बन्धः ॥ ११६ ॥

तत्सर्वं वक्ष्याम इत्युक्तमेव माङ्गन्यायप्रदर्शनेन वदति—

उद्गातृप्रतिहर्तृकर्तृकतया जातौ वियोगौ क्रमाद्
यस्मिन् कर्मविधिप्रयोगसमये तत्रैष नः संशयः ॥
किं सर्वद्रविणव्ययो भवतु वा संस्थापनं दक्षिणा-
हीनस्येति तदा परं बलवदित्यूचे मुनिर्जैमिनिः ॥ ११७ ॥

उद्गात्रिति । उद्गातृप्रतिहर्तारौ ज्योतिष्टोमे सामगौ ऋत्विजौ प्रसिद्धौ तत्कर्तृकतयेत्यर्थः । ज्योतिष्टोमे ह्यध्वर्यवादीनामृत्विजामन्योऽन्यं सम्बध्य बहिः पवमानस्तोत्रार्थं बहिर्निर्गच्छतां यद्युद्गातृकर्तृकः प्रतिहर्तृकर्तृको वा वियोगो भवेत्तत्र तद्वियोगनिमित्तं विरुद्धप्रायश्चित्तमदक्षिणस्य प्रस्तुतप्रयोगस्य समाप्तिः सर्वस्वदक्षिणस्य च श्रूयमाणमेकैकवियोग उपपन्नमेव । युगपदुभयवियोगेऽपि निमित्तयोस्तौल्यात्तन्निमित्तं प्रायश्चित्तमपि यजमानेच्छया विकल्पेनानुष्ठेयम् । यत्र पुनरेवं क्रमात्तयोर्वियोगः सोऽनेन विषयो दर्शितः । विचाराङ्गसंशयमाह—तत्रैष इति । तमेवाभिनीय दर्शयति—किं सर्व इति । अत्र श्लोकोक्तयथासंख्यक्रमो न विवक्षितः, "यद्युद्गाता विच्छिन्द्याददक्षिणो यज्ञः सन्तिष्ठते, यदि प्रतिहर्ता सर्वस्वं दद्यात्"इति श्रुतिपाठविरोधादिति द्रष्टव्यम् । प्रतिहर्तृविच्छेदनिमित्तं सर्वस्वदक्षिणं प्रस्तुतप्रयोगसमापनं वोचितं किं वोद्गातृविच्छेदनिमित्तमदक्षिणं प्रयोगस्य संस्थापनं समापनमित्येष नः संशय इति सम्बन्धः । असंजातविरोधितया पूर्वनिमित्तं बलवदिति पूर्वपक्षं सिद्धवत्कृत्य सिद्धान्तमाह—तदेति । परम् उत्तरं निमित्तम् ऊचे" पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् " इति सूत्रेणोक्तवानित्यर्थः । अन्यथा प्रथमसंजातविरोधेनोत्तरस्योदयासंभवात्तत्तद्बाधमानमेवोदेति पूर्वजन्मसमये तूत्तरस्याजातत्वान्न तत्तद्बाधमानमुदि-

तामिति विशेष इति भावः। तदुक्तम्—

पूर्वं परमजातत्वादबाधित्वैव जायते।
परस्यानन्यथोत्पादान्न त्वबाधेन संभवः॥ इति॥ ११७॥

तत्र पौर्वापर्ये पूर्वदौर्बल्यमिति भागं व्याख्याय प्रकृतिवदितिसूत्रभागसूचितं वैदिकं दृष्टान्तं विवृणोति—

यद्वत प्राकृतवैकृतावितितरामन्योन्यसंस्पर्धिनौ
धर्मौ बाध्यनिवर्तकावभिमतौ बुद्धौ क्रमेणान्वयात्।
पाठव्यत्ययसंभवेऽपि च तयोर्बुद्धिक्रमो विद्यते
पूर्वा प्राकृतधर्मधीरितरधीरन्त्या तथैवोत्थितेः॥ ११८॥

यद्वदिति। प्राकृतवैकृतौ प्राकृतं सर्वासामिष्टीनां प्रकृतिभूतयोः स्वप्रकरणे एव सर्वाङ्गसंपूर्णयोर्दर्शपूर्णमासयोरुपदिष्टं कुशमयं बर्हिः, वैकृतं विकृतौ विकलाङ्गतया विहितं श्येने उपदिष्टं शरमयं बर्हिः, तौ धर्मावेकवेद्यास्तरणार्थत्वे निरपेक्षतयाऽन्योन्यमितितरां संस्पर्धिनौ भूत्वा बाध्यनिवर्तकावाभिमतौ। अत्राप्युत्तरेण पूर्वो बाध्यतयाऽभिमत इत्यर्थः। कुतः? बुद्धौ क्रमेणान्वयाद् बोधकप्रमाणक्रमेणादौ कुशमयबर्हिषः, पश्चाच्छरमयबर्हिषो वैकृतभावनयाऽन्वयात्। ननु विकृतावुपदिष्टस्य शरमयबर्हिषः सन्निधानात् प्रथमान्वयसंभवे कथं प्राकृतस्यासंनिहितस्य प्रथममन्वय इत्यत आह—पाठेति। पाठव्यत्ययः सन्निधावसन्निधौ च पाठस्तत्संभवेऽपीत्यर्थः। यतस्तयोः कुशमयशरमययोरतिदेशोपदेशवाक्यप्राप्तिकयोर्बुद्धिक्रम उक्तरीत्याऽन्वयबुद्धिक्रमः। तमेव क्रमं सहेतुमाह—पूर्वेति। प्रकृतिवद्विकृतिः कार्येति प्रकृतिवच्छब्दस्य वैकृतिविधिशेषत्वादित्यर्थः। तथैवोत्थितेः प्राकृतस्य पूर्वमाकाङ्क्षितत्वाद्वैकृतस्यातथात्वादित्यर्थः। यद्यपि वैकृतभावनासंनिधौ शरा उपदिष्टा न कुशास्तथापि प्रकृतावुपदिष्टकुशानां प्रथमं तत्र वेद्यास्तरणमुपकारः कल्प्तः वैकृतभावना च कल्प्तत्वात् प्रथमं तमेवोपकारमपेक्षत इति तद्द्वारा कुशानां पूर्वतयाऽन्वयः प्रस-

ज्यते न तु सन्निहितानामपि शराणां तेषां तदुपकारस्य प्रागक्लृप्त-त्वादित्याकाङ्क्षानुरोधेनातिदेशेन कुशानामेव प्रथममन्वय इति प्रथ-ममाक्षिप्त्वान्निरवकाशचरमभाविशरान्वयप्रतीत्या कुशा बाध्यन्ते तद्वचरमभाविनिमित्तेनोद्गात्रादिविच्छेदेन प्रथमभाविमतिहर्त्रादिवि-च्छेदो बाध्यत इत्यर्थः ॥ २१८ ॥

ननूच्चैर्ऋचा क्रियत उपांशु यजुषेत्यादौ विध्युद्देशगतमपि पा-दबद्धमन्त्रादिवाचकमृगादिपदं त्रयो वेदा अजायन्तेत्यर्थवादोपक्रमग-तमन्त्रब्राह्मणसमुदायवाची वेदशब्दः स्वार्थात् प्रत्याय्य ऋगादिवे-दपरतया स्थापयतीति "वेदो वा प्रायदर्शनात्" इत्यत्र निर्णीतम् । तत्कथं चरमेणात्र पूर्वबाध इत्याशङ्क्य ततो विशेषमाह—

सापेक्षावुदितौ यदा तु भवतः पूर्वापरप्रत्ययौ
पूर्वस्तत्र निवर्तको भवति तत्रान्त्यो निवर्त्यो यथा ॥
वेदोपक्रमजा मतिर्बलवती नर्गादिसंहारजा
वेदोपक्रममुख्यभाग् भवति तत्रर्गादिवाणी गुणात् ११९॥

सापेक्षाविति । विरुद्धयोर्बुद्ध्योः परस्परनैरपेक्ष्ये परेण पू-र्वबाधः । यदा तु पूर्वापरप्रत्ययौ सापेक्षावुदितौ भवतस्तत्र तदा तयोः प्रत्यययोर्मध्ये पूर्वप्रत्ययो निवर्तकोऽन्त्यस्तु निवर्त्य इति निर्णयः । परमपि यत्पूर्वसापेक्षं न तत्पूर्वस्य बाधकमुपजीव्यत्वेन पूर्वस्य बल-वत्त्वात् तद्बाधे स्वस्याप्यभावादिति पूर्वेणैव तत्र परस्य बाध इत्य-र्थः । यथेत्यादिना तत्रोक्तं दृष्टान्तमाह । संहार उपसंहारः । पश्चा-त्पठितऋगादिशब्दजन्येत्यर्थः । प्रथमप्राबल्ये फलितमाह—वेदोप-क्रमेति । उपक्रमगतं वेदपदं मुख्यम्,उपसंहारस्थमृगादिपदं तु गुणा-ल्लाक्षणिकामित्यर्थः । एकस्मिन् वाक्ये ह्युपक्रमं पर्यालोच्य तदनुरो-धेनोत्तरं नेतव्यम्, अन्यथा संजातविरोधितया तदुपस्थितमुख्या-र्थेनास्यान्विताभिधानासंभवात् । तथा च प्रथमस्य चरमापेक्षितत्वे सति तद्विरोधित्वं तद्बाधकत्वे निमित्तम् । न च प्रत्यक्षादीनां तत्त्ववेद-

कत्वं वेदान्तैरपेक्ष्यते तद्गतव्यावहारिकप्रामाण्येनैव वेदान्तानां चरितार्थत्वादित्यर्थः ॥ ११९ ॥

इदानीं बादरायणन्यायसिद्धमपि प्रथमबाधकत्वे प्रसक्तानुप्रसक्त्योदाहरणमाह—

ब्रह्मपुच्छमितिवाक्यगामिनो-
र्ब्रह्मपुच्छमिति शब्दयोर्द्वयोः ॥
ब्रह्मशब्दबलवत्तरत्वतः
पुच्छशब्दपरिपीडनं मतम् ॥ १२० ॥

ब्रह्मपुच्छमिति। तैत्तिरीयके ब्रह्म पुच्छं प्रतिष्ठेति वाक्यगतयोरित्यर्थः। शब्दयोर्मध्ये। तत्र हि वाक्येऽसन्नेवेत्यादिवाक्यशेषगतब्रह्मशब्दाभ्यासानुरोधेन ब्रह्मशब्दस्य स्वप्रधानाद्वितीयब्रह्मणि निर्णीततात्पर्यानुरोधेन पुच्छशब्दमिदं पुच्छमित्यादिप्रायपाठप्राप्तादवयवार्थात् प्रत्याव्य सर्वाधिष्ठानत्वलक्षणया नीयते। न चात्र तद्बत् प्रत्यक्षादीनां तत्त्ववेदकत्वकल्पकं किं चिदस्तीति भावः ॥१२०॥

ननु प्रथमश्रुतस्यैव चरमबाधकत्वमिति न बादरायणनयेन नियतम्। अस्य लोकस्य का गतिरिति प्रश्नोत्तरे आकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इत्यत्र सर्वाणि ह वा इत्यादिवाक्यशेषावगतानेकप्रमाणानुरोधेनाकाशपदं भूताकाशात् प्रत्याव्य ब्रह्मपरतया बादरायणेन "आकाशस्तल्लिङ्गात्" इति सूत्रेण निर्णीतं तद्वत्प्रत्यक्षाद्यनेकानुरोधेन वेदान्तमात्रबाधः किं न स्यादित्याशङ्क्याह—

अथ यद्युपक्रमणमल्पतरं
भवति प्रभूतमुपसंहरणम् ॥
बलवत्तदा चरममेव भवे-
दुभयोर्विरोधसमये नितराम् ॥ १२१ ॥

अथेति। प्रभूतं बहु। तत्र ह्यस्य लोकस्येति प्राथमिकप्रतिपि-

पादयिषितजगत्कारणविषयप्रश्नोपोद्बलितानेकलिङ्गबलादाकाशश्रुतिः प्रथमावगताप्यन्यथा नीता । न चात्र प्रत्यक्षादीनां प्राबल्यनिमित्तं किं चिदुपोद्बलकमस्ति येन तद्वद् भूयसामनुग्रहन्यायेन वेदान्तैकप्रमाणबाधो भवेदित्यर्थः ॥ १२१ ॥

ननु अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यादिवाक्ये एकेनैव यच्छब्देन ज्योतिरादिश्रुतिलिङ्गानामनेकेषां बाधो दृष्टः । न च तत्र तस्योपोद्बलकं किं चिदस्ति तद्वदुपोद्बलनाभावेऽपि प्रत्यक्षादि बाधकं किं न स्यात्तत्राह—

अथ यद्युपक्रमणमल्पमपि
प्रतिपाद्यवस्तुविषयं भवति ।।
अविवक्षितार्थविषयं चरमं
भवति प्रभूतमपि बाध्यमदः ॥ १२२ ॥

अथ यदीति । तत्र हि यच्छब्दस्य प्रथमावगतार्थगोचरतास्वभावानुरोधेन स्ववाक्ये प्रथमावगत्यभावेऽपि पूर्वत्र गायत्रीवाक्ये पादोऽस्य विश्वा भूतानीति प्रतिपादितब्रह्मपरतयापि निर्णीतस्य प्रतिपाद्यवस्तुविषयतावलेन तद्विरोधिज्योतिरादिश्रुतिलिङ्गान्यन्यथा नीतानि । न चात्र प्रत्यक्षादेः प्रतिपाद्यविषयत्वं निर्णीतमिति न वेदान्तबाधकत्वमिति भावः ॥ १२२ ॥

एवमखण्डब्रह्मविषयवेदान्ताः प्रत्यक्षादिबाधकास्तदनपेक्षत्वे सति तद्विरोधिविषयोत्तरप्रमाणत्वाद् यदेवं तदेवं यथोत्तरभाव्युद्वाहादिविच्छेदनिमित्तप्रायश्चित्तोपदेशः । न चासिद्धिर्वेदान्तानां प्रत्यक्षादिगतव्यावहारिकप्रामाण्यांशापेक्षत्वेऽपि तदीयतत्त्ववेदकत्वानपेक्षत्वात् । नापि तत्प्रामाण्यासिद्धिः प्रथमाध्यायोक्तन्यायेन तत्तात्पर्यविषयाखण्डब्रह्मणो बाधाभावेन तत्सिद्धेः । प्रत्यक्षादीनां व्यावहारिकत्वेनापि प्रामाण्यव्यवहारोपपत्तेरित्युक्तम् । प्रसङ्गाच्च कचित्

पूर्वस्याप्युत्तरबाधकत्वं जैमिनिसंमतं प्रदर्श्य तदनुप्रवक्त्या पुच्छब्रह्मादिन्यायोऽपि दर्शितः। इदानीं तु वेदान्ताः प्रत्यक्षादिबाधका आसन्नविषयत्वाद्यदेवं तदेवं यथाऽनुमितिविरुद्धविषयप्रत्यक्षमित्याशयेनाह—

आसन्नवस्तुविषयेण यथाऽक्षजेन
बाधो भवत्यनुमितेर्व्यवधानयोगात्॥
प्रत्यक्त्वमात्रविषयेण तथाऽऽगमेन
युक्तोऽक्षजादिविषयावगमस्य बाधः॥ १२३॥

आसन्नेति। अव्यवहितवस्तुविषयेणेत्यर्थः। प्रत्यक्षं हि प्रमितिसविशेषवृत्तिद्वारा प्रमातृचैतन्याव्यवहितं साक्षादेव गृह्णाति तदिन्द्रियसंनिकर्षादिसामग्रीजन्यत्वात्। अनुमानं तु सामान्यव्याप्तिपुरस्कारेणोत्पन्नं सामान्यकारणसाध्यं पक्षे विषयीकुर्वद्धेतोः पक्षधर्मतानुपपत्त्या साध्यविशेषं विषयीकरोतीति व्यवहितविषयं सद् विरोधेन यथा बाध्यते, एवं प्रत्यङ्मात्रविषयत्वादत्यासन्नविषयं वेदान्तवाक्यम्, अध्यक्षादिकं तु प्रपञ्चस्वरूपं विषयीकुर्वदर्थादात्मगतं भेदं विषयीकरोतीति तस्य तेन बाधो युक्त इति भावः॥ १२३॥

किं च प्रागुक्तं वेदान्तवाक्यं प्रत्यक्षादिबाधकं तद्विरोधितदुपजीव्यार्थकत्वात्संमतवदित्याशयेनाह—

किं चाम्नायवचःप्रमेयबलतः सर्वं प्रमाणान्तरं
स्वार्थं साधयतीति तत्सकलमेवायत्तमस्मिन्भवेत्॥
यद् यत्रायतते विरोधसमये तेनास्य तद्बाधने
सामर्थ्यं न च विद्यते श्रुतिवचोबाधे यथा हि स्मृतेः १२४॥

किंचाम्नायेति। आत्मैवास्य ज्योतिरित्यादिवेदान्तवचसो यत्प्रमेयं स्वप्रकाशात्मा तद्बलादित्यर्थः। आयत्तमधीनम्, अस्मिन्नाम्नायप्रमेये कूटस्थानुभवे तत् सकलमेवेतरत् प्रमाणजातम् उक्तानुभवोपजीवकं मानान्तरं भवेदित्यर्थः। प्रत्यक्षादिर्हि स्वसामर्थ्या-

त्प्रमेयाकारां धीवृत्तिमुत्पादयति । न चैतावता तदर्थः सिध्यति जडवृत्ते रूपादिवदर्थासाधकत्वादिति तदवच्छिन्नं स्वप्रकाशचैतन्यं प्रमेयसाधनायापेक्षते, स्वप्रकाशचैतन्यं चाखण्डं ब्रह्म तच्च तत्परवेदान्तादेव सिध्यतीति तदुपजीव्यं प्रत्यक्षादिकं च तदायत्तप्रामाण्यम् । ततः किं तत्राह—यद्यत्रेति । आयत्तते आयत्तं भवति, यद् यदुपजीवीत्यर्थः । तेन उपजीव्येन विरोधसमये तद्बाधे सति अस्य उपजीवकस्य प्रत्यक्षादेः सामर्थ्यं तद्बाधने नैव विद्यते । तत्र दृष्टान्तमाह—श्रुतीति । औदुम्बरीं स्पृष्ट्वोद्गायेदित्यादिश्रुतिवचोबाधे यथौदुम्बरी सर्वा वेष्टयितव्येति स्मृतेः सामर्थ्यं नैव विद्यते इति स्मृतेः श्रुत्युपजीवित्वात्तद्विरोधेऽप्रामाण्यादेवमिहापीत्यर्थः ॥ १२४ ॥

एवं प्रत्यक्षादेर्वेदान्तबाधितविषयत्वेन सविषयस्य तस्याविद्यकत्वं साधितमिदानीं तत्फलमाह—

ब्रह्माज्ञानसमुद्भवं ग्रहगणं सातिग्रहं ब्रह्मणः
स्वाकारग्रहणेन वेदशिरसो जाता मतिर्बाधते ॥
विद्या वस्तुबलेन जन्म लभते माया तु निर्वस्तुका
सा तामुद्भवमात्रतः क्षपयति ध्वान्तं यथा भास्करः १२५॥

ब्रह्माज्ञानेति । ग्रहगणं हस्तो वै ग्रह इत्यादिश्रुतिसिद्धेन्द्रियसमूहं सातिग्रहं स कर्मणातिग्रहेण गृहीत इत्यादिश्रुतिसिद्धतत्तदिन्द्रियगोचररूपातिग्रहसहितं सकलसंसारामीति यावत् । वेदशिरसोऽहं ब्रह्मास्मीति महावाक्याज्जाता मतिरज्ञानसमुद्भवं बाधते । ननु जडाया मतेः कथं बाधकत्वमित्यत आह—ब्रह्मण इति । ब्रह्मणः प्रपञ्चाधिष्ठानस्य यः स्वाकारः सत्यज्ञानप्रत्यगद्वयानन्दस्वरूपं तद्ग्रहणेन तद्बलेनेत्यर्थः । ननु प्रपञ्चस्यापि प्रमाणविषयस्य कथमपरप्रमाणेन बाधस्तयोः प्रमाणत्वाविशेषादित्याशङ्क्य तद्विशेषमाह—विद्येति । वस्तुनोऽबाधितविषयस्य बलेन ब्रह्मविषया हि विद्या वस्तुनिर्णीततात्पर्येण वाक्येन जन्म लभत इति सा वस्तुबलजा बलव-

ती प्रत्यक्षादितद्विषयप्रपञ्चकारणमाया तु निर्वस्तुका वस्तुत्वरहिता अतः सा विद्या तां मायाम् उद्बुद्धमात्रतः स्वोत्पत्तिमात्रेण क्षपयति निवर्तयति । लोकेऽप्यविद्यातत्कार्ययोरितरानपेक्षतत्त्वसाक्षात्कारनिवर्त्यत्वदर्शनात् । दृष्टान्तान्तरमप्याह–ध्वान्तमित्यादिना ॥१२५॥

नन्वेवं सति हिरण्यगर्भाद्यनेकविधसुखभोगाढ्यस्य देवर्ष्याद्यनेकाश्रितस्य संसारस्य विरोधित्वे ब्रह्मसाक्षात्कारे प्रेक्षावतामुपेक्षैव युक्ता स्यादित्याशङ्क्यानेकविधरागद्वेषनिदानो हि संसारः,अथो खल्वाहुः काममय एवायं पुरुष इति श्रुतेः। अत एव मिथ्याज्ञानमूलोऽपि रागादेस्तन्निमयमात् । एवं ब्रह्महत्याद्यनेकपातकादिजन्यविविधयातनोपेत आशुविनाशिसुखश्च तस्मिन्नेतस्मिन्विवेकिभिरादृतेऽपि दृढतरमुमुक्षादियुक्तस्य तन्नाशार्थं ज्ञानान्वेषणमेवोचितमित्याशयेनाह–

रागद्वेषप्रशाखं विषयगुणसमुद्भासि धीवृत्तिशाखं
धर्माधर्मप्रवृत्तिप्रचुरसुखसमुद्वेगभोगप्रवालम् ॥
छिन्द्याः संसारवृक्षं निशितमतिमहाशस्त्रनिक्षेपदक्षः
प्रत्यक्तत्त्वस्थलीगं निबिडतमतमोमूललब्धप्ररोहम् १२६॥

रागद्वेषेति । अनुकूलेषु रागः प्रतिकूलेषु द्वेषः, रागद्वेषौ प्रकृष्टे शाखे स्थूलविटपौ यस्य संसारवृक्षस्य तम् । विषयाणां शब्दादीनां गुणा इष्टानिष्टसाधनरूपास्तद्बुद्धासिन्यस्तदध्यासात्मिका धीवृत्तयः क्षुद्रा शाखा यस्य तम् । उक्तशाखोपशाखाफलमाह—धर्माधर्मेति । धर्माधर्मरूपा याः प्रवृत्तयः एतच्चाधर्मानिवृत्तेरप्युपलक्षणं, तज्जन्यौ प्रचुरौ सुखसमुद्वेगौ समुद्वेगो दुःखम, एतदपि निवृत्तिसाध्यदुःखाभावोपलक्षणं,ते प्रवालानि पल्लवा यस्य तम् । प्रवालग्रहणेन सांसारिकभोगस्यात्यन्तिकमहेयत्वं दर्शयति । अथ वा धर्माधर्माभ्यां प्रवृत्तिर्द्विर्यस्य, प्रचुरा असंख्याताः सुखसमुद्वेगभोगा सुखदुःखानुभवाः प्रवालाः पत्राणि यस्य, धर्माधर्मप्रवृत्तिश्चासौ प्रचुरसुखदुःखभोगप्रवालश्चेति तथा तमिति विग्रहः । छिन्द्या इति सूचितं छेत्तारं विशिनष्टि ।

निशिता निश्चला मतिर्ब्रह्मात्मसाक्षात्कारः सैव महत्पाशुपतास्त्रादिकल्पं शस्त्रं छेदनसाधनं तस्य निक्षेपे समुत्पादे दक्षस्त्वं छिन्द्या इति सम्बन्धः। तस्य ब्रह्मात्मसाक्षात्कारनिवर्त्यत्वाय तं विशिनष्टि-प्रत्यक्तत्त्वेति। प्रत्यक्तत्त्वं स्थली स्थलमधिष्ठानं तत्राध्यस्तमित्यर्थः। ज्ञाननिवर्त्यत्वमात्रे हेतुमाह-निबिडेति। अनादिकालानेकवासनानुबन्धत्वान्निबिडतमम्, अति महाजड़ं यत्तम आवरणाविक्षेपशक्तिमदज्ञानं तदेव मूलमाधारस्ततो लब्धः प्ररोहोऽङ्कुरीभावो येन तम्। अनेन ज्ञानाभावेऽनुच्छेद्यत्वं तस्य दर्शितम्। अत्र वृक्षरूपकालङ्कारेण संसारवर्णने वृक्ष इव मूलोच्छेदे स्वमूलाविद्योच्छेदे संसार उच्छिद्यत इति दर्शितम् ॥ १२६ ॥

ननु मायां तु प्रकृतिं विद्यादित्यादिश्रुत्या मायैव संसारकारणं सिद्धं न त्वज्ञानमिति कथं तस्य ज्ञाननिवर्त्यत्वमित्याशङ्क्य मायाऽज्ञानयोरभेदस्य तृतीये वक्ष्यमाणत्वान्न तयोर्भेदः। एवं च यथा अज्ञानमेव तमः कारणमित्यादिशब्दैरभिधीयते एवं मायाशब्देनापीति न तस्य ज्ञाननिवर्त्यत्वानुपपत्तिरित्याशयेनाह—

प्रत्यग्वस्तुन एव तत्र विषये माया तमः कारणं
ध्वान्तं बीजमबोध इत्यपि गिराऽविद्यैव संकीर्त्यते ॥
तस्या एव विलास एष भवता गुर्वादिभेदान्वितः
संक्लृप्तो न तु विद्यते पृथगसौ संध्ये यथा धामनि १२७॥

प्रत्यग्वस्तुन इति। आत्मतत्त्वस्य सम्बन्धिनी प्रत्यक्चैतन्याश्रितेति यावत्। तत्र प्रत्यग्वस्तुनि विषये याऽविद्या सैव मायादिगिरा संकीर्त्यत इति सम्बन्धः। अज्ञानात्मकमायाकार्यत्वे भेदप्रपञ्चस्यात्मनोऽपि नानात्वायोगात्तदद्वितीयत्वमपि सिध्येदित्याशयेन सदृष्टान्तमाह—तस्य इति। अविद्याया एवैष विलासो विपरिणामो गुर्वादिभेदान्वितो भवता अविद्यावता त्वया संक्लृप्तोऽध्यस्तोऽत आत्मनः सकाशादसौ पृथग् नैव विद्यते इत्यर्थः।

सन्ध्ये स्वप्ने। सन्ध्यं स्वप्नस्थानमिति श्रुतेः। यथा स्वप्नस्थाने स्वपता दृष्टश्चेतनाचेतनात्मकप्रपञ्चस्ततो न पृथगस्तीति उत्थानानन्तरमदर्शनात्। न हि सतः समयान्तरे अदर्शनं भवति, एवं गुर्वादिप्रपञ्च आत्मनो न भिद्यते इत्यर्थः। विमतः संसारः अविद्याविलसितः अविद्यावस्थायामेव विभाव्यमानत्वात् स्वप्नवदित्यर्थः ॥ १२७ ॥

ननु स्वप्नस्य निद्रादिदोषजन्यस्य युक्तोऽविद्याध्यासत्वेन तद्द्रष्टुः पृथगसद्भावस्तेन कथं जाग्रत्प्रपञ्चस्य साम्यम्। अत एव "वैधर्म्याच्च न स्वप्नादिवत्" इति स्वप्नवैषम्यं सूत्रकार आहेत्याशङ्क्य प्रमातरि सति बाधाबाधाभ्यां स्वप्नजागरितयोर्वैधर्म्येऽप्यध्यस्तत्वेन त्रिकालासत्त्वे न कोऽपि विशेष इत्याशयेनाह—

मुक्तामुक्तौ विद्वदज्ञौ त्वदन्या-
वाकाशादि क्ष्माऽवसानं च विश्वम् ॥
स्वाविद्योत्थस्वान्तनिष्पन्दनं तद्
विज्ञातव्यं मा ग्रहीरन्यथैतत् ॥ १२८ ॥

मुक्तेति। शुकादिर्मुक्तश्चैत्रादिरमुक्तः, एवं गुर्वादिर्विद्वान् देवदत्तादिरज्ञः। क्ष्मा पृथिवी अवसानेऽन्ते यस्य विश्वस्य तदेतत् सर्वं स्वाविद्योत्थं यत् स्वान्तमन्तःकरणं तद्गतवासनानिमित्तत्वात्तन्निष्पन्दनं तच्चेष्टामात्रमविद्याकार्यान्तःकरणपरिणाम इति वा ज्ञातव्यम्, अन्यथा स्वप्नवैलक्षण्येन सत्यतया मा ग्रहीर्मा जानीहीत्यर्थः। अथवा

एवं हेयं संसारं प्रपञ्चमाविद्यकं निरूप्य यत्प्राग्निवर्तदृष्टेरेकानेकजीवविषयत्वेन द्वैविध्यमुक्तं तत्र शुको मुक्तो नास्मदादिरिति वैदिकलौकिकव्यवहारानुरोधेन जीवनानात्वमेवेत्याशङ्क्य दृष्टिमात्रं तथा स्वप्नवत्, न तु वास्तवो व्यावहारिको वा जीवभेदोऽस्ति। तथाहि, अविद्यायां प्रतिबिम्बितं हि चैतन्यं जीवः अविद्या च लाघवानुगृहीतया अजामेकामित्यादिश्रुत्या तदनुभवेन तद्भेदे प्रमाणाभावाच्चैका सिध्यतीत्येक एव जीवः, स चाविद्याकार्यानेकान्तःकरणावच्छेदेना-

नेकरूपप्रमातृकर्तृभोक्तृभावं प्रतिपद्यत इति लौकिकवैदिकव्यवहारो निखिलोऽपि यथायथमेकस्मिन्नपि जीव उपपन्न एवेति नानन्तजीवकल्पना युक्ता, अनन्यथासिद्धप्रमाणाभावाद् गौरवाच्च । अन्तःकरणनानात्वं चैकजीववादेऽपि प्रसिद्धव्यवस्थितव्यवहारानुरोधेन कल्प्यमानं न लोहगन्धितामावहतीत्याशयेनाह—मुक्तामुक्ताविति ॥ १२८ ॥

नन्वेवमपि मुक्तामुक्तादिव्यवस्था कथं ? न ह्येकाज्ञाने तस्य निवृत्तावन्यत्र बन्धः संभवति । न ह्यतीतप्राक्काले कोपि न मुक्त इति वक्तुं शक्यम् । एवम् आगामिकालेऽपि मुक्तामुक्तभेदः स्थास्यतीति न जीवैकत्वमिति शङ्कामनूद्य दृष्टान्तेन निराचष्टे—

कालोऽतीतोऽनादिरेष्यन्ननन्तो
मुक्तामुक्तौ तत्र पूर्वं तथोर्ध्वम् ॥
तस्मादेतद् दुर्घटं शङ्कसे चेन्
मा शङ्किष्ठाः स्वप्नदृष्टान्तदृष्टेः ॥ १२९ ॥

कालोऽतीत इति । अतीतः कालोऽनादिः, एष्यन् भविष्यंश्च कालोऽनन्त इति योजना । तत्र तयोः कालयोर्मुक्तामुक्तौ सर्वतः प्रसिद्धाविति शेषः । यस्मादयमर्थः प्रामाणिकः तस्मान्मदुक्तं दुर्घटं शङ्कसे चेदित्यनुवादः । उत्तरं मा शङ्किष्ठा इति । लोकप्रसिद्धेर्भ्रान्तिमात्रत्वात्तत्प्रसिद्धानुवादित्वाच्च श्रुत्यादेर्न विरोध इत्याह—स्वप्नेति । तथा चाविद्यामात्रविवर्तस्वप्नवन्मिथ्याभूतस्यापि व्यवहारास्पदत्वोपपत्तेर्न दुर्घटमिति भावः ॥ १२९ ॥

दृष्टान्तं विवृण्वन्दार्ष्टान्तिकेऽपि तदर्शयति—

सुप्तो जन्तुः स्वल्पमात्रेऽपि काले
कोटीः पश्येदुक्तसंवत्सराणाम् ॥
पश्येत्कोटीरेवमागामिनां च
जाग्रत्काले योजयेत्सर्वमेतत् ॥ १३० ॥

सुप्त इति । सुबोधम् ॥ १३० ॥

दार्ष्टान्तिकमपि विवृणोति—

कालोऽनादिस्तत्र मुक्तः शुकादिः
कालोऽनन्तो मोक्ष्यते तत्र चान्यः ॥
इत्येवं ते बन्धमोक्षव्यवस्था-
संसिद्धिः स्यादापरात्मप्रबोधात् ॥ १३१ ॥

कालोऽनादिरिति । आपरात्मप्रबोधाद् ब्रह्मात्मैक्यसाक्षात्कारपर्यन्तमात्मैकत्वाज्ञानात् स्वप्न इव मुक्तामुक्तादिभेदव्यवहारोऽविदुषां सिध्यति, विवेकिनां तूक्तन्यायेन जीवैकत्वमेव संमतमिति भावः ॥ १३१ ॥

एवं स्वसंमतजीवैकत्वमुक्त्वा तत्र मतान्तराणि दर्शयन् प्रथमं ब्रह्मप्रतिबिम्बानन्तजीवाश्रयं बिम्बरूपब्रह्मविषयं सकलप्रपञ्चभ्रमोद्भवकारणमज्ञानमेकम् । यथाऽनेकपिण्डेषु गवादिव्यक्तिष्वाश्रितं गोत्वादिसामान्यम् । तच्च ब्रह्मसाक्षात्कारवन्तं पुरुषं जहाति "जहात्येनां भुक्तभोगाम्"इति श्रुतेः । विद्याविहीनमज्ञं नरं भजते "जुषमाणोऽनुशेते" इति श्रुतेः । यथा गोत्वादिजातिरिदानीं नष्टामात्मनो व्यक्तिं विहायानष्टां विद्यमानामाश्रयते तद्वदिति बन्धमोक्षव्यवस्थां ये जगुस्तन्मतमाह—

अज्ञानं सकलभ्रमोद्भवनकृत् पिंडेषु सामान्यव-
ज्जीवानां प्रतिबिम्बकल्पनपुषां बिम्बोपमे ब्रह्मणि ॥
विद्वांसं पुरुषं जहाति भजते विद्याविहीनं नरं
नष्टानष्टमिवात्मपिण्डमधुना जातिस्तथैके जगुः ॥१३२॥

अज्ञानमिति । उक्तार्थम् ॥ १३२ ॥

इदं चानुपपन्नम् । न ह्येकस्मिन्नज्ञान एकस्य ब्रह्मणोऽनेके प्रतिबिम्बाः संभवन्ति, लोके तथाऽदर्शनात् । न चाज्ञाने विद्यमाने तत्प्रतिबिम्बानां प्रतिबिम्बत्वापगमः सम्भवतीति न मुक्तिरुपपद्यते । न च ज्ञानमवि-

द्यासमानविषयं तन्न निवर्तयतीति युक्तं, येनेदानीमज्ञानां संसारो भवेत्। अन्यथाऽज्ञानस्य कदापि निवृत्तिर्न स्यात्। न हि दृष्टान्तमात्रेण किंचित् सिध्यतीत्यरुच्याऽज्ञानानन्त्यमादाय बन्धमोक्षव्यवस्थाविषयं मतान्तरमाह—

अज्ञानानि बहून्यसंख्यवपुषो जीवान् मुमुक्षूनपि
ज्ञानाज्ञानसमाश्रयाननुयुगं तेषां च निःश्रेयसम् ॥
मायामीश्वरसंश्रयामनुगमात् संसारसंवर्त्तिनीं
केचिद् दैवविघातनिघ्नमनसः स्वीचक्रुरल्पश्रुताः॥१३३॥

अज्ञानानीति। अस्मिन् पक्षे ज्ञानेनाज्ञानस्य निवृत्तिप्रसिद्धिर्न बाध्यते, अज्ञानसमानाश्रयविषयकज्ञानेन लोकेऽप्यज्ञाननिवृत्तेर्दृष्टत्वादित्यर्थः। आध्यात्मिकप्रमातृत्वकर्तृत्वसुखदुःखादिजनकाज्ञानानि बहून्यपरे स्वीचक्रुरिति सम्बन्धः। एवमसंख्यवपुषो जीवानपि स्वीचक्रुरिति योजना। जीवानां विशेषणं मुमुक्षूनित्याद्याश्रयानित्यन्तम्। अनुयुगं प्रतियुगं तेषां जीवानां निःश्रेयसं च स्वीचक्रुरित्यनुषङ्गः। ननु वियदादेरप्यज्ञानकार्यत्वे कर्तृत्वादिवत् सर्वजीवसाधारण्यं न स्यादित्याशङ्क्याह—मायामिति। वियदादिप्रपञ्चहेतुरज्ञानादन्या माया सा चेश्वराश्रया सकलबाह्यकार्यसाधारणकारणमित्यपि स्वीचक्रुरित्यन्वयः। तथा च श्रुतिः—मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति। इदं च मतमत्यन्तमनुपपन्नम्, अज्ञाननानात्वादेरसम्भवादित्यनुवादसमय एव तस्य फल्गुत्वं सूचयन्नाह—केचिदित्यादिना। दैवं दुरदृष्टं तत्कृतविघातेन प्रतिबन्धेन निघ्नं वशीकृतं विपर्यस्तं मनो येषां ते तथा। अल्पश्रुतत्वादपि तेषां तन्मतं दुष्टमित्याह—अल्पश्रुता इति ॥ १३३ ॥

एवं नानाजीवाश्रयमतद्वयेन स्वाभिमतमुक्तामुक्तव्यवस्था द-

शिता । इदानीं तत्रारुच्या मतान्तरमाह—

आकाशे विहगोऽस्ति नास्ति च यथा तद्वत् परब्रह्मणि
स्वच्छे चिद्वपुषि स्वभावविमलेऽसङ्गे शिवे शाश्वते ॥
निर्भेदऽनुदयव्यये ऽनवयवेऽविद्या भवेन्नो भवे-
दित्येवं निरवद्यमाहुरपरे पक्षव्यवस्थार्थिनः ॥ १३४ ॥

आकाश इति । आकाशे पक्षी संचरतीति यदैकेन प्रमीयते तदैव स्थलान्तरे परेणाकाशे विहङ्गो नेति प्रमीयते । न चाकाशस्यांशभेदोऽस्तीति युगपदेकस्य विहगस्यैकत्र भावाभावावङ्गीकर्तव्यौ । एवं परे ब्रह्मणि स्वच्छचैतन्यादिस्वभाव एकस्या अविद्याया भावाभावाविरुद्धाविवेकमेव ब्रह्माविद्याश्रयः संसरति,तदैवं तदेव ब्रह्माविद्याशून्यं मुक्तमिति मुक्तामुक्तव्यवस्थां स्वपक्षतया केचनोचिरे इत्यर्थः । ब्रह्मविशेषणानामेषोऽर्थः । स्वच्छे निर्मले । अन्यकृतनैर्मल्यं वारयति-स्वभावविमल इति । तत्र हेतुश्चिद्वपुषीति । स्वभावविमलत्वेऽप्यागन्तुकमलयोगं वारयति—असङ्ग इति । तत् साधयति—शिव इति । निर्गुण इत्यर्थः । शिवमद्वैतं चतुर्थं मन्यन्त इति श्रुतेः । विनाशं वारयति—शाश्वत इति । शाश्वतत्वं साधयति—अनुदयव्यय इति । सर्वस्योदयव्ययसाक्षित्वादधिष्ठानत्वाच्च स्वत उदयव्ययशून्य इत्यर्थः । तथाप्यविद्याभावाभावयोरेकत्र विरोधात्तदाश्रयत्वाय कथंचिद् भेदोऽभ्युपेय इति चेन्नेत्याह—निर्भेद इति । स्वभावतो निर्भेदत्वं साधयति—अनवयव इति । भेदाभावेऽप्याकाश इव भावाभावाश्रयत्वं न विरुध्यत इति भावः । निरवद्यम् अविद्याया दुर्घटत्वस्यालङ्कारत्वादेकत्र भावाभावविरोधदोषहीनमित्यर्थः ॥ १३४ ॥

अत्रापि वक्ष्यमाणरीत्याऽरुचेः सत्त्वात् पक्षान्तरमाह—

शुद्धे वस्तुनि यद्यपि प्रविशति ध्वान्तं मनः कारणं
स्वीकृत्यैव तथाप्युपाधिमपरं ब्रह्मस्वरूपे विशेत् ॥
तच्चान्तःकरणं सुसूक्ष्मवपुषा तिष्ठद् बहिः सर्वदा
चैतन्ये तमसो नियामकमिति स्वीचक्रुरन्ये पुनः ॥ १३५ ॥

शुद्धे वस्तुनीति । यद्यप्युक्तश्रुत्यादिना शुद्धे ब्रह्मण्येव कारणं जगत्कारणं ध्वान्तमविद्या तिष्ठति, तथापि निरंशे तस्मिन्नज्ञानस्य युगपद् भावाभावयोरसंभवादवच्छेदकभेदेन तद् वक्तव्यमित्यपरमाश्रयातिरिक्तं मन उपाधिद्वारमवच्छेदकमिति यावत् । स्वीकृत्यैव सृष्ट्वेत्यर्थः । तद् ब्रह्मस्वरूपे विशेत, न तु निर्द्वारमित्यर्थः । तच्चान्तःकरणं यद्यपि सुषुप्त्यादौ लीयते, तथापि सूक्ष्मवपुषा तदापि तिष्ठत्येव । तदपि न तदाश्रयस्य ब्रह्मणो विशेषणं तदाऽज्ञानस्य तत्रापि वृत्तिप्रसङ्गात् । न च कार्यस्य स्वकारणाश्रयत्वं संभवति अतो बहिस्तदुपाधिरेव सद् दृतिहरिशब्दार्थे पशुत्वमिव सर्वदा चैतन्ये तमसो वृत्तिनियामकमित्यन्ये पुनः स्वीचक्रुरित्यर्थः । एवं चान्तःकरणावच्छिन्ने चैतन्ये तदानीमेव तदभाव उपपद्यत इत्युक्तरीत्या मुक्तामुक्तव्यवस्थोपपद्यत इति भावः ॥ १३५ ॥

एवमपि ज्ञानाज्ञानसाध्यमुक्तामुक्तव्यवस्था नोपपादितेत्यपरितोषेण पक्षान्तरमाह—

अज्ञानि ब्रह्म बुद्धीरनुसरति ततः स्थावरं जङ्गमं च
स्वाज्ञानादेव भूत्वा क्वचिदवगतितो मुक्तमन्यत्र बद्धम् ॥
तच्चाज्ञानं विनष्टं स्थितमथ च तदेवांशभेदोपपत्ते-
रेवं सर्वव्यवस्था परमपुरुषगा जाघटीतीति केचित् १३६॥

अज्ञानीति । यद्यप्यज्ञानमेकमिति श्रुतिसिद्धं तथापि व्यवस्थितानेककार्यवशात्तत्कार्याण्यन्तःकरणानि बहूनि स्वीकर्त्तव्यानि, ततश्च तदज्ञानि ब्रह्म यस्माद् बुद्धीरन्तःकरणान्यनुसरति तत्र प्रतिबिम्बितं भवति, ततः स्वाज्ञानादेव स्थावरं जङ्गमं च तद् भूत्वा क्वचित् मनुष्यादिशरीरोपाधौ विवेकवैराग्यादिसाधनेन ब्रह्मावगतितस्तदुपादानाज्ञानांशतत्कार्यशरीरद्वयतद्धर्मनिवृत्त्या मुक्तं भवति। अन्यत्र विद्याभावादविद्यया बद्धमिति तद्व्यवस्थोपपद्यते । ननु निरंशेऽज्ञाने तदंशप्रयुक्तव्यवस्थानुदयान्नेत्याशङ्क्याह—तच्चेति । अथ

च तदेव स्थितमिति संबन्धः। अयमाशयः। यस्यां बुद्धौ विद्योत्पत्तिस्तस्मादुपादानांश एवाज्ञानस्यैकोऽशस्तद्द्वारा बुद्धिनाशान्नश्यति,उपाध्यन्तरोपादानांशद्वारेण तु तिष्ठतीत्येवमंशभेदो विवक्षित इति। अनिर्वचनीयाज्ञाने निरंशत्वनिर्णयदूषणासंभवेन सांशत्वकार्यसंभवादेकाज्ञानमतेऽपि परमपुरुषाश्रिता मुक्तामुक्तव्यवस्थाऽतिशयेन घटत इति केचिदाहुरित्यर्थः॥ १३६॥

यद्यज्ञानस्याप्यवयवास्तेषु च प्रत्यवयवं प्रतिबिम्बभूता जीवास्तेषां ब्रह्मण्यज्ञानावरणानि चानन्तानि स्वीक्रियन्ते तर्हि नानाऽज्ञाननानाजीववाद एवाश्रित इति नैकाज्ञानैकजीवमाश्रित्य बन्धादिव्यवस्थोपपादितेति तदपि परित्यज्य केषांचिन्मतमाह—

बाह्याध्यात्मिकवस्तुजातजननी माया हरेर्बन्धनी
शक्तिर्दाशकजालवत् प्रसरणं प्राप्नोत्यविद्यावतः॥
जीवान् संकुचतीच्छया भगवतः सत्याऽस्तु मिथ्याऽथ वा
संकोचश्च विलक्षणश्च भवतः स्वाभाविकावित्यपि॥१३७॥

बाह्येति। अस्मिन् मते ह्यज्ञानमनात्मन्यात्मभ्रान्तिस्तद्वासना च तदुभयमपि संसरणे निमित्तमेव नोपादानं, गुणस्य तदयोगात्। तदुपादानं तु बाह्यस्य वियदादेराध्यात्मिकस्याहंकारतद्धर्मप्रमुखस्य च वस्तुजातस्य जननी मायाशब्दवाच्या बन्धनी जीवसंसारहेतुर्हरेरीश्वरस्य शक्तिरेवेत्यर्थः। मायां तु प्रकृतिं विद्यान् मायिनं तु महेश्वरमिति श्रुतेः। सा च दाशकस्य मत्स्यघातकस्य जालवत् मत्स्यबन्धनार्थवागुरावदविद्यावतः प्रति प्रसरणं प्राप्नोतीश्वराश्रिता मायैव सर्वान् बध्नातीत्यर्थः। भक्त्या चार्जितभगवत्प्रसादवशात् मुक्तान् जीवान् प्रति सङ्कुचति तान् न बध्नाति, यथा दाशकेच्छया जालम्। ननु सा यदि सत्या तर्हि ज्ञानान्न निवर्तेत यद्यसत्या सैवानाद्यज्ञानमिति न ततो भेद इत्याशङ्क्य न, सत्यत्वेऽपि प्रपञ्चस्येश्वरज्ञानादिवत्तद्विषयज्ञानादपि निवृत्त्युपपत्तेः। असत्यत्वेऽपी-

ईश्वरशक्तेस्तस्या अज्ञानत्वानुपपत्तेः। कस्मिन् सति किं स्यादित्याशयेनाह—सत्येति। ननु जीवे तत्संकोचविकासयोर्विकारत्वाद्रज्जुसर्पवत् मिथ्यात्वे कथं तदधीनसंसारस्य सत्यत्वमित्याशङ्क्य तयोस्तत्स्वाभाविकत्वेन रज्जुसर्पवद्दोषाजन्यतया सत्यत्वमिति नोक्तदोष इत्याशयेनाह—संकोचश्चेति। विलक्षणः प्रसारः, एकश्चकारोऽवधारणे स्वाभाविकावेवेति सम्बन्धः। द्वितीयस्तु तत्कार्यसमुच्चयार्थः। इत्यपि केचिदित्यनुषङ्गः। तौ च संकोचविकासौ स्वाभाविकौ केवलमीश्वरेच्छानिबन्धनौ न विद्यानिबन्धनः संकोचो नाप्यविद्यानिबन्धनो विकास इत्यर्थः ॥ १३७ ॥

दृश्यस्य मिथ्यात्वनियमादीश्वरस्याप्युक्तवक्ष्यमाणन्यायेनाज्ञानाश्रयत्वसंभवान्नेदं मतं युक्तमिति समुच्चयवादिनां मतमाह—

संस्कारभ्रमसन्ततिं प्रतिनरं भिन्नां परब्रह्मणि
स्वीचक्रुर्विषये प्रवाहवपुषाऽनादिं तमः केचन ॥
तामुच्छिद्य समुच्चयेन घटते मोक्षाय कश्चिन्नरः
कश्चित्तद्विरहेण संसरति ना जीवाश्रया सेति च १३८॥

संस्कारेति। आत्मनो बाह्याध्यात्मिकसंसारो नाज्ञानजन्यः किं तु परब्रह्मणि विषये देहाद्यतिरिक्तव्यापकात्मविषये अहं मनुष्य इति पूर्वपूर्वभ्रमतत्संस्कारान्निमित्तादात्मन एवानादेश्चोपादानात् सत्साद् भवति भ्रमादयश्च प्रतिनरं भिन्ना एव, अज्ञानमपि भ्रमादिरेव। तच्च प्रवाहवपुषाऽनादिभावं भ्रमादिसंततिं कर्मसमुच्चितेन ज्ञानेनोच्छिद्य कश्चिन्नरो मोक्षाय लिङ्गशरीरविलयायात्यन्तिकदुःखनिवृत्तये वा घटते, अन्यः कश्चित् समुच्चयाभावात् संसराति तमोरूपा सा संस्कारादिसंततिश्च जीवाश्रयेति ब्रह्म नाज्ञानि, न वा न जानामीत्यनुभवस्य काचन क्षतिरिति केचन स्वीचक्रुरित्यर्थः ॥ १३८ ॥

इदमप्यनुपपन्नम्, असङ्गस्याविकारिणः प्रत्यगात्मनो भ्रमतत्संस्कारादेरसंभवात्। समुच्चयं च चतुर्थे निराकरिष्यति। किं च इतोऽप्येते सप्तापि पक्षा न सङ्गच्छन्ते, तेषां जीवानां परस्परं ब्रह्मणश्च भेदवि-

पयत्वात्, तृतीयचतुर्थौ तु विशिष्य निराकरिष्यति। भेदश्च किं काल्पनिकः पारमार्थिको वा। नाद्यः, स्वप्नवदेकस्यापि जीवस्य कल्पितभेदेन सर्वव्यवहारोपपत्तेस्तदानन्त्यस्याप्रामाणिकत्वात्। द्वितीये चाज्ञातं ब्रह्म वाच्यमात्मवदननुभवात्तस्याज्ञातत्वं च युष्माकं कुतः सिध्येदिति विमृशति—

अज्ञस्तावत् प्रत्यगात्माहमज्ञ
इत्येवं नः सिध्यति स्वप्रकाशात्॥
अज्ञातं तु ब्रह्म सिध्येत् कुतो वः
सम्यग् ज्ञानाद् भ्रान्तितः स्वप्रकाशात्॥ १३९॥

अज्ञस्तावदिति। वक्ष्यमाणापेक्षया तावच्छब्दः। अहमज्ञ इत्यनुभूयमानमात्माज्ञानं नोऽस्माकं मते स्वप्रकाशात् साक्षिणः सिध्येदित्युपपादितम्। वो युष्माकं मते जीवातिरिक्तमज्ञातं ब्रह्म कुतः सिध्येत्। किंशब्दोऽभिप्रेतविकल्पानाह—सम्यग्ज्ञानादिति। घटादिवदित्यर्थः। भ्रान्तितः स्वप्नवत् स्वप्रकाशादात्मवच्च कुतोऽपीत्यर्थः। एतमेव विशेषं तुशब्देन दर्शयति॥ १३९॥

तत्राद्यं प्रत्याह—

सम्यग्ज्ञानाद् ब्रह्मणः सिद्धिपक्षे
जाड्यं नस्य स्याद् घटादेर्यथैव॥
सम्यग्ज्ञानाद् ब्रह्मणोऽज्ञानसिद्धौ
तस्यापि स्यात् सत्यता तद्वदेव॥ १४०॥

सम्यग्ज्ञानादिति। ब्रह्मणो ज्ञातस्येति शेषः। ज्ञानविषयस्य जडत्वनियमाद् ब्रह्मणोऽपि तथात्वं स्यादेवेत्यर्थः। द्वितीयां नाज्ञानाश्रयं दोषान्तरमाह—सम्यगिति। ब्रह्मणोऽज्ञानसिद्धावज्ञातत्वसिद्धौ तस्याज्ञानस्यापि प्रमाणसिद्धत्वाद् सत्यता स्यात्। तद्वदेव ब्रह्मवदेव न च दृश्यस्याज्ञानस्य सत्यतोपपन्नेति भावः॥ १४०

भ्रान्तिज्ञानादिति द्वितीयं कल्पं प्रत्याह—

भ्रान्तिज्ञानाद् ब्रह्मणः सिद्धिपक्षे
तस्यापि स्यात् कल्पितत्वं तमोवत् ॥
अज्ञातं चेद् ब्रह्म नः स्वप्रकाशं
मा भाषिष्ठा नानुभूतिस्तथा नः ॥ १४१ ॥

भ्रान्तीति । भ्रान्तिविषयस्याज्ञानादेरिव ब्रह्मणोऽपि बाध्यतया कल्पितता स्यादित्यर्थः । स्वप्रकाशादिति तृतीयं पक्षं प्रत्याह—अज्ञातमिति । मा भाषिष्ठाः मा कथय । तत्र जीवातिरिक्तस्य सर्वज्ञादिस्वभावस्य ब्रह्मणो विना वेदान्तवाक्यमस्माकं तथाऽननुभवादिति हेतुमभिप्रेत्याह—नानुभूतिरिति ॥ १४१ ॥

ब्रह्मणः परमतेऽज्ञातत्वाश्रयमुक्तं दोषं मायावित्वपक्षेऽपि सामान्यतोऽतिदिशति—

अज्ञातत्वे यानवोचाम दोषान्
मायावित्वे ब्रह्मणस्तानवेहि ॥
मिथ्याज्ञानात् स्वप्रकाशात् प्रमाणात्
संसिद्धिः स्यात्तस्य तत् कथ्यतां नः ॥ १४२ ॥

अज्ञातत्व इति । विशिष्य तं दर्शयितुं तानेव विकल्पानाह—मिथ्याज्ञानादिति । तस्य ब्रह्मणः तत् मायावित्वमित्यर्थः ॥१४२॥

तदेव दूषणमाह—

मिथ्याज्ञानाद् ब्रह्मणः सिद्धिपक्षे
मायेव स्यात् कल्पितं तच्च तद्वत् ॥
मानादिष्टं ब्रह्म मायावि चेद् वा
मायायाः स्यात् सत्यता जाड्यमस्य ॥ १४३ ॥

मिथ्याज्ञानादिति । मायायाश्च दृश्यत्वेन मिथ्यात्वं सिद्धमिति सा दृष्टान्तीकृता । अन्त्ये दोषमाह—मानादिष्टमिति । मायाविशिष्टस्य मानाविषयत्वे विशेषणस्य सत्यत्वम् । अत एव मायास्यात् सत्यतेत्युक्तम् । अस्य ब्रह्मणश्च विशेष्यस्य मानविषय-

त्वेन पूर्ववज्जाड्यमपि स्यादित्यर्थः ॥ १४३ ॥

इदानीं द्वितीयं विकल्पं दूषयति—

तन् मायावि ब्रह्म चेत् स्वप्रकाशं
मायापि स्याद् ब्रह्मवत् स्वप्रकाशा ॥
मायां पश्येद् ब्रह्म चेत् स्वप्रकाशं
तत्रापि स्यात् स्वानुभूत्या विरोधः ॥ १४४ ॥

तन् मायावीति । मायाविशिष्टस्य स्वप्रकाशत्वे मायाऽपि स्वप्रकाशा स्यात्तथा च स्वप्रकाशत्वे चिद्रूपत्वात् सत्यत्वाच्च मायात्वव्याकोप इत्यर्थः । ब्रह्म स्वप्रकाशं माया तु तद्वेद्येति स्वीकारान्नोक्तदोष इति चेत्तत्राह—मायामिति । पूर्ववत् स्वानुभूत्या विरोध इति भावः ॥ १४४ ॥

ननु यथाऽज्ञश्चात्मा स्वप्रकाशत्वरूपेणाज्ञानं पश्यति तथा मायावि ब्रह्मापि मायां पश्यत्वित्याशङ्क्य तस्य प्रतीचः स्वानन्यत्वात्तद् युज्यते न तु तदतिरिक्तमायाविनस्तत्त्वमन्यस्य तथा सिध्यतीत्याशङ्कापूर्वकमनुभवविरोधं स्पष्टयति—

आत्मा मूढः स्वप्रकाशो यथाऽयं
नैवं मायि ब्रह्म नः स्वप्रकाशम् ॥
अज्ञादन्यद् ब्रह्म चेत् स्वप्रकाशं
द्वे विस्पष्टे स्वप्रकाशे स्फुरेताम् ॥ १४५ ॥

आत्मेति । नः अस्मान् प्रति । द्वे जीवब्रह्मणी । न च जीवातिरिक्तस्य ब्रह्मणस्तथा स्फुरणमस्तीति यत्किंचिदेतदिति भावः ॥ १४५ ॥

एवं जीवातिरिक्तस्याज्ञातत्वं प्रमाणाभावेन दूषयित्वा तद्भेदमपि विकल्प्य दूषयति—

ज्ञायन्ते चेद् ब्रह्मणा जीवभेदा
जाड्यं तेषां कुड्यवन्निर्विवादम् ॥
न ज्ञायन्ते ब्रह्मणा चेत्तदानीं
सर्वज्ञत्वव्याहतिर्दुर्निवारा ॥ १४६ ॥

ज्ञायन्ते चेदिति । ब्रह्मणा स्वस्माज्जीवानामन्योऽन्यं च भेदा ज्ञायन्ते चेत्तत्प्रतियोगित्वादिना तेषामपि दृश्यत्वापातादनात्मत्वप्रसङ्गः, दृश्यस्य तन्नियमादेतदुक्तम् । निर्विवादमिति । अथैतद्दोषपरिहाराय ते न ज्ञायन्ते चेत्तदानीं ब्रह्मणः सर्वज्ञत्वहानिर्वज्रलेपैवेत्यर्थः ॥ १४६ ॥

इदानीं जीवानामपि भेदासिद्धिं दूषयितुं तेषां स्वप्रकाशत्वं प्रथममनुजानाति—

जीवा एते स्वप्रकाशस्वभावा
निर्भासन्ते ब्रह्मणश्चेद् विभक्ताः ।
तेषां भेदः स्वप्रकाशो न वा स्याद्
दोषं ब्रूमो दुर्निवारं द्विधाऽपि ॥ १४७ ॥

जीवा इति । तेषां भवतु स्वप्रकाशत्वं तद्भेदस्तु कथं प्रकाशत इति वक्तव्यम् । सोऽपि किं स्वप्रकाश उत नेति विकल्प्य पक्षद्वयेऽपि दूषणं संभावयति—तेषामिति ॥ १४७ ॥

तत्राद्यं दूषयति—

तेषां भेदः स्वप्रकाशो यदीष्टः
सत्यत्वं स्यात्तस्य तेषां तथैव
वेद्योऽभीष्टस्तद्विभागो यदि स्यात् ।
तानज्ञात्वा तद्विभागो न वेद्यः ॥ १४८ ॥

तेषां भेदः स्वप्रकाशो यदीति । तस्य भेदस्य । प्रतियोग्यादिसत्यतां विना कथं तस्य सा स्यादित्याशङ्क्य जीवानामपि स्वप्रकाशत्वे सत्यत्वनियमात्तस्य सा दुर्वारेत्याह—तेषामिति । तेषामपीत्यर्थः । द्वितीयं दूषयति—वेद्य इति । तेषां जीवानां विभाग इत्यर्थः । तान् प्रतियोगिभूतान् जीवान् । धर्म्यादिज्ञानं विना भेदस्य ज्ञातुमशक्यत्वाज्जीवा अपि ज्ञातव्या इत्यर्थः ॥ १४८ ॥

ततः किं तत्राह—

जीवाः सर्वे त्वां प्रति प्रस्फुरन्तः
सम्यग् ज्ञानात् प्रस्फुरन्ति स्वतो वा ॥
यद्वा मिथ्याज्ञानसामर्थ्यतोऽमी
पक्षः कस्ते रोचते ब्रूहि तन्मे ॥ १४९ ॥

जीवा इति । व्यक्तम् ॥ १४९ ॥

आद्यं पक्षं दूषयति—

सम्यग् ज्ञानाज्जीवभेदप्रसिद्धा-
वद्वैतत्वं ब्रह्मणो न प्रसिद्ध्येत् ॥
जीवाः सर्वे मां प्रति स्वप्रकाशा
इत्युक्तिस्ते स्वानुभूत्या विरुद्धा ॥ १५० ॥

सम्यग् ज्ञानादिति । प्रामाणिकस्य ब्रह्मवत् सत्यत्वनियमेन तदद्वैतप्रमाणसिद्धं न सिद्ध्येदित्यर्थः । द्वितीयं पक्षं दूषयति—जीवा इति । तथा सत्यन्येषामपि तदेव स्वतः सर्वजीवानुभवप्रसङ्गः । भिन्नत्वात्तेषां स न भवति चेत्तवापि स न भवेदिति भावः ॥ १५० ॥

तृतीयपक्षे त्वेक एव जीवः स्यान्न तद्भेद इत्याशयेन तं दूषयति—

मिथ्याज्ञानाज्जीवभेदप्रसिद्धौ
सम्यग्ज्ञानाद् बाध एवाभ्युपेयः ॥
मिथ्याज्ञानाद्रज्जुसर्पः प्रसिद्धः
सम्यग्ज्ञानात्तस्य बाधोऽपि सिद्धः ॥ १५१ ॥

मिथ्याज्ञानादिति । । अभ्युपेय एवेति सम्बन्धः । सम्यग्ज्ञानबाध्यत्वे च तेषां मिथ्यात्वाद् बन्धमोक्षभाक्त्वं न स्यात् तथा च तद्व्यवस्थापनाय पक्षोद्भावनं तव निरर्थकमिति भावः । कुत इत्याशङ्क्य मिथ्यात्वबाध्यत्वयोः समानियतत्वादित्याशयेनाह—मिथ्याज्ञानाद्रज्जुसर्प इति । तथा च कथमपि न जीवभेदसिद्धिरिति भावः ॥ १५१ ॥

एवम् "अज्ञानं सकलभ्रमोद्भवनकृत्" इत्याद्युपन्यस्तेषु भेदपक्षेषु साधारणं दूषणमभिधायैकोपाधाविति श्लोकोक्ततृतीयपक्ष एकस्यैकत्रैकदा भावाभावौ न सम्भवत इति तत्पक्षस्यात्यन्तासम्भवमेवाह—

एकोपाधावेकवस्तुप्रसिद्धौ
भावाभावौ नेक्षितौ क्वापि लोके ॥
पक्ष्यादीनामास्तिता नास्तिता च
व्योम्न्येकस्मिन्नप्यवच्छिन्न एव ॥ १५२ ॥

एकोपाधाविति । एकस्मिन्नधिकरण इत्यर्थः । प्रसिद्धाविति एतदनन्तरं सत्यां तत्र तदभावो न सिद्ध्येदिति द्रष्टव्यम् । कुत इत्याशङ्क्य भावाभावयोर्विरुद्धत्वाल्लोके क्वापि तथा भानादर्शनाच्चेत्याशयेनाह—भावाभावाविति । क्वाप्येकोपाधाविति शेषः । अथवैकवस्तुनः प्रतियोगिभूतस्य सम्बन्धितया प्रसिद्धौ भावाभावौ लोके क्वापि नेक्षिताविति योजना । न चोक्तं गगने पक्षितदभावयोर्युगपदस्तित्वमिति शङ्क्यम् । तदृदृष्टान्तासम्मतेः । न चानुभवविरोधः, न हि यत्र पक्षी दृश्यते तत्रैव तदभावोऽपि, किं त्वन्यत्रैव । न च गगनस्यैकत्वान्निरंशत्वाच्च नास्ति तदाश्रयभेद इति वाच्यम् । सवितृप्रभावयवावच्छेदकल्पितगगनप्रदेशभेदात्तदुपपत्तेरित्याशयेनाह—पक्ष्यादीनामिति । अवच्छिन्न एव, केन चिदुपाधिनेति शेषः ॥ १५२ ॥

न च तदवच्छेदकसम्बन्धोऽपि तत्रैव तदानीं नास्तीति वक्तव्यम् । अन्यथा केवलगगनस्येवावच्छिन्नस्यापि तस्यैकत्वान्न पक्ष्यादीनां युगपत्तत्र भावाभावौ स्याताम् । तथा च न स एव दृष्टान्तोऽस्त्वित्याशङ्कावकाशः, यतस्तदधिकरणेऽपि केन चिदवच्छिन्नत्वमिष्यत एवेत्याह—

सोऽवच्छेदोऽप्यस्ति नास्त्यम्बरे चेत्
तत्रान्वेष्यः कोऽप्यवच्छिन्नभावः ॥
सोऽवच्छेदोऽप्यस्ति नास्त्यम्बरे चेत्
बाढं तस्मिन्सोऽप्यवच्छिन्न एव ॥ १५३ ॥

सोऽवच्छेद इति। तत्राप्युपाध्यन्तरावच्छिन्न एव नभसि तौ स्तो न केवल इति। परिहरति-तत्रान्वेष्य इति। अवच्छिन्नभावोऽवच्छेदकान्तरेणावच्छिन्नत्वमित्यर्थः। तत्र प्रभावयवानां बहुत्वात्तत्तदेकावयवावच्छिन्नेऽवच्छेदान्तरभावान्नोक्तदोष इत्याशयः। एवं तत्तदवच्छेदाधिकरणगगनमन्यावच्छिन्नमेवेत्याशङ्कापूर्वकमाह-सोऽवच्छेद इति ॥१५३॥

नन्वेवमनवस्था दुर्निवारा स्यादित्याशङ्क्य तत्र मायावादिनां सा नानिष्टा प्रकारान्तरेणानुपपन्नस्यापि प्रतीतिमात्रेणानिर्वचनीय-शुक्तिरजतादिवत्तदङ्गीकारादित्याशयेनाह—

नन्वेवं स्याद् दुर्निवाराऽनवस्था
बाढं का नो हानिरिष्टैव सापि ॥
कर्मोद्भूतं नः शरीरं शरीरात्
कर्मोद्भूतिस्तत्र किं नेष्यते सा ॥ १५४ ॥

नन्वेवमिति। साऽनवस्था। किं च वर्त्तमानं देवदत्तशरीरं तदीयकर्मोद्भवं, तद्विना प्राणिनां विचित्रशरीरानुपपत्तेः। तच्च प्राक्तनदेवदत्तशरीरादुत्पन्नं शरीरं विना कर्मासम्भवात्तदपि शरीरं तत्पूर्वस्मात्कर्मणस्तदपि तत्पूर्वस्माच्छरीरादिति यथाकर्म शरीरानन्तप्रवाहोऽनादिरभ्युपगम्यते। एवमत्रापीत्याशयेनाह-कर्मोद्भूतमिति। अवच्छेदकपरम्पराभ्युपगमोऽपि न दोषायेत्येतावन्मात्रेऽयं दृष्टान्तः अतः संसारस्यानादित्वाद् दृष्टान्ते प्रवाह उपपद्यते नात्रावच्छेदप्रवाहोऽनादिरितिदूषणं यत्किंचित्, अनिर्वचनीयवादे तदभावादिति। वस्तुतस्तु परमतेऽपि संयोगाधिकरणतावच्छेदकस्य सर्वस्याप्यव्याप्यवृत्तित्वादयं दोषः समान इति नास्मान्प्रत्युद्भावनीय इति द्रष्टव्यम् ॥ १५४ ॥

एवमसम्भवेन तृतीयं पक्षं दूषयित्वा प्रमाणाभावादपि तं

दूषयति—

किं चाज्ञानं ब्रह्मणोऽस्यास्ति नास्ती-
त्येतत्कस्मात्त्वं विजानासि हेतोः ॥
मूढोऽस्मीति प्रत्ययादस्ति बुद्धि-
र्मुक्ते दाहान्मोहनास्तित्वबुद्धिः ॥ १५५ ॥

किं चेति । अस्य प्रागुक्तानिरंशचैतन्यात्मनः । कस्माद्विजानासीति । पूर्वोक्तयुक्त्या न कुतोऽपि ज्ञातुं शक्यत इत्यर्थः । पूर्वपक्षी शङ्कते—मूढोऽस्मीति । अस्मदादीनामज्ञानस्येति शेषः । अस्तिबुद्धिः अस्तितावुद्धिरित्यर्थः । मुक्ते नित्यमुक्ते ब्रह्मणि दाहादभावान्मुक्तेऽज्ञाननास्तिता ॥ १५५ ॥

ज्ञानोपायं प्रश्नपूर्वकं पूर्ववद्विकल्पयति—

मुक्तेऽज्ञानं दग्धमित्येतदेवं
कस्माद्धेतोर्वेत्सि तत् कथ्यतां नः ॥
मिथ्याज्ञानात् स्वप्रकाशात्प्रमाणा-
न्मुक्तेऽज्ञानं दग्धमित्यस्य सिद्धिः ॥ १५६ ॥

मुक्तेऽज्ञानमिति । दग्धमितीति । नास्तीत्यर्थः ॥१५६॥
कल्पत्रयमपि पूर्ववद् दूषयति सम्यग्ज्ञानादित्यादिना द्वयेन—

सम्यग्ज्ञानान्मुक्तिसिद्धिर्यदीष्टा
नूनं मुक्तः कुड्यवत्तो जडः स्यात् ॥
मिथ्याज्ञानान्मुक्तसिद्धिर्यदीष्टा
स्रग्सर्पादिप्रख्य एवैष मुक्तः ॥ १५७ ॥
मुक्तो मह्यं स्वप्रकाशश्चकास्ती-
त्येषा वाणी स्वानुभूत्या विरुद्धा ॥

नह्यश्रुत्वा शास्त्रमेतन् मनुष्यः
कश्चिज्ज्ञानात्येष मुक्तः शुकादिः ॥१५८॥

स्वानुभूतिविरोधमेव व्यतिरेकमुखेन प्रपञ्चयति—न हीति। शास्त्रं शुकादिमुक्तिप्रतिपादकं शास्त्रम्, मुक्त इत्यनन्तरमितिशब्दो द्रष्टव्यः। शुकवामदेवादिर्मुक्त इत्येतन्न हि जानातीत्यर्थः ॥१५७॥ ॥ १५८ ॥

नन्वन्तःकरणोपाध्यवच्छिन्ने अज्ञानमिति चतुर्थपक्षमनूद्य तत्र प्रागुक्तं दूषणमतिदिशति—

ताटस्थ्येनोपाधिमादाय मोह—
श्चैतन्येऽस्मिन् स्वप्रकाशे प्रविष्टः ॥
तेनेह स्याद्बन्धमोक्षव्यवस्थे-
त्युक्तं यत्प्राग्दूषणं तस्य विद्धि ॥ १५९ ॥

ताटस्थ्येनेति। तेनेति। उपाधिनेत्यर्थः। इह अस्मिन्मते। व्यवस्थेत्यन्तं पूर्वपक्षानुवादः। उक्तमित्यादि तस्यापि पक्षस्य पूर्वोक्तविकल्पदूषणयोरासञ्जनम ॥ १५९ ॥

किं चान्तःकरणावच्छिन्नमात्रवृत्तित्वेऽज्ञानस्यात्यन्तं परिच्छिन्नस्य न वियदादिभूतभौतिकप्रपञ्चोपादानत्वं संभवतीत्यस्योपलक्षणतयाऽन्यत्रापि तत्सत्त्व उपाधेस्तदधिकरणतानवच्छेदकत्वादानर्थक्यम्। नन्वन्तःकरणमज्ञानस्य तत्र प्रवेशे द्वारतयाऽऽश्रीयते, न त्वधिकरणतावच्छेदकतया, यथाऽग्नेर्गृहप्रवेशे उल्मुकं द्वारमित्याशङ्क्य तर्हि तद्द्वारा प्रविष्टमज्ञानम् अग्निरिव गृहमात्रं पूर्णं ब्रह्म व्याप्नुयादिति न तदभावस्तत्र स्यादित्याशयेनाशङ्कानुवादपूर्वकं व्यतिरेकमुखेनाह—

ताटस्थ्येनोपाधिरङ्गं यदि स्यान्
मोहाविष्टे ब्रह्मणि स्वप्रकाशे ॥
अग्निक्षेपस्योल्मुकं यद्वदेवं
मोहस्य स्यान्न प्रदेशस्थितत्वम् ॥ १६० ॥

तटस्थयेनेति । आविष्ट आवेशे । यद्वदित्यन्तं शङ्कानुवादः, एवमित्यादि दूषणम् । एवमग्निवदित्यर्थः । न प्रदेशस्थितत्वम् । तथा च ब्रह्मणि न त्वदुक्तस्तदभाव इत्यर्थः ॥१६०॥

उक्तमेव सदृष्टान्तं दार्ष्टान्तिकं विशदयति—

अग्निः क्षिप्तो ह्युल्मुकेन प्रदेश-
मात्रव्याप्तिं वर्जयित्वा समस्तम् ॥
वेश्म व्याप्नोत्येवमेवेह कृत्स्नं
ब्रह्म व्याप्नोत्याधिनास्तं तमोऽपि ॥१६१॥

अग्निः क्षिप्त इति । इहास्मिन्पक्षे । आधिनोपाधिना द्वारेणाऽस्तं क्षिप्तं प्रविष्टमिति यावत् ॥ १६१॥

तस्मादुक्तपक्षाणां दुष्टत्वान्मुक्तामुक्तेत्यादिनोक्तैव बन्धमोक्षव्यवस्था स्वप्नवदित्याशयेनोपसंहरति—

तस्माद् ब्रह्माविद्यया जीवभावं
प्राप्यासित्वा तावकै तु स्वरूपे ॥
त्वच्चित्तेन स्पन्दितं जीवजात-
माकाशादि क्ष्मावसानं च पश्येत् ॥१६२॥

तस्माद्ब्रह्मेति । तावके स्वरूपे आसित्वेति त्वत्स्वरूपेण स्थित्वेत्यर्थः । शेषं स्पष्टम् ॥ १६२ ॥

नन्वस्म्यहमेव मदविद्यया जीवः कथं तर्हि मम जीवभावान्निवृत्तिः, सा हि ब्रह्मविद्यया विना न भवति, तमेव विदित्वेत्यादिश्रुतेः । सा च गुर्वाद्युपायं विना न सम्भवति, आचार्यवान्पुरुषो वेदेति श्रुतेः । तत्कथं मदन्यजीवाभावे ब्रह्मविद्या मन्मुक्तिर्वेति प्रागुक्तविस्मरणशीलं प्रति तदेव स्मारयति—

स्वीयाविद्याकल्पिताचार्यवेद-
न्यायादिभ्यो जायते तस्य विद्या ॥
विद्याजन्मध्वस्तमोहस्य तस्य
स्वीये रूपेऽवस्थितिः स्वप्रकाशे ॥ १६३ ॥

स्वीयाविद्येति । प्रत्यगाश्रयविषयाऽविद्येत्यर्थः । न्यायो ब्रह्ममीमांसा, तस्य संसारिब्रह्मणः । उक्तं पुरस्तादेकाज्ञानप्रतिबिम्बजीवैकत्वेऽपि तत्कार्यानन्तान्तःकरणावच्छिन्नस्य तस्यानन्तप्रमात्रादिभाव इति । तत्र यदन्तःकरणावच्छिन्ने श्रवणमननादिसंपत्त्या निश्चयरूपापि ब्रह्मविद्याऽपरोक्षा भवति स गुरुः अत एवानन्तान्तःकरणावच्छिन्नानां युगपत्स्वस्वगुरोर्विद्याप्तये पृथग् यत्न उपपद्यते । न चैतावता जीवभेद आयाति । अविद्याप्रतिबिम्बस्यैकस्यैव जीवस्य तत्तदुपाधिना युगपत्क्रमेण वा तदुद्देशेन प्रवृत्तेः सम्भवाद् गुरुरपि स्वोपाधौ ब्रह्मापरोक्षाभावात्तदर्थं श्रेयांसमधिकारिणं प्राप्योपदिशति त्वमेव त्वदविद्याकल्पिताचार्याद्विद्यां प्राप्स्यसीति न किं चिदवद्यम् । एवं वेदान्तादिरपि त्वदविद्याकल्पितोऽस्तीति ततोऽविद्योत्पत्तिरुपपद्यत इति भावः । एकजीववादे विद्यासमर्थनफलमाह—विद्याजन्मेति । जातविद्येत्यर्थः । स्वीये रूपे स्वस्वरूपे । यद्यन्तःकरणमेकमेव तत्र च ज्ञानाज्ञानव्यवस्था स्वप्न इवेति मतं तदुक्तविधया तद्विलक्षणज्ञानाज्ञानव्यवस्थोपपत्तेरसाधु, स्वस्मिन्नज्ञानानुभवविरोधेन स्वस्यैकस्य जीवत्वं जानतः परस्मिन्नात्मसाक्षात्कारादिकल्पनासम्भवात्कल्पितस्यापि विदुषः स्थाणुपुरुषवदुपदेशासम्भवाच्चेति भावः ॥ १६३ ॥

ननु स्वीयाविद्या स्वीये रूपेऽवस्थितिः स्वप्रकाश इति च स्वप्रकाशे सर्वज्ञे नित्यमुक्ते ब्रह्मण्यज्ञानविषयत्वमाश्रयत्वं चोक्तमनुपपन्नं, स्वप्रकाशादिस्वभावे तस्मिंस्तदयोगात् । किं चाहमज्ञ इतिजीवस्यैवाज्ञत्वानुभवात्तदाश्रयत्वं युक्तम् । भाष्यकारादिभिस्तत्रतत्राधिकरणादौ जीवाज्ञानाभिधानाच्च तदयुक्तमित्याशङ्क्याह—

अज्ञानि ब्रह्म जीवो भवति भवति च स्पष्टमज्ञानमस्य
प्रागस्पष्टं सदन्तःकरणानिपतितज्योतिराभासयोगात् ॥
चैतन्यैकप्रतिष्ठं स्फुरति न हि तमस्तादृशं यादृशं तद्
बुद्धिस्थाभासनिष्ठं स्फुरति तदुचितं जीवमौढ्याभिधानम्

अज्ञानीति । स्वप्रकाशादिस्वभावं ब्रह्म स्वविषयाज्ञानाश्रय-स्तत्र प्रतिबिम्बितं जीवो भवति न तु जीवो भूत्वा, अज्ञान्यहङ्कार-स्याज्ञानकार्यतया तदवच्छिन्ने जीवे तदाश्रयविषयत्वासम्भवस्याश्र-यत्वविषयत्वभागिनीत्यत्र प्रथमाध्याय उक्तत्वात् । अहमिति तस्य स्पष्टप्रतीतेश्च नाज्ञानविषयत्वम् । अज्ञानावच्छिन्ने तु तदुपरिष्टान्नि-राकरिष्यति । ततः परिशेषाद्ब्रह्मैव तदाश्रयो विषयश्च । किं च न तावत्प्रकाशत्वेन ब्रह्मणस्तदुभयासम्भवः । जीवस्याप्यविकृतब्रह्म-स्वभावतया तदनपायात् । न च प्रकाशमानस्य स्वविषयाप्रकाशा-श्रयत्वं विरुद्धं, परमते प्रमेयत्वादिना प्रकाशमानेऽपि घटत्वादिना तदज्ञानवत्प्रकृतेऽप्यविरोधात्फलबलकल्पनस्य तदविरोधित्वस्य चै-तन्ये सम्भवात् । अत एव जीवस्तदाश्रय एव ब्रह्मैव तु तदन्यत्त-द्विषय इति निरस्तम् । स्वप्रकाशस्य तदाश्रयत्वायोगे तस्य तदयो-गात् । नापि सर्वज्ञतया तस्याज्ञत्वानुपपत्तिः । न ह्यावृतस्वरूपतारूप-मज्ञत्वं सर्वज्ञस्याङ्गीक्रियतेऽस्माभिः । जीवं प्रति तु ब्रह्मावरकमज्ञानं तत्र न विरुध्यते, उपपादयिष्यति चैतत् । नापि नित्यमुक्ते तदनुपप-त्तिः । कल्पितस्य तस्य रज्जुसर्पादेरिव वस्तुतः स्वाश्रयासंस्पर्शित्वेन तस्य नित्यमुक्तत्वाविरोधात् । तस्माद् ब्रह्मैवाज्ञानाश्रयो विषयश्चे-ति । कथं तर्ह्यहमज्ञ इति प्रतीतेर्गतिरिति चेत्तत्राह—भवतीति । चोऽवधारणे । अस्य जीवस्यैव प्रागन्तःकरणाध्यासात् पूर्वं सुषु-प्त्यादावस्पष्टं प्रकाशमानं सज्जाग्रदादावन्तःकरणे निपतितं प्रति-बिम्बितं यज्ज्योतिश्चैतन्यं तस्य तद्रूपाभासयोगात् स्पष्टं भवति । जाग्रदादावहमज्ञ इति तदनुभवात् सुषुप्ते च तस्मिन् सत्यपि तथा-ऽनुभवाभावेनान्वयव्यतिरेकाभ्यां चिन्मात्राश्रयाज्ञानव्यञ्जकत्वेन तद-नाश्रयत्वेऽप्यहङ्कारस्य ज्ञाने तथानुभवोपपत्तेरिति तद्बलात्तस्य तदा-श्रयत्वसिद्धिरिति भावः । तर्ह्यज्ञाते प्रकारान्तरेणानुभवासम्भवेन क-थं तस्य ब्रह्माश्रयत्वसिद्धिरित्याशङ्क्याऽसिद्धो हेतुः, सुषुप्तेऽपि भाना-

दित्याशयेनाह—चैतन्यैकेति। चैतन्यैकास्मिन्स्थतमित्यर्थः। तद्-ज्ञानं बुद्धिप्रतिबिम्बितचैतन्यनिष्ठं सद् यथा स्फुरति तादृशं चैतन्यै-कप्रतिष्ठं न हि स्फुरति किन्तु प्रकारान्तरेणेति न तत्र प्रमाणाभा-वः। स्पष्टज्ञानानुरोधेनैव भाष्यकारादेर्जीवाज्ञानाभिधानमपि युक्त-मित्याशयेनाह—तदुचितामिति ॥ १६४ ॥

यादृशं तादृशमित्युक्तमेव विशदयञ्जीवमौढ्याभिधानाशयं विवृणोति—

अज्ञानं जडशक्तिमात्रवपुषा जीवाद् बहिः सिध्यति
जीवारूढमहं न जान इति तु ज्ञानापनोद्यात्मना ॥
संसिद्धिं प्रतिपद्यते तदुचितं जीवाज्ञताभाषितं
द्वैरूप्ये सति रूपमेकमनिशं भात्येवमन्यत्र हि ॥ १६५ ॥

अज्ञानमिति। जडरूपा या शक्तिर्ब्रह्मपरतन्त्रा माया तन्मा-त्रस्वरूपेणेत्यर्थः। बहिरहङ्कारानवच्छिन्नचैतन्यात्मनि ब्रह्मणि, जी-वारूढं जीवाश्रितम्। जीवाश्रितस्य तस्याहं न जान इत्यनुभवविष-यत्वे युक्तितया तद्विषयमाह—ज्ञानापनोद्यात्मनेति। न जान इत्य-ज्ञानं ज्ञाननिवर्त्यत्वयोग्यस्वरूपेण भाति तस्मिन् ज्ञानविरोधित्वस्य तत्रैव पर्यवसानात्। तच्च ज्ञानमनुभवितृनिष्ठमेव वक्तव्यं परज्ञा-ननिवर्त्ये तस्मिन् परस्य तथाननुभवात्। अत एव ब्रह्मणि तस्य न तथानुभवः सम्भवति किं तु जडशक्तिमात्ररूपेणेति तत्र तथैव सा सिध्यति। जीवे तु जीवगतज्ञाननिवर्त्यत्वेन ज्ञानापनोद्यात्मना संसि-द्धिं प्रतिपद्यते ज्ञातं भवति, ततश्च भाष्यकारादेर्जीवाज्ञताभाषितमु-चितमिति भावः। नन्वेवं जडशक्तित्वेनापि जीवे तत् किमिति न मायात्तत्राह—द्वैरूप्य इति। अज्ञानस्योक्तप्रकारेण द्विरूपत्वे सत्येक-ं ज्ञानापनोद्यत्वरूपं तदपि नित्यसिद्धसाक्षिण्येव भातीत्याशयेनाह—अनिशमिति। भाति जीव इति शेषः। अन्यज्जडशक्ति-त्वरूपम् ॥ १६५ ॥

DONATED BY

अन्यन्न हीत्यत्र हेतुतया ब्रह्मण्येव तथा तदनुभवो युक्त इत्याशयेनाह—

जडशक्तिमात्रवपुषा गगन-
श्वसनादिकार्यजननी भवति ॥
पुरुषोत्तमस्य वशवर्तितया
प्रकृतिः परस्य जगदेकगुरोः ॥ १६६ ॥

जडशक्तिमात्रेति । अज्ञानं हि जडशक्तिमायास्वरूपेण गगनादिप्रपञ्चस्य जननी भवति । न चैवं पराभिमतप्रधानसाम्यं तस्येत्याह–पुरुषोत्तमस्येति । देवात्मशक्तिं स्वगुणैर्निगूढामिति परमात्मशक्तितया प्रस्तुतायां मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुत्या मायात्वेनेश्वराश्रितत्वेन च दर्शितत्वेन न सा सांख्यीयप्रकृतितुल्येश्वराश्रिता च प्रकृतिः सा भवतीति जगत्कारणे ब्रह्मण्येव सा तथा भातुं युक्तेति भावः ॥ १६६ ॥

तर्हि जीवगतज्ञानापनोद्यमज्ञानमुक्तवैलक्षण्यात्ततोऽन्यदेवास्त्वित्याशङ्क्य नानालक्षणत्वस्यैकस्मिन्नपि संभवात्तद्विरोधस्य चासम्मतित्वेत्यभिप्रेत्य वक्ष्यमाणं तदभेदानुमानं हृदि कृत्वाऽऽह—

इयमेव सर्वजननी प्रकृति-
र्वशिनी शरीरिणमिमं पुरुषम् ॥
अधिरुह्य जीवमहमज्ञ इति
स्फुरणैकगोचरवपुः स्फुरति ॥ १६७ ॥

इयमिति । प्रस्तुतेत्यर्थः । वशिनी स्ववशं कुर्वाणा । अधिरुह्याऽऽश्रित्य । जीवस्य जगत्प्रकृतितयाऽज्ञानं तत्र जडशक्तिरूपेण न भातुमर्हतीत्याशयेनाह–अहमज्ञ इति । स्फुरणैकगोचरं वपुर्यथा स्यात्तथा स्फुरतीत्यर्थः ॥ १६७ ॥

जीवगतज्ञाननिवर्त्यत्वादज्ञानस्याहमज्ञ इति जीवे तद्भाति न

स्वीश्वर इत्युक्तं तत्रोपपत्त्यन्तरमाह—

चितिशक्तिबाधितवपुः परमं
पुरुषं प्रति स्फुरति सा प्रकृतिः ॥
चितिशक्तिबाधकवपुः पुरुषं
पुरवर्तिनं प्रति पुनः स्फुरति ॥ १६८ ॥

चितिशक्तीति। अज्ञानं हि यं प्रति वस्तुस्वरूपमावृणोति तेनैव तन्न जानामीत्यनुभूयते, परमेश्वरं प्रति च तदुस्तु नावृणोति यतः परमं नित्यसर्वज्ञं परमात्मानं प्रति तस्य स्वाभाविकचितिशक्त्या स्वरूपचैतन्येन बाधितवपुः स्फुरति, तेन तुच्छतया ज्ञायते अतस्तं प्रति तत्स्वरूपं नावृणोतीत्यर्थः। जीवं प्रति तु नैवमित्याह—चितिशक्तिबाधकेति। पुरवर्तिनं स्थूलसूक्ष्मशरीरावच्छिन्नम्। मायया-ऽपहृतज्ञाना इति स्मृतेर्न जानामीत्यनुभवाच्चैतन्यं प्रति स्वरूपावरकतया स्फुरतीत्यर्थः ॥१६८॥

इयमेव सर्वजननीति श्लोकेन सूचितं मायाऽविद्याऽभेदानुमानमाह—

दृश्यत्वजाड्यपरतन्त्रचिदाश्रयत्वै-
र्मायेश्वरस्य तमआत्मतयानुमेया ॥
स्वप्नप्रपञ्चरजतभ्रमलिङ्गदेह-
दिक्चन्द्रविभ्रमरीचिजलोपमानैः ॥१६९॥

दृश्यत्वेति। चैतन्यभास्यत्वेत्यर्थः—जाड्येति। अस्वप्रकाशेत्यर्थः। पारतन्त्र्यं स्वातिरिक्तचेतनाधीनव्यापारवत्त्वम्। ईश्वरस्येति स्वरूपकीर्त्तनम्। लौककमायाविगतस्य मायात्वेन प्रसिद्धमन्त्रादेर्व्यवच्छेदार्थं वा। माया न तमसो भिद्यते दृश्यत्वादिभ्यः स्वप्नप्रपञ्चादिवत्स्वप्नप्रपञ्चादेर्न वस्तुतोऽज्ञानाद्भेद इति न साध्यवैकल्यम्। मायायाश्चाकार्यतया वस्तुतस्तद्भेदाभावे तदात्मत्वमेव सिध्यतीत्याशयः। लिङ्गदेहस्य भ्रान्तित्वप्रसिद्ध्यभावाद् दृष्टान्तत्वानुपपत्तेस्तस्य तत्पङ्क्तिपाठोऽनास्थया मायाऽविद्याभेदवादिनाध्यात्मिक-

लिङ्गस्याविद्यामयत्वस्वीकाराद्वा व्याप्तिग्रहाङ्गभूयःसाहचर्यदर्शनप्रदर्शनायानेकदृष्टान्तोपादानम्। एवं च वियदादिकमज्ञानकार्यमिति सिध्यतीति भावः ॥ १६९ ॥

इदानीं मायाकार्यत्वेन प्रसिद्धवियदादिपक्षकमपि हेत्वन्तरेण तदभेदानुमानमाह—

एकाज्ञानविकल्पितं सकलमेवाकाशपूर्वं जगद्
बाध्यत्वादिह यद्यदीदृशमदस्तादृग् मतं स्वप्नवत् ॥
बाध्यं चेदमभीप्सितं भवति वस्तस्मादिदं तादृशं
शुद्धं धूमवदेव साधनमिदं तत्पाञ्चरूप्यान्वयात् १७०

एकाज्ञानेति। ईदृशं बाध्यम्। अदस्तत्तादृक्। एकाज्ञानविकल्पितमिदमाकाशादि वो युष्माकमप्यौपनिषदानाम्। निगमयति—तस्मादिति। न चात्रास्यासिद्ध्यादिदोषशङ्का कार्यत्याशयेनाह—शुद्धमिति। निर्दुष्टत्वे धूमवदिति निदर्शनम्। शुद्धत्वे हेतुमाह—तत्पाञ्चरूप्येति। तस्य प्रपञ्चस्य स्वप्नादेश्च नेह नानेत्यादिश्रुत्यादिना बाधितत्वाद्विपक्ष आत्मनि बाधितत्वाभावाच्चास्यानुमानस्यास्ति पाञ्चरूप्यम्, साधनस्य पक्षधर्मत्वादिपाञ्चरूप्यं तेनास्य साधनस्यान्वयात्। अतोऽसिद्ध्यादिहेत्वाभासराहित्यादिदमनुमानं शुद्धमित्यर्थः। वियदादिकमेकाज्ञानकार्यं बाध्यत्वात् संमतवत् ततश्च तत्कारणत्वेन प्रसिद्धा माया ऽज्ञानमेव सिध्यतीत्याशयः। एकपदं च स्वरूपकीर्त्तनम्। नानाज्ञानेनाऽर्थान्तरतानिवृत्तये च ॥ १७० ॥

ननु तदैक्षत बहु स्यामित्यादिश्रुतिर्ब्रह्मणः कारणत्वं प्रतिपादयति, न चैकस्य विलक्षणानेकोपादानत्वं संभवतीत्यज्ञानस्य वियदादिकारणत्वाद्यनुमानं श्रुतिविरुद्धमित्याशङ्कामनूद्य निराकरोति—

अनुमानमागमविरुद्धमिदं
प्रतिवादिनो यदि मतं तदसत् ॥
न तमोऽतिरिच्य जगतो जनक-
प्रतिपादकं वचनमस्ति यतः ॥ १७१ ॥

अनुमानमिति । प्रतिवादिनो ब्रह्मपरिणामप्रपञ्चवादिनो माया सत्येतिवादिनश्चेत्यर्थः । अथ वा मायाऽज्ञानशब्दयोरपर्याय-त्वात्तदर्थयोर्भेद इति मायां तु प्रकृतिमित्यादिश्रुतिविरुद्धमिदमनुमा-नमित्याशङ्क्याभिप्रायः । तत्कुतो न स्तीत्यत आह—न तम इति । असङ्गस्य ब्रह्मणः कूटस्थस्य साक्षाज्जगत्परिणामायोगाद इन्द्रो माया-भिरित्यादिश्रुतेश्च विवर्त्यमानाविद्याधिष्ठानमेव सदित्यविद्यायास्ताव-दुपादानत्वं न श्रुतिविरुद्धम् । एवं भूयश्चान्ते विश्वमायानिवृत्तिरिति मायाया अपि ज्ञाननिवर्त्यत्वश्रवणेनाज्ञानाभेद एव । पर्यायशब्दभे-दास्तु एकस्मिन्नपि प्रवृत्तिनिमित्तभेदादुपपद्यन्त इति नागमविरुद्धा-नुमानमिति भावः ॥ १७१ ॥

ननु प्रपञ्चस्याज्ञानकार्यत्वे शुक्तिरजतादितुल्यतया तत्समसाम-ग्रीजन्यत्वं वाच्यम् । न च तत्सर्वतीत्याशङ्क्याह अपि तदस्तीत्याशयेन प्रागुक्तं भ्रमकारणं सदृष्टान्तं स्मारयति—

विषयकरणदोषान्न भ्रमः संविदि स्या-
दपि तु भवति मोहात् केवलादेवमेव ॥
भगवति परमात्मन्यद्वितीये समस्त-
द्वयमतिरियमस्तु भ्रान्तिरज्ञानहेतुः ॥१७२॥

विषयेति । प्रागेवोक्तार्थः ॥ १७२ ॥

ननु ब्रह्मण एवाज्ञानाश्रयत्वे कथं दुःखादिसंसारस्य सर्वज्ञत्वा-देश्चाविद्याकार्यस्य लोकवेदयोर्व्यवस्थाप्रसिद्धिः, अविद्याकार्याणां तदाश्रयत्वस्य चैकत्रैवोचितत्वादित्याशङ्क्याह—

अज्ञानिनो भवति दुःखमनेन कृत्स्नं
सर्वेश्वरस्य न खलु प्रतिभासतोऽपि ॥
सर्वज्ञतादिगुणजातममुष्य नास्य
संसारिणः स्फुरति मोहसमन्वितस्य ॥१७३॥

अज्ञानिन इति । नित्यमुक्तनिरतिशयानन्दस्वस्वरूपस्फुरण-

शून्यस्य जीवस्येत्यर्थः । अनेनाज्ञानेन प्रतिभासतोऽपि तद् दुःखं न खल्विति सम्बन्धः । अपिशब्देन प्रमाणान्तरमनूद्य निरस्तं सूचितम् । सर्वज्ञतादीत्यादिशब्देन सर्वकारणत्वादि विवक्षितम् । अमुष्येश्वरस्य सर्वज्ञतादीति सम्बन्धः । जीवस्य सर्वज्ञत्वाद्यभावे हेतुतया तं विशिनष्टि—मोहसमन्वितस्येति । एकाज्ञानकार्यमेकस्मिन्नेव युक्तमिति सत्यम् । संसारिनित्यमुक्तयोरप्येकचैतन्यमात्रत्वेन प्रकृतेऽपि तत्सत्त्वात् ,परं तु दुःखित्वादिकं भ्रमसिद्धमधिष्ठानविशेषस्फुरणशून्ये प्रतिबिम्बात्मना जीवभावमापन्ने तस्मिन्युज्यते । सर्वज्ञत्वादि तु श्रुत्यादिबलादनावृतस्वरूपे बिम्बब्रह्मण्येव युक्तमित्युपपत्तितोऽनुभवादितश्च तद्व्यवस्थाऽस्मिन् मतेऽपि न विरुध्यत इति भावः ॥१७३॥

एवं भाष्यकारादीनां जीवाज्ञतावचनस्य स्वमतेनाशयं वर्णितमुपसंहरति—

जीवन्मुक्तिगतो यदाह भगवान् सत्संप्रदायप्रभु-
र्जीवाज्ञानवचस्तदीदृगुचितं पूर्वापराऽऽलोचनात् ॥
अन्यत्रापि तथा बहुश्रुतवचः पूर्वापरालोचना-
न्नेतव्यं परिहृत्य मण्डनवचस्तच्चान्यथा प्रस्थितम् १७४

जीवन्मुक्तिगत इति । नित्यमुक्त इत्यर्थः । अन्यत्रापि भाष्ये । कथं तर्हि मण्डनमिश्रादयो जीवस्याज्ञानाश्रयत्वमभिदधुरित्याशङ्क्य तद्धि मतान्तरं, भाष्यकारीयमतं तन्नेत्याह—परिहृत्येति । मण्डनवचो नोक्ताशयेन वर्णनीयमित्यर्थः । तत्र हेतुस्तद्धीति । अन्यथा उक्तवैलक्षण्येन ॥ १७४ ॥

अन्यत्रापीत्युक्तं भाष्यकारोक्तमेव दर्शयति—

जीवस्य कार्यकरणाधिपतेरविद्या-
दोषान्वितस्य तमसावृतमन्ददृष्टेः ॥
ज्ञानं निरावरणमैश्वरमित्यपीदं
भाष्याक्षरं कथितनीतिवशेन योज्यम् ॥१७५॥

जीवस्येति । कार्यं स्थूलशरीरं करणं लिङ्गशरीरं तदधिपतेस्तदवच्छिन्नस्येत्यर्थः । अत्र हेतुतया जीवं विशिनष्टि–दोषेति । पूर्वपूर्वभ्रमकार्यसंसारवासनारूपदोषान्वितस्य । तत्रापि हेतुस्तमसेति । अज्ञानावृताद्वैतस्वरूपचैतन्यस्येत्यर्थः । ज्ञानं नित्यमुक्तस्वरूपस्फुरणं निरावरणमावरणशून्यम् । ऐश्वरमिति कल्पितभेदाभिप्रायम् । ज्ञानातिरिक्तेश्वराभावात् । भाष्याक्षरम् अक्षरब्राह्मणे भाष्यकारेणोक्तम् "अविद्याविशिष्टः कार्यकरणोपाधिरात्मा जीव उच्यते नित्यनिरतिशयज्ञानशक्त्युपाधिरात्माऽन्तर्यामीश्वर उच्यते" । तथाऽन्यत्र गीताभाष्येऽपि "त्वं न जानीषे धर्माधर्मप्रतिबद्धज्ञानशक्तित्वात्, अहं तु नित्यशुद्धबुद्धमुक्तस्वभावत्वादनावरणज्ञानशक्तित्वाद्वेद" इत्यादि । नीतिवशेन अहमज्ञ इत्यनुभवादिवशेनेत्यर्थः ॥ १७५ ॥

नीतिमेव विशदयति—

स्पष्टं तमःस्फुरणमत्र न तत्र तद्वत्
सर्वेश्वरे तदिति तत्र निषिध्यते तत् ॥
बिम्बे तमोनिपतिते प्रतिबिम्बके वा
देहद्वयावरणवर्जितचित्स्वरूपे ॥१७६॥

स्पष्टमिति । तमःस्फुरणमित्येकं पदम्, अत्र जीवे, तत्र सर्वेश्वरे, तत् तमःस्फुरणं तद्वज्जीववन्नेति तत्तत्र निषिध्यत इति सम्बन्धः । एकात्मवादे जीवेश्वरविभागासम्भवादत्र तत्रेति कथमित्याशङ्क्य तत्प्रकारमाह–बिम्ब इति । उपाधिनिमित्तस्वप्रतियोगिकव्याप्यवृत्तिभेदाश्रयत्वे सत्यौपाधिकपरिच्छेदरहितत्वम् बिम्बत्वम्, तद्विशिष्ट इत्यर्थः । प्रतिबिम्बावच्छिन्नादिव्यावृत्तये विशेषणानि । अर्थात् प्रतिबिम्बत्वविशिष्टचैतन्यं जीव इत्युक्तं भवति । ईश्वरे मतान्तरमाह–तमोनिपतित इति । अज्ञानान्वयिनि प्रतिबिम्बके स्वार्थे कः । उपाधिनिमित्तस्वप्रतियोगिकव्याप्यवृत्तिभेदवत्त्वे सत्युपाधिपरिच्छिन्नत्वं प्रतिबिम्बत्वम् । अत्र चाज्ञानमात्रप्रतिबि-

म्बत्वमीश्वरत्वं विवक्षितम् । अहङ्कारतादात्म्यापन्नाज्ञानप्रतिबिम्बत्वं च जीवत्वमिति द्रष्टव्यम् । ईश्वरे तमो न स्पष्टमित्यत्र हेतुतया पक्षद्वयेऽपि साधारणमीश्वरस्वरूपमाह—देहद्वयेति । स्थूलसूक्ष्मदेहद्वयलक्षणं यदावरणमवच्छेदकं तद्विवर्जितं तदभिमानरहितं यच्चित्स्वरूपं तस्मिन्नित्यर्थः । ईश्वरस्यानहङ्कारतयाऽहमज्ञ इत्यादि स्पष्टं तदनुभवो नेत्याचार्याणां तत्र तन्निषेध इति भावः ॥ १७६ ॥

अत एव भाष्यकारादेर्जीवेश्वरयोः किंचिज्ज्ञतासर्वज्ञतावचनमप्यज्ञानावृतस्वस्वरूपत्वतदभावपरं न तु किंचिज्ज्ञत्वसर्वज्ञत्वमूलतया जीवेश्वरयोस्तयोरज्ञानतदभावपरमित्याशयेनाह—

किंचिज्ज्ञताऽस्य तमसावृतनित्यदृष्टेः
सर्वज्ञता पुनरमुष्य परस्य पुंसः ॥
अज्ञानतज्जकरणादिविवर्जितत्वा-
दित्येतदेवमुपपन्नतरं हि भाष्यम् ॥ १७७ ॥

किंचिज्ज्ञतेति । अस्य जीवस्य । तमसेत्यहङ्कारादेरुपलक्षणमिति कृत्वैतदेवंरूपार्थप्रतिपादकं भाष्यमिति सम्बन्धः ॥१७७॥

अज्ञानतज्जकरणराहित्यमीश्वरस्य, किंचिज्ज्ञता च जीवस्योक्ता तयोस्तद्विपरीततामनुभवेन द्रढयति—

अज्ञोऽहमित्यवगतिर्न परस्य पुंसः
सर्वज्ञतावगतिरात्मनि नास्य पुंसः ॥
अत्रापि कारणमहङ्कृतिवर्जितत्वं
तद्बद्धता च परमेऽल्पतरे च पुंसि ॥ १७८ ॥

अज्ञोऽहमिति । आत्मनि स्वस्मिन् । अत्रोक्तानुभवाभावे, तद्बद्धता तत्तादात्म्यमिति यावत् । अल्पतरे परिच्छिन्ने जीव इति यावत् ॥ १७८ ॥

ननु श्रीकृष्णरघुनाथादेः श्रुतीतिहासपुराणप्रामाण्येनेश्वरत्वं वक्तव्यं, तस्य चाहङ्कारयोगात् कथमीशस्याहङ्कारवर्जितत्वमित्याश-

ङ्कासिद्धो हेतुरित्याशयेनाह—

बिम्बस्य नापि तमसि प्रतिबिम्बकस्य
संघट्टनं क्व चिदहङ्करणेन शक्यम्॥
वक्तुं प्रभोः सकललोकहितावतार-
स्वेच्छाविनिर्मितवपुर्वरमन्तरेण॥ १७९॥

बिम्बस्येति। अनेनेश्वरविषयं प्रागुक्तं पक्षद्वयं दर्शितम्। क्व चित्कस्मिन्नपि पक्षे। अहङ्कारो ह्यहमिहैवेत्यनुभवात परिच्छिन्न एव वाच्य इति न सर्वात्मकेश्वरे तत्सम्भवः। न चेश्वरस्याहङ्कारो व्यापकोऽस्तीति वाच्यम्। तत्र प्रमाणाभावाच्छरीरयोगस्य शुद्धसत्त्वमायया ऽहङ्कारस्येव तेन विनोपपत्तेर्न तस्याहङ्कारगमकत्वम्। न च स्वस्वरूपावरणरहितस्य परिच्छिन्नाहङ्काराभिमानः सम्भवति। न वा दुःखादिधर्मिणोऽहङ्कारस्येश्वरे सम्भवोऽस्ति, प्रसिद्धाहङ्कारविलक्षणस्याहङ्कारत्वासम्भवाच्च। अहमात्मा गुडाकेशेत्यादौ चाहंशब्दस्य शुद्धात्मनि लक्षणा। एवं सति मुख्यया वृत्त्या नेश्वरस्याहङ्कारसम्बन्धः सम्भवतीति भावः। बिम्बस्य तमसि प्रतिबिम्बस्य वा प्रभोः क्व चिदप्यहङ्करणेन सङ्घट्टनं वक्तुं न शक्यमिति सम्बन्धः। ननु कथमेवं सति तस्य शरीरयोगोऽपि, तस्याहङ्कारधर्मकर्मायत्तत्वादित्याशङ्क्याह—सकलेति। कंसादेरसुरस्य रावणादेर्वा राक्षसस्य वधेन सकललोकहितार्थं योऽवतारस्तस्यैव विवरणं स्वेच्छेति। वपुर्वरं श्रेष्ठं वपुः। ईश्वरस्य हि शरीरं न भोगार्थं येन तत्कर्मार्जितं स्यादिति तदभावे न भवेत् किं तु ब्रह्मादीनां प्रार्थनयाऽमुककुले प्रादुर्भविष्यामीति या तस्येच्छा तद्विनिर्मितमेव तस्य वपुःश्रेष्ठं न त्वस्मदादिशरीरवत् कर्मायत्तमिति नोक्तदोषः। अत्र स्वेच्छेत्यनेन शरीरपरिग्रहे स्वातन्त्र्यं सूचयति। अत एव प्रभोरित्युक्तम्। स्वीयानां स्वभक्तानामिच्छया वेत्यर्थः। अव्यक्तब्रह्मानुशीलनं ह्यतिदुष्करमिति स्वभक्तवाञ्छापूरणायाशरीरस्यापि भगवतस्तज्जनं माययेव

पपन्नमिति भावः ॥ १७९ ॥

एवं प्रमाणाभावादनुपपत्तेश्चेश्वरस्य नाहङ्कृतियोग इत्युक्तम् । इदानीं तदभावेऽननुभूयमानमपि तस्य स्वरूपावरकमज्ञानं किंबलात्सिध्येन्न वा तदन्यत्तादृगज्ञानकार्यं तस्मिन्नस्तीत्याशयेनाह—

नाहङ्कृतिं च परिहृत्य तमस्विताधीः
सम्भाव्यतेऽपहतपाप्मनि नित्यमुक्ते ॥
तामन्तरेण घटते न च मूढभाव-
सम्भावनाऽपि परमेशितरि प्रसन्ने ॥ १८० ॥

नाहमिति । चकारेण कार्यान्तराभावं सूचयति । तत्र हेतुः अपहतेत्यादि । तमस्विताबुद्ध्यभावे फलितमाह—तामिति । अहमज्ञ इति तमस्विताधियमित्यर्थः । मूढभाव आवृतस्वस्वरूपत्वम्, तत्संभावनापीत्यर्थः । मानाभावे मेयासिद्धेरित्याशयः । नाहङ्कृतिमित्यनेन द्योतितमर्थं विशदयति—प्रसन्न इति । अनवच्छिन्नतया प्रकाशमान इत्यर्थः ॥ १८० ॥

नन्वीश्वरस्यापि शरीराभ्युपगमेऽज्ञत्वमवश्यं वाच्यं शरीरित्वस्याज्ञत्वव्याप्तत्वात्, अन्यथा मुक्तेऽपि तत्प्रसङ्गादिति चेत् । सत्यम् । अस्त्येवेश्वरेऽपि जगन्निदानमज्ञानं तथापि न तस्याज्ञत्वमित्युक्तम् । मुक्ते तु तदपि नास्तीति विशेषः । तत्र च निमित्तं सर्वज्ञतया तद्वशित्वम् । जीवस्तु विपरीततया तद्वश्य इत्येकमेवात्मतत्त्वं तदभिभावकं तदभिभूतं चेत्याशयेनाह—

स्वेच्छाविनिर्मितवपुर्भजतोऽपि तस्य
नाज्ञानितावगतिरस्ति वशित्वहेतोः ॥
वश्यत्वहेतुकामिदं स्फुरणं नराणां
नाहं विजान इति नास्ति तदीश्वरस्य ॥१८१॥

स्वेच्छेति । वशित्वहेतोः, अज्ञानं प्रतीति शेषः । मायानियन्तृत्वादिति भावः । वश्यत्वं तदावृतस्वरूपतया तत्परतन्त्रत्वम् ।

इदंशब्दार्थमाह—नाहं विजान इतीति। नन्वज्ञानाश्रयत्वे तस्य तद्दृश्यत्वमेव स्यादित्याशङ्क्य मायिनो महेश्वरत्वश्रुतेर्नेशस्य तदस्तीत्याह—नास्तीति। तद्दृश्यत्वम् ॥ १८१ ॥

नन्वेवं सति रघुनाथादेः कथमज्ञत्वादि पुराणप्रसिद्धमुपपद्येतेत्याशङ्क्य तस्मिन्नेव पुराणे तस्य निरवग्रहैश्वर्यश्रवणात्तस्य सर्वज्ञत्वेऽपि स्वीकृतमनुष्यनटनां प्रदर्शयितुं विषयिणां गतिं च स्वेच्छयैवाहं कं चित्कालं न विजान इति सङ्कल्पपूर्वकमज्ञत्वाभिनयः सीतापहारादिनिमित्तशोकादिप्रकटनं चेत्याशयेनाह—

सङ्कल्पपूर्वकमभूद्रघुनन्दनस्य
नाहं विजान इति कं चन कालमेतत् ॥
ब्रह्मोपदेशमुपलभ्य निमित्तमात्रं
तच्चोत्ससर्ज स कृते सति देवकार्ये ॥ १८२ ॥

सङ्कल्पेति। नन्वेवं सति तस्य ब्रह्मोपदेशाद्यनर्थकम्। न हि सर्वज्ञ उपदेशोऽर्थवानित्याशङ्क्य, सोऽपि तस्य स्वेच्छास्वीकृतमनुष्यव्यापार इत्याशयेनाह—ब्रह्मेति। देवकार्ये देवादिहितार्थमतिज्ञातरावणादिवधे कार्ये। तच्चोत्ससर्जेत्यज्ञानविसर्जने स्वातन्त्र्यं दर्शयन् प्राकृतस्येवाज्ञतानटनमेवेति दर्शितम् ॥ १८२ ॥

"अज्ञानादिकमीश्वरस्य नटनम्" इत्यत्र हेतुतया रघुनाथादेः पारमेश्वरं स्वभावं दर्शयन् तदभावाज्जीवस्य तद्वैपरीत्यमाह—

अज्ञानवर्जिततया परमेश्वरोऽसौ
सर्वज्ञ एव यदहङ्कृतिबन्धहीनः ॥
ज्ञानं निरावरणमिष्टममुष्य यस्मा-
ज्जीवस्य सावरणमेव यतोऽनभिज्ञः ॥ १८३ ॥

अज्ञानेति। स्पष्टम् ॥ १८३ ॥

ईश्वरः सर्वज्ञ इत्यस्य सम्भावनां दर्शयन् तदभावाज्जीवोऽन-

भिन्न इत्याह—

सर्वप्रमाणफलभूतसमस्तसंवि-
ज्ज्ञातं बिभर्ति परमः पुरुषो न जीवः ॥
ज्ञानं निरावरणमैश्वरमस्तु तस्मा-
ज्जीवं च सावरणमस्य विशेषहेतोः ॥ १८४ ॥

सर्वप्रमाणेति । सर्वेषां देवमनुष्यतिर्यगादिप्रमातॄणां चक्षुरादिसर्वप्रमाणाभिव्यक्ततया तत्फलभूतायाः समस्तप्रमेयजातस्य संविदः तज्जातं तत्समूहम् । परमेश्वरो ह्यनन्तचिद्रूपत्वात् सर्वेषां सर्वप्रमाणाभिव्यक्तसर्वप्रमेयावच्छिन्नचित्स्वरूप इति तदीयं स्वरूपं निरावरणं भवेत् । जीवस्तु परिच्छिन्नत्वान्नैवं, तस्मात्तस्य स्वरूपज्ञानमावृतमेवातोऽज्ञानस्य चिन्मात्राश्रयस्य जीवेश्वरयोः सत्त्वेऽप्यस्माद्धेतोरीश्वरः सर्वज्ञो न जीव इति सम्भवतीत्यर्थः ॥ १८४ ॥

किं च तस्य भासा सर्वमिदं विभातीतीश्वरस्य स्वत एव सर्वावभासकत्वं श्रूयते । न चावृतमसत्कल्पं ज्ञानमर्थं प्रसाधयितुमर्हतीत्यतोऽनावृतस्वस्वरूप ईश्वरः सर्वज्ञ इत्यवश्यमभ्युपेयम् । जीवस्तु नैवमित्याशयेनाह—

अज्ञानतज्जमखिलं जगदात्मभासा
नित्यं प्रकाशयति सन्निहितः सदात्मा ॥
जीवस्तु नैवमिति सावरणं तदीयं
ज्ञानं निरावरणमैश्वरमुच्यते हि ॥ १८५ ॥

अज्ञानेति । नन्वनावृतोऽपि प्रकाशः प्रकाश्यासन्निहितो व्यवहितदीप इव तज्जं न प्रकाशयेदिति कुतस्तस्य तावता सर्वज्ञतासिद्धिस्तत्राह—सन्निहित इति । सर्वप्रपञ्चाधिष्ठानतया तत्र सन्निहित इत्यर्थः । उक्तरूपेण तस्य सन्निधाने हेतुतया तं विशिनष्टि—सदात्मेति । उक्तविभागप्रयोजनमाह— सावरणमिति । अनुभवसिद्धं तदावरणं न केनचित् प्रत्याख्येयमित्यर्थः ॥ १८५ ॥

ईश्वरोऽनावृतस्वस्वरूपेण सर्वत्र सन्निहितत्वान्नित्यसर्वज्ञ इत्यत्र

विष्णुपुराणस्थं पद्यं पठति—

ज्ञानात्मकस्यामलसत्त्वराशे-
रपेतदोषस्य सदा स्फुटस्य ॥
किं वा जगत्यत्र समस्तपुंसा-
मज्ञातमस्यास्ति हृदि स्थितस्य ॥ १८६ ॥

ज्ञानात्मकस्येति। अमलः सत्त्वराशिर्यस्य रजआद्यंपृक्ताखण्डसत्त्वात्मकाज्ञाने प्रतिबिम्बितस्य अत एवापेतो दोष आवरणादिर्यस्यात एव सदा स्फुटस्य नित्यापरोक्षस्य, यत्साक्षादपरोक्षादिति श्रुतेः। अस्य श्रीकृष्णस्य। अर्थादेनेन जीवस्तद्विपरीतरूप इति द्रष्टव्यम् ॥ १८६ ॥

ईश्वरस्य मायावशित्वं जीवस्य च तद्वश्यत्वमित्यत्रापि पौराणं पद्यमाह—

मायामसौ वितनुते विभुरेवमेनां
सर्वेश्वरः सततमेव वशीकरोति ॥
इत्यादिवाक्यमुपपन्नतरं पुराणे
त्वज्ञानमस्य हि वशे विदधीत भावात् ॥ १८७ ॥

मायामिति। वितनुते ब्रह्मादिष्विति शेषः। एनां मायाम्। नन्वेवं मायावशित्वमेवेश्वरस्य नाज्ञानवशित्वमिति कथं तावता तस्य तदनभिभव इत्याशङ्क्याह—स्वाज्ञानमिति। अज्ञानमाययोरभेदादज्ञानस्यापि तच्छक्तितया तदधीनत्वात्तद्वशित्वमेव तस्यानेन दर्शितमिति नोक्तदोष इति भावः ॥ १८७ ॥

ननु भाष्यकारादिभिस्तत्रतत्र जीवेऽज्ञत्वस्येश्वरे तन्निषेधस्यासकृदुच्यमानत्वादीश्वरे कथमज्ञानमित्याशङ्क्योक्तन्यायेन सर्वत्र तद्वचनानामुक्त एवार्थो द्रष्टव्य इत्यतिदिशति—

जीवाज्ञतावचनमेवमिदं समस्तं
सर्वत्र योज्यमितरत्र च तन्निषेधः ॥

तस्मात् समञ्जसमिदं मतमस्मदीय-
माचार्यवाक्यमुपपन्नतरं हि तत्र ॥ १८८ ॥

जीवेति । इतरत्रेश्वरे तन्निषेधस्तस्याज्ञानस्य निषेधोऽप्येवं योज्य इति विपरिणतानुषङ्गः । यस्मादज्ञानस्य चिन्मात्राश्रयत्वे भाष्यकारस्य तत्रतत्र जीवाज्ञतावचनमविरुद्धं तस्मादिति फलितमुपसंहरति । हि यस्मात्तत्राज्ञानस्य चिन्मात्राश्रयत्वे ॥ १८८ ॥

अस्मदीयमित्युक्तं तत्स्वमतमेव दर्शयति—

चैतन्यमेव च तमास्वि तदप्रबुद्धं
सर्वज्ञमेतदिह विश्वमिमं विभागम् ॥
जीवेश्वरौ च जगदित्यपि निर्मिमीत
इत्येव वेदशिरसः प्रथितः प्रचारः ॥ १८९ ॥

चैतन्यमिति । अखण्डचैतन्यमित्यर्थः । तमस्वि अज्ञानाश्रयः । तत् चैतन्यम् । एतत्तमस्वि चैतन्यम् । इहास्मिन् तमस्विनि चैतन्ये । विश्वं समस्तम् । तमेवाह—जीवेश्वराविति । न केवलमिदमस्मदिच्छया कल्पितं मतं किं तु समस्तवेदान्तसंमतमित्याशयेनाह—इत्येवेति ॥ १८८ ॥

ननु—मायिनं तु महेश्वरम्, मम माया दुरत्ययेत्यादिश्रुतिस्मृतिभ्यामीश्वरस्य मायावित्वं प्रतीयते, तत्कथं तमस्वित्वम्, मायाऽज्ञानयोरेकत्वं वा । उपपन्नं चैतत् । ईश्वरो हि जीवान् संसारेण योजयन् मोहयति, व्यामोहकत्वं च मायाविन एव लोके दृष्टं न त्वज्ञस्य, अज्ञस्तु व्यामुह्यत्येव, अत एवेश्वरस्य सर्वज्ञत्वं न विरुद्ध्यते जीवस्य चाज्ञत्वमित्याशङ्क्य जीवेशादिसमस्तभेदनिदानं वैष्णवी जड़शक्तिर्बीकापीश्वराश्रया सती मायाशब्दवाच्या भवति सैव जीवावधिर्जीवाश्रया भूत्वा मोहोऽज्ञानमिति गीर्यस्याः साऽज्ञानशब्दवाच्या भवति, तथैव वृद्धानां व्यवहारात् । प्रसाधयिष्यति च तदभेदं तृतीये । अत एवेश्वरस्य व्यामोहकत्वादिर्जीवस्य व्यामोहादि-

श्रोपपद्यत इत्याशयेनाह—

जीवेशानजगद्विभागजननी शक्तिर्जड़ा वैष्णवी
मायेशानगता सती भवति सा जीवावधिर्मोहगीः ॥
जीवानीश्वर एष मोहयति ते जीवा विमुह्यन्त्यतः
शश्वद्विश्वदृगीश्वरो भवति ते जीवा विमूढा मुहुः ॥१९०॥

जीवेशानेति ॥ १९० ॥

एवं वियदादेर्लोके मायिकत्वं जीवगतदुःखित्वादेः संसारस्याविद्यकत्वमिति वेदान्तनिष्णातानां प्रसिद्धिरप्युक्तविधया तदेकत्वेऽप्युपपन्नेत्याह—

अज्ञानिनो भवति मोहविजृम्भितं तु
दुःखं जगज्जनकता परमेश्वरस्य ॥
मायामयी भवति तेन विलक्षणत्व-
मेकान्ततः श्रुतिशिरःसु तयोः प्रसिद्धम् ॥१९१॥

अज्ञानिन इति । जीवस्येति शेषः । नन्वखण्डब्रह्मण एव तमस्वित्वे यस्याज्ञानं तस्यैव संसार इति कुत उक्तविभागः सिध्येदिति चेत् । सत्यम् । तमस्व्येव ब्रह्म प्रागुक्तप्रतिबिम्बात्मना दुःखाश्रयो जीवो बिम्बात्मना तु जगज्जनकः परमेश्वर इति श्रुतिषु तद्वैलक्षण्यव्यवहार इत्याशयेनाह—तेनेति । तयोर्जीवेश्वरयोः श्रुतिशिरस्सु प्रसिद्धमेकान्ततो विलक्षणत्वं तेन चिन्मात्राश्रयाऽज्ञानेनोपपन्नमिति शेषः । एवमज्ञानस्य चिन्मात्राश्रयत्वमुपपन्नमिति भावः१९१॥

चिन्मात्राश्रयाज्ञानस्यापि न जानामीत्यनुभवाद्यनुरोधेन जीवं प्रत्येव नित्यमुक्तब्रह्मस्वरूपावरकत्वात्तस्यैव तन्नेश्वरस्येति भाष्यकारादेर्जीवाज्ञतावचनमीश्वरे च तन्निषेधवचनं तत्परमित्युक्तम् । इदानीं जीवत्वस्याज्ञानव्यञ्जकत्वादपि चिन्मात्रनिष्ठमपि तज्जीवगततया प्रतीयते । अनुभवानुरोधेन जीवत्वं हि तद्व्यङ्ग्यकम् । यथा

परेषामप्याश्रयद्रव्यमहत्त्वमजातेरप्युद्भूतरूपस्येत्याशयेनाह—

चैतन्यस्याज्ञानशक्तेरनादे-
र्जीवत्वं तु व्यञ्जकं कल्पयन्तः ॥
जीवारूढं व्यक्तमज्ञानमाहु-
र्जीवो मूढः कथ्यतेऽतो बहुज्ञैः ॥ १९२ ॥

चैतन्यस्येति । फलितमाह—जीव इति । तस्मान्नित्यमुक्तात्मनो मायादिशब्दवाच्यानिर्वचनीयात्मशक्तिवशाज्जीवेश्वरादिविभागोऽहङ्कारादिसम्बन्धेन जीवे ईश्वरवैलक्षण्यं संसार इत्युपपन्नम् । अतः स्वस्वरूपब्रह्मसमन्वयस्य न केनापि भेदग्राहकेण बाध इति भावः ॥ १९२ ॥

नन्वात्मनोऽविद्यानिमित्तो न संसारो येन संसारिणोऽप्यसंसारिब्रह्मैक्यं भवेत्, किं तु ब्रह्मपरिणामतया स वास्तव एव, न च तत्परिणामत्वासिद्धिः, वेदान्तहृदयवेदिना श्रीबादरायणेन भोक्त्रादिसूत्रे तथा दर्शितत्वात्, इत्याशङ्क्यानिर्वचनीयप्रपञ्चस्य व्यावहारिकतया स्वप्नादिवैषम्यमात्रेण तदभिधानं न तु वस्तुतत्त्वाशयेन, अन्यथोपरितनारम्भणाद्यधिकरणविरोधादित्याशयेनाह—

अत्रैव वस्तुनि दृढं व्यवतिष्ठमानः
प्रौढिप्रदर्शनपरः पुनरन्यदन्यत् ॥
भाषापदं किमपि निक्षिपति स्फुटं त-
दस्माभिरेवमुपपादितमञ्जसैव ॥ १९३ ॥

अत्रैवेति । आत्मा सदाऽद्वयो मुक्तः । प्रपञ्चस्त्वनिर्वचनीय इत्यत्रैव वस्तुन्यर्थे, एतमेवार्थं प्रतिपद्यमान इत्यर्थः । प्रौढिप्रदर्शनपरोऽभ्युपगमवादी । अन्यदन्यदिति वीप्सया ब्रह्मणः परिणामित्वं जीवेश्वरयोर्भिन्नत्वमित्यादिसूत्रकारीयवचनं परामृशति । भाषापदम् उक्तार्थविषयं तत्तत्सूत्रम् । ननु किमित्यस्याभ्युपगमवादत्वं, तत्संमतत्वमेव कस्मान्न भवेदित्यत आह—स्फुटं तादिति । एवमित्यत्रैव

वस्तुनीत्यनेनोक्तार्थपरम् । न च तदुपपादनं क्लेशेनेत्याह—अञ्जसैवेति । प्रत्युत परमत एव क्लेशः । आरम्भणाद्यधिकरणविरोधस्य तत्र दुष्परिहरत्वात् । लोकवदित्युक्तेरन्यथाप्युपपत्तेरिति भावः ॥१९३॥

किञ्च सर्वधर्मोपपत्तेरिति सूत्रेण जगत्कारणत्वतन्मूलसर्वज्ञत्वादिकारणधर्माणां ब्रह्मण्युपपत्तिं दर्शयन् सूत्रकारस्तस्य विवर्ताधिष्ठानत्वमेवाभिमतीति, अन्यथा निरवयवे कूटस्थे निर्विकारे तस्मिन् कारणत्वादेरसंभवादित्याशयेनाह—

विस्पष्टमात्ममतमेव हि सर्वधर्म-
सूत्रेण सूत्रकृदिदं दृढमाचचक्षे ॥
सर्वज्ञतादिपरिपालनतत्परः सन्
तत्रैव भाष्यकृदपीदमुवाच यत्नात् ॥ १९४ ॥

विस्पष्टमिति । इदं प्रागस्माभिरुपपादितम् । विस्पष्टं प्रसिद्धमात्मनः स्वस्य मतमेव इदं यथा स्यात्तथा आचचक्षे हीति सम्बन्धः । दार्ढ्यं चानन्यभावः । तदाशयमाह—सर्वज्ञतेति । यद्यपि सर्वज्ञत्वं सर्वशक्तित्वं च लोके कारणगतत्वेन न प्रसिद्धम् । तथापि कुलालादेरिव तदभिज्ञत्वादिमात्रं तस्मिन् सिध्यज्जगत्कारणस्य तस्य सर्वज्ञत्वादौ पर्यवस्यतीति तत्परिपालनायैवमुक्तवान् । तच्च मायां विनाऽनुपपन्नमिति विवर्तवाद एव तत्संमत इति भावः । अत एव तत्सूत्रव्याख्याने भाष्यकारोऽपि सर्वज्ञं महाशक्तिं महामायं ब्रह्मेत्यवोचदित्याह—तत्रैवेति ॥ १९४ ॥

एवं चिन्मात्राश्रयविषयमज्ञानं समस्तसंसारनिदानमिति स्वमतमुक्तम् । इदानीं तद् दृढयन् जीवस्याज्ञानमिति मतं दूषयति—

अज्ञानित्वं ब्रह्मणो जीवता चे-
ज्ज्ञानित्वं तत्र जीवस्य युक्तम् ॥
अज्ञानित्वे चान्यदप्यभ्युपेत-
मज्ञानित्वं यद्यहो कष्टपिष्टिः ॥ १९५ ॥

अज्ञानित्वमिति । ब्रह्मणो जीवभावो हि न स्वाभाविको

युज्यते, तस्य ब्रह्मताप्रतिपादकश्रुतिविरोधात् । नाप्युपाध्यन्तरप्रयुक्तः सः, अद्वैतमते वास्तवोपाध्यन्तरासम्भवात् । अतोऽज्ञानित्वमज्ञानावच्छिन्नत्वमेव ब्रह्मणो जीवभावो वाच्यः । ततः किं तत्राह-नाज्ञानित्वमिति । तत्र मते जीवस्याज्ञानित्वं न युक्तम् । कुतो न युक्तमिति चेत्, किं जीवभावप्रयोजकमज्ञानं तद्वृत्त्यज्ञानादन्यदुत तदेव । आद्यं प्रत्याह-अज्ञानित्व इति । ब्रह्मणोऽज्ञानावच्छिन्नत्वे तस्यापि जीववृत्तित्वे तदाश्रयावच्छेदकत्वेनाप्यज्ञानान्तरं वाच्यम्, एवं तस्यतस्यापीत्यनवस्था स्यादित्याशयेनाह—अहो इति । तस्यैवं विहरणं कष्टपिष्टिरिति । शुद्धस्य ब्रह्मणोऽज्ञानाश्रयत्वमनुपपन्नमिति हि तस्य त्वया जीववृत्तित्वमिष्यते । अत्रापि साऽनुपपत्तिः कथं न स्यात् । अवच्छिन्नस्यापि जीवस्य शुद्धब्रह्मभावानपायात् अन्यथा मुक्तिशास्त्रायोगादतोऽनन्तापामाणिकाप्रयोजनाज्ञानमालाऽभ्युपगमोऽतिक्लिष्ट इति भावः ॥ १९५ ॥

अतस्तदज्ञानं शुद्धब्रह्माश्रयमिति त्वदनिष्टमप्यभ्युपेयमिति तेनैवालं किं तदवच्छिन्नवृत्तिनाऽज्ञानान्तरेण, एवं त्वन्मतासिद्धिप्रसङ्गश्चेत्याह—

अज्ञानित्वं ब्रह्मणश्चानभीष्ट-
मस्मिन् पक्षे दुर्निवारं प्रसक्तम् ॥
अज्ञानित्वं ब्रह्मणश्चेदभीष्ट-
मस्मत्पक्षस्त्यज्यते कस्य हेतोः १९६ ॥

अज्ञानित्वमिति । अस्मिन्नज्ञानावच्छिन्नेऽज्ञानमित्यत्र । अनभीष्टम्, जीवाज्ञानवादिन इति शेषः । कस्य हेतोरित्यनेन शुद्धब्रह्माश्रयादज्ञानादन्येन किं प्रयोजनं साधनीयमिति सूचितम् ॥१९६॥

कस्य हेतोरित्यस्य प्रश्नार्थत्वं मत्वा शङ्कते—

शुद्धत्वार्थं ब्रह्मणस्त्यज्यते चे-
दस्मत्पक्षेऽप्यस्ति शुद्धत्वमस्य ॥

अस्मत्पक्षे शुद्धता वास्तवी चेद्
युष्मत्पक्षे कल्पिता शुद्धता किम् ॥ १९७ ॥

शुद्धत्वार्थमिति। ब्रह्मण्यध्यासेऽपि तस्य तदधिष्ठानब्रह्मणः शुद्धिर्नापैति, लोके रजताद्यध्यासाधिष्ठानस्य तत्कालेऽपि तत्स्वभावाप्रच्युतिदर्शनादित्याशयेन सिद्धान्त्याह—अस्मत्पक्ष इति। ननु ब्रह्मज्ञानवादे तत्कल्पिताशुद्धेः सत्त्वात्तत्र वास्तव्येव तदभावरूपा शुद्धिर्वाच्येति न सर्वप्रकारशुद्धिस्तस्य सिध्यतीति शङ्कते—अस्मत्पक्ष इति। सिद्धान्तपक्ष इत्यर्थः। सर्वप्रपञ्चाधिष्ठानस्य कल्पिताशुद्धेर्निराकर्तुमशक्यत्वात्। त्वत्पक्षेऽपि तादृश्येव तस्य शुद्धिर्वक्तव्येति काक्काऽऽह—युष्मत्पक्ष इति ॥ १९७ ॥

जीववत्तैवाज्ञानं स्वाश्रयजीवावच्छेदकमितिकल्पनिराकरणाशयेन प्रकृतनिराकरणमुपसंहरति—

कष्टःकष्टः कल्पितो ब्रह्मवादः
श्रेयोमार्गाद् भ्रश्यतो भ्रान्तबुद्धेः ॥
त्यक्तव्यस्ते सज्जनैरस्मदीयः
श्रेयोमार्गः श्रेयसे चाभ्युपेयः ॥ १९८ ॥

कष्ट इति। वीप्सयाऽत्यन्तानुपपन्नत्वं सूचयति। स्वोत्प्रेक्षितत्वं कल्पितत्वं ब्रह्मवादस्य। ब्रह्माश्रिताज्ञानानङ्गीकारे संसारस्य नाविद्यकत्वं सिध्यतीति न मोक्षः स्यादित्याशयेनाह—श्रेयोमार्गादिति। अत एव जीवाज्ञानबुद्धिर्भ्रान्तिरेवेत्याह—भ्रान्तेति। फलितमाह—त्यक्तव्य इति। ननु तत्रापि बहूनां वेदान्तव्याख्यातॄणामङ्गीकारो दृश्यते इत्याशङ्क्याभिनिवेशमूलस्तेषां सः, न विवेकमूल इत्याशयेनाह—सज्जनैरिति। अनभिनिविष्टैर्विवेकिभिरित्यर्थः। ब्रह्मव्याकृतरूपेण जीवस्य त्वयाऽज्ञानाश्रयत्वमभ्युपेयत इति तद्व्याकृतेरज्ञानात् प्रागसत्त्वं वाच्यम्। अन्यथा तस्याज्ञानाश्रयताप्रयोजकताऽयोगात्। सा चाविद्याधीनसत्ताकेति कथं परस्पराधीनसत्त्वयोस्तयोर्नेतरेतराश्रयत्वदोषः। उत्पत्तावितरेतराश्रयत्व-

स्य दोषत्वमप्युत्पद्यमानसत्ताद्वारेणैवेति न ततोऽस्य विशेषः । एवं च शुद्धाश्रयत्वं जीवाश्रयत्वं चेत्यनुपपन्नद्वयं परपक्षे स्याज्जीवस्यापि शुद्धब्रह्मस्वभावत्वादिति द्वितीयपरिहाराय तदेव वस्तुतो विचारासहमपि विवेकिभिरभ्युपेयमिति भावः ॥ १९८ ॥

ननु यदि ब्रह्मण्यज्ञानमुपपादितं तर्हि तदेवानवच्छिन्नं संसरतु किमवच्छिन्नजीवकल्पनया । न च बद्धत्वादेर्नित्यमुक्तत्वादेश्च प्रयोजकतया जीवब्रह्मविभागो वाच्य इति वाच्यम् । अविद्याश्रयस्यापि तदभावत्वेन तद्विभागश्रुत्युपपत्तेः । न चैकत्रैकस्य युगपद्भावाभावानुपपन्नाविति वाच्यम् । एकस्मिन्नपि व्योम्नि पक्ष्यादीनां युगपद्भावाभावदर्शनादित्याशङ्क्याह—

एकोपाधावस्तिता नास्तिता च
मूढत्वस्य स्वीकृता चेत् परस्मिन् ॥
व्योम्न्येकस्मिन्नास्तिता नास्तिता च
पक्ष्यादीनां यद्वदिष्टा तथैव ॥ १९९ ॥

एकोपाधाविति । तथैव मूढत्वस्य परस्मिन्नेकोपाधाविति सम्बन्धः ॥ १९९ ॥

यद्यविद्यादीनां मिथ्यात्वप्रयोजको वास्तवोऽभावस्तत्रास्तीत्युच्येत तर्हि काममस्तु, तदवच्छिन्नस्य नित्यमुक्तत्वादिव्यवहारालम्बनत्वे बद्धमुक्तयोः परस्परविरहोपाधिद्वयावच्छिन्नतयाऽन्योन्यं व्यावृत्तिर्वाच्या । तत्र च बिम्बप्रतिबिम्बपक्ष एव श्रेयान् । अनवच्छिन्नमेव संसरतीति तदा त्वदुक्तिविरोधश्च । अथाविद्यादिसमानसत्ताकस्तदभावस्तत्रास्तीत्युच्येत तत्र तयोर्विरोधेनान्यतराभावप्रसङ्गादित्याशयेनाह—

नैतत् सारं सत्त्वमिष्टं यदि स्या-
दस्तित्वादेरिष्टहानिः प्रसक्ता ॥
एकोपाधावस्तिता नास्तिता च
स्यादित्येवं स्वीकृतेऽस्मिन् हि पक्षे ॥ २०० ॥

नैतत् सारमिति । इष्टहानिरिति । अनवच्छिन्नमेव संसरत्वित्यादेर्हानिरित्यर्थः । दूषणान्तरं वक्तुं तत्पक्षमनुवदति—एकोपाधाविति ॥ २०० ॥

दूषणमाह—

धूमे सत्ता स्यादसत्ता च तस्मिन्
धूमस्यैवं कारणं कल्प्यते किम् ॥
कादाचित्कं कारणं नान्तरेण
स्यादित्येवं तस्य कल्पिः कुतो वः ॥ २०१ ॥

धूम इति । सत्ता पर्वतादिवृत्तित्वम् । तस्मिन् धूमादौ । अस्मिन् पक्षे धूमादेरपि युगपत्पर्वतादौ भावाभावौ स्यातामित्यर्थः । गगने पक्षिण इव साऽप्यस्तित्वाशङ्क्य दृष्टान्तासंमतिं मत्वा प्रकृते दूषणमाह—धूमस्येति । एवमिति । एवं सतीत्यर्थः । कारणकल्पनामेव सप्रकारां दर्शयंस्तदाक्षेपमुपपादयति—कादाचित्कमिति । कार्यमित्यर्थः । तस्य कारणस्य । कुतो, न कुतोऽपीत्यर्थः । धूमकालेऽपि तत्र तदभावसत्त्वे धूमाभावनिश्चयदशायामिव तत्कालेऽपि धूमादिसत्ताप्रयोजकवह्न्यादिसत्ता न कल्प्येत, कल्पकाभावस्य निश्चितत्वादिति न धूमादिना वह्न्याद्यनुमानं परस्य सिध्येदिति भावः ॥ २०१ ॥

नन्वभावे सत्यपि धूमादिनिश्चयात्तत्कारणं कथं न कल्प्येतेत्याशङ्क्य गगने पक्ष्यादेरिव धूमादेरपि तदाश्रये भावस्य त्वन्मते तदा निश्चितत्वेन तत्प्रतिबन्धान्न तदा तत्कल्पना युक्तेत्याशयेनाह—

कादाचित्कात् कल्पनां कारणस्य
प्रत्याचक्षीताविरोधं ब्रुवाणः ॥
एकोपाधावस्तिनास्तित्वयोर्हि
तस्मादेषा कष्टकल्पिर्न कार्या ॥ २०२ ॥

कादाचित्कादिति । कार्यादित्यर्थः । अस्तिनास्तित्वयोरेकोपाधावविरोधं ब्रुवाणः कादाचित्कादिति सम्बन्धः । तस्मादेष पक्षोऽप्रामाणिक इत्युपसंहरति–तस्मादिति ॥ २०२ ॥

ननु भवन्मते चैतन्यं स्फुरदपि तन्मात्राद्वयानन्दस्वरूपेण न स्फुरतीत्यभ्युपगतं, तथाऽविद्यादेर्युगपदेकत्र भावाभावावविरुद्धाविति दृष्टान्तमात्रमवलम्ब्य शङ्कते––

ननु चैकरूपाचितिवस्तुगतं
स्फुरणं तदस्फुरणमेव च वः ॥
अविरुद्धमभ्युपगतं द्वितयं
तादिवास्तिनास्तियुगलं भवतु ॥ २०३ ॥

ननु चेति । स्फुरणास्फुरणयो रूपभेदे नैकस्मिन्नपि यौगपद्यमविरुद्धमिति शङ्कामपनुदति–एकरूपेति । तदस्फुरणं चेति द्वितयं वो युष्माभिरविरुद्धमभ्युपगतमेवेति योजना । दार्ष्टान्तिकमाह–तदिवेति । तद्वदित्यर्थः । अविद्यादेरिति शेषः ॥ २०३ ॥

नैतत्सारम्, चैतन्ये हि स्फुरणं स्वाभाविकमस्फुरणमविद्याकृतमारोपितं न तु निजम्, स्वाभाविकारोपितयोश्च न विरोधः, तथा सत्यारोपमात्रस्यैव विलोपप्रसङ्गात् । समानसत्ताकभावाभावयोस्तु नैव, लोके नियमेन तयोर्विरोधस्य दर्शनादित्याशयेन सिद्धान्ती दूषयति––

न तदात्मनः स्फुरणमेव निजं
परतोऽप्रकाशनमबोधवशात् ॥
न च किं चिदन्यदनयोरुभयो-
रविरोधसिद्धिकृदुदाहरणम् ॥ २०४ ॥

न तदिति । परत इत्यस्य विवरणमबोधेति । अतस्तदृदृष्टान्तो विषम इति भावः । नन्वेवमपि यथा संयोगादेरेकस्मिन्नेव सम्प्रसक्तत्वं तद्वदिदमस्त्वसाशङ्क्य प्रतीत्यनुरोधेन तयोरपि भिन्नप्रदे-

शद्वत्तित्वमेव । न च गगनेऽनवच्छिन्नात्मनि वा स्वतः प्रदेशभेदोऽस्तीति न तद्दृष्टान्तबलादपि त्वन्मतसिद्धिरित्याशयेनाह—न चेति २०४॥

ननु न स्फुरतीति नञा स्फुरणाभाव एव प्रतीयते, स चाविद्यानिमित्तश्चेत्, अस्तु नाम । न चैतावतैकस्य युगपद्भावाभावौ परिहर्तुं शक्येते इति दृष्टान्तसमर्थनं पूर्ववादिन आशङ्क्याह—

स्फुरणास्फुरणे च नात्मनः
सदसद्भावतया मनीषिते ॥
स्फुरणं चितिरात्मवस्तुन-
स्तदविद्याऽस्फुरणं च कथ्यते ॥ २०५ ॥

स्फुरणेति । सदसद्भावतया भावाभावतया मनीषिते इष्टे अङ्गीकृते इति यावत् । कीदृशे तर्हि ते इत्याकाङ्क्षायामाह—स्फुरणमिति । तस्याऽऽत्मनोऽविद्याऽऽत्मविषयाऽविद्येत्यर्थः । तथा च विद्याविरोधित्वाद्भावरूपमप्यस्फुरणं नेक्षेतेत्यादाविवेक्षणविरोधिसंकल्पादिर्नञाऽभिधीयत इति न तदभावरूपं न वा स्वरूपस्याभावः सम्भवतीति दृष्टान्तासिद्धिरेवेति भावः ॥ २०५ ॥

अतो नाज्ञानित्वमेव जीवत्वं येनाज्ञानाश्रयानवच्छिन्नमेव ब्रह्म जीवः स्यात्, किं त्वविद्यायां प्रागुक्तचित्प्रतिबिम्ब एव, तत्र च जीवत्वेनान्यदप्यज्ञानमुपाधितया प्रयोजकमित्याशयेनोपसंहरति—

अज्ञानित्वं जीवभावो न तस्मा-
ज्जीवत्वादेः कारणं युक्तमेतत् ॥
प्राणोपाधेर्वाचको जीवशब्द-
श्चैतन्यस्य स्यात् प्रसिद्धो हि तत्र ॥ २०६ ॥

अज्ञानित्वमिति । आदिपदेनेश्वरत्वादि गृह्यते । ननु सुषुप्त्यादावपि चैतन्ये प्रतिबिम्बत्वस्य सत्त्वात् कथं न तदा जीवव्यवहार इत्याशङ्क्य लिङ्गशरीरोपाधिर्हि जीवव्यवहारालम्बनं तस्य च सुषुप्त्यादावभावान्न तदा स्वस्य परस्य वा जीवव्यवहार इत्याश-

येनाह—प्राणोपाधेरिति । तत्र सकलमहाजनप्रसिद्धिं 'जीव प्राणधारणे' इति शाब्दप्रसिद्धिं चाभिप्रेत्याह—प्रसिद्ध इति । तत्र प्राणोपाधिचैतन्ये जीवशब्द इत्यनुषङ्गः ॥ २०६ ॥

प्रसिद्ध इत्येतदेव विवृणोति—

अज्ञानजन्यकरणप्रतिबिम्बवाचि
जीवाभिधानमिह वृद्धजनप्रसिद्धम् ॥
तत्रैव निर्वचनमस्ति च तस्य तस्मा-
ज्जीवो भवेत् करणपूगवशीकृता चित् ॥ २०७ ॥

अज्ञानेति । करणमन्तःकरणादि । तत्राज्ञानादिप्रतिबिम्बे, निर्वचनं धातुकारादेर्जीवशब्दार्थकथनम् ॥ २०७ ॥

तस्मादज्ञानातिरिक्तजडस्य सर्वस्याज्ञानकार्यतया तदात्मत्वाज्जीवस्याप्युक्तविधया तथात्वात् परिशेषाद्ब्रह्मैवाज्ञानाश्रय इत्याह—

ब्रह्मैवाज्ञानि तस्मादिह भवितुमलं नापरं वस्तु किं चित्
तस्याज्ञानात्मकत्वान्न च तमसि तमस्तन्निवृत्तेरयोगात् ॥
नाज्ञानोत्थस्य विद्याजनिरिह घटते तां विना तन्न नश्येन्
न ह्यज्ञानं विनश्येदवगतिजनकज्ञानजन्मान्तरेण ॥ २०८ ॥

ब्रह्मेति । तस्मादित्यादौ योजनीयम् । इह वेदान्तसिद्धान्ते । प्रपञ्चस्याज्ञानकार्यत्वेन तदात्मत्वान्न तदाश्रयत्वमित्याश्रयादिप्रसङ्गादित्यर्थः । किं च तस्य जडाश्रयत्वे तत्तदावरणमेव वाच्यम् । लोके तमसः स्वाश्रयमात्रावरकत्वदर्शनात् । न च तद्युज्यते, स्वत एवाप्रकाशे तस्मिन्नविद्यावरणवैयर्थ्यादित्याशयेनाह—न च तमसि तमः इति । किं च तदा तन्निवृत्तिरपि न भवेत्, स्वसमानाश्रयविद्यानिवर्त्या सा वाच्या, अन्यथाऽतिप्रसङ्गात । नच जडस्य प्रकाशरूपा विद्या सम्भवतीत्याशयेनाह—तन्निवृत्तेरिति । अयोगे हेतुमाह—नेति । तर्हि क्रियया वोपासनया तन्निवृत्तिरस्त्वित्याशङ्क्याह—तां विनेति । तदज्ञानम् । शुक्तिकादेर्ह्यज्ञानं शुक्तिज्ञानादेव नश्य-

तीत्यन्वयव्यतिरेकाभ्यां सिद्धम् । एवं चात्माज्ञानस्यापि तदुत्स्वविषयज्ञानेन नाश्यत्वमेवोचितमिति तेन विना तन्न नश्येदित्याह—न ह्यज्ञानामिति । अवगतिर्विषयाभिव्यक्तिस्तज्जनकं यदन्तःकरणवृत्तिरूपं ज्ञानं तस्य जन्म विनेत्यर्थः ॥ २०८ ॥

ननु तर्हि जीवत्वं वस्तुभूतमेवास्तु बाधकाभावात्, तथा सति तद्विशिष्टस्य जीवस्याज्ञानाश्रयत्वादि सम्भवतीत्याशङ्क्योक्तानुवादेनोक्तहेतोरसिद्धिमभिप्रेत्याह—

अज्ञानात्मकवस्तु नाश्रयतयाऽज्ञानस्य सम्भाव्यते
नाज्ञानात्मकताबहिष्कृतमिदं जीवत्वमङ्गीकृतम् ॥
नाज्ञानाश्रयमध्यपाति घटते जीवत्वमेतेन वः
श्चैतन्याश्रयमेतदस्तु घटते तत्रैव हीदं तमः ॥ २०९ ॥

अज्ञानात्मकेति । नाङ्गीकृतमिति सम्बन्धः । तत्त्वमस्यादिश्रुतिबाधाज्जीवत्वं वस्त्विति नाङ्गीकर्तुं युक्तमित्यर्थः । फलितमाह—नाज्ञानेति । आश्रयमध्यपातीति । जीवत्वविशिष्टस्याश्रयत्वे तदप्याश्रयकोटौ प्रविशतीत्येतदुक्तम् । अतः परिशेषाच्चैतन्यमेव तदाश्रय इत्युपसंहरति—एतेनेति । उक्तोपपादनेनेत्यर्थः । वः वोऽपि । उक्तोपपादनमेव स्मारयति—घटत इति ॥ २०९ ॥

मन्वखण्डचैतन्यस्य ब्रह्मात्मनो नाज्ञानस्याश्रयत्वं नापि विषयत्वं सम्भवति, तथा सत्यज्ञानस्यैव ज्ञानायोगात् । न चाद्वयाश्रयविषयतया तमः स्फुरति, जीवाश्रयत्वेन तत्स्फुरणादिति शङ्कते—

ननु चाद्वयाश्रयतमःस्फुरणं
न कथं चिदत्र न हि तत् स्फुरति ॥
स्फुरदाश्रयस्य तमसः स्फुरणं
घटते न चाद्वयमिह स्फुरति ॥ २१० ॥

नन्विति । आश्रयेति विषयस्याप्युपलक्षणम् । न कथं चित् सम्भवति, तथा सति न घटत इत्यनुषङ्गः । अज्ञानस्याद्वयाश्रयत्वेन

स्फुरणं न युज्यत इत्यर्थः । न केवलं तदयोगोऽपि तु स्वरूपतोऽपि तन्नास्तीत्याह—अत्रेति । अद्वयात्मनीत्यर्थः । अद्वयाश्रयविषयतमःस्फुरणं च न घटत इत्यत्र युक्तिमाह—स्फुरदिति । आश्रये विषये च स्फुरति खलु तस्येच्छादिवत् स्फुरणं वाच्यं, न चाद्वयवस्त्वविद्यादशायां स्फुरतीति न तत्तदाश्रयमित्यर्थः ॥ २१० ॥

यद्यपि वस्तुतोऽद्वयमेव चैतन्यमज्ञानाश्रयो विषयश्चाज्ञानकार्यभेदविरोधिस्वरूपस्यैव तदाश्रयविषयत्वस्य वक्तव्यत्वात् । तथापि तेन रूपेण न तत्तदाश्रयो न वा विषयः, तथा तदप्रतीतेर्दृष्टाभावात्मतया तस्य तदुभयात्मत्वायोगाच्च । किं तु वस्तुतोऽद्वयं प्रत्यक्चैतन्यात्मना तदाश्रयो विषयश्चेति न किं चिद्विरुध्यते, प्रथमानस्यैवानथमानानन्दाद्यात्मना प्रकाशविषयत्वेन साश्रयविषयतत्स्फुरणोपपत्तेरित्याशयेनाह—

नाज्ञानमद्वयसमाश्रयमेवमिष्टं
नाद्वैतवस्तुविषयं निशितेक्षणानाम् ॥
नानन्दनित्यविषयाश्रयमिष्टमेतत्
प्रत्यक्त्वमात्रविषयाश्रयतानुभूतेः ॥ २११ ॥

नाज्ञानमिति । तर्हि किं भावरूपानन्दाद्याश्रयविषयं तादृङ्न्यं तदपि नोक्तदूषणानपायादित्याशयेन चैतन्यमात्रस्य तद्विषयत्वानुभूतेरित्याह—नानन्देति । एतदज्ञानम् । अनुभूमामहं न जानामीत्यनुभूतेरित्यर्थः ॥ २११ ॥

प्रत्यक्त्वमात्रेत्याद्युक्तमनूद्योपपादयति—

प्रत्यक्त्वमात्रविषयाश्रयमोहहेतोः
प्रत्यक् तिरोहितमिति प्रतिपादयामः ॥
प्रत्यक्षमेव खलु वेद्मि न वेद्मि चेति ॥
प्रत्यक्षमस्ति ननु वेदनमस्य पुंसः ॥ २१२ ॥

प्रत्यक्त्वमात्रेति । मोहहेतोः, मोहाद्धेतोरित्यर्थः । नन्वयमनु-

वाद एवानुपपन्नः, सविषये हि ज्ञानादावाश्रयविषयभेदो दृष्टस्तत्कथं तदाश्रयमतीत्य एव तद्विषयत्वमित्याशङ्क्याह—प्रत्यक्तिरोहितामिति। ज्ञातुः स्वात्मनि वृत्तिविरोधादस्तु ज्ञातृज्ञेयभेदः, नैवमत्र बाधोऽस्तीति लाघवेन तदुभयैक्यं युक्तमिति भावः। तत्रोक्तानुभवमपि प्रमाणयति—प्रत्यञ्चमिति। प्रत्यक्षवेदनमस्ति नन्विति सम्बन्धः॥ २१२॥

नन्वेकस्यैव निरंशचैतन्यस्याज्ञानसाधकतया तदाश्रयस्य स्फुरणं तदैव तद्विषयतया विरुद्धमित्याशङ्क्य स्वप्रकाशसंविद्वादिनाऽपि तत्स्वप्रकाशत्वादिविप्रतिपत्त्यनुरोधेन स्फुरत्यामपि तस्यामज्ञातत्वमवश्यं स्वीकर्त्तव्यं तद्वदत्रापि स्यादित्याह—

संवित् परिस्फुरति न स्फुरतीति तस्यां
वैयात्यदूषितधियस्तु विसंवदन्ते॥
अज्ञाननस्तदपि तद्वदिहाद्वयत्वं
भादप्यभादिव विमूढधियो वदन्ति॥ २१३॥

संविदिति। वैयात्यं धाष्टर्यं "धृष्टो धृष्णुग् वियातः स्यात्" इत्यमरः। तद् विसंवदनम्॥ २१३॥

ननु स्फुरत्यपि तस्मिन्नज्ञानं चेदविरोधेन कदापि ज्ञानात्तन्न नश्येदित्याशङ्क्य स्वरूपचैतन्यस्य तदाश्रयतयाऽविरोधेऽपि वेदान्तजवृत्तिव्यक्तस्य तन्निवर्त्तकत्वं घटत इत्याशयेन सदृष्टान्तमाह—

अव्युत्पत्तिं विभ्रती भाति संवित्
तद्वद्ब्रह्माप्यद्वितीयस्वरूपम्॥
अव्युत्पत्तिं नाशयद्भाति वेद्यं
तस्मादेतच्चोद्यमस्मासु नास्ति॥ २१४॥

अव्युत्पत्तिमिति। स्वप्रकाशत्वाद्यव्युत्पादनम्। भाति, अज्ञाततयेति शेषः। ब्रह्माप्यव्युत्पत्तिं बिभ्रत् स्वरूपेणाविचारितं तद्वद्भातीत्यनुषङ्गः। वेद्यं वेदान्तजवृत्त्यभिव्यक्तम्, यथा संवित् स्व-

प्रकाशत्वेन प्रमिता तदज्ञाततां नाशयति, एवं ब्रह्मापि वेद्यं सत्तां नाशयतीत्यर्थः। एवं स्वपक्षस्य निर्दोषसमर्थनमुपसंहरति—तस्मादिति। एवं नित्यमुक्ताद्वयचैतन्यात्मकं ब्रह्म स्वाश्रयाज्ञानप्रतिबिम्बितं जीवरूपेण संसरति स्वज्ञानाच्च मुच्यत इति सिद्धम् ॥२१४॥

नन्वेवं शुकवामदेवादेर्ब्रह्मविदो मुक्तिरन्येषां च तदज्ञानात् संसार इति काण्डद्वयात्मकबन्धमोक्षव्यवस्थाशास्त्रमप्रमाणं स्यादिति शङ्कते—

नन्वेवं चेद् बन्धमोक्षव्यवस्था-
शास्त्रं कुप्येन्नाप्रबोधात् प्रवृत्तेः ॥
बद्धो मुक्तो ज्ञानवानज्ञ इत्य-
प्येतत् सर्वं यावदज्ञानमिष्टम् ॥ २१५ ॥

नन्वेवमिति। स्वप्न इव यावदज्ञानं बन्धमोक्षादिव्यवस्थैकजीववादेऽप्यविरुद्धेस्याशयेन समाधत्ते—नाप्रबोधादिति। प्रवृत्तेः, तद्व्यवस्थाशास्त्रस्येति शेषः। एतदेव विवृणोति—बद्ध इति। शुकादिर्मुक्तोऽन्यो बद्धोऽन्य एवं स ज्ञानवानितरोऽज्ञ इत्यादि सर्वमप्यस्मिन् सिद्धान्ते यावदज्ञानमिष्टमुपपन्नमित्यर्थः। यथा स्वप्नद्रष्टुरेकस्यैव सत्त्वेऽपि तदा तदृष्टपुरुषाणां स्थाणुपुरुषवदविद्याकल्पिततयाऽविद्यातदधीनसंसाराभावेऽपि कचित्तदा विद्वत्तया मुक्ततया च तेन व्यवह्रियन्तेऽन्ये च तद्विपरीततया न तु वास्तवस्तस्य तद्व्यवहारस्तदा संभवति। एवं जागरणेऽपि शुकादेस्तदन्यस्य च तद्व्यवहारो यावदज्ञानं युज्यते। न हि स्वप्नजागरितयोरज्ञानकृतव्यवहारे किञ्चित् वैषम्यमस्तीति प्रागेवोक्तमिति भावः॥२१५॥

किं चाध्ययनविध्युपात्तस्य वामदेवादिमुक्तिशास्त्रस्याध्येतृपुरुषार्थपर्यवसायिनस्तस्य ब्रह्मस्वरूपतामात्रपर्यवसायित्वान्न निष्प्रयोजने श्रूयमाणकथाप्रबन्धे तात्पर्यमिति न तत इदानींतनसंसारोपलम्भविरुद्धा शुकादिमुक्तिः सिध्यति, मानान्तरविरोधेऽन्यपरादर्थवा-

दात्तदर्थासिद्धेरिति वक्तुं विमृशति—

किं चैतत् किं बन्धमोक्षव्यवस्था-
शास्त्रं यत्नात्तत्परं सत् प्रवृत्तम् ॥
किं वाऽन्यस्मात् प्राप्तमेवानुभाष्य
तस्या रूपं ब्रह्मतत्त्वं विदध्यात् ॥ २१६ ॥

किं चेति। यत्नादिति। मानान्तरबाधनेऽपि तस्य व्यापारप्रसङ्गं सूचयति-अन्यस्मादिति। अनादिवृद्धव्यवहारादित्यर्थः। तस्या मुक्तेः ॥ २१६ ॥

आद्यं दूषयति—

शास्त्रं तावत्तत्परं नेष्यते त-
दानर्थक्यात्तत्स्वरूपप्रतीतेः ॥
ब्रह्मात्मैक्यप्रत्ययेनार्थवत्त्वं
वक्तुं युक्तं तच्च नोऽभीष्टमेव ॥ २१७ ॥

शास्त्रमिति। तद्वाक्याध्येतृपुरुषस्यास्मदादेः शुकादिमुक्तिज्ञानेन साक्षात् कस्यचिद् दृष्टार्थस्यादर्शनादितरार्थवादवन्नायमपि तत्पर इत्याशयेनाह—आनर्थक्यादिति। अतो द्वितीय एव कल्पो वक्तुमुचितः, वामदेवादेर्ब्रह्मसाक्षात्काराच्चद्भावरूपमुक्तौ प्रतिपादितायामिदानींतनमुमुक्षोरपि तदुद्देशेन प्रवृत्तिर्भवतीति तस्य तत्परत्वमेव युक्तं, तच्चास्माकमिष्टमेवेत्याशयेनाह—ब्रह्मात्मैक्येति। अतोऽविद्वद्दृष्टयैव बन्धमोक्षादिव्यवस्थाव्यवहार इति भावः ॥२१७॥

ननु मदन्यजीवाभावेन बन्धमोक्षादिव्यवस्थाभावेऽनुभवविरोधः स्यादिति शङ्कते—

नन्वन्यो मद्बन्धमोक्षादिभागी
भूतो भावी वर्त्तते वा न कश्चित् ॥
इत्युक्तार्थं स्वानुभूत्या विरोधा-
न्नाहं जातु प्रोत्सहे संग्रहीतुम् ॥ २१८ ॥

नन्विति । मद् मत्तो भूतो वा भावी वेत्यन्वयः ॥ २१८ ॥

यदनुभवेन बन्धमोक्षादिव्यवस्थाभावोक्तिर्विरुध्यत इत्युच्यते तमनुभवं दूषयितुं विकल्पयति—

किं द्वैतानुभवो विरोधपदभाक् किं वा परोऽस्मीत्ययं
यद्वा काश्चिदिहापरोऽस्त्यनुभवो यस्ते विरोधावहः ॥
नाद्वैतानुभवः क्षतिं वितनुते तस्येति युक्तं वचो
नापि द्वैतमुपोल्लिखन्ननुभवस्तेनास्य बाधो यतः ॥२१९॥

किं द्वैतेति । बन्धमोक्षादिव्यवस्थाभावेऽनुभवविरोधं वदतस्तव कोऽनुभवः संमतः, किं कर्तृत्वादिद्वयविषयोऽनुभवस्तद्विरोधी, किं वाऽद्वयः परोऽस्मीत्यभेदानुभवः, अथ वा द्वैताद्वैतविषयः काश्चिद्वयः सविशेषाद्वयवादिभिरिष्यते । न चैभ्योऽपरः काश्चिदनुभवोऽस्तीत्येतन्मध्ये कोऽनुभवः प्रकृतविरोधीत्यर्थः । दूषणे विकल्पक्रमानादरेऽपि न कश्चिदर्थो दुष्यतीति मत्वा प्रथमं द्वितीयं दूषयति-नाद्वैतेति । तस्य जीवेषु बन्धमोक्षादिव्यवस्थाभावस्य । आद्वितीयः परमात्मास्मीत्यनुभवे मुक्तिमात्रस्यैव भानादिदानींतनबन्धप्रतीतेः स तद्बाधक इति वचो न युक्तमित्यर्थः । एवमेव द्वैतानुभवो न तस्य बाधक इत्याह—नापीति । प्राक् कस्यचिन्मुक्तौ अस्माभिरुच्यमानायां खल्विदानींतनबन्धानुभवोऽस्मन्मते बाधको भवेत् । न चैवमस्ति अविद्यकसंसारस्य प्राग् निवृत्त्यनभ्युपगमादस्माभिरित्यर्थः । कल्पितविषयत्वेनास्यैव बाध्यत्वाच्च न बाधकतेत्याह-तेनेति ॥२१९॥

द्वैताद्वैतानुभवेन बाध इति चेन्न, शास्त्राद्विरुद्धभेदाभेदाननुभवादित्याशयेनाह—

द्वैताद्वैतनिवेशिनोऽनुभवनाद्बाधोद्भवोऽस्येति चेत्
तादृङ् नानुभवोऽस्ति कस्य चिदपि स्थानत्रये जीवतः॥
भास्वच्छास्त्रवरगोचरं ह्यनुभवं विभ्रज्जनो दृश्यते
नास्मिन् संसृतिमण्डले स न भवेत् कस्मादयं चेद्भवेत्

तादृगिति । स्थानत्रये भूम्यन्तरिक्षादौ जाग्रदादौ वा । विरोधादसम्भवे दृष्टान्तमाह—भास्वदिति । सूर्यस्यान्धकारस्य चाभेदमनुभवन् जनोऽस्मिन् संसारमण्डले न दृश्यते यथा, तथा भेदाभेदमपि न कोऽप्यनुभवतीत्यर्थः । ननु माभूत् सूर्यतमसोरभेदानुभवो भेदाभेदयोस्तु स किं न स्यात्तत्त्वमादिश्रुतेरित्याशङ्क्य विरोधाविशेषाच्छ्रुतेश्चाखण्डार्थत्वादत्रापि न भवेदित्याशयेनाह—स न भवेदिति । स न भवेच्चेदिति सम्बन्धः ॥ २२० ॥

तस्माद्ब्रह्मैवैकेनैव प्रतिबिम्बरूपेण स्वाविद्यया संसरति स्वविद्ययैव मुच्यत इति पक्षस्याबाधितत्वाद्ब्रह्मवित्संप्रदायागतः स एव पक्षो मुमुक्षुभिराश्रयणीय इत्युपसंहरति—

यत एवमत्र न विरोधलवोऽ-
प्युपढौकते कथितनीतिवशात् ॥
उपगृह्यतां मतमिदं सुदृढं
गुरुसंप्रदायवचनानुगतम् ॥ २२१ ॥

यत इति । एवमित्यस्य विवरणं कथितेति । अविरोधसमर्थनफलवचनमुपगृह्यतामित्यादि ॥ २२१ ॥

एवं नित्यमुक्तब्रह्मस्वभावोऽप्यात्माऽविद्यया संसरतीत्युक्तम् । इदानीं तत्फलं ज्ञानमात्रात् सकलानर्थनिवृत्तिरधिकारिणस्तव सिध्यतीति शिष्यं प्रत्याह—

तव गाढमूढतमसा रचितं
जगदीशजीववपुषा सकलम् ॥
प्रतिभाति तावददृढं दृढवत्
समुदेति यावदवबोधरविः ॥ २२२ ॥

तवेति । ब्रह्मज्ञानातिरिक्तोपायानिवर्त्यत्वाद् गाढं दृढम् । अबाधितमिव यथा स्यात्तथा ऊढं प्राप्तं यत्तमस्तेनेत्यर्थः । तत्प्रतिभानस्योत्तरावधित्याजेन तन्निवर्त्तकमाह—तावदित्यादिना । अदृढ-

मिति । तस्यानिर्वचनीयतया ज्ञानानिवर्त्यत्वयोग्यतामाह—दृढवत्-प्रतिभातीति सम्बन्धः ॥ २२२ ॥

ननु सर्वेषामविप्रतिपन्नानुभवसिद्धस्येश्वरादिप्रपञ्चस्य कथं शुक्तिरजतवद्दृढत्वमित्याशङ्क्याऽविद्याप्रमुष्टधियामेव देहात्माभेदवत्तदनुभवान्न शुक्तिरजतादेस्तस्याध्यस्तत्वे कोऽपि विशेष इत्याशयेनाह —

प्रभुरेष सर्वविदहं कृपणो
जगदेतददभुतवितानमिति ॥
प्रतिपत्तयस्तिमिरलुप्तदृशो
यदिहोद्भवन्ति न तददभुतकम् ॥ २२३ ॥

प्रभुरिति । सुबोधम् ॥ २२३ ॥

ननु किंबलादेतस्य महाजनानुभवविरुद्धमनिर्वचनीयत्वं कल्प्यत इत्याशङ्क्य श्रुतिन्यायसिद्धमपि तद्विद्वदनुभवबलादाह —

अभयं सनातनमनातुरधी-
रवलोकयन्निजमनन्तसुखम् ॥
न मुनिः प्रपश्यति किमप्यसुखं
सकलं जिघत्सति जगत् स्वचिता ॥ २२४ ॥

अभयमिति । अनातुरधीर्धीरः, जिघत्सति अत्तुमिच्छति नाशयतीति यावत् ॥ २२४ ॥

नन्वात्मातिरिक्तद्वैताभावे गुर्वादेस्तत्त्वज्ञानोपायस्याभावात् कथं विदुषामनुभवः सिध्येदित्याशङ्क्याविद्यकस्य व्यावहारिकस्य तस्य सत्त्वान्नोक्तदोष इत्याशयेनाह—

तव चित्तमात्मतमसा जनितं
परिकल्पयत्यखिलमेव जगत् ॥
तव कल्पनाविरचितः स गुरु-
स्तव रूपमद्वयमुदाहरति ॥ २२५ ॥

तवेति । ततः किं तत्राह- तव कल्पनेति ॥ २२५ ॥

नन्वसत्यस्य शुक्तिरजतादेः स्वोचितकार्यजनकत्वाभावाद् गुर्वादेरपि कल्पितत्वे तन्न स्यात् । यदि तत् स्यात् सत्य एव स्यादित्याशङ्क्यार्थक्रियाजनकस्य सत्यत्वासंप्रतिपत्तेर्दृश्यस्य च शुक्तिरजतादेर्मिथ्यात्वस्य दृष्टत्वाद् गुर्वादेरपि तथैवेत्याह---

न हि चित्तदृश्यमपि सत्यमिति
प्रतिपन्नमस्ति भुवि किं चिदपि ॥
रशनाभुजङ्गसदृशं सकलं
जगदिन्द्रजालमिति सिद्धमतः ॥ २२६ ॥

न हीति । दृश्यस्य सत्यत्वाभावे फलितमाह -रशनेति । अतो रशनेति सम्बन्धः । तत्साद्दृश्यमेवाह--इन्द्रजालमिति । मायिकमित्यर्थः ॥ २२६ ॥

ननु गुर्वादेः परिकल्पितत्वे स्थाणुपुरुषवन्न तत्त्वोपदेष्टृत्वं स्यादित्याशङ्क्य व्यावहारिकगुर्वादिशरीरावच्छिन्नजीवस्य घटादाविव ब्रह्मण्यपि प्रमातृतया तन्निश्चयसम्भवेन तदुपदेश उपपद्यते नैवं स्थाणुपुरुषस्येत्याशयेन सदृष्टान्तमाह----

परिकल्पितोऽपि सकलज्ञतया
गुरुरेव पूर्णमवबोधयति ॥
परिकल्पितोऽपि मरणाय भवे-
दुरगो यथा न तु नभो मलिनम् ॥ २२७ ॥

परिकल्पित इति । एवकारेण स्थाणुपुरुषादि व्यावर्त्तयति ॥ २२७ ॥

ननु पूर्वक्षणे सत एव कारणत्वात् कथं सद्विलक्षणस्य तत् स्यादित्याशङ्क्य किं कारणस्य सत्तामात्रं तत्तत्कार्यविशेषजनने प्रयोजकमुत तन्मृत्त्वादिकमपि । तत्राद्यं दूषयति----

यदि सत्यमित्यवगतिं कुरुते
घटते पदादपि हुताशनधीः ॥

यदि चानृतं न जनयेत् प्रमितिं
ननु चोदनापि जनयेन्न धिषम् ॥ २२८ ॥

यदीति । गुर्वादिप्रपञ्चो यदि सत्यतयैवावगतिं कुर्यान्न तु स्वस्वासाधारणरूपसामर्थ्येन तदा पटादेरपि धूमादेरिव हुताशनज्ञानादिकार्यं स्यादित्यर्थः । द्वितीये चासद्विलक्षणप्रपञ्चस्य तावन्मात्रादेव कार्यविशेषजनकत्वोपपत्तौ न श्रुतिन्यायविरुद्धं सत्त्वं कल्पनीयमिति द्रष्टव्यम् । किं च भ्रमविषयस्य प्रमादिकार्याजनकत्वं नियमेन परेणापि वक्तुं न शक्यमित्याशयेनाह----यदि चेति । नन्विति वितर्के, चोदनेति वाक्यमात्रं द्रष्टव्यम् ॥ २२८ ॥

इष्टापत्तिमाशङ्क्याह—

जनयत्यसाविह मृषावपुषा
करणीयवस्तुनि मतिं सुदृढाम् ॥
ध्वनिधर्मभेदघटितो हि मृषा
स्वरसेन सन्नपि तु वर्णगणः ॥ २२९ ॥

जनयतीति । असौ चोदना, इह लोके च मृषावपुषा विकल्पितानुपूर्वीस्वरादियुक्तवपुषा, करणीयवस्तुन्यनुष्ठेयादिस्वभावे स्वप्रमेये । ननु स्वरादिवैशिष्ट्यं तस्याः स्वाभाविकमिति न मृषेत्यत आह—ध्वनीति । एतच्च वर्णक्रमस्याप्युपलक्षणम् । अवर्णात्मकशब्दो वायुर्वा ध्वनिस्तस्य धर्मा उदात्तादयो न वर्णधर्मा वर्णानामेकत्वान्नित्यविभुत्वाच्चोदात्तादेः पौर्वापर्यस्य चासम्भवात् । वीणादिध्वनिधर्मतया क्लृप्तस्य तस्य वर्णधर्मत्वे प्रमाणाभावाच्च । अत उदात्तोकार इत्याद्यनुभवस्य तत्कालनियतध्वनिधर्मविषयस्य वर्णांशे भ्रान्त्याऽप्युपपत्तेर्वायुधर्मस्यापि शब्दस्येवाश्रयानुभवमन्तरेणापि तत्सम्भवात् अतः स्वरूपेण सत्यापि वर्णसमूहस्वरूपा चोदनोक्तविशिष्टरूपेण मृषैवेत्यर्थः ॥ २२९ ॥

ननु तर्हि वर्ण स्वरूपमेवार्थप्रतिपत्तौ कारणमस्तु न मृषास्वरवैशिष्ट्यं पौर्वापर्यं चेत्याशङ्क्य स्वरादिभेदेऽर्थप्रतीतिविशेषदर्शनात्तदपि कारणमेवेत्याशयेन नैरुक्तं वचनमाह—

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ॥
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ २३० ॥

मन्त्र इति । मिथ्याप्रयुक्तः स्वाभाविकस्वरादिविलक्षणस्वरादिमत्तया प्रमादादिना प्रयुक्तः । तं तात्पर्यविषयीभूतम् । प्रत्युत विपरीतार्थबोधकतया यजमानं नाशयत्येवेत्याह—स इति । उदाहरति—यथेति । वृत्रमुत्पादयता त्वष्ट्रा इन्द्रस्य शत्रुरिति तत्पुरुषस्वरमन्त्रार्थमभिप्रेत्य प्रमादेन बहुव्रीहिस्वरः प्रयुक्त इतीन्द्र एव तस्य शत्रुर्बभूव यथा, एवं चोचितस्वरोऽपि वाक्यार्थज्ञानहेतुरित्यर्थः । एवं पौर्वापर्यविशेषस्याऽप्यर्थविशेषधीजनकत्वं वाच्यम्, अन्यथा राजा जारेतिपदाभ्यामाविशेषेणार्थधीप्रसङ्ग इत्याशयः ॥ २३० ॥

ननु तर्हि सत्यस्फोट एव चोदनाऽस्तु न तस्यापि स्वरसतः स्वरादिवैशिष्ट्यासम्भवेन तत्र तस्य मिथ्यात्वानपायात् । वर्णसमूहातिरिक्ते चानुभवादेरभावादप्रामाणिके न चोदनात्वमित्याशयेनाह—

न च वर्णपूगमपहाय भवे-
दिह चोदनेत्यभिमतं विदुषाम् ॥
यदि सत्यमेव गमकं भवति
स्फुटमप्रमाणमिदमप्युदिता ॥ २३१ ॥

न चेति । परमतनिराकरणमुपसंहरति—यदीति । अपिशब्देन चोदनामात्रप्रामाण्यवादिनं प्राभाकरं प्रति तदपि न सिध्येदिति सूचयति । उदिता उक्ता चोदना, प्रमाणं स्यादिति शेषः ॥ २३१ ॥

वैशेषिकादीनां मते वर्णव्यक्तीनामानन्त्यादुत्पत्तेश्च स्वाभावि-

क्येवानुपूर्वी स्वरश्चोपपद्यत इति न वर्णानां तद्वैशिष्ट्यं मृषेत्यलीकस्य सत्यबोधकत्वे नायं दृष्टान्त इति मत्वा तन्मते श्रोत्रेन्द्रियं तत्र दृष्टान्तमाह—

श्रवणेन्द्रियं च किल कर्णगतं
परिकल्पनोपचरितं नभसः ॥
वलयं प्रकाशयति शब्दगणं
परमार्थमित्यपि कणादमतम् ॥ २३२ ॥

श्रवणेति । तत्स्वरूपमाह, कर्णगतं कर्णशष्कुलीमध्यस्थम् । ननु नभसः सर्वगतस्य कथं कर्णगतत्वं वलयत्वं चेत्याशङ्क्याह— परिकल्पनया, कर्णावच्छेदेन हेतुनोपचरितं नभसो वलयवद्वलयं वलयसदृशोंऽशः श्रवणेन्द्रियमित्यन्वयः । वैशेषिकादिमते हि श्रोत्रस्य नित्यविभुनभोरूपस्यैव शब्दप्रकाशकत्वेऽतिप्रसङ्गपरिहाराय कर्णशष्कुल्यवच्छिन्नं नभोवलयं श्रोत्रमित्युपेयम् । न च नभसो वलयत्वं मुख्यं संभवतीति तदलीकमेव वाच्यम् । तथापि शब्दं प्रकाशयतीति तन्मतेऽप्यलीकस्य सत्यबोधकत्वं दृष्टमित्यर्थः । किलेत्यनेन स्वमते श्रोत्रस्यारब्धत्वेन तदसंमतिं सूचयति ॥ २३२ ॥

तस्मात् कल्पितगुर्वादेरपि तत्त्वबोधकत्वसंभवाद् वाक्योत्थतत्त्वसाक्षात्कारादविद्यकबन्धनिवृत्तिः सिध्यतीति स्वमतमुपसंहरति—

त्वमतः स्वमोहरचितं गहनं
भवसागरं तर परावगतेः ॥
परिकल्पितद्वयनिबन्धनतः
परमार्थसंविदुदये सति भोः ॥ २३३ ॥

त्वमिति । कल्पितं द्वयं गुर्वादिनिबन्धनं यस्याः परावगतेर्वृत्तिरूपायाः परमार्थसंविद उदयेऽभिव्यक्तावितीति योजना ॥२३३॥

ननु परमते चोदनाद्यानुपूर्व्यादेरलीकत्वमसिद्धं, तन्मतेऽनिर्व-

चनीयाभावात्। एवं श्रोत्रेन्द्रियमपि नालीकं किं तु प्रसिद्धवलयसदृशं नभः, ततश्च सत्यमेव परमते बोधकमिति तद्दृष्टान्तासिद्धिमाशङ्क्य कैमुतिकन्यायेनानिर्वचनीयस्य बोधकत्वमाह—

भ्रान्तं तथोपचरितं च यथाविभाग-
मङ्गीकृतं कणभुगादिमुनीन्द्रमुख्यैः ॥
यन्नास्ति तत्फलनिबन्धनमस्मदीये
तन्त्रे तमोविरचितं न फलाय कस्मात् ॥२३४॥

भ्रान्तमिति। चोदनायाः स्वरादिवैशिष्ट्यं भ्रान्तं श्रोत्रेन्द्रियमुपचरितं वलयम्। यथाविभागं यथामतम्। ततः किं तत्राह—यन्नास्तीति। भ्रान्तमुपचरितं परमते नास्त्येव, न ह्यपरिच्छिन्ने नभसि वस्तुतो वलयमादृश्यमस्ति, तथापि तत्सत्यबोधनहेतुश्चेदस्मन्मते अविद्याकल्पितमनिर्वचनीयं कस्मात् फलाय न भवेदित्यर्थः ॥२३४॥

ननु भ्रमविषयादेरपि तन्मतेऽन्यत्र सत्त्वाद्यन्नास्तीत्यासिद्धिमित्याशङ्क्योत्तरार्द्धं विवृणोति—

असदपि फलवत्तामनुते युष्मदिच्छा-
मनुसरदथ कस्मान्मायया निर्मितं सत् ॥
न भवति फलवत्ताभाजनं चित्रमेतद्
वयमिह न समर्था यूयमत्यन्तशक्ताः ॥ २३५ ॥

असदिति। यद्यपि स्वरादि ध्वन्यादौ वर्त्तते तथापि न तत्स्वरूपेण शाब्दबोधहेतुः किं तु शब्दनिष्ठतया ज्ञायमानम्, तस्य तद्वैशिष्ट्यं चासदेव, तस्य सत्त्वे तज्ज्ञानस्य भ्रान्तित्वायोगात्। एवं नभसो वलयमादृश्यमप्यसदेवेति न तयोर्दृष्टान्तत्वासिद्धिः, तदिदमुक्तमसदिति। युष्मदिच्छामनुसरद् युष्मदिष्टमित्यर्थः। अथेत्यर्थान्तरोक्तिः। सत् असद्विलक्षणम्। अत्र लौकिकीं रीतिं दर्शयति -वयमित्यादिना। इह उक्तेऽर्थे केवलं भवतां धार्ष्ट्यमस्माकं च तदभावो निमित्तं न त्वन्यत् किंचिदित्यर्थः ॥ २३५ ॥

एवं परमतेनापि कल्पितस्य सत्यबोधकत्वमुपपादितं स्वमते त्वसत्यस्यैव गगनादेर्निखिलप्रपञ्चस्य मायाभिः पुरुरूप ईयत इति श्रुत्यनुसारेण कारणत्वाभ्युपगमाद् गुर्वादेरपि तथाविधस्य तदुपपन्नमेव स्वरूपेणालीकस्याप्यधिष्ठानसदात्मत्वादित्याशयेनाह—

परमेव तत्त्वमगृहीतमभू-
दखिलस्य कारणमनर्थकरम् ॥
परमेव तत्त्वमवबुद्धमतः
परितृप्तये भवति पुष्कलतः ॥ २३६ ॥

परमेवेति । अगृहीतमज्ञातम् । सर्वस्य बन्धस्याज्ञातसद्वितर्त्तत्वे फलितमाह—परमेव तत्त्वमवबुद्धमिति ॥ २३६ ॥

ननु यदि मद्रूपमेवावबुद्धं मम तृप्तये भवति तर्हि प्रागपि तत्त्वमादिवाक्यादिश्रवणसंभवात् कथमितः पूर्वं मम तृप्तिर्नाभूदित्याशङ्क्याशुद्धान्तःकरणतया मायिकैश्वर्यादौ तव चित्ताभिनिवेशादिनाऽधिकाराभावेन प्राक् तत्त्वसाक्षात्कारानुदयादित्याशयेनाह—

तव रूपमेव तव दुःखकरं
यदि तन्न पश्यसि बहिर्मुखधीः ॥
तव रूपमेव तव तृप्तिकरं
यदि तत् प्रपश्यसि निवर्त्य तमः ॥ २३७ ॥

तव रूपमिति । बहिर्मुखधीरित्यनेन वैराग्यशमदमाद्यभावं सूचयति । इदानीं तु तव विवेकाद्यधिकारसंपत्तेस्तत्त्वसाक्षात्कारसम्भवात् परितृप्तता सिध्यतीत्याशयेनाह—तव रूपमिति । तम इत्यज्ञानकार्याविवेकरागादिरुच्यते ॥ २३७ ॥

नन्वेवमपि न ज्ञानमात्रान्मम कृतकृत्यता, "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इत्यादेः कर्मणो मुक्तिहेतुत्वावगमादित्याशङ्क्य अन्तःकरणशुद्धिलक्षणां सिद्धिं प्रति कर्मणो हेतुत्वं तद्वाक्यार्थः, अन्यथा "नान्यः पन्था विद्यतेऽयनाय । ज्ञानादेव तु कैवल्यम्" इत्यादिशास्त्र-

विरोधादतो ज्ञानमात्रात् कृतकृत्यता भवेदित्याशयेनाह—

तव बोधमात्रमुपनयेमत-
स्तव मोहमात्रमपनेयमपि ॥
तव बोधमोहजनिहानिकरं
वचनं त्रयीशिरासि तत्त्वमिति ॥ २३८ ॥

तव बोधेति। किं चाविद्यानिवृत्तेरेवात्र साध्यत्वाद्विद्यैवापेक्षिता न कर्मेत्याशयेनाह—तव मोहेति। ननु सकलप्रमाणावेद्यब्रह्मणि कथं मम बोधस्तमोनिवृत्तिर्वा स्यादित्याशङ्क्याह—तव बोधमोहेति—बोधजनिद्वारा मोहहानिकरं वचनमित्येव युक्तं तत्त्वमिति वचनमिति सम्बन्धः ॥ २३८ ॥

ननु मुक्तिसंसारयोरविशेषायोगाद् विशेषो वाच्यः, स चेन्मुक्तावपि कश्चिदागन्तुकोऽस्ति तर्हि तव बोधमात्रमुपनेयमित्यसङ्गतमित्याशङ्क्य आविद्यकसंसारनिवृत्तिरेव तत्र विशेषः, सा च तव मोहेत्यादिनोक्तैवेत्याशयेनाह—

तव बोधजन्मनि पुरा न पुन-
स्तव कश्चिदप्यतिशयो भवति ॥
तम एव पूर्वमभवन्न भव-
त्यवबोधजन्मनि ततो न परम् ॥ २३९ ॥

तव बोधेति। बोधोऽवबोधस्तज्जन्मनि ततः पुरा पश्चाच्च न कश्चिदतिशयोऽस्तीत्यर्थः। तर्हि निवर्त्यभावात् किं निवर्त्तकेन ज्ञानेनेत्यत आह—तम एवेति। पूर्वं, ज्ञानात् पूर्वम्। अवबोधजन्मनि सति तमो न भवति परं तु न ततः परमन्यत् किं चिदस्तीत्यर्थः ॥ २३९ ॥

नन्वेवं प्राक् तमसैवात्मा सद्वितीयः स्यादित्याशङ्क्य तस्य त-

स्मिन्नध्यस्तत्वान्न ततः पृथक् तमोऽस्तीत्याशयेनाह—

न तमोऽपि पूर्वमभवन्न भव-
त्यवबोधजन्मनि तमोऽभिभवः ॥
तम एव केवलमिदं सकलं
न तमो विनाऽऽत्मनि किमप्यभवत् ॥ २४० ॥

न तमोऽपीति । अभवद् वस्तुत इति शेषः । तथापि तन्निवृत्त्यैवात्मा सद्वितीय इत्याशङ्क्य तन्निवृत्तेरपि तावन्मात्रत्वान्नैवमित्याह—न भवतीति । तद्धि न इति शेषः । तर्हि वियदादिप्रपञ्चतन्निवृत्तिभ्यां तस्य सद्वितीयतेत्याशङ्क्याह—तम एवेति । तम आसीत्तमसा गूढमग्र इति श्रुतिमुक्तेऽर्थे प्रमाणमभिसंधायाह—न तमो विनेति । ननु भवतु तमस्तत्कार्ययोरात्मन्यध्यस्तत्वात्तावन्मात्रत्वं न तु तन्निवृत्तेरपि तथात्वं युज्यते मुक्तावप्यध्यासतत्कारणावस्थानायोगादनध्यस्तायास्तस्या ज्ञानसाध्यतया आत्मताऽयोगाच्चेति चेन्न । साध्यत्वेऽपि हि तस्या आत्ममात्रत्वं चतुर्थाऽध्याये वक्ष्यति । अस्तु वा पञ्चमप्रकाररूपा सा ततोऽतिरिक्ता तदुपपादनं च तत्रैव द्रष्टव्यम् ॥ २४० ॥

नन्वेवमपि न तस्यास्तमोमात्रत्वमित्याशङ्क्याह—

न तमः परिहृत्य लभ्यते
तमसो हानिगता निरूपणा ॥
इति सा तम इत्युदीरिता
न निवृत्तिस्तमसस्तमोमयी ॥ २४१ ॥

न तमः परिहृत्येति । हानिविषया निरूपणेत्यर्थः । अविद्यादशायामेव हि तन्निरूपणं क्रियते प्रतियोगितया च तन्निवृत्तिरविद्यामपेक्षत इत्युपचारात् सा बन्धवत्तम इत्युदीरिता । न तु तमोनिवृत्तिर्वियदादिवत्तमोमयी भवति न हि घटादिनिवृत्तिर्घटमयीत्यर्थः ॥ २४१ ॥

नन्वेमपि तव बोधमात्रमुपनेयमित्युक्तमयुक्तं, विदुषोऽपि नित्याद्यनुष्ठानसत्त्वात्,अन्यथा यावज्जीवादिश्रुतिविरोधादित्याशङ्क्याविद्वद्विषया सेत्याशयेनाह—

विधयश्च कर्मविषयाः स्वतमः-
पटलावृते त्वयि बहिर्मनसि ॥
कुत एव सम्यगवबोधहते
तमसि प्रवृत्तिरिह सम्भवति ॥ २४२ ॥

विधय इति । ननु किमिति तमःपटलावृतगोचरत्वं तेषामित्याशङ्क्य त्वयीत्युक्तं तदधिकारिणं विशिनष्टि—बहिर्मनसीति । आत्मनो बाह्ये पापक्षयादौ मनो यस्य तस्मिन्नित्यर्थः । प्रत्यवायादिपरिहारकामं प्रत्येव नित्यादिविधिप्रवृत्तेः प्रत्यवायतत्परिहारकामादेश्चाविदुष एव संभवादविद्वदधिकारा एव नित्यादिविधयो यावज्जीवश्रुतिश्चेति विद्यया निवृत्ताज्ञानतत्कार्यब्राह्मण्याद्यभिमानादौ त्वयि न तत्प्रवृत्तिरित्याशयेनाह -कुत एवेति॥ २४२ ॥

उक्तमेवार्थं विवृणोति—

विदिते पदे भगवतः परमे परिपुष्कले परमतृप्तिमतः ॥
तव तृष्णया विरहितस्य कथं विधिषु प्रवृत्तिरपवर्गवतः२४३

विदित इति । परिपुष्कले सजातीयादिभेदरहिते, अनेनोक्तरूपे ब्रह्मण्यपि स्वात्मतया विदितेऽनुष्ठाननिमित्तब्राह्मण्यादेस्तदभिमानादेश्चाभावो दर्शितः । परमतृप्तिमत इत्यस्य विवरणम् अपवर्गवत इति । अनेनाप्यकामस्याप्रवृत्तिर्दर्शिता ॥ २४३ ॥

नन्वेकस्य विधेरेकत्रैव दशाभेदेन प्रवृत्तेरप्रवृत्तेश्चायोगादिदमयुक्तमित्याशङ्क्य तत्परिहारं सदृष्टान्तमाह—

अभिचारकर्मविधयो हि यथा फलभागबाधमनु बाधयुजः
करणादिभागनिरुपाख्यतया विधयस्तथैव परमात्ममतेः ॥

अभिचारेति । वैरिहिंसाफलकश्येनादिकर्मविधयो न हिं-

स्यात् सर्वाभूतानीति तत्फलांशहिंसाया बाधमनु पश्चादिदं बलवदनिष्टसाधनमिति स्वस्य बाधयुक्ता भवन्तीत्यर्थः। श्येनादेर्हिंसासाधनस्य विहितत्वादाहत्य निषेधादर्शनाच्च फलभागबाधमित्याद्युक्तम्। अत एवाग्नीषोमीयादस्य विशेषः, तस्य फलद्वारा साक्षाद्वा कथमप्यनिषेधात्। श्येनेनाभिचरन् यजेतेत्यादिविधयो हि तीव्ररोषाद् ब्राह्मणादिवधं बलवदिष्टं मत्वा प्रवर्त्तमाने प्रवर्त्तन्ते, स एव यदि न हिंस्यात् सर्वा भूतानीति श्येनादिफलभागस्य हिंसाया बाधकं शास्त्रमर्थतः परामृशति तदा विगतरोषो भवति, श्येनादिविधयश्च तदा स्वभाव्याभावात्तस्मिन्न प्रवर्त्तन्ते। न हि बलवदनिष्टसाधनत्वं हिंसादेर्जानन्तं तदुपाये विधयः प्रवर्त्तयितुं शक्नुवन्तीति तेषां यथा दशाविशेष एव तस्मिन् प्रवृत्तिः। एवं ब्रह्मसाक्षात्कारेण शरीरादिसमस्तप्रपञ्चनिवृत्तौ भावनायाः करणाद्यंशत्रयस्यापि निरुपाख्यतया अभावात् कथं विधयः प्रवर्त्तेरन्निति न किंचिदत्रायुक्तमित्यर्थः॥ २४४॥

अनेन द्योतितं कैमुतिकन्यायं विशदयति—

यदि भाव्यभागविलये न भवेत्
फलभावना कथमिहोत्सहते॥
करणादिभागविलये भवितुं
विधिरन्तरेण घटते न च ताम्॥ २४५॥

यदीति। भाव्यरूपभागमात्रस्य विलय इत्यर्थः। फलभावना हिंसारूपफलोद्देशेन या भावना। करणादीत्यादिपदेन सर्वस्यैव भावनांशत्रयस्य तदन्यस्यापि तद्धेतोरभावं दर्शयति। नन्वर्थभावनाभावेऽपि लिङादिव्यापारो विधिः किमिति न भवेदित्याशङ्क्य तस्यार्थभावनाभाव्यकत्वात्तामन्तरेण सोऽपि न घटत इत्याह—विधिरिति॥ २४४॥

एवं भावनावाक्यार्थवादेऽवगतहिंसादिप्रतिषेधशास्त्रार्थे श्येनादिविधीनामप्रवृत्तिमुक्त्वा नियोगवाक्यार्थमतेऽपि तामाह—

अधिकारिणं च विषयं च विना
न नियोगबुद्धिरुपपत्तिमती ॥
न विना तमस्तदुभयं घटते
विदितात्मनश्च न तमो घटते ॥ २४६ ॥

अधिकारिणं चेति । नियोज्यमित्यर्थः । विषयं कृतिनिरूपणद्वारा नियोगनिरूपकं धात्वर्थम् । प्राभाकरमते हि प्रत्ययार्थो नियोगः फलकामनादिमता नियोज्येन साक्षात्कृतिविषयेण धात्वर्थेन चास्यात्र नियोग इति निरूप्यते, हिंसादिनिषेधशास्त्रार्थविदश्च न श्येनादिविधिनियोज्यत्वं तदनिष्टत्वाज्ञाननिवृत्त्या तत्कामनादेरसंभवान्न श्येनादेस्तत्कृतिसाध्यत्वमिति विषयनियोज्यौ विना श्येनादिनियोगबुद्धिस्तस्य तदा न घटते । एवं विदितात्मतत्त्वस्य तमसो निवृत्तेर्विषयनियोज्यात्मकमुभयं नियोगापेक्षितं तत्र घटत इत्यर्थः । तर्हि तस्य तमोऽप्यस्तु तत्राह—विदितेति ॥ २४६ ॥

नन्वविद्यावद्विषयत्वे विधीनां बाधितार्थतयाऽप्रामाण्यप्रसङ्ग इत्याशङ्क्य वस्तुतस्तदर्थस्य वेदान्ततन्मूलन्यायबाधेऽपि व्यावहारिकमेव प्रामाण्यं, न वेदान्तानामिव तात्त्विकमित्याशयेनाह—

व्यवहारगोचरमतः सकलं विधिवाक्यमित्यवगतिं मनसि ॥
उपनीय वेदशिरसां विधिभिर्न विरोध इत्यपि समाकलय॥

व्यवहारेति ॥ २४७ ॥

एवमद्वयब्रह्मपरवेदान्तानां भेदग्राहिमानान्तरविरोधनिराससमर्थनं द्वितीयाध्यायार्थमुपसंहरति—

एवं वेदान्तवाक्यैरवगतिपदवीमद्वये नीयमाने
प्रत्यक्तत्त्वे समस्तद्वयकृति तमसि क्षीयमाणे च सद्यः॥

स्वाराज्यं त्वय्यवासे परमसुखभुजि स्वच्छचैतन्यमात्रे
लेशो मानान्तराणामपि दुरधिगमस्तत्र दूरे विरोधः२४८॥

इति श्रीसर्वज्ञात्ममुनिविरचिते संक्षेपशारीरके-
ऽविरोधलक्षणं नाम द्वितीयोऽध्यायः ॥

—<>०<>—

एवमिति । अद्वये प्रत्यक्तत्त्वे वेदान्तैः स्फुटं प्रतिपाद्यमान इति विरोधविषयसमन्वयार्थो दर्शितः । अविद्यात्मकभेदविषयत्वान्मानान्तरस्य न तेन समन्वयार्थो विरुध्यत इति प्रागुपपादितं मनसि निधाय समस्तद्वयकृतीत्युक्तम् । क्षीयमाणे चेत्यादिना ज्ञानमात्रात् परितृप्ततामुपपादितामनुवदति । विचारदशायामपि वेदान्तानां न मानान्तरविरोधः सम्भावितस्तदा किमु वक्तव्यमवगते तत्त्वे इत्याशयेनाह—लेश इति । लेशोऽपीत्यर्थः ॥ २४८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीश्रीपादकृतसंक्षेपशारीरकव्याख्यानरूपसारसङ्ग्रहाख्यटीकायां द्वितीयोऽध्यायः ॥



॥ श्रीः ॥

तृतीयोऽध्यायः ।

"अथातो ब्रह्मजिज्ञासा" इत्यनेन किं ब्रह्मस्वरूपम्, किं च तत्र प्रमाणम्, का च तदनुग्राहिका युक्तिः, किं च सयुक्तिकप्रमाणजन्यायाः फलवन्मतेः साधनमितिकर्त्तव्यतारूपं सामवायिकमारादुपकारकं च, किं च सेतिकर्त्तव्यताकप्रमाणजन्यायाः फलवन्मतेः फलम्, कथं वेति प्रतिज्ञापञ्चकसंपिण्डनं कृतम् । तत्राद्वयब्रह्मस्वरूपं तटस्थस्वरूपलक्षणाभ्यां लक्षयित्वा तत्र समन्विता वेदान्ताः । ते च तत्रैव मानमेवेति समन्वयलक्षणे व्युत्पादितम् । अथाद्वये ब्रह्मणि वेदान्तसमन्वये द्वैतग्राहिमानविरोधोद्धारयुक्तयो निबद्धा अविरोधलक्षणे । ततो निर्विरोधवेदान्तसमन्वयजन्याया मोक्षफलपर्यन्ताया मतेरुत्पत्तौ साधनं वेदान्तवाक्यप्रमाणेतिकर्त्तव्यतारूपमन्तरङ्गबहिरङ्गभावेन स्थितं साधनलक्षणे निरूपितम् । ततोऽन्तरङ्गबहिरङ्गसाधनकलापसंपन्नवेदान्तप्रमाणजन्याया मतेः फलमाविद्यानिवृत्त्युपलक्षितमखण्डानन्दस्वरूपं यच्च यादृशं चेति चतुर्थे फललक्षणे निर्णीतम् । एवं पञ्चावयवविचारात्मिका चतुर्लक्षणी मीमांसा । तस्याः प्रकरणमिदमपि तादृशमेवेति साधनप्रतिज्ञां निरूपयितुं तृतीयोऽध्याय आरभ्यते ।

ननु द्विविधं साधनम्, प्रमायाः करणमितिकर्त्तव्यता च । तत्र करणं वेदान्तवाक्यम्, तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुत्याऽऽत्मन औपनिषदत्वकथनात् । इतिकर्त्तव्यता चाप्रामाण्यशङ्का-

निरासितर्कानुसरणम् । तदुभयमपि प्रथमद्वितीयाभ्यामेव संपादितमिति किं तृतीयेन । अज्ञाननिवर्त्तके च ज्ञाने प्रमाणतदितिकर्त्तव्यताऽतिरिक्तं साधनं नापेक्षितमिति वक्ष्यते । शुक्त्याद्यज्ञाननिवृत्तौ तावन्मात्रदर्शनाच्च । उच्यते । सत्यं, प्रमाणमितिकर्त्तव्यता चेति द्विविधं साधनम्, इतिकर्त्तव्यतायां त्वस्ति विशेषः, प्रतिबन्धकवैचित्र्यात् । तथाहि । ब्रह्मज्ञाने साक्षात्काररूपे बाधायोग्ये जातेऽप्येते पुरुषापराधाः फलं प्रतिबध्य जिज्ञासामुत्पादयन्ति । एका विषयभोगवासना, वेदान्तानां ब्रह्मण्यबोधकत्वकल्पना, बोधितेऽपि ब्रह्मणि बाधितत्वकल्पना, अबाधितेऽपि ब्रह्मणि साक्षात्काररूपायां तत्प्रमितावसाक्षात्कारत्वकल्पना, प्रमितिफले च पुरुषार्थेऽप्यज्ञाननिवृत्त्युपलक्षिते मोक्षे पुरुषार्थत्वाभावकल्पना चेति । तत्र विषयभोगवासना शमदमादिसंपत्त्या श्रवणाङ्गभूतया निवर्त्यते । द्वितीया प्रमाणगतासम्भावना श्रवणाख्यविचारप्रदर्शकेन समन्वयाध्यायेन । तृतीया प्रमेयगतासम्भावना विरोधाभावरूपमननाख्यविचाराङ्गप्रदर्शकेन द्वितीयाध्यायेन । प्रामाण्यनिश्चयविरोधित्वादुभयमिदमसम्भावनेत्युच्यते । निश्चितेऽपि प्रामाण्ये यत्फलविरोधिकल्पनाद्वयं तद्विपरीतभावनेत्युच्यते । तच्च निदिध्यासनाख्यविचाराङ्गप्रदर्शकेन तृतीयेन चतुर्थेन चाध्यायेन निवर्त्यत इति प्रागुक्तमेव । तत्र साक्षात्कारस्यासाक्षात्कारत्वकल्पनानिवर्त्तकं प्रामाण्यनिश्चयानुपयोगिसाधनजातं तृतीयार्थः, पुरुषार्थेऽप्यपुरुषार्थत्वकल्पनानिवर्त्तकं तु चतुर्थार्थ इति विवेकः । तेन यद्यपि वेदान्ता ब्रह्म बोधयन्त्येव, ब्रह्म च केनापि मानेन न बाधितम्, तथापि तदहं न साक्षात् करोमि किं तु तन्मम परोक्षमेव भातीति भ्रान्तितत्संस्कारपरंपरारूपा विपरीतभावना यावदनुवर्त्तते तावन्न ब्रह्मविद्या फलं प्रसूत इति तन्निवर्तनाय वेदान्तैर्बोधितं सर्वमानाबाधितं च सच्चिदानन्दाद्वयलक्षणं ब्रह्मैवाऽहमस्मि तच्च सर्वदा साक्षात् करोम्येवेत्येतावत्फलपर्यन्तसोपकर-

णध्याननिरूपणाय शिष्यप्रश्नमवतारयति—

श्रुत्वाऽविरोधमुपपन्नसमन्वयोत्थ-
ब्रह्मात्मतामतिरयं पुनरप्युवाच ॥
ब्रह्मात्मताफलशिरस्कमतिं प्रसूते
यत् साधनं तदखिलं प्रतिपित्समानः ॥ १ ॥

श्रुत्वेति । अयं शिष्योऽविरोधं श्रुत्वेति वृत्तं द्वितीयाध्यायार्थं हेतुत्वेन कथयति । अविरोधन्यायैरुपपन्नाऽबाधितत्वेन निश्चिता प्रथमाध्यायोक्तसमन्वयोत्था ब्रह्मात्मतामतिरस्येति समननश्रवणफलं सिद्धं दर्शयति। अहं ब्रह्म भवामि ब्रह्मरूपेण च सर्वदा भामीत्येवमभानावरणनिवृत्तिरूपं ब्रह्मात्मताफलं शिर इव यस्या मतेरन्तःकरणवृत्तेर्यदभावे शिरोहीनेव निष्फला भवति मतिस्तादृश्याः फलपर्यन्ताया मतेर्यत् साधनं ध्यानमौनानिदिध्यासनादिशब्दैः प्रतिपादितं तदखिलं कृत्स्नं सोपकरणं प्रतिपित्समानः प्रतिपत्तुमिच्छन्निति वर्त्तिष्यमाणं हेतुमत् कथयति । पुनरप्युवाच पृष्टवान् गुरुम् । श्रवणमननाभ्यामहं ब्रह्म न भवामीत्येवंविधासत्त्वावरणनिवृत्तावप्यहं ब्रह्मरूपेण न भामीत्येवंविधाऽभानावरणस्य स्थितेस्तन्नाशाय फलवन्मतिसाधनाकाङ्क्षाऽस्तीति दर्शितम् । तद्विना वेदान्तानां प्रयोजनवन्मतिपर्यवसायितारूपप्रामाण्यासिद्धेः ॥ १ ॥

इदानीं शिष्यस्य द्वितीयाध्यायकृतशङ्कानिवृत्तिमनुवदन् तदीयजिज्ञासितगोचरप्रश्नमाह—

ऐदंपर्यमखण्डवस्तुविषयं वेदान्तवाक्यस्य यत्
पूर्वं वर्णितमस्य भूदपहतिर्मा नाम मानान्तरैः ॥
किं त्वस्याः परिनिष्ठितस्वविषयध्वान्तच्छिदो जन्मने
विद्याया वचनादृते किमपरं कृत्यं भवेत् साधनम् ॥२॥

ऐदंपर्यमिति । वस्तुतोऽखण्डत्वं त्रिविधपरिच्छेदशून्यत्वं प्रत्यगभिन्नत्वं च । प्रथमपद्ये प्रस्तुतत्वाद् विद्याया अस्या इति परा-

मर्शः। विद्यासमानविषयस्य ध्वान्तस्याऽभानावरणस्य परिनिष्ठितत्वं नाम विविधनिबिडवासनाभिः सहानादिकाले निरूढत्वम्। अथ वा परिनिष्ठितेति विषयस्य ब्रह्मणो विशेषणं बाधावधित्वकथनार्थम्। वचनाद्वेदान्तवाक्यात्, कृत्स्नमनुष्ठेयम्। यतेः कृत्स्नकर्मत्यजोऽनन्यगतिकस्येति शेषः। ननु वचनादत इत्युक्त्वैवाऽनुष्ठेयसाधनस्य तदन्यत्वमवगतं किमपरमिति विशेषणेनेति चेत्, सत्यम्। नाऽयमपरशब्दोऽन्यत्वपरः किं तु प्रधानभूतवेदान्तवाक्योपकारितया साधनान्तरस्य तद्गुणत्वपर इत्यनवद्यम्॥ २॥

यानि त्वया पृष्टानि साधनानि तानि तृतीयाध्यायनिविष्टैश्चतुर्भिः पादैः क्रमेण निरूपितान्येवेत्यभिप्रेत्याहाचार्यः—

वैराग्यस्य दृढत्वमेकमपरं तत्त्वंपदार्थज्ञता
वाक्ये निर्गुणनिष्ठिते च सकले न्यायादियत्तामतिः॥
सम्यग्ज्ञानसमीपदूरभवयोर्हेत्वोर्विवेकज्ञता
वाक्यार्थप्रतिपत्तिसाधनमिदं यत्नेन कृत्यं यतेः॥ ३॥

वैराग्यस्येति। नन्वादावेव जिज्ञासासूत्रगताथशब्दोपात्तन्यायैर्वैराग्यस्य दृष्टादृष्टद्वारा तत्त्वबोधोपकारिताया उक्तत्वात् कृतमत्र तदभिधानेनेत्याशङ्क्योक्तं दृढत्वमिति। तत्रैहिकामुष्मिकविषयभोगेष्वनिच्छालक्षणवैराग्यमात्रस्य साधनत्वमुक्तम्। अत्र तु जीवस्य शुभाशुभादिकर्मवशान्नानाविधशरीरपरिग्रहपरित्यागलक्षणदुरन्तदुःखमयसंसारानिरूपणेन तज्जिहासारूपस्य तदार्ढ्यस्य विवक्षितत्वान्न पुनरुक्तता। अत एव रंहतिपादविषयभूतवाक्यशेषे तस्माज्जुगुप्सेतेत्यन्यकर्मविपाकेषु सर्वात्मना जिहासा कार्येत्युक्तम्। एकम्, वाक्यार्थप्रतिपत्तिसाधनमिति सम्बन्धः। तत्र द्वितीयपादे "संध्ये सृष्टिराह हि" इत्यारभ्य "न स्थानतोऽपि" इत्यतः प्राक्तनेन ग्रन्थेन वस्तुतोऽवस्थात्रयसंसर्गहीनस्तत्साक्षी चिदेकरसस्त्वंपदार्थो निरूपितः। तत आरभ्याऽऽपरिसमाप्तेस्तत्पदार्थो वस्तुतः सर्वोपाधिरहितः सत्यज्ञानादि-

रूपो निरूपितः । तत्प्रतिपत्तिरेव वाक्यार्थप्रत्यगात्मब्रह्मैक्यप्रतिपत्तिकारणमित्याह-अपरं तत्त्वंपदार्थज्ञेति । गुणोपसंहारपादे नानाशाखागतोपनिषत्प्रतिपाद्यब्रह्मविद्यैक्यं निरूप्य "आनन्दादयः प्रधानस्य" इत्यादिनाऽऽनन्दसत्यज्ञानानन्तादिपदवाच्यार्थानुश्रुतस्थलेषूपसंहृत्य तल्लक्ष्यस्यैकस्यैव दुःखानृतजडपरिच्छेदादिविरुद्धस्वरूपविशेषस्य प्रतिपत्तिर्दुःखित्वानृतत्वजडत्वपरिच्छिन्नत्वादिभ्रमविरोधिनी सर्वत्रैकरूपैव जायत इति न्यायागमाभ्यां निरूपितम् । तदनुसन्धानमप्यत्र साधनमित्याह—वाक्य इत्यादिना । सकले समस्तोपनिषद्गणे, चशब्देन मन्दाधिकारिणां सगुणोपासनं तदपेक्षितोपास्यगुणोपसंहारन्यायपरिशीलनं च तत्त्वसाक्षात्कारसाधनमिति विवक्षितम् । तदुक्तं कल्पतरौ—

निर्विशेषं परं ब्रह्म साक्षात् कर्तुमनीश्वराः ।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥
वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।
तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम् ॥ इति ।

यमेवैष वृणुते तेन लभ्य इति श्रुतिरप्युक्तार्थपरा । पुरुषार्थपादोक्ताऽन्तरङ्गबहिरङ्गसाधनापेक्षामाह—सम्यगज्ञानेति । शान्तो दान्त इत्यादिवाक्येन शमादीनां तत्त्वसाक्षात्करोद्देशेन विधानादस्मिन्नेव जन्मनि यावत्साक्षात्कारमनुष्ठेयत्वात् समीपभवत्वेनान्तरङ्गत्वम् । वेदानुवचनादीनां विविदिषोद्देशेन विधानात्तदवधिकमनुष्ठानमिति दूरभवत्वात्तेषां बहिरङ्गत्वमिति विवेकज्ञानेनापोह्य बहिरङ्गमन्तरङ्गानुसरणमपरं साधनमित्यर्थः । तदेतत् साधनजातं परमहंसेनावश्यमनुष्ठेयम् ।

त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् ।
श्रुत्या विधीयते यस्मात्तत्त्यागी पतितो भवेत् ॥

इत्यादिवचनैस्तस्य तदकरणे प्रत्यवायश्रवणात्तेनैव चैतदनुष्ठातुं

शक्यम् । तस्य कर्मानुष्ठानादिकृतविक्षेपाभावादिति यत्नेन यतेरिति पदद्वयाभिप्रेतम् ॥ ३ ॥

ननु सर्वेषां दृष्टश्रुतविषयभोगविषयस्य रागस्याज्ञानसिद्ध्येष्यमाणविषयप्राप्त्यैव निवृत्तिः स्वानुभवसिद्धा, तथा चैहिकस्यामुष्मिकस्य च हिरण्यगर्भान्तस्य विषयभोगस्याप्राप्तौ कथं ततो वैराग्यम्, तदभावे च कथंतरां तद्दार्ढ्यम्, कथंतमां चेष्यमाणविषयसिद्धये लौकिकवैदिककर्मानुष्ठानव्यग्रचित्तस्य तत्त्वंपदार्थपरिशोधनावकाश इति, तत्राह—

संसारदोषमवधारयतो यथावद्
वैराग्यमुद्भवति चेतसि निष्प्रकंप्यम् ॥
वैराग्यजन्मनि दृढे च सति प्रवृत्ति-
स्तत्त्वंपदार्थपरिशोधनकर्मणि स्यात् ॥ ४ ॥

संसारेति । यद्यपि विषयभोगपरितृप्तस्य भोगसामर्थ्यप्रतिबन्धाद्रागोत्कलिकोपशमो भवति, तथापि तृप्तेरनित्यत्वात् पुनरप्रतिबद्धसामर्थ्यस्य भुक्तसजातीयभोगगोचरोऽभ्यधिको रागः समुद्भवतीत्यपि सर्वानुभवसिद्धम् । तथा चाहुः पौराणिकाः—

हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते इति ॥

ततश्च विषादियुक्तान्नादाविव वक्ष्यमाणदोषदर्शनमेव रागनिवृत्तिहेतुः, पुनः पुनस्तदनुसन्धानं च तदार्ढ्यहेतुरित्येवमुत्पन्नवैराग्यदार्ढ्यस्य सकलकर्माणि त्यक्तवतस्तत्कृतविक्षेपाभावात्तत्त्वंपदार्थशोधनमनन्तरं सुकरमित्यर्थः । अत एव प्रथमद्वितीयपादयोः क्रमोऽप्युपपन्न इति भावः ॥ ४ ॥

ननु कर्मफलेषु पुत्रवित्तादिषु स्वर्गादिषु च स्वरससुन्दरेषु दोषमेवोक्तदृष्टान्तवन्न पश्यामः, कथं ततो विराग इत्याशङ्क्य मिथ्यात्वानित्यसुदुःसहदुःखप्रचुरत्वं भयशोकस्पर्द्धाऽसूयाद्यनर्थव्रातग्रथितत्वं च कर्मफलरूपसंसारे मया क्रमेण विविच्योच्यमानमवधारय,

तत एव ततो वैराग्यादि सुलभमित्याह—

संसाररूपमवगच्छ विविच्यमानं
यस्मिन् श्रुते भवति तद्विषया जुगुप्सा ॥
वेदः प्रकाशयति संसरणं यथाऽस्य
जीवस्य जन्ममरणे व्रजतः क्रमेण ॥ ५ ॥

संसाररूपमिति। त्वद्वचनस्य पौरुषेयतया मूलप्रमाणापेक्षस्य स्वतःप्रामाण्यायोगात् कथं तदर्थे विश्वासो भवेदित्याशङ्क्याह—वेद इति। यथा यथावज्जन्ममरणे क्रमेण निरन्तरं व्रजत इति सम्बन्धः। ऐहिककर्मफलेष्वनर्थप्रचुरत्वं प्रत्यक्षानुमानाभ्यामेव विमर्शवतामवगतम्। आमुष्मिकेष्वपि तेषु तस्मिन् यावत्संपातमुषित्वाऽथ तमेवाध्वानं पुनर्निवर्त्तन्त इत्यारभ्य—तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वेत्यादिश्रुत्येष्टादिकारिणामपि पुण्यक्षये पुनः पूर्वसंचितशुभाशुभकर्मवशान्नानाविधगर्भवासाद्यनर्थप्रतिपत्तेर्दोषभूयिष्ठत्वमवगतम्। उक्तं च भगवता—"एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते" इति। "कर्मणां परिणामित्वादाविरिञ्च्यादमङ्गलम्" इति च। ततः सर्वत्र जिहासा युक्तेत्यर्थः ॥ ५ ॥

नन्वात्मन्यनादिकालप्रवृत्तस्य कर्मतत्फलात्मकसंसारस्य स्वात्मवद् दुष्टस्यापि तस्याशक्यं हानं कर्तुमिति शङ्कां निराकुर्वद् तस्य मिथ्यात्वेनासारत्वदोषप्रकटनायात्मनो वस्तुतस्तदसंस्पर्शं तावदाह—

शुद्धः परो न खलु वाङ्मनसव्यतीतः
संसारदुःखमतिदुःसहमश्नुवीत ॥
स्वाविद्यया हि पर एव स जीवभाव-
मागत्य संसरति लिङ्गसमागमेन ॥ ६ ॥

शुद्ध इति । स्वतः कामकर्मादिदोषहीन इत्यर्थः । तत्र हेतुः-पर इति । वस्तुतो निर्विशेषनिरतिशयानन्दपरमात्मैव स इति न तत्र कर्मतत्फलस्पर्श इत्यर्थः । ननु संसारितयाऽनुभूयमानस्य जीवस्य परमात्मभावोऽसम्भावित इत्याशङ्क्य, इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिवचनात् स्फटिकलौहित्यादिवदनिर्वचनीयाविद्योपाधिनिबन्धनत्वेन जीवत्वादेर्मिथ्यात्वान्न विरोध इत्याह-स्वाविद्यथेति । तर्हि सुषुप्त्यादावपि संसारप्रसङ्ग इत्याशङ्क्य वक्ष्यमाणाविद्यकलिङ्गदेहस्यापि तत्रोपाधित्वमाह-लिङ्गेति । सुषुप्त्यादौ च लिङ्गस्य लीनत्वान्न संसारप्रसङ्ग इति भावः ॥ ६ ॥

ननु निरुपाधिकात्मन एव मुक्तिभाक्त्वात्तस्यैव बन्धरूपसंसारभाक्त्वं वाच्यम्, बन्धमोक्षयोरेकाश्रयत्वनियमात् । ततश्च बन्धस्य वास्तवत्वमपरिहार्यमिति तत्राह—

ब्रह्मैव संसरति मुच्यत एतदेव
दौवारिकं भवति संसरणं तु तस्य ॥
मुक्तिः पुनर्भवति चिद्वपुषैव तस्य
स्वाज्ञानतः स्वमहिमप्रतिबोधतश्च ॥ ७ ॥

ब्रह्मैवेति । अविद्यादशायां यस्तदधीनभ्रान्त्यैव संसारमनुभवति स एव स्वाभाविकब्रह्मभावसाक्षात्कारात्तस्याः समूलाया निरासान्मुच्यत इति ब्रह्मैव सन् ब्रह्माप्येति, विमुक्तश्च विमुच्यत इत्यादिश्रुतिभिः प्रतिपादनाद्, दशाद्वयेऽपि जीवस्य ब्रह्मभाव एकरूप एव । न हि स्थाणोः स्थाणुत्वं चोरभ्रमतान्नवृत्तिदशयोर्विशेषवद्भवति । न चैतावता तत्राज्ञानकल्पितं चोरत्वं वास्तवं भवति । एवं चात्मन्यनिर्वचनीयाविद्याकल्पितलिङ्गोपाधिनिबन्धसंसारस्य मिथ्यात्वमुपेयमित्यर्थः । तर्हि विद्याया अप्याविद्यकतयाऽनिर्वचनीयत्वाद् बन्धवन्मुक्तेरपि तदधीनाया मिथ्यात्वं स्यादित्याशङ्क्य तयोर्वैषम्यमाह—दौवारिकमित्यादिना । तस्य मिथ्यैव जीवस्वभावमा-

पन्नस्य ब्रह्मणो यदनिर्वचनीयलिङ्गसम्बन्धद्वारकं संसरणम्, तत् स्वरूपाज्ञानविजृम्भितभ्रान्तिमात्रसिद्धत्वान्मिथ्यैवेति युक्तम् । तस्यैव तु स्वात्मतत्त्वबोधान्निवृत्ताज्ञानस्य नित्यशुद्धादिरूपब्रह्मात्मनैव स्थितिरूपा या मुक्तिस्तस्यास्तत्त्वावेदकमानसिद्धब्रह्ममात्रतया बाधायोग्यत्वाद् वास्तवत्वमिति वैषम्यमित्यर्थः ॥ ७ ॥

ननु मिथ्यातत्त्वज्ञानयोर्विषयवैषम्येऽपि "यस्याज्ञानं भ्रमस्तस्य भ्रान्तः सम्यक् न वेत्ति सः" इति न्यायादज्ञानभ्रान्तितत्त्वबोधानामेकाश्रयत्वनियमादज्ञानाश्रयचिन्मात्राश्रयत्वमेव भ्रान्त्यादेः स्यात्, तथा च लिङ्गोपाधिकजीवे प्रमातृत्वादिबन्धाभ्युपमविरोध इति तत्राह—

स्वाज्ञानान्वयिनी चिदेव भवति स्वज्ञानमस्याः पुन-
र्नास्त्यन्तःकरणोपरागशबलीभावं विना युक्तितः ॥
कूटस्थे न तमस्विता न घटते नो विक्रिया तत्र न-
स्तस्मादेष विशेष ईषदुचितः स्वीकर्तुमेते प्रति ॥ ८ ॥

स्वाज्ञानान्वयिनीति । अनादिसिद्धाज्ञानस्य तत्कार्यलिङ्गतदुपहिताचिदाश्रयत्वानुपपत्तेः शुद्धा चिदेव तदाश्रयो विषयश्चेति युक्तम् । स्वज्ञानं पुनर्भ्रमप्रमारूपमस्याश्चितोऽध्यस्ताहङ्कारसंपिण्डितप्रमातृरूपं उपेयते । ज्ञानेच्छादेर्हि प्रमातृधर्मत्वमनुभवसिद्धमविप्रतिपन्नं च परीक्षकाणाम् । प्रमातृत्वं च प्रमाकर्तृत्वम्, तच्च स्वातन्त्र्येणेतरतत्कारकप्रयोक्तृत्वम् , तच्च चेतनस्य विकारवत एव सम्मतीति केवलजडकूटस्थचैतन्ययोः प्रमातृत्वानुपपत्तेस्तद्धर्मज्ञानादेश्चित्संवलितधर्मत्वं युक्तमित्यर्थः । तर्हि शुद्धचैतन्यस्य कूटस्थासङ्गाद्वितीयादिरूपत्वात्तत्राज्ञानसम्बन्धो युक्त्या न घटत इत्याशङ्क्याह—कूटस्थ इति । द्वाभ्यां नञ्भ्यां तद्घटनाऽवधार्यते । अज्ञानस्यानादित्वेनाविकारत्वान्न तदाश्रयस्य कौटस्थ्यविरोधः । एवं तस्य ज्ञानबाध्यत्वेन मिथ्यात्वात्तत्सम्बन्धस्यापि तदधीनसत्ताकस्य तथा-

त्वान्न वास्तवासङ्गत्वादिविरोधो नोऽस्माकं मत इति भावः । एवं तर्हि प्रमातृत्वाद्यपि शुद्ध एव घटते, तस्य मिथ्यात्वेन तत्कौटस्थ्याविरोधित्वात् कृतं शबलधर्मत्वेनेति तत्राह—नो विक्रियेति । तस्यागमापायित्वेन विकारत्वात्तद्धर्मिणा परिणामिना भवितव्यम्, न चात्मा परिणामी, कौटस्थ्यहानेः । न चाज्ञानपरिणामस्य तस्यात्मन्यारोप इति वाच्यम् । केवलाज्ञानपरिणामत्वे सुषुप्त्यादावपि प्रसङ्गात् । लिङ्गरूपेण परिणताज्ञानपरिणामत्वे चास्मदिष्टसिद्धिरिति भावः । एवं तर्ह्यज्ञानभ्रान्त्यादीनां भिन्नाश्रयत्वमन्याय्यं प्राप्तमिति शङ्कामुपसंहारव्याजेन निराकरोति—तस्मादिति । एते ज्ञानाज्ञाने प्रति धर्मिगत एव विशेष उपहितानुपहितत्वाधीनभेदरूप ईषत्तदभेदाविरोधी पूर्वोदितन्यायात् स्वीकर्त्तुमुचित इत्यर्थः । कार्यकारणयोरत्यन्तभेदानङ्गीकारात्तदाश्रयचैतन्ययोरेकोपाधिकत्वस्यापि वक्तुं युक्तत्वान्न तदाश्रितानां वैयधिकरण्यम्, स्वतन्त्रोपाधिभेदभिन्नधर्मयोरेव तत्प्रसिद्धेरिति भावः ॥ ८ ॥

वस्तुतोऽसंसारिणोऽपि जीवस्याज्ञानकार्यलिङ्गोपाधिकसंसरणमलीकमित्युक्तं तदयुक्तम् । अनादिभावत्वेनात्मवदज्ञानस्य सत्यत्वात्तत्कार्यलिङ्गस्यापि तदभिन्नतया सत्यत्वेन तदधीनसंसारस्य मिथ्यात्वानुपपत्तिरिति चेत्, नेत्याह—

पुर्यष्टकं भवति तस्य परस्य मोहा-
त्तेनान्वितस्य तु नभोमलवद् व्यलीकम् ॥
दुःखं त्रिधा भवति संसरणाभिधानं
नान्यः परादधिकरूपभृदस्ति जीवः ॥ ९ ॥

पुर्यष्टकमिति । "कर्मेन्द्रियाणि खलु पञ्च"इत्यादिना वक्ष्यमाणमज्ञानतत्कार्यात्मकं पुर्यष्टकं तस्य जीवस्य वस्तुतः परस्य सतो मोहादेव भवति भ्रान्तिमात्रकल्पितमित्यर्थः । अज्ञानस्वरूपस्य मानायोग्यत्वात्तत्त्वबोधबाध्यत्वाच्च रज्जुसर्पादिवदलीकत्वात्तत्कार्यस्या-

पि तदात्मकतया तथात्वात्तदधीनमाध्यात्मिकादिभेदभिन्नदुःखात्मकं संसरणं तस्य नभोनैल्यवदलीकमित्याह-तेनेति। ननु परादभिन्नस्यापि जीवस्य, य आत्मनि तिष्ठन्, द्वा सुपर्णेत्यादिश्रुतिभिर्भेदस्यापि प्रतिपादनात्तत्प्रयोजकं संसरणं वास्तवमित्याशङ्क्याह-नान्य इति। भेदस्याभेदसमसत्ताकस्यैकत्र विरोधेनासंभवात्। नान्योऽतोऽस्ति द्रष्टा, उदरमन्तरं कुरुत इत्यादिश्रुतिभिर्निषेधाच्च तत्र न वास्तवभेदाद्युपेयत इत्यर्थः॥ ९॥

ननु पादोऽस्य विश्वा भूतानि, ममैवांशो जीवलोके इत्यादिश्रुतिस्मृतिभिर्जीवस्य परांशत्वप्रतीतेरग्निविस्फुलिङ्गादिदृष्टान्तश्रुत्या च तस्य परविकारत्वप्रतिपत्तेश्च तयोर्भेदाभेदावुपेयौ, अन्यथांऽशांशिभावाद्यनुपपत्तेरिति, नेत्याह—

नांशः परस्य न च तस्य विकार एष
नात्यन्तमेव च विभिन्नवपुः परस्मात्॥
जीवोऽयमभ्युपगतः कुत एतदेवं
ब्रह्मात्मतावचनजातविरोधहेतोः॥ १०॥

नांश इति। तृतीयपक्षनिषेधो दृष्टान्तार्थः। मतान्तरनिषेधार्थो वा। सर्वत्राकांक्षापूर्वकं हेतुमाह-कुत इत्यादिना। निष्कलं निष्क्रियं शान्तम्, अजो नित्यः शाश्वतोऽयं पुराण इत्यादिश्रुत्यांऽशिनो विकारस्य चानित्यत्वाद्यापादकयुक्त्यनुगृहीतया विरोधात्, अंशित्वादेः सत्यत्वायोगाद्, वचनान्तरस्य घटाकाशादिवदौपाधिकाल्पत्वाद्यनुवादेन ब्रह्मानन्त्यपरत्वात्, अखण्डपरतत्त्वमादिवाक्यसमन्वयविरोधाच्च नैते पक्षा उपादेया इत्यर्थः॥ १०॥

इतोऽपि जीवस्य वस्तुतोंऽशत्वादिकल्पना न घटत इत्याह—

अपि च विश्वमनु प्रविवेश तत्
परममेव पदं परमात्मनः॥
इति वदत्सु सुहृत्स्विव तत्पर-
श्रुतिवधःसु कथं स ततोऽधिकः॥ ११॥

अपि चेति । स एष इह प्रविष्ट आनखाग्रेभ्यः, तत् सृष्ट्वा तदेवानुप्राविशत्, अनेन जीवेनात्मनाऽनुप्रविश्येत्यादिश्रुतिवचनेषु सूर्यस्य स्वसृष्टजलभेदेष्वविकृतस्य प्रवेशवदविकृतपरमपुरुषार्थपरमात्मस्वरूपस्यैव स्वसृष्टसमष्टिव्यष्टिरूपसर्वोपाधिषु प्रविष्टस्य जीवभावम अत्यन्तहितकारिमातृवत्तात्पर्येणोपादिशत्सु सत्सु कथं तस्य तद्रुद्धविकारादिभावो भवेत् । न चात्रान्तर्यामिभावेनैव परमात्मनः प्रवेशोऽभिहितो न जीवभावेनेति साम्प्रतम् । प्रविष्टस्य प्राणस्नेव प्राणो नाम भवतीत्यादिश्रुत्या प्राणनादिव्यापारवत्त्वप्रतिपादनविरोधात् । अत एव चोपमा सूर्यकादिवदित्याद्यधिकरणोक्तन्यायाविरोधाच्च श्रुतितो जीवस्य परेणात्यन्ताभेद एव वास्तवः, विपरीतं त्वाविद्यकमिति स्थितमित्यर्थः ॥ ११ ॥

इदानीं युक्तितोऽपि जीवस्य ब्रह्मात्मतैव वास्तवीत्याह—

प्रच्यावि वस्तु यदिहास्ति निजस्वरूपा-
दप्रच्युतैकरससंविदधीनमस्य ॥
प्रच्यावितास्फुरणमित्यवगत्य तत्र
तत् कल्पितं सकलमाकलयानुमानात् ॥ १२ ॥

प्रच्यावीति । भिन्नो जीवः किं स्वतो जडो विकारी च, किं वा कूटस्थचिदात्मा ? आद्ये निजस्वरूपात् कूटस्थचैतन्यात् प्रच्याव्युद्रिक्तं जडं विकारि च यद् बुद्ध्यादि वस्त्विह व्यवहारदशायामस्ति तस्योक्तरूपस्य यत् प्रच्यावित्वस्फुरणं तत् कूटस्थैकरससंविद्रूपसाक्ष्यधीनमिति नियमावगमाज्जीवस्यापि तथात्वावगमेन दृश्यत्वमपरिहार्यं स्यात् । तथा च तस्य बुद्ध्यादिसहितस्य साक्षिणा वास्तवसम्बन्धानिरूपणाद्रज्जुसर्पादिवत्तत्र साक्षिण्यविद्याकल्पितत्वमनुमानादापद्येत, न चैतदिष्टम् । न हि तत्त्वबोधाधीनमुक्तिभाजो जीवस्य स्वरूपं कल्पितमिति कैश्चिदुपेयते । द्वितीये तस्य कूटस्थचिद्रूपब्रह्मणो भेदे मानाभावात् एको देव इत्यादिश्रुतिविरोधाच्च न सत्यभेदावका-

श इति भावः ॥ १२ ॥

ननु जीवब्रह्मणोरत्यन्ताभेदे ब्रह्मणोऽपि स्वगोचराज्ञानाश्रयतया संसारित्वं स्यादित्याशङ्क्य, किं ब्रह्मशब्देन चिन्मात्रं विवक्षितमुत जगदुपादानत्वादिविशिष्टं चैतन्यमिति विकल्पमभिप्रेत्याद्यमङ्गीकरोति—

चैतन्यवस्तुविषयाश्रय एव मोहो
नाद्वैतवस्तुविषयाश्रयकोऽप्रतीतेः ॥
बुद्ध्यादिवेष्टितचितो न तमस्वितेति
ब्रह्माश्रयत्वमुदितं तमसः पुरस्तात् ॥ १३ ॥

चैतन्येति । द्वितीये तस्य चिन्मात्रतया तदाश्रयत्वादिसंभवेऽपि जीवव्यावृत्ताविद्येश्वरत्वरूपेण नाज्ञत्वादिसंभव इत्याह—नाद्वैतेति । तर्हि ब्रह्मैव संसरतीत्यादि कथमुक्तमित्याशङ्क्य, बुद्ध्याद्युपहितचैतन्यस्य तदनाश्रयत्वादित्यभिप्रायेणैतदुक्तमित्याह—बुद्ध्यादीति ॥ १३ ॥

जीवव्यावृत्तेश्वररूपेऽज्ञत्वाद्यभावं मानाभावेन प्रपञ्चयति—

ब्रह्माश्रयं न हि तमोऽनुभवेन लभ्यं
नाप्यागमान्न च किमप्यपरं प्रमाणम् ॥
ब्रह्माश्रयत्वविषयं तमसस्ततश्च
प्रत्यक्प्रकाशविषयाश्रयमेतदस्तु ॥ १४ ॥

ब्रह्माश्रयमिति । अनुभवेन प्रत्यक्षेण । तमसो ब्रह्माश्रयत्वविषयमिति प्रमाणविशेषणम् । परिशेषात् स्वप्रकाशचिन्मात्राश्रयविषयत्वमज्ञानस्योपेयमित्याह—ततश्चेति ॥ १४ ॥

ननु जीवत्वमेवाज्ञानाश्रयतावच्छेदकमुपेयं न तु चिन्मात्रत्वं जीववदीश्वरस्यापि इतरथाऽज्ञत्वादिदोषप्रसङ्गादतो जीवाश्रितैवावि-

द्या ब्रह्मविषयेति, नेत्याह—

जीवत्वमेव तु तदाश्रयमध्यपाति
नेच्छन्ति युक्तिकुशला न हि युज्यते तत् ॥
अज्ञानमेव खलु तन्न तमस्तमस्वि
चैतन्यवस्तु पुनरस्तु न तद्विरोधः ॥ १५ ॥

जीवत्वमेवेति । तदाश्रयमध्यपाति, अज्ञानाश्रयविशेषणमिति यावत् । न ह्यज्ञानाश्रयत्वमात्रमज्ञत्वं रज्जुतत्त्वबोधदशायां कालान्तरभाविसर्पादिभ्रमहेत्वज्ञानशालिनोऽपि चैत्रस्य तत्राज्ञत्वाभावात्, तदा तस्य रज्जुतत्त्वावारकत्वाभावात् । तदाश्रयस्यापि नाज्ञत्वमिति चेतर्हि ब्रह्मणश्चिद्रूपतयाऽविद्याश्रयत्वेऽपि सर्वज्ञत्वसर्वनियन्तृत्वादिरूपेण श्रुत्यादिसिद्धत्वात्तत्प्रत्यज्ञानस्य वस्त्वावारकत्वायोगात्तत्राज्ञत्वभ्रान्तत्वादिशङ्का दूरापास्ता । जीवस्य तु स्वात्मानं प्रति वस्त्वावारकाऽविद्याभिमानित्वादज्ञत्वादिव्यवस्थाऽज्ञानस्य चिन्मात्राश्रयत्वपक्षेऽप्युपपद्यते, एतदभिप्रेत्योक्तं युक्तिकुशला इति । परमते जीवत्वस्याश्रयविशेषणत्वेऽनुपपत्तिं प्रतिज्ञापूर्वकमाह—न हीत्यादिना । तज्जीवत्वमज्ञानाधीनसत्ताकत्वादज्ञानमेव, तथा चाज्ञानस्य तद्विशिष्टाश्रयत्वे स्वाश्रितत्वमपि स्यात्, तच्च विरुद्धम् । न च जीवत्वस्याज्ञानाश्रयोपाधित्वान्नोक्तदोष इति वाच्यम् । तस्य चिन्मात्रधर्मत्वे मतभेदायोगादाविवादः, अतिरिक्तधर्मत्वे च तस्यातिरिक्तस्य मुक्त्यन्वयित्वमपि स्यात् । न च तथोपेयते, शुद्धचैतन्यस्य तु तदाश्रयत्वे न कोऽपि विरोध इत्यर्थः ॥ १५ ॥

एवमविद्याश्रयचिन्मात्रस्याविद्याप्रतिबिम्बरूपेण तदावृतनिरुपाधिस्वरूपत्वादज्ञत्वं जीवत्वं चेत्युक्तम् । तस्यैव नानाविधदुःखादिमत्त्वरूपसंसरणं तु मोहकल्पितपुर्यष्टकयोगादिति पुरोक्तम्, तत्र किं तत् पुर्यष्टकमिति वीक्षायामाह—

कर्मेन्द्रियाणि खलु पञ्च तथाऽपराणि
बुद्धीन्द्रियाणि मन आदिचतुष्टयं च ॥

प्राणादिपञ्चकमथो वियदादिकं च
कामश्च कर्म च तमः पुनरष्टमी पूः ॥ १६ ॥

कर्मेन्द्रियाणीति । वचनादानगमनविसर्गानन्दरूपक्रियाऽसाधारणकारणानि कर्मेन्द्रियाणि पञ्च खलु प्रसिद्धानि, उक्तक्रियारूपकार्यलिङ्गानुमानैस्तेषां प्रसिद्धेः । सत्स्वपि तत्तदिन्द्रियाधारावयवेषु तेषामभावादेव मूकादिषु वचनादिक्रियाभावदर्शनात् । तानि च व्यष्टिसमष्ट्यात्मकान्येको गण एका पुरी, पुरवत् स्वामिनो भोगहेतुत्वात् । अपराणि शब्दस्पर्शरूपरसगन्धोपलब्धिष्वसाधारणकारणानि श्रोत्रत्वक्चक्षूरसनाघ्राणाख्यानि तथा पञ्च प्रसिद्धानि सोऽपि गणो द्वितीया पुरीत्येवमग्रेऽपि द्रष्टव्यम् । एकमप्यन्तःकरणं मनो बुद्धिरहंकारश्चित्तमिति संकल्पाध्यवसायाभिमानस्फूर्त्तिरूपवृत्तिभेदेनानेकधोच्यमानमेको गणः । एवमाध्यात्मिक एकोऽपि वायुः श्वासप्रश्वासादिवृत्तिभेदेन प्राणापानव्यानोदानसमानशब्दैः पञ्चधोच्यमान एको गणः । एवमपञ्चीकृतभूतकार्यं लिङ्गदेहं भोगोपकरणं गणचतुष्टयात्मना निर्दिश्य स्थूलभूतैः सह तत्कार्यं भोगायतनं भोग्यांश्च विषयानेकीकृत्यैकं गणमाह—अथो इति । वियदादेरुक्तवैलक्षण्यार्थोऽयं निपातः । इदानीं संसारे मुख्यं प्रयोजकं कार्यकारणरूपं गणद्वयमाह—कामश्च कर्म चेति । उक्तसप्तपुरीणां निदानपञ्चानमेवाष्टमपुराकाङ्क्षायां तत्त्वेन गृहाणेत्याह—तम इति । एवं च तत्त्वबोधादविद्यानिवृत्त्या सर्वसंसारोपशम इति भावः ॥ १६ ॥

ननु तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति श्रुतौ विद्यापूर्वप्रज्ञयोरपि संसारहेतुत्वप्रतिपत्तेः कथं पुर्यष्टकस्यैवोक्तस्य तद्धेतुत्वम्, कथं वा विद्याहेतुके तस्मिन्नविद्याया हेतुत्वमिति तत्राह—

विद्या च विश्वविषयाऽनुभवोत्थपूर्व-
प्रज्ञा च कर्मवचसैव तु संगृहीते ॥

बन्धप्रयोजकतया सदृशत्वहेतो-
रेकत्र च श्रुतिवचस्युपसंग्रहेण ॥ १७ ॥

विद्या चेति। द्वितीयाऽऽशङ्कानिराकरणाय विशिनष्टि—विश्वविषयेति। नात्र परब्रह्मविद्या विद्यापदेनोपात्ता, इति नु कामयमान इति संसारप्रकरणं समाप्य, अथाकामयमान इत्यादिना प्रकरणान्तरेण परब्रह्मभावस्यैव परब्रह्मविद्याफलस्य वक्ष्यमाणत्वात्। किं तु वक्ष्यमाणं चातुर्विध्यमाविद्यकप्रपञ्चगोचरज्ञानमिह विद्यापदोपात्तामिति तत्फलसंसारस्याविद्याहेतुत्वं नानुपपन्नमित्यर्थः। पूर्वानेकजन्मसु संचिता भोगवासना पूर्वप्रज्ञा, पूर्वपद्यनिविष्टकर्मपदेनोक्तविद्यापूर्वप्रज्ञयोरप्यजहल्लक्षणया संगृहीतत्वात् त्रयाणामेकगणत्वस्य विवक्षितत्वान्नाद्यचोद्यावकाश इत्यर्थः। कर्मवचसा तयोर्लक्षणायां मुख्यार्थसम्बन्धं स्वगतं प्रमाणद्वारकं चाह—बन्धप्रयोजकतयेति॥१७॥

किं तदेकं श्रुतिवचो येन विद्यादित्रयं बन्धहेतुतयोक्तमिति वीक्षायामाह—

तं विद्येति हि वाक्यमेकमिह च स्पष्टं त्रयं कीर्त्तितं
तस्मात् कर्मवचस्तयोरपि भवेत् संग्राहकं कारणात् ॥
विद्या चात्र चतुर्विधाप्यभिमतैवारम्भिका कर्मवत्
संस्कारोऽपि तथा चतुर्विध इति ज्ञेयस्तथा संभवात् ॥१८॥

तं विद्येति। तस्मात् कारणादिति सम्बन्धः। ननु पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति शुभाशुभकर्मण एव संसारहेतुत्वप्रतिपत्तेः कथं विद्यापूर्वप्रज्ञयोस्तद्धेतुत्वमित्याशङ्क्य तत्र कर्मैव तद्धेतुरित्यश्रवणादेतद्वचनबलात् त्रयाणामपि संसारहेतुत्वमविशिष्टमिति वदन् तेषु चातुर्विध्यमाह—विद्या चेत्यादिना। का चन विद्या शास्त्रविहिता देवताद्युपासनरूपा, अपरा तान्निषिद्धाऽसच्छास्त्रविषया, अन्या विहितसमा विधिं विनापि यदृच्छयोपपन्ना गङ्गादिदर्शनरूपा श्रेयस्करी, का चिन्निषिद्धसमा

बीभत्सितशवादिविषया सद्यो दुःखकरीति विद्यायाश्चातुर्विध्यम् । एवं कर्मणां यागवधाहारविहारादिरूपाणामपि विहितप्रतिषिद्धाऽविहिताप्रतिषिद्धभेदेन चातुर्विध्यं द्रष्टव्यम् । एवं पूर्वप्रज्ञाख्यसंस्कारोऽपि मूलानुभवाद्यनुरोधेन चतुर्विधो बन्धहेतुरित्यर्थः ॥ १८ ॥

ननु विद्यादीनां त्रयाणां संसारहेतुत्वेऽपि तद्द्वारा लिङ्गस्यैव तद्धेतुत्वमुपेयं न पुर्यष्टकस्य, तदेव सक्तः सह कर्मणेति लिङ्गं मनो यत्र निषिक्तमस्येत्यादौ लिङ्गस्यैव तद्धेतुत्वश्रुतेरित्याशङ्क्य, स वा अयमात्मा ब्रह्म विज्ञानमय इत्यादिश्रुतौ भूतभौतिकादिसर्वमयत्वप्रतिपत्तेस्तदेकदेशवाचिलिङ्गश्रुतिर्लक्षणया पुर्यष्टकविषया नेतव्येत्याह—

पुर्यष्टकं तदिदमप्यभवद्धि लिङ्गं
तेनोच्यते तदपि लिङ्गगिरा क्वचित्तु ॥
पुर्यष्टकं न खलु लिङ्गगिरोऽभिधेयं
मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम् ॥ १९ ॥

पुर्यष्टकमिति । तुशब्दः शङ्काव्यावृत्त्यर्थः । पुर्यष्टकमेव तदभिधेयं किं न स्यात् कृतं लक्षणयेत्याशङ्क्य, लिङ्गयति नियमेन स्वधर्मं ज्ञापयति तद्विलक्षणात्मनीति व्युत्पत्त्या तस्य लिङ्गपदाभिधेयत्वायोगाद् वक्ष्यमाणसप्तदशकगण एव तदभिधेय इत्याह—पुर्यष्टकमिति ॥ १९ ॥

किं तत् सप्तदशात्मकं मुख्यं लिङ्गमिति वीक्षायामाह—

इह तावदक्षदशकं मनसा
सह बुद्धितत्त्वमथ वायुगणः ॥
इति लिङ्गमेतदमुना पुरुषः
खलु सङ्गतो भवति जीव इति ॥ २० ॥

इह तावदिति । इह पुर्यष्टके, तावत् प्रथमोक्तम् । कर्मबुद्धीन्द्रियदशकं चित्ताहंकारौ बुद्धावेकीकृत्य मनो बुद्धिरित्यन्तः-

करणद्वयम्, प्राणादयो वायवः पञ्चेत्येतत् सप्तदशात्मकं मुख्यं लिङ्गम्, अमुना प्राणप्रधानेन लिङ्गेनावच्छिन्नश्चिदात्मा जीवपदवाच्य इत्यर्थः ॥ २० ॥

ननु हिरण्यगर्भादीनामधिकारिपुरुषाणां सत्यपि पुर्यष्टके दुःखस्वरूपसंसाराभावात् कथं तस्य तद्धेतुत्वमित्याशङ्क्य, तेषामपि सोऽबिभेत् स वै नैव रेमे, इन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्शेत्यादिश्रुतिभिर्भयारत्यादिप्रतिपादनात्तस्य तद्धेतुत्वं निरपवादमित्यभिप्रेत्य सर्वेषामपि शरीरत्रयात्मकपुर्यष्टकाभावे संसाराभाव इति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति श्रुत्युक्तं व्यतिरेकमाह—

न पुराष्टकेन रहितस्य तव
क्व चिदस्ति संसरणदुःखयुजा ॥
न पुराष्टकेन सहितस्य तथा
क्व चिदस्ति दुःखविगमश्च तव ॥ २१ ॥

न पुराष्टकेनेति । न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुत्या सति पुर्यष्टकात्मके शरीरत्रये संसारो नास्तीति न, किं त्वस्येवेत्यन्वयोऽप्युक्तः । ततोऽपि तस्य तद्धेतुत्वमुपेयमित्याह—न पुराष्टकेन सहितस्येति ॥ २१ ॥

तर्हि पुर्यष्टकसम्बन्धस्यात्मनन्यनन्यप्रयुक्तत्वेन स्वाभाविकत्वात्तदधीनसंसारस्तत्र वास्तवः स्यादित्याशङ्क्याह—

तव नित्यमुक्तसुखचिद्रपुषो
न कदा चिदस्ति पुरसङ्गमनम् ॥
तव मायया विरचितं सकलं
पुरसङ्गतिप्रभृतिकं वितथम् ॥ २२ ॥

तव नित्येति । स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्, स यत्तत्र किं चित् पश्यत्यनन्वागस्तेन भवति, असङ्गो ह्ययं पुरुषः, अप्राणो ह्यमनाः शुभ्रः, स एष नेति

नेत्यात्मेत्यादिश्रुतिभिर्नित्यमुक्तादिरूपात्मनो वस्तुतः सर्वोपाधिरहितत्वश्रवणात्तस्य पुर्यष्टकान्वयो वास्तवो न शङ्कनीयः । न चोक्तवाक्यजातं परमात्मविषयमिति वाच्यम् । तथापि—ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा इमे । त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ॥ नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिभिर्जीवस्यापि नित्यमुक्तादिरूपब्रह्ममात्रप्रतिपत्तेस्तस्य पुर्यष्टकायोग उपेय इत्यर्थः । कथं तर्हि जीवे तदन्वयानुभवः, कथं वा पुराष्टकेन सहितस्येतिपागुक्तमित्याशङ्क्याह—तव माययेति । उक्तरूपे आत्मनि स्थूलसूक्ष्मशरीरद्वयस्य भूतभौतिकात्मनोऽनिर्वचनीयमायाविलसितत्वात्तस्य तदन्वयो मिथ्यैवावभासते, असङ्गाद्वितीयस्वप्रकाशचिदात्मनि मायान्वयस्यापि वास्तवस्यायोगात् । सोऽपि तदधीनसत्ताकतया तत्प्रयुक्तो न स्वाभाविक इत्यर्थः ॥ २२ ॥

आत्मनो नित्यमुक्तत्वे यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः । न स तत् पदमाप्नोति संसारं चाधिगच्छति । यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः । स तु तत् पदमाप्नोति यस्माद् भूयो न जायत इति श्रुतिप्रतिपादितं बन्धमुक्तिकादाचित्कत्वं कथमित्याशङ्क्य, व्यावहारिकदृष्टिसिद्धबन्धमोक्षव्यवस्थाविषयेयं श्रुतिः । तत्त्वतस्तु—न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ इत्यादिश्रुतिपर्यालोचनया न बन्धो न वा मोक्षस्तस्यास्तीत्येतद् दृष्टान्तेनाह—

मलिनं नभो न हि कदा चिदभूद्
विमलं कदा चिदभवन्न नभः ॥
उभयं नभस्यभवदेवमिह
त्वयि नित्यमुक्तचितिसंसरणम् ॥ २३ ॥

मलिनमिति । मालिन्यं वैमल्यं वा नभसि कदा चिदपि वस्तुतो नाभूत्तथापि व्यवहारदृष्ट्या दुर्दिनादावुभयमभूत् । एवं ब्रह्मभूते त्वयि संसरणं तन्निष्टत्तिश्चेत्यर्थः ॥ २३ ॥

नन्वाविद्यकोऽपि बन्धो यदाऽस्ति तदाऽऽत्मनो बन्धस्य च परस्परसम्बन्धस्यावश्यकत्वेन तत्र बन्धाभावायोगात् कथं नित्यमुक्तता तस्येत्याशङ्क्याह—

न हि कल्पनाविरचितं वितथं
परमार्थवस्त्ववितथं स्पृशति ॥
परमार्थवस्तु च तथा तमसा
परिकल्पितं न किमपि स्पृशति ॥ २४ ॥

न हि कल्पनेति । कल्प्यतेऽनयेति कल्पनाऽनिर्वचनीयाऽविद्या तत्कार्यमिति यावत् । येन सम्बन्धेन यत्र यत् प्रतीयते तेन सम्बन्धेन तत्र तस्य त्रैकालिकनास्तितायाः एव मिथ्यात्वलक्षणत्वाद् बन्धवैतथ्यस्य चोपपादितत्वादात्मनि बन्धदशायामपि बन्धात्मनोरितरेतरस्पर्शाभावात्तस्य नित्यमुक्ततोपपद्यत इत्यर्थः ॥ २४ ॥

ननु यदाऽऽत्मनि बन्धो वर्त्तते तदैव कथं तत्र तदभावो घटेत भावाभावयोरेकदैकत्र विरोधादित्याशङ्कां परिहरन् पूर्वपद्योक्तमर्थं दृष्टान्तेन स्पष्टयति—

न हि भूमिरूषरवती मृगतृड्-
जलवाहिनीं सरितमुद्वहति ॥
मृगवारिपूरपरिवारवती
न नदी तथोषरभुवं स्पृशति ॥ २५ ॥

न हि भूमिरिति । मृगतृड्जलवाहिनीमिति । मृगैस्तृष्णावशादारोपितजलप्रापणीमित्यर्थः । अत्रोपाधिनाऽऽत्मारोपितं बन्धनं न स्पृशतीत्यत्र दृष्टान्तः प्रथमेनार्द्धेन दर्शितः । द्वितीयेन त्वारोपितो बन्धस्तं न स्पृशतीत्यत्रेति द्रष्टव्यम् ।

इदमत्राभिप्रेतम् । मरुभूम्यादौ जलाद्यारोपदशायामप्यदुष्टाक्षाणां विशेषदर्शनवतां तदा तत्र जलाद्यभावस्य प्रमितत्वाद् भावाभावयोः समसत्ताकयोरेकदैकत्र विरोधो न विषमसत्ताकयोरित्य-

भ्युपेयम् । तथा चात्मनि बन्धस्य मिथ्यात्वात्तदभावस्य त्रैकालिकस्य वास्तवत्वात्तयोरेकदैकत्र न विरोध इति ॥ २५ ॥

नन्वेष आत्मा उत्क्रामतीत्यादिश्रुत्या जीवस्योत्क्रान्तिगत्यागतिभिः संसारप्रतिपादनात् कथं तस्य मृषात्वमित्याशङ्क्य, युक्तिभिस्तावत्तदसम्भवमाह--

न तव क्वचिद् गमनमस्ति विभो-
र्न पुराष्टकस्य जडरूपभृतः ॥
न च मध्यवर्त्तिजडचिद्वपुषो-
र्गमनक्षमं किमपि संभवति ॥ २६ ॥

न तवेत्यादिना । किं चिदात्मनो गत्यादिरूपः संसारो वास्तवः, किंवा जडस्य देहस्य, उत तृतीयस्य चिज्जडात्मकस्य । नाद्यः, तस्याणुमध्यमपरिमाणायोगेन सर्वगतस्य वास्तवगत्यादेरसम्भवात् । न द्वितीयः, तस्य पुर्यष्टकान्तःपातिनो घटकुड्यादिवज्जडस्योक्तसंसारायोगात् । न तृतीयः, चिज्जडात्मकस्यैकस्य वस्तुनो विरुद्धत्वेनासम्भवात्, कस्य गत्यादि स्यादित्यर्थः । जडचिद्वपुषोर्मध्यवर्त्ति ताभ्यामन्यत् तृतीयं चिज्जडात्मकं वस्त्विति यावत् ॥ २६ ॥

जीवस्य ब्रह्मात्मना विभुत्वेऽपि लिङ्गावच्छिन्नतया परिच्छिन्नत्वाद् गत्याद्युपपत्तिरित्याशङ्क्य तथाऽप्युपाधेरेव गमनं स्यान्नात्मन इति दृष्टान्तेनाह--

पुरवेष्टितं न खलु चिद्वलयं
परलोकमार्गमनुसर्त्तुमलम् ॥
घटवेष्टितं न हि नभोवलयं
व्रजति व्रजत्यपि घटेऽवितते ॥ २७ ॥

पुरवेष्टितमिति । चिद्वलयम्, चितः परिच्छिन्नरूपम् । घटस्यावितते व्यापित्वम् ॥ २७ ॥

दृष्टान्तासंप्रतिपत्तिमाशङ्क्याह—

घट एव गच्छति नभस्त्वचलं
व्रजता घटेन तु ततश्च ततः ॥
परिवेष्टनेन घटखं क्रियते
घटखानि तत्र सुबहूनि ततः ॥ २८ ॥

घट एवेति । ननु शुद्धस्य नभसोऽचलत्वेऽपि घटावच्छिन्ननभसो यत्रयत्र घटो गच्छति तत्रतत्र दर्शनात् तस्यापि गमनमुपेयमिति तत्राह—व्रजतेति । तुशब्दः शङ्कानिरासार्थः । घटतत्क्रियासंतत्या घटनभसोरन्योऽन्यसंयोगस्य जायमानत्वादवच्छेदकभेदेनावच्छिन्ननभसोऽपि नानाभूतस्य जायमानत्वात् सर्वत्र तस्यैकस्य दर्शनात्तद्गमनं मानहीनमित्यर्थः ॥ २८ ॥

तर्ह्येतदेवास्त्वात्मनः परलोकगमनं यल्लिङ्गगमनमयुक्तं तदवच्छिन्नचैतन्यस्य तत्र जन्मेति शङ्कते—

पुरमेव गच्छति चितिस्त्वचला
व्रजता पुरेण यदि सापि चितिः ॥
परिवेष्ट्यते तु सुबहूनि तदा
वलयानि पूर्वदुपाश्रयसे ॥ २९ ॥

पुरमेवेति । यद्युपाश्रयस इति सम्बन्धः । तुशब्दो मुख्यगमनाभावाङ्गीकारार्थः ॥ २९ ॥

दूषयति—

अकृतागमश्च कृतनिष्फलता
फलतः समापतति कर्त्रगतेः ॥
अपरस्य भोक्तुरुदयाच्च दिवि
व्यसनस्य संततिरहो विषमा ॥ ३० ॥

अकृतागम इति । भूभागे सुपाधिपरिच्छिन्नचैतन्यस्य सुकृतादिकर्तृत्वम्, तस्यास्मिन् पक्षे परलोकगमनाभावान्न तत्फलभो-

क्तृत्वम् । यच्च परलोकगाम्युपाध्यवच्छिन्नं चैतन्यं फलभोक्तृत्वेनाभिमतम् , न तस्य तत्कर्तृत्वामित्यकृताभ्यागमादि देहात्मवाद इवापद्येत । नन्विहलोकपरलोकयोश्चैतन्यस्य स्वस्वरूपेणैकत्वात् कथं देहात्मवादसमदोषापत्तिरिति तत्राह—फलत इति । शुद्धचिदात्मनः कर्तृत्वायोगादुपाध्यवच्छिन्नस्य तदुपेयम्, तस्य चेह कर्मकर्तुः परलोकगमनादेरुक्तरीत्याऽसम्भवादकृताभ्यागमादेर्दुष्परिहरत्वात् फलतो देहात्मवादसमतेत्यर्थः । नन्ववच्छिन्नचैतन्यानामन्यत्वेऽपि सन्तानैक्यादुक्तदोषानवकाश इत्याशङ्क्य, तर्हि बौद्धमतापात इत्यभिप्रेत्याह—व्यसनस्येति ॥ ३० ॥

ननु घटे चलति तदवच्छिन्नाकाशस्य तन्निहितद्रव्यस्येव सर्वत्र प्रत्यभिज्ञायमानत्वादबाधितप्रत्यभिज्ञया तस्यैकत्वे सत्यवश्यमुपेयमन्यत्र गमनम् । एवं पुरोपहितचैतन्यस्यापि परलोकगमनमित्याशङ्क्य, उपाधिसंयोगस्य नानात्वेन तद्घटितोपहितनानात्वस्योभयत्रापरिहार्यत्वादुत्तरजन्मसमये पूर्वनाशस्यावश्यकत्वात्तत्प्रत्यभिज्ञाप्रामाण्यायोगाद् वास्तवगमनायोग इत्याह—

चलने ह्युपाध्यभिमतस्य भवे-
ज्जनितस्य तेन विगमः सुदृढम् ॥
ननु कुण्डलापसरणे पुरुषा-
दथ न प्रणश्यति न कुण्डलिता ॥ ३१ ॥

चलन इति । उपाध्यभिमतस्य, उपाधित्वेनाभिमतस्य । तत्र विशेषणसंबन्धापगमे विशिष्टापगमं दृष्टान्तयति—ननु कुण्डलेति । न प्रणश्यतीति न, किं तु प्रणश्यतीत्यर्थः ॥ ३१ ॥

चिदात्मनः परसम्बन्धमङ्गीकृत्य तद्गमनाद् वास्तवं गमनं नेत्युक्तम् । इदानीं तस्य तत्संबन्ध एव विभोर्दुर्निरूपः कुतस्तदधीनं गमनमित्याह—

न पुरान्वयश्च नव चिद्वपुषः
परमार्थतो भवति तर्कसहः ॥

नभसो यथा घटसमागमनं
न ततोऽपि लिङ्गघटितो व्रजसि ॥ ३२ ॥

न पुरान्वय इति । चोऽवधारणे । नभसो निरवयत्वमतेनोदाहरणमाह—नभस इति । समागमनं संयोगो यथा न तर्कसह इत्यनुषङ्गः ॥ ३२ ॥

विभुद्रव्यस्य सकलमूर्त्तद्रव्यसंयोगित्वाद् घटसंयुक्तस्य नभसस्तदवच्छिन्नत्वोपपत्तेर्दृष्टान्तोऽसंमत इत्याशङ्क्याह—

नभसः प्रदेशविरहान्नभसो
न घटः प्रदेशपरिवेष्टनकृत् ॥
न नभः समस्तमपि वेष्टयते
नभसोऽवशेषविरहापतनात् ॥ ३३ ॥

नभस इति । घटसंयोगः किं नभसः प्रदेशसमवायी तमवच्छिनत्ति, किं वा नभोव्यापी सन् कृत्स्नं नभोऽवच्छिनत्ति । नाद्यः, तस्य परमतेऽवयवपर्यायप्रदेशस्याभावात् । घटावच्छिन्नभाग एव तत्प्रदेश इति चेन्न । परस्पराश्रयापत्तेः । तत्संयोगे सति नभसस्तदवच्छिन्नभागसिद्धिस्तत्सिद्धौ च तदाश्रितसंयोगसिद्धिरित्यन्योऽन्यापेक्षणात् । न द्वितीयः, परिच्छिन्नद्रव्यसंयोगस्य विभुद्रव्यव्यापित्वासंभवेन नभोमात्रस्य तदवच्छिन्नत्वायोगात् । इतरथा घटाद्यनवच्छिन्नाकाशाद्यभावापातात् । तथा चालोकानवच्छिन्ननभसोऽसत्त्वेन नभसि तमः कदाऽपि न स्यात् । स्याच्च देहसंयोगस्यात्मव्यापित्वात्तदधीनदुःखादेरपि तद्व्यापित्वम् । न चैतदिष्यते इति नभसो घटावच्छिन्नत्वं वास्तवं न घटत इत्यर्थः ॥ ३३ ॥

तथापि स समानः सन्नुभौ लोकावनुसंचरति मधीः स्वप्नो भूत्वेत्यादिश्रुतिसिद्धत्वादात्मनः पुरावच्छिन्नत्वं वस्तुसदेवेत्याशङ्क्य पूर्वोक्तविकल्पदोषयोरत्रापि तुल्यत्वादाविद्यकावच्छिन्नत्वाद्यनुवाद-

नीयं श्रुतिरिति वक्ष्यते, ततो नैतद् वस्तुसदित्यभिप्रेत्याह—

परमात्मभागपरिवेष्टनकृन्न पुरं तथाऽनवयवो हि परः ॥
न च कृत्स्नमेव परमं पुरुषं पुरवस्तु वेष्टयितुमुत्सहते ॥३४॥

परमात्मेति। पूर्वपद्योक्तविकल्पदूषणातिदेशार्थस्तथाशब्दः। आत्मानवयवत्वस्य श्रुतियुक्तिभ्यां प्रसिद्धिर्हिशब्दार्थः ॥ ३४ ॥

नन्वव्याकृताकाशाद्युपाधेर्व्यापित्वात्तदवच्छिन्नत्वं विभोरपि चिदात्मनः सर्वात्मना घटत इत्याशङ्क्य, तथापि तदवच्छिन्नः किं जीव उतेश्वरः, आद्ये सर्वज्ञादिरूप ईश्वरो न लभ्येत। तथा च यः सर्वज्ञः स सर्ववित् य आत्मनि तिष्ठन्नित्यादिश्रुतिविरोध इत्यभिप्रेत्याद्यपक्षमनुवदन्नाह—

यदि कृत्स्न एव परमः पुरुषः
पुरवेष्टितो भवति जीवतया ॥
न तदेश्वरो भवितुमुत्सहते
न च जीवजातमपरं सकलम् ॥ ३५ ॥

यदि कृत्स्न इति। द्वितीय ईश्वरादपकृष्टजीवाभावो जीवतारतम्याभावश्च स्यादित्याह-न च जीवजातमिति ॥ ३५ ॥

ईश्वरासत्त्वे दोषान्तरमाह—

गुरुशिष्यसङ्गतिरतो न भवे-
न्न च बन्धमोक्षनियमो घटते ॥
विषयं विना सकलमापतति
स्फुटमत्र वेदवचनं च वृथा ॥ ३६ ॥

गुरुशिष्येति। न च जीवस्येव हिरण्यगर्भादेः सर्वज्ञत्वाद् गुरुत्वमिति वाच्यम्। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इत्यादिश्रुतिभिः तद्विद्याया अपीश्वराधीनत्वप्रतीतेस्तस्यापि स्वतस्तदसंभवादिति भावः। जीवभेदाभावे दोषमाह-न च बन्धेति। किं च ज्ञानकर्मणोरीश्वरस्यानधिकारात्तदतिरिक्त-

जीवाभावेऽधिकार्यभावात् कर्मज्ञानकाण्डात्मकः सकलो वेदो व्यर्थः स्यादित्याह—विषयं विनेति ॥ ३६ ॥

दृष्टान्तदार्ष्टान्तिकयोरुपाध्यवच्छिन्नत्वं वास्तवं दुर्निरूपमित्युक्तमुपसंहरति—

न पुरान्वयोऽत उपपत्तिसहः
परमार्थतोऽस्ति परनार्थदृशेः ॥
वियतो घटान्वयवदेव ततः
परिकल्पितं पुरसमागमनम् ॥ ३७ ॥

न पुरान्वय इति । कथं तर्ह्युभयत्र तत्परिच्छिन्नत्वधीरित्याशङ्क्य, असंभावितम्यानुभूयमानस्यापि नभोनैल्यादिवत् कल्पितत्वमुपेयमित्याह—तत इति ॥ ३७ ॥

ननु "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" इत्यादिना सूत्रकारेणैव जीवस्य भूतपरिष्वङ्गतदधीनगत्यादेः श्रुतिप्रतिपन्नस्य न्यायैरुपपादितत्वात् कथं तदपह्नव इत्याशङ्क्य, घटाकाशस्येव तस्योक्तविधया वस्तुतो गत्यादेरसम्भवात्तस्यौपाधिकत्वनिरूपणेन मिथ्यात्वमेव तदभिप्रेतं न सत्यत्वमित्यभिप्रेत्याह—

यत एवमेतदुपपत्तिपथं
न तव प्रयाति विरहय्य तमः ॥
परलोकमार्गगमनं स्वतमः-
परिकल्पितं चलनवन्नभसः ॥ ३८ ॥

यत एवमिति । एतत् पुरसमागमनम् । परलोकपदात् प्राक् तत इति पूरणीयम् ॥ ३८ ॥

ननु घटाकाशदृष्टान्तेनात्मनः पुरोपाधिकाऽलीकसंसाराङ्गीकारे कथमहङ्कारादिरूपे पुरे चैतन्यानन्दादिरूपात्मस्वभावप्रतिभासः स्यात् । न ह्याकाशोपाधौ घटे तत्स्वभावो नीरूपत्वामूर्त्तत्वादिः प्रतिभासत इत्याशङ्क्याहङ्कारादेरात्मनश्च परस्परभेदाध्यासाधीनः परस्परस्व-

भावव्यत्यासः। घटाकाशयोस्तु परस्पराभेदाध्यासाभावात्तदभाव इत्यभिप्रेत्याह—

पुरधर्ममात्मनि विकल्प्य तथा
स्वचिदात्मतां च पुरधर्मतया ॥
स्वपुरं स्वयं च दृढमेकतया
परिकल्पयन् व्रजसि मूढमतिः ॥ ३९ ॥

पुरधर्ममिति। जाड्यगतिदुःखादिसंसारमित्यर्थः। चशब्द आनन्दादेः समुच्चयार्थः। पुरधर्मतया, विकल्प्येत्यनुषज्य व्रजसीति योजनीयम्। धर्मव्यत्यासकल्पनायां धर्म्यभेदाध्यासं हेतुमाह—स्वपुरमिति। तत्रापि हेतुमाह—मूढमतिरिति। मोहादतत्स्वयाथात्म्यानुभव इत्यर्थः ॥ ३९ ॥

कल्पितस्यापि संसारस्यानादित्वादात्मनो न नित्यमुक्ततेत्याशङ्क्य, कल्पितराहित्यस्य वास्तवस्याधिष्ठाने तत्कालेऽप्युपपादितत्वात् सदा नित्यशुद्धादिरूप आत्मेति फलितमाह—

परिपूर्णचंद्रसघनः सततं
स्वमहिम्नि तिष्ठसि निरस्तमले ॥
न तथापि तत्त्वमसीतिवाक्यकृतां
मतिमन्तरेण तव केवलता ॥ ४० ॥

परिपूर्णेति। तर्हि मुमुक्षूणां शमादिपूर्वकश्रवणाद्यायासो वृथेत्याशङ्क्य, अविद्यादशायामनर्थस्यैव तत्र प्रतिभासात् तत्प्रतिभासशून्यनिरतिशयानन्दमात्रानुभवरूपैकैवल्यमिति तत्साक्षाद्ज्ञातस्य तस्य विस्मृतकण्ठमणिवद् प्रेप्साविरोधित्वाभावादनर्थनिदानाज्ञाननिवर्तकज्ञानाय मुमुक्षुव्यापारोऽर्थवानित्यभिप्रेत्याह—न तथापीति ॥४०॥

ननु वाक्यकृतामिति विशेषणमयुक्तम्, अविद्यादिनिवर्तकसाक्षात्कारस्यात्मन्यन्यथैव सम्भवादित्याशङ्क्याह—

न तव प्रतीचि करणानि बहि-
र्विषयाणि येन करणानि सदा ॥

सहजं च गाढमतिमूढतमं
तम इत्यतः पुरमनुव्रजसि ॥ ४१ ॥

न तवेति । किं बाह्याभ्यन्तरकरणानामन्यतमजन्यो ब्रह्मात्मसाक्षात्कारस्तदज्ञाननिवर्त्तक इत्युच्यते, किं वा स्वरूपसाक्षात्कार एव । नाद्यः । पराञ्चि खानि व्यतृणत् स्वयंभूरितिश्रुतेरनुभवाच्च । येन स्वभावतोऽज्ञस्य तव सर्वाणि करणानि पराञ्चिषयाणि तेनाविषयस्वप्रकाशचिद्रूपे प्रतीचि तानि न प्रवर्त्तितुं समर्थानीत्यर्थः । द्वितीये स्वरूपचैतन्याज्ञानयोः सहभावस्यानादिकालेऽविरलमनुवर्त्तमानत्वान्न स्वरूपचैतन्यस्य तन्निवर्त्तकत्वोपपत्तिः । तस्मात्तत्र वाक्यकृत एव साक्षात्कारोऽभ्युपेय इत्यभिप्रेत्याह—सहजामिति । एवं प्रासङ्गिकं चोद्यं निरस्य, कल्पितपुरोपाधिनाऽऽत्मनि कल्पितं संसरणमिति प्रकृतमुपसंहरति-इत्यत इति ॥ ४१ ॥

नन्वाविद्यकोपाधिकल्पितमात्मनः संसरणमिति स्वकपोलकल्पितयुक्तिभिर्मां प्रतारयसि, न त्वत्र किं चिन्मानमस्तीति तत्राह—

स समान इत्युपनिषद्वचनं
प्रतिपादयत्युदितमर्थमतः ॥
स्वमनीषिकेति न कदा चिदपि
प्रतिपत्तिरत्र भवतो भवतु ॥ ४२ ॥

स समान इति । सः, योऽयं विज्ञानमय इत्यादिना बुद्ध्यादिभ्यो विवेचितश्चिदात्मा स समानः सन्—माध्यन्दिनशाखायां वाक्यशेषे स धीरिति श्रवणाद् बुद्ध्यैक्यमापन्नः सन्नुभौ लोकौ इहलोकपरलोकौ बुद्धिमनुसंचरति । एतच्च तदीयसकलव्यापारानुकरणोपलक्षणार्थम् । तस्य मिथ्यात्वमाह—ध्यायतीव लेलायतीव चलतीव वस्तुतो न ध्यानादि करोति किं तु तत् करोतीव भ्रान्त्या भातीतीवशब्दात् प्रतीतेरात्मनि संसरणं कल्पितमितीदं वचनं प्रतिपादयतीत्यर्थः । तत्कल्पितत्वस्य प्रामाणिकत्वे फलितमाह—अत इति । अत्र, संसारमिथ्यात्वे ॥ ४२ ॥

एवं घटाकाशदृष्टान्तेनात्मनो गमनादि कल्पितमित्युक्तम् । इदानीं रूपं रूपं प्रति रूपो बभूवेत्यादिवचनाज्जलसूर्यादिप्रतिबिम्बदृष्टान्तेनापि तदुपपादयति—

पुरहेतुकं यदभवच्च विभोः
परिकल्पितं किमपि चित्सदृशम् ॥
जलपात्रहेतुकमिव द्युमणे-
स्तदसंततं भवति तद् व्रजति ॥ ४३ ॥

पुरहेतुकमिति । तदधीनसत्ताकमिति यावत् । विभोः शुद्धचिदात्मनोऽपरिच्छिन्नस्य । किमपि केवलजडरूपेण केवलचिद्रूपेण वा दुर्निरूपमत एव चित्सदृशमुपाध्युपरागधर्मविशेषविशिष्टं चिदाभासाख्यं जीवपदवाच्यं यद्रूपं परिकल्पितमभवत् तदसंततमव्यापि भवति, ततस्तदेव मिथ्यागमनादिवद्भवति, तत्तदात्म्याच्चिदात्मन्यपि तद्भ्रान्तिरित्यर्थः । प्रतिबिम्बस्य कल्पितेऽपि बिम्बविपरीतरूपे दृष्टान्तमाह—जलपात्रेति । एवं च चित्प्रतिबिम्बस्य चिज्जडात्मत्वेऽपि चित्प्राधान्येन प्रतिबिम्बव्यवहारः, कल्पितजडप्राधान्येनाभासव्यवहारश्चेति प्रतिबिम्बस्य बिम्बाभेदाभिधानम्, आभासस्य तु मिथ्यात्वाभिधानं सर्वत्रोपपद्यत इति ॥ ४३ ॥

ननूक्तोपाधेरेव परलोकगमनमनुपपन्नं कुतस्तदुपाधिकं तदात्मनि स्यात् । बुद्ध्यादेर्जडस्य चेतनानधिष्ठितस्य स्वतो गमनादिप्रवृत्त्ययोगात्, जीवस्य चोत्क्रान्तिकाले संपिण्डनकरणत्वेन विशेषबोधरहितस्य तत्प्रेरकत्वायोगात्, परमात्मनोऽपि कूटस्थचिन्मात्रतया तत्प्रेरणायोगादित्याशङ्क्य परमेश्वरस्य मायाशक्तिमतस्तदधीनव्यापारेण पुरतदवच्छिन्नजीवाधिष्ठातृत्वसम्भवात् पुरादिगमनोपपत्तिरिति वक्तुं तस्य तच्छक्तिमत्त्वमाह—

जडशक्तिरस्ति च परस्य विभोः
परमात्मनस्तम इति प्रथिता ॥

पुरमष्टकं तव यथा भवति
श्रुतितः प्रसिद्धमिदमप्यखिलम् ॥ ४४ ॥

जडशक्तिरिति । चशब्दस्तदधीनप्रेरणाव्यापारसमुच्चयार्थः । सा च जीवं प्रति तमोवद् वस्तुतत्त्वावरकत्वेनाविद्यायामन्तरे वर्तमानाः, अहमज्ञ इत्यादिश्रुत्यनुभवसिद्धेत्याह—तम इति । अस्तीत्यभिधानात् परशक्तिसंबन्धवास्तवत्वशङ्कां दृष्टान्तोक्त्याऽपाकरोति—पुरमष्टकमिति । अष्टकमष्टसङ्ख्याकम् । परस्य तच्छक्तिमत्त्वे किं मानम् । सम्बन्धे सति सा तमपि जीववत् किमिति न व्यामोहयेत् ? तस्य तन्नियन्तृत्वेन तत्कूटाभिज्ञत्वान्न व्यामोह इति चेत्, अत्रापि किं मानमित्याशङ्क्याह—श्रुतित इति । मायिनं तु महेश्वरम्, परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, यो योनिंयोनिमधितिष्ठत्येक इत्यादिश्रुतिभ्य उक्तार्थसिद्धिरित्यर्थः ॥ ४४॥

ननु न तस्य कार्यं करणं च विद्यत इत्यादिश्रुतेः परमात्मनः कृतिकर्तव्यागावप्रतीतेः कथं मायया तस्य पुराद्यधिष्ठातृत्वसम्भव इत्याशङ्क्य तस्य स्वरूपेण वस्तुतस्तदभावेऽपि कल्पितरूपेण तदुपपत्तिरित्यभिप्रेत्य पुरहेतुकं यदभवदित्युक्तसंसारयोग्यजीवरूपदृष्टान्तेन सर्वाधिष्ठातृत्वादियोग्यमीश्वरपदवाच्यं सर्वज्ञत्वसर्वशक्तित्वादिविशिष्टात्मकं परमात्मनो मायिकमीश्वरत्वाख्यं रूपमाह—

पुरहेतुकं तव यथा च वपु-
र्भवतीह जीववचसो विषयः ॥
जडशक्त्युपाधिकममुष्य तथा
परमेश्वरत्ववपुरुद्भवति ॥ ४५ ॥

पुरहेतुकमिति । स्वरूपावरकाज्ञानप्रयुक्तमिति यावत् । चशब्दोऽवधारणे, स च पद्याद्यपदेन सम्बध्यते । इहाविद्यादशायाम् । जडशक्त्युपाधिकमिति । स्वरूपानावरकेश्वरपरतन्त्रमायाप्रयुक्तमि-

त्यर्थः । अमुष्य कल्पितपारोक्ष्यपरमात्मन इति यावत् । उद्भवति प्रकटीभवति, जगत्सृष्ट्यादिनेत्यर्थः ॥ ४५ ॥

ईश्वरस्य मायिकोक्तरूपवत्त्वेऽपि जीवस्य तदभिन्नत्वात् कथं तदधिष्ठेयत्वमित्याशङ्क्य तदज्ञानाद् विपरीतरूपाभिमानित्वाच्च तदधिष्ठेयतया जीवस्य कर्माधीनसंसारानर्थसिद्धिरिति फलितमाह—

पुरहेतुरूपघटितस्य दृशे-
र्जडशक्त्युपाधिपरमेश्वरतः ॥
भयमुद्भवत्यनवबोधवशा-
दिति च त्रयीशिरसि राजपथः ॥ ४६ ॥

पुरहेतुरूपेति । ईश्वरप्रेरितो जीवः संसरतीत्यत्र य आत्मनि तिष्ठन्नात्मानमन्तरोऽयमयति, एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत इत्यादिश्रुतिर्मानमित्याह—इति चेति । बहुवेदान्तवाक्यसिद्धत्वाद्राजमार्गवदसंदिग्धोऽयमर्थ इत्यर्थः ॥ ४६ ॥

जीवस्यैहिकामुष्मिकः कर्मफलभोगः परमेश्वरदातृक इत्येतावद् न तु जीवस्तदधिष्ठितो गच्छतीति के चित्, तान् प्रबोधयन् तद्यथाऽनः सुसमाहितमुत्सर्जद् यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् यातीति श्रुत्यर्थं दर्शयति—

परमेश्वरेण विभुना रणयन्
परिबृंहितः शकटवद् व्रजासि ॥
शकटं हि शाकटिकयोगवशाद्
व्रजति स्वयं न परतन्त्रतया ॥ ४७ ॥

परमेश्वरेणेति । विभुना प्रभुणा, रणयन्नूर्ध्वोच्छ्वासदशायां दुःसहवेदनावशाच्छब्दं कुर्वन्, एतच्च उत्सर्जन्निति श्रुतिपदोक्तम्, तदुक्तिश्च वैराग्यार्थम् । परिबृंहितोऽधिष्ठितः । शकटस्य परमेश्वराधिष्ठितत्वमप्रसिद्धमित्याशङ्क्य दृष्टान्तं विवृणोति—शकटं हि-

ति । स्वयं न व्रजतीत्यनुषङ्गः । परतन्त्रतयेति हेतुर्व्रजतीत्यत्रापि योजनीयः ॥ ४७ ॥

ननु शकटस्याचेतनतया पारतन्त्र्यं युक्तं चेतनस्य तु जीवस्य तदयुक्तमित्याशङ्क्य चेतनस्याप्यज्ञस्य दुर्बलस्य च बहुज्ञप्रबलपारतन्त्र्यदर्शनाज्जीवस्याप्यज्ञत्वाद्यभिमानित्वात्सर्वज्ञादिरूपेश्वरपारतन्त्र्यं युक्तमित्यभिप्रेत्याह—

पुरवेष्टितः पुरवशानुगतः
पुरतन्त्रचिन्निभविभिन्नवपुः ॥
दिवि यातनां भुवि च कर्मफला-
न्यनुभूय भूय इह सम्भवति ॥ ४८ ॥

पुरवेष्टित इति । तमसाऽऽवृतस्वरूप इत्यर्थः । पुरवशानुगतः बुद्ध्यादिगतकतिपयशक्तियुक्तः । बुद्ध्यादौ चित्प्रतिबिम्बोऽपि जीव इति मतेनापि तदाह—पुरतन्त्रेति । चिन्निभोऽशत्वादिविशिष्टरूपश्चिदाभासस्तदभिन्नस्वरूपो जीवोऽनः पारतन्त्र्यमित्यर्थः । ईश्वरप्रेरणया जीवस्य स्वर्गनरकयोर्गमनसम्भवेऽपि तत्र सुखदुःखभोगाभ्यां पुण्यपापयोः क्षीणत्वात्तावताऽज्ञस्यापि संसारोपरमः स्यादित्याशङ्क्यानादिभवपरंपरासंचितकर्मणां बहुत्वादभुक्तफलपुण्यपापाभ्यां पुनर्मनुष्यदेहप्राप्तेस्तदधीनकर्मणामप्यवश्यंभावित्वान्नैवमित्याभिप्रेत्याह—दिवि यातनामिति । इदं पदद्वयं संयमिन्याः सुखस्य चोपलक्षणम् । भुवि भारतवर्षातिरिक्तेलावृत्तादिवर्षेषु । पश्वादिजातिसमुच्चयार्थश्चशब्दः । इह भारतवर्षे मनुष्यजातौ ॥ ४८ ॥

स्वर्गनरकादिशब्दानां सुखदुःखमात्रवाचित्वात्तदनुभवस्य चेहैव सम्भवात् कर्मवशाद् गन्तव्यदेशविशेष एव नास्ति, तत्प्रमाणाभावात् । धूमादिमार्गश्रुतेरर्थवादत्वादर्थवादानां च विधिनिषेधापेक्षितस्तुतिनिन्दामात्रपरतया स्वार्थे प्रामाण्याभावादिति के चित्,

तान् प्रत्याह—

सुकृतदुष्कृतकर्मवशादयं
दिवमथो यमसादनमेव वा ॥
अनुभवेन समाप्य पुनर्महीं-
तलमबोधवशादवरोहति ॥ ४९ ॥

सुकृतदुष्कृतेति। पद्याक्षराणि स्पष्टार्थानि। अयं भावः। मन्त्रार्थवादेतिहासपुराणानां स्वार्थे प्रामाण्यस्यौत्सर्गिकस्य देवताधिकरणोक्तन्यायैर्बाधाभावेनावश्यमभ्युपेयत्वात्तेषु च कर्मफलभोगापेक्षिनदेशोपकरणादिविशेषप्रतिपादनात्। इतरथा पुण्यपापतारतम्याधीनसुखदुःखतारतम्यानुपपत्तेः। ततश्च गत्यादिपूर्विका तत्प्राप्तिरिति तद्रूपसंसारस्येश्वराधीनत्वं युक्तमिति ॥ ४९ ॥

ननु केवलेष्टादिकारिणामनिष्टादिकारिणां चाज्ञानां चन्द्रलोकं संयमिनां वा गत्वा कर्मफलं भुक्तवताम् अथैतमेवाध्वानं पुनर्निवर्त्तन्ते इत्यादिवचनादिहावरोहादुक्तविधया संसारानुपरमेऽपीष्टादिसमुच्चितसूत्रात्युपासनावशादर्चिरादिमार्गेणापरं ब्रह्म प्राप्तानां विनाऽप्यात्मतत्त्वानुभवं न तेषामिह पुनरावृत्तिः, एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्त इति वचनादिहावरोहाभावात् संसारोपरमसिद्धिरिति, नेत्याह—

यदि वा समुच्चयवशात् पुरुषः
कमलासनं व्रजति कामुकधीः ॥
पुनरेव मानवमिमं तु विना
परिवर्त्तमाव्रजति मूढमतिः ॥ ५० ॥

यदि वेति। कामुकधीः केवलब्रह्मलोककामो मानवं मनुवंशगं मनुष्यदेहम् इमं वर्त्तमानं विना परिवर्त्तं पुनः पुनः परिवर्त्तमानं जन्मादि निरन्तरं व्रजति यतो मूढमतिरज्ञानी, क्रममुक्तिप्रापकदहराद्युपासनारहितानां पुण्यविशेषाद् ब्रह्मलोकं गतानामिह नावृ-

त्तिः, इमं नावर्त्तन्त इति चैतत्कल्पविशेषितावृत्तिनिषेधात् कल्पान्तरीयावृत्तिः सूच्यते । इतरथा तेषामावर्त्तं नावर्तन्त इत्येतावतैवात्यन्तिकानावृत्तिसिद्धेर्विशेषणवैयर्थ्यापातात् । तत्त्वबोधं विना संचितसर्वकर्मक्षयायोगेन कर्मान्तराधीनावृत्तेरावश्यकत्वाच्च । ब्रह्मलोकगतानां न नियताऽनावृत्तिरित्यर्थः ॥ ५० ॥

ब्रह्मलोकंगतानां पुनरावृत्तौ "अनावृत्तिः शब्दात्" इत्यधिकरणविरोध इत्याशङ्क्य क्रममुक्तिफलकोपासनाभिर्ब्रह्मलोकं गतानां "कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्"इत्यत्रोक्तन्यायेन तत्रैवोत्पन्नविवेकवैराग्यादिमतां तदध्यक्षोपदेशलब्धतत्त्वबोधानां तद्बलान्मुक्तिरित्यन्त्याधिकरणं ज्ञानादेव कैवल्यमित्येतद्विषयमित्यभिप्रेत्याह—

अथ वा स तत्र परमात्ममतिः
परिमुच्यते सकलबन्धनतः ॥
क्रमयोगमुक्तिरुदिता श्रुतिषु
प्रतिशाखमेवमुपपन्नतरा ॥ ५१ ॥

अथ वेति ! परम आत्मेति मतिर्यस्य स परमात्ममतिः । तत्र मानमाह—क्रमयोगेति । कार्यब्रह्मप्राप्तिपूर्वकपरब्रह्मप्राप्तिरूपा मुक्तिः, ब्रह्मलोकमभिसंपद्यते न स पुनरावर्त्तत इत्यादिश्रुतिषु योदिता सैवमुपपन्नतरेत्यर्थः ॥ ५१ ॥

एवं केवलेष्टादिकारिणां समुच्चयकारिणां चोत्कृष्टलोकप्राप्तावपि जन्ममरणादिसंसारानुपरम इत्युक्तम् । इदानीं मनुष्येषु प्राक्तजनबाहुल्यादिष्टादिकर्मानुष्ठानमेव दुर्लभं तदभावे तदधीनदेवयानपितृयाणमार्गद्वयप्राप्तिरहितानां तेषां रागादिपरवशानां दुरितबाहुल्यसम्भवात्तद्बलात् पुनःपुनः कीटपतङ्गादिक्षुद्रजन्तुभावरूपतृतीयपथप्राप्तानामत्यन्तं कष्टप्राप्तिरपरिहार्येति वैराग्यार्थं वदन् अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भव-

न्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति श्रुत्यर्थं दर्शयति—

देवयानपितृयाणयोः पथो-
र्ज्ञानकर्मरहितत्वकारणात् ॥
नैकमप्यनुसरन्ति ये पुनः
क्षुद्रजन्तव इहोद्भवंति ते ॥ ५२ ॥

देवयानेति। स्पष्टार्थः श्लोकः ॥ ५२ ॥

एवं पुण्यपापफले संसारे वैराग्यार्थं मिथ्यात्वानित्यत्वजन्ममरणानुपरमदुःखबाहुल्यादिदोषं प्रदर्श्य पुण्यादेरपि प्रयोजकं कामान् यः कामयते मन्यमान इत्यादिश्रुत्युक्तं दर्शयन्नुपसंहरति—

इति कामुकस्य तव संसरणं
शतशो बभूव बत मूढमतेः ॥
इह विप्रजन्मनि विरक्तमतिः
कुरु साधनं यदपवर्गकरम् ॥ ५३ ॥

इति कामुकस्येति। यथा संसारहेतुप्रयोजको रागस्तथा मुक्तिहेतुप्रयोजकं वैराग्यम्। परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायादित्यादिश्रुत्योक्तं वदन् विरक्तस्यापि न कर्मत्यागमात्रादभीष्टसिद्धिरित्यभिप्रेत्याह—इहेति ॥ ५३ ॥

अपवर्गस्य ब्रह्मभावस्यासाध्यत्वात्तत्साधनमेव नास्तीत्याशङ्क्य तज्जन्यज्ञानान्तरङ्गसाधनानि मुमुक्षुणाऽनुष्ठेयानीत्याह—

श्रवणादिकं शमदमादिपरः
परमात्मनः परमभागवतः ॥
कुरु तावता परममेव पदं
परमात्मनस्त्वमवलोकयसि ॥ ५४ ॥

श्रवणादिकमिति। कस्य श्रवणादीति वीक्षायामुक्तम् परमात्मन इति। यस्य देवे परा भक्तिरित्यादिवचनात् सगुणपरमात्मभक्तिरप्यन्तरङ्गसाधनमित्यभिप्रेत्याह—परमभागवत

इति। श्रवणादीनामप्रमाणत्वात्ततः कथं तत्त्वसाक्षात्कारोदय इत्याशङ्क्य श्रवणपदार्थस्य वेदान्तघटितत्वात्तत्प्रमाणात्तदुपपत्तिरित्यभिप्रेत्याह—तावतेति। आत्मनस्तव परमाविद्यातत्कार्यातीतं स्वरूपं परमं निरतिशयानन्दं ब्रह्मैवावलोकयसि साक्षात्करोषीति सम्बन्धः। उक्तविशिष्टाधिकारिणा ब्रह्मसाक्षात्कारे विलम्बाभावपरो वर्त्तमानत्वव्यपदेशः॥ ५४॥

परमपदावलोकनेऽपि किं स्यादित्याशङ्क्य य एतद्विदुरमृतास्ते भवन्ति, एतावदरे खल्वमृतत्वमिति श्रुतेः सर्वदुःखरहितसुखात्मकब्रह्मभावरूपाऽमृतत्वं ततो भवतीत्यभिप्रेत्य तदभावे दुःसहदुःखानुपरमम्, अथेतरे दुःखमेवापियन्तीत्यादिश्रुत्युक्तं सदृष्टान्तमाह—

यदि तन्न पश्यसि हरेः परमं
पदमम्बुशीतलमिवेद्धशिराः॥
न खलु प्रदीप्तशिरसोऽस्ति सुखं
तव दुःखपावकशिखाभिरहो॥ ५५॥

यदि तन्न पश्यसीति। इद्धशिराः प्रदीप्तशिराः। दुःखसंभिन्नसुखस्यापि दुःखत्वात्सुखं नास्तीत्युक्तम्। दुःखसामान्यात्मकपावकस्य आध्यात्मिकादितापविशेषाः शिखाः ताभिः प्रदीप्तशिरसो व्याप्तसर्वाङ्गस्य। शिरोग्रहणमितराङ्गोपलक्षणार्थम्। तत्त्वविदामप्युक्तसंसारिदर्शनाधीनं खेदं द्योतयति—अहो इति॥ ५५॥

ननु प्रदीप्तशिरसोऽपि शीतलाम्बुदर्शनमात्रेण तत्तापानिवृत्तिवदनादिकालप्रवृत्तसंसारतापस्याप्यात्मदर्शनमात्रेण निवृत्त्ययोगादुपायान्तरस्यापि तत्राभावाद्यथाशक्ति दुःखं परिहृत्य दुःखेऽपि संसारे वैषयिकसुखमेव विवेकवताऽपि प्रार्थनीयमिति कुतस्ततो वैराग्यमित्याशङ्क्य शिरस्यग्निदाहस्य जलाज्ञानविलसितत्वाभावात्तद्दर्शननिवर्त्यत्वाभावेऽपि संसारतापस्य नित्यशुद्धादिरूपात्माज्ञानविलसितत्वस्य बहुधोपपादनात्तद्दर्शनात्तस्यात्यन्तिकनिवृत्त्युपपत्तौ नित्यनिरति-

शयसुखब्रह्मभावानुभवलक्षणमोक्षस्य ज्ञानमात्रायत्तत्वात्तदर्थिनो विषयवैराग्यदार्ढ्यमावश्यकमित्यभिप्रेत्योपसंहरति—

एवं विज्ञाय तापत्रयमतिगहनं मोहमूलं परास्मि-
न्नात्मन्यात्मप्रकाशे त्वयि परमसुखे निष्कले निष्कलङ्के।
सत्ये नित्यस्वभावे परिहृतसकलद्वैतकूटानुषङ्गे
सम्यग्ज्ञानानुरागं कुरु विषयगतं भिन्द्धि निर्बन्धमेनम्॥५६॥

एवं विज्ञायेति । अतिगहनमतिनिबिडम् । आत्मनि तापत्रयस्य मोहविलसितत्वे हेतुः—परिहृतेति । तत्र वस्तुतो द्वैतानुषङ्गपरिहारहेतुत्वेनात्मानं विशिनष्टि—आत्मप्रकाश इत्यादिना । सत्ये बाधायोग्यस्वरूपे । नित्यस्वभावे कूटस्थस्वभावे । स्वभावपदं विपरीतप्रतीतिविरोधपरिहाराय सर्वविशेषणेषु योजनीयम् । निर्बन्धं नितरां बन्धकम् । एनमनुरागम् ॥ ५६ ॥

एवं रंहतिपादार्थं 'वैराग्यस्य दृढत्वमेकम्'इति संगृहीतं शिष्यवैराग्यदार्ढ्यं सोपपत्तिकमुपपाद्यानन्तरपादार्थम् "अपरं तत्त्वंपदार्थज्ञता" इति संगृहीतं प्रपञ्चयिष्यन्, नापृष्टः कस्य चिद् ब्रूयादिति शास्त्रार्थं शिक्षयन् प्रथमं गुरूपरमं शिष्यप्रश्नं चावतारयति—

इत्युक्त्वोपरते गुरौ पुनरयं जिज्ञासया प्रेरित-
स्तत्त्वंशब्दनिगद्यलक्ष्यविषयं शिष्यो गुरुं पृच्छति ॥
वैराग्येऽतिदृढीकृते सति यतः प्राज्ञो यतिर्मन्यते
संदीप्तं शिरसीव पावकमिदं संसारदुःखं महत् ॥ ५७ ॥

इत्युक्त्वेति। अत्यन्तं विरक्तस्य कुतः प्रश्नोद्यम इति वीक्षायामाह—जिज्ञासयेति । तत्त्वमिति । तत्त्वंपदयोर्वाच्यलक्ष्यात्मको यो विषयस्तमित्यर्थः । तत्त्वंशब्दवाच्याभ्यां लक्ष्यं विषयमिति वा । जिज्ञासोरप्यविलम्बेन प्रश्नोद्यमे हेतुमाह—वैराग्य इति । शिरसि संदीप्तं पावकमिव महत्संसारदुःखं यतो मन्यतेऽतो गुरुं पृच्छतीति योजना ॥ ५७ ॥

उक्तं रंहतिपादार्थं श्रुतवन्तोऽपि के चित्संसाराद्वैराग्यं तद्दार्ढ्यं वा न लभन्ते, तथा किमयमपि तथा च तत्त्वोपदेशानर्ह इति शङ्कां निराकुर्वन् स्वस्यात्यन्तिकं वैराग्यं सामग्रीप्रदर्शनपूर्वकं शिष्यो ज्ञापयति—

वैराग्यं विषयेषु पूर्वमपि मे जातं हरेरर्चनाद्
यज्ञादिक्रियया निरस्तफलया किं त्वद्य दार्ढ्यं गतम् ॥
संसारस्य निरूपणेन धिगिदं कर्मादिजन्यं फलं
विश्वं नश्वरमम्बुबुद्बुदसमं पश्यासनान्तं जगत् ॥५८॥

वैराग्यं विषयेष्विति । निरस्तमनपेक्षितं फलं यस्याः सा तथोक्ता तयेत्यर्थः । यज्ञाद्यनुष्ठायिनामपि केषां चिद्वैराग्यादर्शनादीश्वरार्पणबुद्ध्यैव तदनुष्ठानं तत्साधनमित्यभिप्रायेण हरेरर्चनादित्युक्तम् । तेनापि पूर्वं ब्रह्मलोकावधिककर्मफलेष्वनिच्छात्मकमेव वैराग्यं जातम् , इदानीं तु तेष्वतितरां जिहासालक्षणं तदार्ढ्यं प्राप्तमित्याह—किं त्विति । तदृदार्ढ्यमेवाभिनयेन दर्शयति—धिगिति ॥ ५८ ॥

तर्हि सर्वतो विरक्तस्य संन्यासिनः कृतकृत्यस्य तवेदानीं कुत्र वाञ्छेत्याशङ्क्य 'त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम्' इति वचनात् त्वंपदवाच्यस्य लोकत एवावगतत्वात् सर्वानर्थशून्यतल्लक्ष्यज्ञाने मम वाञ्छेत्याह—

किं तु त्वंपदलक्ष्यमर्थमधुना कर्तृत्वभोक्तृत्वयो-
र्ज्जाग्रद्भूगतयोरपोहमुखतो वाञ्छाऽवगन्तुं मम ॥
कर्तृत्वादिकमस्य किं निजमभूत् स्वाभाविकं जाग्रतः
किं वा तत् परतः कुतश्चिदभवच्चैतन्यधातोरिति ॥५९॥

किं त्विति । स्वप्नभूगतकर्तृत्वादेर्मिथ्यात्वेन तदपोहस्यात्मनि निश्चितत्वाज्जाग्रद्भूगतयोरित्युक्तम् । तामेव वाञ्छां सप्रकारां दर्शयति—कर्तृत्वादिकमिति । प्रमातृत्वभोक्तृत्वादिकमादिपदा-

र्थः । निजमित्यनेन स्वरूपेणानादीति पृष्टमिति शङ्क्येत, तन्निवारणाय स्वाभाविकमित्युक्तम् । अनन्यप्रयुक्तमित्यर्थः । परतः स्फटिकलौहित्यादिवदुपाधित इत्यर्थः । चैतन्यधातोरिति । चैतन्यैकरसस्येति द्वितीयकोटौ बीजम् । कर्तृत्वादिमद्वस्त्वन्तरादर्शनमाद्यकोटौ बीजमिति द्रष्टव्यम् ॥ ५९ ॥

ननु तत्त्वमादिमहावाक्यैरेवाकर्त्रादिरूपब्रह्माभेदप्रतिपादनाज्जीवस्य कर्तृत्वादि न स्वाभाविकमिति गम्यते । तथा स यत्तत्र किंचिद् पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्याद्यवान्तरवाक्यैरपि कर्तृत्वादिसंसर्गरहिततया स्पष्टं जीवस्वरूपप्रतिपादनाद् कथं तत्र जिज्ञासा तवेति तत्राह—

यावत्त्वंपदलक्ष्यवस्तुविषयो बोधो न मे वर्त्तते
तावन् मे बधिरेषु गीतमिव तच्छ्रौतं वचोऽनर्थकम् ॥
तस्मात्त्वंपदलक्ष्यवस्तुविषयः कर्तृत्वभोक्तृत्वयो-
र्जाग्रद्भूगतयोरपोह्यमुखतो बोधो ममोत्पाद्यताम्॥६०॥

यावदिति । इदमहं करोम्यदोऽकरवम् अग्रे च करिष्यामीत्याद्यनुभवैः प्रत्यक्षादिप्रमाणाधीनैः, शास्त्रफलं प्रयोक्तरीतिन्यायानुगृहीतया स्वर्गकामो यजेतेत्यादिश्रुत्या चात्मनि त्रैकालिककर्तृत्वादिसंसारसम्बन्धनिश्चयात्तस्यासंसारित्वविषयश्रुतिशतेनापि वह्निरनुष्ण इति वाक्येनेवायोग्यतानिश्चयान्निर्विचिकित्सो बोध एव न जायेत, तेनात्मनोऽसङ्गत्वादिप्रतिपादकं श्रुतिवचो बधिरेषु श्रोतृषु सङ्गीतमिवानर्थकं प्रतिभाति, ततस्तत्र जिज्ञासा मम समुल्लसतीत्यर्थः । तर्हि तव चित्तदोषात्तद्बोधानुदये श्रुत्या मया वा किं कर्त्तव्यमित्याशङ्क्य त्वयैव युक्तितस्तद्दोषापनयेन स बोधः सम्पादनीय इत्याह—तस्मादिति ॥ ६० ॥

एवं शिष्येण प्रार्थितो गुरुः प्रत्यगात्मनि संसारित्वभ्रमितिविरोधादसंसारित्वं दुरवगमामित्युक्तं निराकुर्वन्नात्मनि कर्तृत्वादिबुद्धेर्देह-

तादात्म्यादिबुद्धेरिव प्रबलानुमानविरोधाद् भ्रान्तित्वं तावदाह—

कर्त्रादेरवभासकत्वमगमः शुद्धः स्वयंभास्वर-
श्चैतन्येन निजेन तेन भवतः कर्त्रादिबुद्धिर्भ्रमः ॥
कूटस्थस्य चिदात्मनस्तव कुतः कर्तृत्वभोक्तृत्वयोः
शङ्का जागरितेऽपि कारकगणं कर्त्रादिकं पश्यतः ॥६१॥

कर्त्रादेरिति । आत्मा कर्त्रादिरूपो वस्तुतो न भवति, तदवभासकत्वाद् यो यदवभासकः स तदात्मा न भवति, यथा घटद्रष्टा घटानात्मा, कर्त्रादिः स्वव्यतिरिक्तद्रष्टृको दृश्यत्वाज्जडत्वाद्वेत्यादिप्रयोगाणां प्रबलत्वात्तद्विरोधात्तवाहं कर्त्ता भोक्तेत्यादिबुद्धिर्भ्रमस्ततस्त्वं शुद्धः नित्यमुक्तः । नन्ववभासकत्वमवभासक्रियाकर्तृत्वमेव, ततश्च प्रतिज्ञाहेतुवचनयोर्व्याघात इति चेत्तत्राह—चैतन्येन निजेनेति । अस्य कर्त्रादेरवभासकत्वमित्यनेन सम्बन्धः । निजेन स्वरूपतया नित्येनेत्यर्थः । तथा चात्मनस्तत्र कर्तृत्वासंभवात्तद्बलेनात्मनः कर्त्रादिसत्ताप्रकारकसंशयादिविरोधित्वमेव तदवभासकत्वमिति नोक्तव्याघातः । तर्ह्यात्मनो ज्ञानगुणकत्वात्तस्य तद्रूपत्वमेवेत्याशङ्क्याह—स्वयंभास्वर इति । आत्मनः स्वयंप्रकाशचिद्रूपत्वस्य पूर्वमुपपादितत्वादग्रे वक्ष्यमाणत्वाच्च चैतन्यं तदात्मकमेवेत्यर्थः । एतेनात्मन्येव दृश्यत्वहेतोरनैकान्तिकतेति निरस्तम् । चिदात्मनि तस्मिंश्चैतन्यविषयत्वरूपदृश्यत्वस्यैवाभावादिति भावः । चिद्रूपस्यात्मनः कादाचित्कक्रियाकर्तृत्वं तदधीनभोक्तृत्वं च स्यादित्याशङ्क्याह—कूटस्थस्येति । न तस्य कार्यं करणं च विद्यते, कूटस्थमचलं ध्रुवमित्यादिवचनैरात्मनि सर्वव्यापारप्रतिषेधाद् विज्ञानं यज्ञं तनुते इत्यादिना सर्वव्यापारस्य बुद्धिकर्तृकत्वाभिधानात् साक्षी चेता केवलो निर्गुणश्चेति श्रुतेः कर्त्रादिसाक्षिणस्तदात्मत्वायोगादात्मनः स्वतः कर्तृत्वादिशङ्का कदापि न कार्येत्यर्थः ॥ ६१ ॥

किं च योऽयं व्यापारमवभासयति स तत्र न कर्त्ता, यथा

दिविष्ठो भास्करो भूमिष्ठसकलजनवर्त्तिगमनादिव्यापारावभासको न तत्कर्त्तेति व्याप्तिः प्राकृतानामपि सुप्रसिद्धा, ततश्च चिदात्मापि पूर्वोक्तविधया सव्यापारकार्यकरणसंघातावभासकत्वात्तद्व्यापारे न कर्त्तेति निष्प्रत्यूहमनुमानोदयात्तस्य स्वतः कर्तृत्वमेवासम्भावितमित्याह—

व्यापारं सकलस्य भासयति यो भास्वत्करो भास्करो
नासौ कर्तृतया जनस्य विदितो भूमौ द्युलोकस्थितः ॥
एवं स्वे महिमन्यवस्थितवतः संघातमुत्पश्यतः
स्वव्यापारसमन्वितं तव कुतः कर्तृत्वमुत्प्रेक्ष्यते ॥६२॥

व्यापारमिति । सकलस्य जनस्येति सम्बन्धः । भास्करस्य द्युलोकस्थित इति विशेषणमतिव्यवधानेन तस्य भूमिष्ठजनव्यापारे कर्तृत्वसम्भावनैव नेति वक्तुम् । एवं पक्षेऽपि । स्वे महिमन्यवस्थितवत इति कूटस्थासङ्गानतिशयानन्दस्वरूपभूते महिमनि स्थित्युक्त्या नैकत्रापि व्यापारे कर्तृत्वसम्भावनेत्युक्तम् ॥ ६२ ॥

नन्वात्मनः स्वतःकर्तृत्वाद्यभावे यथाकारी यथाचारी तथा भवतीत्यादिश्रुतेः, कर्त्ता शास्त्रार्थवत्त्वादिति सूत्रस्य च पीडा स्यादित्याशङ्क्य, श्रुतेरेवंजातीयकाया औपाधिककर्तृत्वाद्यनुवादत्वादात्मन्यौपाधिकमपि कर्तृत्वं नेत्येतन्मतनिराकरणपरत्वाच्च सूत्रस्य नोक्तदोष इत्यभिप्रेत्य, तर्हि कोऽयं कर्तृत्वादिमानुपाधिरिति वीक्षायाम्, "एतेभ्यो भूतेभ्यः समुत्थाय, प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः, प्रकृतैव च कर्माणि क्रियमाणानि सर्वशः, इत्यादिवचनात् कार्यकरणसंघाताकारपरिणताविद्यकभूतसंघात एव कर्तृत्वादिमानुपाधिरित्याह—

भूतानि पञ्च तव मोहसमुद्भवानि
संघातरूपपरिणाममुपागतानि ॥
कुर्वन्ति कर्मफलमश्नुवते च तेषां
साक्षी त्वमन्तरविलुप्तचिदेकरूपः ॥ ६३ ॥

भूतानीति । कर्तृसंघातमध्यप्रवेशमात्मनो वारयति—तेषामिति । अन्तः साक्षीति सम्बन्धः । तत्र हेतुरविलुप्तेति ॥ ६३ ॥

ननु स्फाटिके लौहित्यवच्चिदात्मनि कर्तृत्वादेरौपाधिकत्वे लोहितद्वयवत् कर्तृद्वयं विविक्तमेकदेहे प्रतीयेत, तथाऽऽलक्तकादौ स्फाटिकत्वादिवत् कार्यकरणसंघाते चेतनत्वादि न प्रतीयेतेत्याशङ्क्य चिच्छायाग्राहिणि संघाते चिदभेदारोपान्नोक्तदोषद्वयमित्यभिप्रेत्य तच्छायाग्राहिणि तदाकारारोपे दृष्टान्तमाह—

क्षीरस्य पूर्णे चषके निरस्तो
मणिर्यथा मारकतो महार्हः ॥
क्षीरं समस्तं क्षणमात्रतस्तत्
करोति तच्छायमनूनतेजाः ॥ ६४ ॥

क्षीरस्येति । क्षीरेणेति यावत् । निरस्तः परीक्षणाय प्रक्षिप्तः । तत् समस्तं क्षीरमिति सम्बन्धः । अनूनतेजा अनभिभूतप्रभायुक्त इत्यर्थः ॥ ६४ ॥

दार्ष्टान्तिकमाह—

तथा तमःसम्भवमच्छमन्त-
र्बहिर्जडिम्नाऽन्वितमन्तरात्मा ॥
जगच्चिदेकच्छवि चित्स्वरूपः
करोति सान्निध्यवशेन विश्वम् ॥ ६५ ॥

तथेति । चित्स्वरूपोऽन्तरात्मा तमस्तत्सम्भवं विश्वं जगच्च सांनिध्यवशेन व्यापाररहितस्वसत्तामात्रेण चिदेकच्छवि चिदाविविक्तच्छायाकारं करोतीति सम्बन्धः । ननु सात्त्विकस्य स्वच्छस्यान्तःकरणादेश्चिच्छायाग्राहित्वेऽपि भूतभौतिकात्मकस्य तामसस्य जगतोऽस्वच्छस्य कथं तच्छायाग्राहिता तदभावे वा चित्सम्बन्धाऽयोगात् कथं तत्स्फुरणं कथं वा तस्य तत्र स्थूलदेहे आत्मत्वाभिमान इत्याशङ्क्य जगद् विशिनष्टि—अच्छमन्तरित्यादिना । ब-

हिः बुद्धेर्बहिर्भूतं बुद्ध्युपरागरहितं जडिम्ना तमसाऽस्वच्छभावेनान्वितमावृतमपि अन्तरच्छं बुद्धितादात्म्यादभिभूतपराग्भावमभिभूतजाड्यं चेत्यर्थः । इदमत्राभिप्रेतम् । तत्तद्देहस्य तत्तदन्तःकरणसंपिण्डितचिदात्मन्यध्यासात् सात्त्विकान्तःकरणसम्बन्धादभिभूतजाड्यस्य तस्य तद्वदेव स्वच्छत्वेन चैतन्यबिम्बोद्ग्राहितया तदात्मना प्रतीतिः क्षीरदृष्टान्तेनोपपद्यते, ततो बहिर्भूतघटादेरपि प्रमाणाधीनचिच्छायावदन्तःकरणोपरागादभिभूतजाड्यस्य चिच्छायावत्तत्तदधीनस्फुरणं चोपपद्यते । एवं पृथिव्यादिष्वापि तत्तद्देवतान्तःकरणतादात्म्यवत्सु तत्तद्देवतानामात्मत्वाभिमानः । एवं विराजोऽपि व्यापिसमस्तान्तःकरणतादात्म्यवति सर्वस्थूलप्रपञ्चेऽहमभिमान उपपद्यत इति सर्वमवदातमिति ॥ ६५ ॥

ननु 'नानात्मानो व्यवस्थात' इत्यक्षपादसूत्रवचनादात्मनि वस्तुतो नानात्वस्य तल्लिङ्गभूतकर्तृत्वादिव्यवस्थाया न्यायतः सिद्धत्वात् पूर्वोक्तं सर्वमनुपादेयमिति चेन्न, "एको देवः सर्वभूतेषु गूढः" "इन्द्रो मायाभिः पुरुरूप ईयते" "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्" "उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा" इत्याद्यैकात्म्यपरश्रुतिविरोधान्निर्मूलत्वात् सौत्रस्य हेतोर्व्यधिकरणसिद्धत्वाच्च तदेव सूत्रं सुगतादिसूत्रवदनुपादेयमित्यभिप्रेत्य कथं तर्ह्यात्मनि देवमनुष्यतिर्यगादिभेदप्रतिभास इति वीक्षायां तस्याप्यौपाधिकत्वमुपाधिनिर्देशपुरःसरं सदृष्टान्तमाह—

तान्येव कार्यकरणानि बहुप्रकारं
भेदं च बिभ्रति भवानपि तत्र लग्नः ॥
भेदेन भाति जलपात्रनिविष्टमूर्त्ति-
र्मार्त्तण्डमण्डलवदन्वयमन्तरेण ॥ ६६ ॥

तान्येवेति । कर्तृत्वाद्युपाधितयोक्तान्येवेत्यर्थः । बहुप्रकारं

देवमनुष्यादिलक्षणम् । चशब्दः कर्तृत्वसमुच्चयार्थः । तत्र कार्यकरणसंघाते । लग्नो मिथ्यातादात्म्यमुपगतः । अन्वयं वास्तवसम्बन्धम् । अन्तरेण विना । भिन्नोपाधिपरामर्शमन्तरेणाप्रतीयमानत्वाद् भेदानां मिथ्यात्वम्, जलपात्रेषु रविभेदवत्, इतरथा रवेरपि स्वतो नानात्वं स्यादिति भावः ॥ ६६ ॥

तर्हि चिदात्मनः प्रमातृत्वं स्वाभाविकमन्यस्याचेतनस्य तदसंभवादिति शङ्कां निराकुर्वन् सर्वशरीरेष्वात्मभेदस्यौपाधिकतया मिथ्यात्वप्रतिपादनफलं तदैक्यसिद्धिमाह—

अध्यात्ममेवमधिभूतमथाधिदैवं
सूत्रं विराजमपि पश्यसि साक्षिभूतः ॥
साक्षित्वकारणमशेषजगन्निदान-
मज्ञानमात्मचिदवज्वलितं सदैव ॥ ६७ ॥

अध्यात्ममिति । अहमित्यात्मतया भासमानं शरीरादिकं तद्धर्मश्चेत्यर्थः । अधिभूतम् इदन्तया पराक्त्वेन भासमानानि सविकाराणि आकाशादिभूतानीति यावत् । अधिदैवम् आध्यात्मिककरणाद्यनुग्राहकं सपरिकरमादित्यादिदेवताजातम् । सूत्रं प्राणप्रधानसमष्टिलिङ्गोपाधिकम्, विराजं स्थूलसमष्ट्युपाधिकं च त्वमेव साक्षिभूतः पश्यसि कूटस्थस्वरूपचैतन्येनैव तद्गोचराभिज्ञादिव्यवहारं प्रवर्तयसि न तु प्रमातृतया, मातृमानादिसाक्षिणि तदम्भवात्तस्याः कर्तृत्वादिसमानयोगक्षेमतया साभासबुद्धिधर्मत्वोपपत्तेश्च । आत्मनि तदवभासस्तदुपाधिनिबन्धन इति न तस्य स्वतः प्रमातृताऽपीति भावः । ननु कूटस्थासङ्गचैतन्यात्मनः केनापि सम्बन्धाभावात् कथं साक्ष्यप्रतियोगिकं सर्वसाक्षित्वमित्याशङ्क्य, अघटितघटकाज्ञानप्रयुक्तानिर्वचनीयसम्बन्धादेव तस्य सर्वसाक्षितोपपत्तिरित्याभिप्रेत्याह—साक्षित्वकारणमिति । सदैवात्मचिदवज्वलितं यावत्सत्त्वमात्मचैतन्यावभासितमित्यर्थः ॥ ६७ ॥

नन्वाज्ञानादप्येकस्मिन्नेव देहेऽहंममाभिमानात् मम तेनैव सम्बन्धो न देहान्तरैस्तत्र तदननुभवान्मानान्तराऽभावाच्च ततो न युक्तं सर्वदेहसाक्षित्वं ममेत्याशङ्क्य तत्तत्समस्तदेहाभिमानिनस्त्वदभिन्नत्वान्मैवमित्यभिप्रेत्य सर्वशरीरेषु तत्त्वतो जीवाभेदेऽनुमानान्याह—देहव्यक्तिरित्यारभ्य सप्तभिः श्लोकैः—

देहव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
देहव्यक्तिर्देहताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ६८ ॥

विप्रतीतिः विप्रतिपत्तिः, तदास्पदत्वं तद्गोचरः । तावकी त्वदीया । त्वया ममायं देह इति निश्चितदेहातिरिक्ताः सर्वे देहास्त्वदात्मना सात्मकाः, तवैव भोगायतनानीति वा, देहत्वात् त्वया तथानिश्चितस्वदेहवदित्यर्थः । तर्हि मम सर्वदेहवर्त्तिभोगानुसंधानं स्यादित्याशङ्क्यैतदन्तःकरणविशिष्टस्य तव परिच्छिन्नत्वेन सर्वभोगसम्बन्धाभावाद् न तदनुसंधानम्, तदुपलक्षितचिन्मात्ररूपस्य तव सर्वसाक्षितया सर्वानुसंधानमिष्टमेव, ततस्तस्य सर्वशरीरैक्ये न किं चिद् बाधकमित्यभिप्रेत्य तदुपसंहरति—तस्मादिति । एवमुत्तरत्रापि योज्यम् ॥ ६८ ॥

एवं देहवदेवैकात्मसम्बन्धित्वेनाविप्रतिपन्नैकव्यक्तिदृष्टान्तेन तदितरेषु तज्जातीयेष्वनेकात्मसम्बन्धित्वेन विप्रतिपन्नेषु वस्तुषु तज्जातीयत्वहेतुना तदेकात्मसम्बन्धित्वमनुमेयम्, ततश्च सर्वेष्वात्मीयेषु विप्रतिपन्नमात्मैक्यं वास्तवमवश्यमुपेयमित्यभिप्रेत्य धर्म्युपस्थितिक्रमेण कतिपयानुमानानि दर्शयति—

संविद्व्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
संविद्व्यक्तिः संविदात्मत्वहेतो-
स्तस्मादात्मा सर्वभूतस्थ एकः ॥ ६९ ॥

संविद्व्यक्तिरित्यादिना । वैदिकाभिमतस्वप्रकाशस्फुरणं संविच्छब्दार्थः । अन्यत् समानम् ॥ ६९ ॥

बुद्धिव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
बुद्धिव्यक्तिर्बुद्धिताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७० ॥

साङ्ख्ययोगवेदान्त्यभिमता बुद्धिर्बुद्धिशब्दार्थः ॥ ७० ॥

अक्षव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
अक्षव्यक्तिस्त्वक्षताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७१ ॥

विप्रतिपन्नमिन्द्रियसमुदायमेकैकं चक्षुरादिकं वाऽभिप्रेत्याक्षव्यक्तिरित्युक्तम् ॥ ७१ ॥

ज्ञानव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव
ज्ञानव्यक्तिर्ज्ञानताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७२ ॥

जडज्ञानं ज्ञानशब्दार्थः ॥ ७२ ॥

रागव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
रागव्यक्ती रागताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७३ ॥

इच्छा रागशब्दार्थः ॥ ७३ ॥

द्वेषव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥

द्वेषव्यक्तिर्द्वेषताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७४ ॥

द्वेषशब्दार्थस्तु स्पष्टः । एवं सुखदुःखप्रयत्नधर्माधर्मादि च पक्षीकृत्यात्मैक्यमनुमेयमिति भावः ॥ ७४ ॥

ननूक्तविधयैकस्यैवात्मनो रागद्वेषादिमत्त्वेन तन्नियतकर्तृत्वादिसर्वसंसारोऽपि तस्यैव स्यादिति शान्तिकर्मणि वेतालोदयन्यायापातः । न चाहङ्कारस्यैव रागादयो धर्मास्तन्नियतसंसारस्तस्यैव न त्वसङ्गस्य तत्साक्षिणश्चिदात्मन इति वाच्यम् । तथा सत्युक्तानुमानैस्तस्यैव सर्वत्रैक्यं साधितं स्यान्न तदतिरिक्तात्मन इत्यसमञ्जसं स्यादित्याशङ्क्य वस्तुत उक्तरूपस्याप्यात्मनोऽविद्याकृतरागादिमदहङ्कारतादात्म्याधीनरागाद्यन्वयः प्रातिभासिक उपेयते । तथा चोक्तानुमानैस्तादृशरागाद्यन्वयानुवादेन तत्साक्षिण एवैकत्वं साध्यते । अहङ्कारस्य तु प्रतिशरीरं स्वसमानसत्ताकभेदवत्त्वस्यानन्यथासिद्धानुभवादिसिद्धतयोक्तानुमानानां तद्विरोधेन न तत्र प्रवृत्तिरिति वैषम्यमभिप्रेत्य साक्ष्येकत्वसाधनफलमाह—

एवं सतीदमविवेकनिबन्धनं ते
कर्तृत्वमात्मनि विभाति न वस्तुभूतम् ॥
बालेन कल्पितमतीव विशुद्धरूपे
व्योम्नीव भूम्नि मलिनत्वमबोधहेतोः ॥ ७५ ॥

एवं सतीति । सर्वभूतस्थसाक्ष्यैक्ये सतीत्यर्थः । भूम्नीति विशेषणमात्मनि व्योम्नि च योजनीयम । कर्तृत्वादिभेदस्याश्रयभेदसापेक्षत्वाच्चिदात्मनश्चोक्तविधया सर्वत्रैक्यात्तदाश्रयताऽयोगात्तत्र तद्भानं भ्रम आकाशनैल्यभानवदित्यर्थः ॥ ७५ ॥

ननु कार्यकरणसंघातातिरिक्तः सर्वसाक्षी चिदात्मैव नास्ति यस्मिन् कर्तृत्वादिसंसारः कल्पितः स्यात् । न च स्वतो घटकुड्यादितुल्यसंघातस्य चित्प्रकाशाधीनचैतन्यभावं विना बाह्याभ्यन्तरस-

र्वकर्मकर्तृत्वानुपपत्तेः स्वतन्त्रश्चिदात्मोपेय इति वाच्यम् । आदित्यादिजडज्योतिरुपकृतेन्द्रियवृत्तिबलादेव तस्य सर्वव्यवहारसम्भवादित्याशङ्क्य तदभावेऽपि स्वप्नमनोरथसमाध्यादिगतव्यवहारदर्शनात् संघातगतचिदाभासद्वारेण तदीयसर्वव्यवहारप्रयोजक एकश्चिदात्मा सर्वत्राभ्युपेय इत्यभिप्रेत्याह—

बाह्यैरसौ रविनिशाकरवह्निवाग्भि-
र्ज्योतिर्गणैरुपकृतोऽपि हि कर्मजातम् ॥
निर्वर्तयन्न खलु तावकमन्तरेण
चैतन्यसन्निधिबलं पुरुषः करोति ॥ ७६ ॥

बाह्यैरसाविति । उपकृतः पुरुषः संघातो निर्वर्तयन्नपि क्वचित् कर्मणि समर्थोऽपि तावकं त्वत्कृतं चैतन्यसान्निध्याधीनचिदाभासरूपं बलमन्तरेण कर्मजातं सर्वकर्माणि न करोति खल्विति सम्बन्धः । उक्तोपपत्तिसूचनार्थः खलुशब्दः । अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति श्रुतिसूचको हिशब्दः ॥ ७६ ॥

ननु संघातगतकर्तृत्वादिप्रयोजकं यच्चैतन्यज्योतिस्तत्तद्धर्मतया तदन्तर्भूतमेवास्तु तस्य स्वातन्त्र्यानुपलम्भात् ततो न तदात्मा श्रुतिस्त्वीश्वरविषयेत्याशङ्क्याह—

ज्योतिर्द्वयान्तरित एव हि कर्मजातं
सर्वं करोति पुरुषोऽन्नमयः सदैव ॥
कर्मादिकारणविनिर्मितमस्य बाह्यं
ज्योतिस्त्वनित्यमनिमित्तकमान्तरं चित् ॥ ७७ ॥

ज्योतिर्द्वयेति । जडाजडज्योतिर्मध्यवर्ती वस्तुतस्तदसंसृष्ट इति यावत् । जडज्योतिरसंसर्गो दृष्टान्तत्वेनोक्तः । अन्नमयोऽन्नोपलक्षितभूतमयश्चैतन्यं न संघातान्तःपाति तदुपकारकज्योतिष्ट्वात्, आदि-

त्यादिवत् । इतरथा तदानन्त्यप्रसङ्गेन गौरवापत्तेः, उदाहृतश्रुतिविरोधश्च । न च सेश्वरविषया । कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इत्यादिवाक्यशेषासामञ्जस्यप्रसङ्गात् । ततश्चैतन्यस्य स्वातन्त्र्याक्षत्यनुरोधेन स एवात्मेत्यर्थः । तथापि तस्य चैतन्यस्य संघातोपकारकत्वादादित्यादिवदनित्यत्वं स्यादित्याशङ्क्याह— कर्मादीति । आदित्यादिपदप्रापकोपासना आदिशब्दार्थः । किं तदान्तरमिति वीक्षायामुक्तं चिदिति । आदित्यादेः कर्मादिसाध्यत्वात्तन्नाशे नाशस्यावश्यकत्वात्कर्मसाध्यत्वं तत्रोपाधिः । चैतन्यस्य त्ववस्थात्रयानुयायिनस्तदभावादुक्तलाघवाच्च नित्यमेवेत्यर्थः ॥७७॥

ननु शब्दादिविषयस्फुरणस्य कादाचित्कत्वात्सुखादिहेतुत्वाच्च तदात्मकचैतन्यं कथं न कर्मजन्यमिति तत्राह—

श्रोत्रादिजन्यमतिवृत्तिषु बाह्यशब्दा-
द्यर्थाकृतिर्विशति कर्मवशेन कर्तुः ॥
बोधाकृतिस्तु तव सन्निधिमात्रहेतु-
र्धीवृत्तिषु प्रविशति स्वरसेन नित्यम् ॥ ७८ ॥

श्रोत्रादीति । जन्यत्वं वृत्तिविशेषणम् । अर्थाकृतिरर्थप्रतिबिम्बः । धीवृत्तिषु प्रत्यक्षाप्रत्यक्षसर्वबुद्धिवृत्तिषु । सन्निधिरेव कर्माधीन इत्याशङ्क्योक्तं स्वरसेनेति । व्यापिचैतन्यस्वभावेनेत्यर्थः । शब्दाद्याकारबुद्धिवृत्तीनां स्वरूपेण कादाचित्कत्वात्सुखादिहेतुत्वाच्च कर्मजन्यत्वमावश्यकं, तासु चैतन्यप्रतिबिम्बरूपस्फुरणस्यापि कर्माधीनत्वे कदा चित्सतीष्वपि तासु स्फुरणं न स्यात् । न चैवमस्ति । तस्माद् वृत्युत्पत्तिमात्रमेव तत्र चैतन्यप्रतिफलनेऽपेक्ष्यते न कर्मेति न तत्साध्यं स्फुरणम्, न वा स्वरूपेण कादाचित्कं तत्, स्वरूपचैतन्यस्य सदा सत्त्वादिति भावः ॥ ७८ ॥

वृत्तिषु चिदाकारः कर्मनिमित्तः तद्गतान्याकारत्वात् तद्गतविषयाकारत्वादिशङ्क्यास्याप्रयोजकत्वमित्यभिप्रेत्य दृष्टान्तेनोक्तं

स्पष्टयति—

स्वाभाविकी हि वियदन्वितता घटादेः
क्षीरादिवस्तुघटना पुनरन्यहेतुः ॥
एवं धियामपि चिदन्विततानिमित्ता
शब्दादिवस्तुघटना खलु कर्महेतुः ॥ ७९ ॥

स्वाभाविकीति । घटना अन्विततां । अन्यहेतुः भोक्तुः कर्महेतुका । अनिमित्तेति छेदः ॥ ७९ ॥

ननु प्रमाणजन्यानित्यज्ञानव्यतिरेकेण तदुपाधिकं बोधाकृतिशब्दितं संवेदनमेव नास्ति यस्या निमित्तत्वं नित्यत्वं च स्यादित्याशङ्क्याह—

संवेदनं यदिह मानफलं प्रसिद्धं
तच्च प्रमातरि विकारिणि निष्ठितं नः ॥
तस्य प्रमातुरपि साक्षितयाऽन्तरात्मा
सर्वस्य तिष्ठति भवानविकाररूपः ॥ ८० ॥

संवेदनमिति । इह व्यवहारभूमौ यन्मानफलं प्रसिद्धं तदेव स्वप्रकाशं संवेदनं जडज्ञानस्येच्छादिवत्स्वपरव्यवहारासमर्थस्य मानफलत्वायोगात् स्वयंप्रकाशं मानफलमुपेयमिति तदेव संवेदनमित्यर्थः । तथापि प्रमातृव्यापाराहिता विषयगता स्वप्रकाशज्ञाततैव संवेदनादिपदाभिलप्या मानफलं तच्चानित्यमिति नेत्याह–तच्चेति । स्वप्रकाशे मानफले स्वतोऽन्यतो वोत्पत्त्यादेरसिद्धेर्जडधर्मस्य रूपादिवज्जडत्वनियमात्तस्य प्रमेयनिष्ठत्वायोगात् स्वाभिव्यञ्जकवृत्तितादात्म्यात्तद्द्वारा प्रमातृनिष्ठत्वमेव अहमुपलभ इत्याद्यनुभवानुरोधादित्यस्मन्मतं युक्तमित्यर्थः । तर्हि प्रमातुरेव स्वनिष्ठसंवेदनेन सर्वसाधकत्वसम्भवात् किं तदतिरिक्तसाक्षिणेत्याशङ्क्य मातृमानादौ मातृमानान्तरासम्भवात् स्वस्य स्वस्मिन्वृत्तिविरोधात्तत्साधकं वस्तुतः स्वतन्त्रं नित्यमेकं मानफलत्वादिकल्पनारहितं स्वप्रकाशं संवेदनं स-

र्वसाक्षिभूतमुपेयं तदेवैष त आत्मा सर्वान्तर इत्यादिश्रुत्युक्तं त्वत्-स्वरूपमित्याह—तस्येति ॥ ८० ॥

ननूक्तरूपसाक्षिसद्भावेऽपि न तन्मम स्वरूपम्, अहंप्रत्यये प्रकाशमानस्यैव मत्स्वरूपत्वात्तत्र कर्त्रादिरूपस्यैव प्रकाशमानत्वादित्याशङ्क्य वस्तुत उक्तरूपस्यैव तवाहंप्रत्यये विपर्यस्ततयाऽन्यथाप्रकाशमानत्वात्तद्गोचरकर्त्रादिरूपं स्थूलादिरूपवत्तव नैवास्तीत्यभिप्रेत्याह—

कर्त्रादिसंनिधिबलेन तवापि कर्तृ-
भोक्तृप्रमातृवपुरापतति भ्रमेण ॥
तद् बुद्धिसंश्रयमनात्मगतं प्रतीचि
शुद्धेऽपि पश्यसि तमःपटलावृताक्षः ॥ ८१ ॥

कर्त्रादीति । ननु स्थौल्याद्याश्रयदेहवत् स्वतःकर्तृत्वादिमदात्मनोऽन्यन्नास्ति यत्संनिधिबलेनात्मनि तद्भ्रमः स्यादित्याशङ्क्य विज्ञानं यज्ञं तनुते, अहमिहैवास्मीत्यादिश्रुत्यनुभवसिद्धा साभासबुद्धिरेव तद्वती, तदविवेकादेवात्मनि कर्तृत्वादिभ्रम इत्याह—तद्बुद्धिसंश्रयमिति । तत्कर्त्रादिवपुः कर्तृत्वादीति यावत् । किं च कर्तृत्वादिर्न तावदात्मपरिणामो निरवयवस्य तस्य हेतूपरागायोगेन परिणामायोगात् स्वत एव तत्परिणामित्वे मुक्त्यभावप्रसङ्गादविकारित्वश्रुतिविरोधाच्च । नाप्यात्मनि मनःसंयोगजो गुणः, निरवयवे प्रदेशवृत्तिसंयोगायोगात् । अत एव न मनस्तत्र तत्साधकं, न चान्यत्तत्साधकमस्ति, तस्मादात्मनो निर्गुणत्वश्रुतेः कामसङ्कल्पादेर्मनोधर्मत्वश्रुतेश्च तन्नियतकर्तृत्वादेरपि मनोधर्मत्वादात्मनि तद्भ्रीभ्रम इत्यभिप्रेत्योक्तम्—अनात्मगतमिति ॥ ८१ ॥

किं च कर्तृत्वादि वस्तुतो नात्मा तद्धर्मश्च दृश्यत्वात्पर्वतादिवत् । न चाप्रयोजकत्वम् । तस्य स्वरूपत्वे आत्मधर्मत्वे च तेनाकारेण दृश्यत्वायोगात् । अनाश्रयस्य तस्य कदाप्यप्रतीतेश्च । तस्य दृश्यत्वा-

नुपपत्तेरेत्र विपक्षे बोधकत्वादित्यनुमानादपि तस्यात्मतद्धर्मत्वाभाव-सिद्धौ तत्प्रतीतिर्भ्रम इत्यभिप्रेत्याह—

कर्तृत्वादि च दृश्यवर्गपतितं द्रष्टुः स्वभावः कथं
सम्भाव्येत तव प्रसन्नविमलस्वच्छप्रकाशात्मनः ॥
यद्यद् दृश्यतया जगत्यभिमतं सर्वस्य तत्तद्भवेद्
दूरं द्रष्टुरिति प्रसिद्धमखिलं भूभृत्समुद्रादिकम् ॥ ८२ ॥

कर्तृत्वादि चेति । द्रष्टुः साक्षिणः । आत्मत्वादौ व्यभिचारमाशङ्क्य तदेवासम्प्रतिपन्नमित्यभिप्रेत्य सामान्यव्याप्तिमेवाह—यद्यदिति । द्रष्टुर्दूरं तदनात्मकमतद्धर्मश्चेत्यर्थः ॥ ८२ ॥

किं चेदं कर्तृत्वादिकमात्मनोऽग्नेर्ज्वालादिवदागन्तुकं किं वौष्ण्यादिवत् स्वाभाविकम् । नाद्यः, पूर्वोक्तविधया तद्धेतोर्दुर्निरूपत्वात्, नहि निर्हेतुकमागन्तुकं सम्भवति आगन्तुकत्वे वा तस्य रज्जुसर्पादिवन्मिथ्यात्वापत्तेश्चेत्यभिप्रेत्य द्वितीयं निराकरोति—

एतस्माच्च न जाग्रतस्तव भवेत् स्वाभाविकी कर्तृता
यद्येषा स्वत एव किं न भवति स्वप्नेऽपि ते तिष्ठतः ॥
यत् स्वप्ने परिपश्यसि त्वमखिलं त्वन्मायया निर्मितं
कर्तृत्वादि न सत्यमत्र घटते कात्स्न्र्यानभिव्यक्तितः ॥८३॥

एतस्मादिति । वक्ष्यमाणहेतोरित्यर्थः । चशब्दः प्रथमपक्षप्रतिक्षेपसमुच्चयार्थः । एतस्मादित्युक्तं विशदयति—यद्येषेति । अग्न्यौष्ण्यस्य यावदग्निरूपानुवृत्तिवत् कर्तृत्वादेरात्मनः स्वाभाविकत्वे यावदात्मस्वरूपं तदनुवृत्तिः स्यात् । न च साऽस्ति, स्वप्ने सत्यप्यात्मनि तदभावादित्यर्थः । ननूक्तहेतुरसिद्धो जाग्रतीव स्वप्नेऽपीदं करोमीदं भुञ्ज इत्याद्यनुभवेनात्मनि तदापि कर्तृत्वादेः सत्त्वादित्यत आह—यत्स्वप्न इति । स्वप्ने यत्कर्तृत्वादि त्वं परिपश्यसि तदखिलं मायया निर्मितमिति सम्बन्धः । कात्स्न्र्यानभिव्यक्तितः परमार्थवस्तूचितदेशकालसाधनसंपत्तिः कात्स्न्र्यं तत्पूर्विका या ऽभि-

व्यक्तिस्तद्रहितत्वादित्यर्थः । स्वे शरीरे यथाकामं परिवर्त्तत इति वचनात्स्वशरीर एव स्वप्नवस्तु दृश्यते, तत्र च वास्तवस्नानभोजनगमनाद्युचितदेशकालसाधनसंपत्तेरसम्भवात्तदभावेऽप्यभिव्यक्तस्य तस्यैन्द्रजालिकसृष्टवस्तुवदनिर्वचनीयमायामात्रविनिर्मितत्वान्मिथ्यात्वमावश्यकम् । तदुक्तम्—"मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्" इति । ततो न जागरितकर्तृत्वादेः स्वप्नेऽनुवृत्तिरिति सिद्धमित्यर्थः ॥ ८३ ॥

कात्स्न्र्यशब्दस्यार्थान्तरं वदन्स्वप्नस्य तदभावेनासत्यत्वमाह—

कात्स्न्र्यं हीष्टमबाधनं न खलु तत् स्वप्नस्य जाग्रद्धिया
बाधाद् बाधितमेव सत्यमिति चेन्नैवं विरोधान्मिथः ॥
सत्यत्वे न हि बाधितत्वघटना बाधे च सत्यं कुतः
सत्यं बाधितमित्यतीव पदयोः सम्बन्धिता दुर्घटा ॥८४॥

कात्स्न्र्यं हीति । भाष्यकारादिसंमत्यर्थो हिशब्दः । जाग्रद्धिया बाधादिति । यद्यपि सिद्धान्ते स्वप्नस्य मूलाज्ञानकार्यस्य जाग्रद्धिया भ्रमान्तररूपया सविलासाविद्यानिवृत्तिरूपबाधो न सम्भवति, तथापि रशनासमारोपितभुजङ्गस्यानन्तरोत्पन्नदण्डभ्रमेणेव जाग्रद्धिया स्वप्नदृष्टवस्तुनस्तदाप्यभावनिश्चयेन तन्मिथ्यात्वनिश्चयरूपबाधनं तदधीनमभिप्रेत्य तथोक्तमिति द्रष्टव्यम् । अथ रथान् रथयोगान्पथः सृजत इति श्रुतेः । स्वप्नदृष्टस्य जाग्रद्धिया निवृत्तिमात्रं बाधशब्दार्थं मन्वानः शङ्कते—बाधितमेवेति । पूर्वोक्तमिथ्यात्वनिश्चयं बाधमभिप्रेत्य परिहरति—नैवमिति । मिथो विरोधमेव प्रकटयति—सत्यत्व इति ॥ ८४ ॥

ननु मायां तु प्रकृतिं विद्यादित्यादौ वियदादिसत्यवस्तुप्रकृतित्वेन मायास्वरूपनिश्चयात्सूत्रकारेण च स्वप्नस्य मायामात्रत्वाभिधानात्सोऽपि जाग्रत्तुल्यस्तदभिप्रेतः, तथा च न तत्र रथा इत्यादिश्रुतिर्जाग्रद्रथाद्यभावपरेति न तस्यालीकत्वमित्याशङ्क्य लोकेऽनिर्वचनी-

याविद्याया एव मायापदार्थत्वाद्वैदिकमायाशब्दस्यापि तदर्थत्वात्तत्कार्यवियदादेरप्यनिर्वचनीयत्वाज्जाग्रद्वस्तुनोऽपि न सत्यत्वम्, जाग्रत्स्वप्नयोर्मिथ्यात्वाविशेषेऽपि स्वप्नस्याविद्यातिरिक्तकारणजन्यत्वात्प्रातीतिकत्वं झटिति बाधश्चोपपद्यत इत्यभिप्रेत्य वक्ष्यमाणमर्थजातं प्रतिजानीते—

मायामेनां जागरे लोकसिद्धा-
मुक्त्वा तद्वत् स्वप्नमायां विविच्य ॥
शक्तिव्याप्ती तत्र सिद्धे गृहीत्वा
मायासिद्धं जागरं साधयामः ॥ ८५ ॥

मायामेनामिति । लोकसिद्धाम् ऐन्द्रजालिकादौ प्रसिद्धामुक्त्वा अविद्यामात्रतया प्रतिपाद्य स्वप्नमायां सूत्रकारोक्तस्वप्नमूलमायां विविच्याविद्यात्मतया निरूप्य तत्राविद्यायां स्वप्ने वा सिद्धे वृद्धप्रयोगभूयोदर्शनाभ्यामवगते शक्तिव्याप्ती मायाशब्दस्य शक्तिकार्यत्वादिहेतोरविद्याकारणकत्वेन व्याप्तिं च गृहीत्वाऽविस्मृत्य जाग्रदवस्थागतं वियदादिप्रपञ्चमपि मायासिद्धमविद्याकार्यं श्रुतियुक्त्यनुमानैरनुपदमेव साधयिष्याम इत्यर्थः ॥ ८५ ॥

तत्र तावल्लोके मायायास्तमःशब्दिताऽविद्याऽभेदं साधयितुमुपक्रमते—

लोके हि मायाऽधिगता न माया
तमोऽतिरिक्ताऽस्ति निरूप्यमाणा ॥
व्याप्तिश्च शक्तिश्च निरूप्यमाणा
भविष्यतीहैव तु नेतरत्र ॥ ८६ ॥

लोके हीति । लक्षणादिना निरूप्यमाणा माया नाऽविद्याविलक्षणा शक्या निरूपयितुमिति वक्ष्यमाणत्वात् तस्या अविद्यामात्रत्वे फलितमाह—व्याप्तिश्चेति । इह अविद्यायाम् । तुरवधारणे । इतरत्र सत्यरूपमायायाम् । नैव भविष्यतीत्यनुषङ्गः ॥ ८६ ॥

ननु मणिमन्त्रौषधादिसत्यवस्तुमति पुरुषविशेषे लोके मायाविशब्दप्रयोगनियमात्तद्विशेषणीभूतमायाऽपि सत्यभूतैवेत्याशङ्क्य सा किं मन्त्रादिरूपसत्यवस्त्वेव तत्कृतः पुरुषशक्तिविशेषो वा, नाद्य इत्याह—

मायाविनो न मणिमन्त्रमथौषधं वा
मायेति शक्यमिह वर्णयितुं कुताश्चित् ॥
सत्यं हि तत् सकलमिष्टमियं त्वसत्या
माया ततोऽन्यादिह किं चन वर्णनीयम् ॥ ८७ ॥

मायाविन इति । मायाशब्दस्य मण्यादिवाचकत्वे बाधकाभावमभिप्रेत्य शङ्कते—कुत इति । बाधकाभावोऽसिद्ध इति परिहरति—सत्यं हीति । किं मण्यादीनां स्वस्वरूपेणैव मायाशब्दवाच्यत्वम् उत मिथ्याकार्यसंवलितरूपेण । आद्यः, केवलमण्यादिसम्बन्धावगमेऽपि तद्वति मायाविशब्दायोगात् । द्वितीयेऽपि मायामायाविवेकेनानिर्वचनीयगजतुरगादिकार्यसम्बद्ध एव मायाशब्दगोचर इति तदेव मिथ्याकार्यं मायाशब्दवाच्यमुपेयम् । तस्य च स्वरूपेण नानाजातियुक्तस्यैकशब्दवाच्यत्वायोगात्तादृशकार्यकल्पं तस्मिन्सर्वस्मिन्नुपादानतयाऽनुगतमनिर्वचनीयमज्ञानमेव मायाशब्दवाच्यम् । तत्तादात्म्याद् घटादौ मृदादिशब्दवत्तत्कार्ये मायाशब्दः, तद्योगात्पुरुषेऽपि मायाविशब्दो युज्यत इति न मन्त्रादिर्मायाशब्दार्थ इति भावः ॥ ८७ ॥

पुरुषे शक्तिविशेषे मायेति पक्षमनूद्य प्रतिक्षिपति—

सामर्थ्यमस्य मणिमन्त्रनिमित्तमस्ति
माया भविष्यति जनभ्रमहेतुरेषा ॥
इत्युच्यते यदि तदप्यतिफल्गु कस्मात्
सामर्थ्यमप्यवितथं हि तदिष्टमस्य ॥ ८८ ॥

सामर्थ्यमिति । तस्याः पार्श्वस्थजनभ्रामकत्वानुपपत्तिकल्प्य-

त्वात्कस्मादतिफल्गु नेति शङ्कते—कस्मादिति । तत्किं सामर्थ्यं कार्यानुरोधेनासत्यं कल्प्यते किं वा सत्यम् । नाद्यः, त्वदिष्टविघातापातात् अस्मदिष्टापत्तेश्चेत्याशयेनाह—सामर्थ्यमिति । तदपीति सम्बन्धः । मिथ्याकार्यकल्प्यमपीत्यर्थः । अस्य पुरुषस्य प्रतिवादिनो वा । द्वितीये कार्यस्यापि सत्यता स्यात्सत्यसामर्थ्याधीनकार्यस्यापि सत्यत्वनियमात्, ततश्च तत्र मायाशब्दप्रत्ययावनुपपन्नौ, भ्रमगोचर एव तयोः प्रसिद्धेरिति हिशब्दार्थः ॥ ८८ ॥

ननु काचकामलादिगतसामर्थ्यस्य सत्यत्वेऽपि तदधीनकार्यस्य मिथ्यात्ववत्पुरुषगतशक्तिविशेषरूपमायायाः सत्यत्वेऽपि तदधीनं कार्यं मिथ्या किं न स्यादित्याशङ्क्य तर्हि दोषगतसामर्थ्यवत्पुरुषे सा सहजा उत चक्षुरादौ भ्रमसामर्थ्यवदागन्तुकीति विकल्प्योभयथाऽपि दुर्निरूपत्वात्तस्याः सत्यत्वनिर्वहणमशक्यमित्याह—

न च शक्तिरस्य सहजा यदि वा
जनितास्ति केन चिदिति ब्रुवतः ॥
परिपुष्कलं स्वमतनिर्वहणं
भवितुं क्षमं तदनिरूपणतः ॥ ८९ ॥

न च शक्तिरिति । दोषादावपि सत्यसामर्थ्यासंप्रतिपत्तिसमुच्चयार्थश्चशब्दः । केन चिद् गुरुरूपेण पुरुषेण । परिपुष्कलं पक्षद्वयेऽप्यनवद्यम् ॥ ८९ ॥

तत्राद्यकल्पस्य दुर्निरूपत्वमुपपादयति—

न च शुक्रशोणितसमागमने
न च गर्भशायिन इयं विदिता ॥
न च मातृयोनिविवरादुदरा-
दपसर्पतो बहिरियं घटते ॥ ९० ॥

न च शुक्रेति । पुरुषस्य सतो जन्माभावात्तच्छक्तेः सहज-

स्वं तच्छरीरेण सह जन्मेति वक्तव्यम् तत् किं गर्भाधानसमये शुक्रशोणितसंसर्गादेव भवति किं वा गर्भ एव करचरणादिमत्पिण्डरूपपरिणामान्मातुरुदरादतिकष्टद्वारेण बहिर्निर्गमनाद्वा ? न सर्वथापि, तत्तत्समयानन्तरमेव मायाकार्यादर्शनेन तच्छक्तिकल्पकाभावात्, तत्सत्त्वासिद्धौ तस्या जन्मासिद्धेरित्यर्थः ॥ ९० ॥

द्वितीये गुरुः किं शिष्ये मण्यादिकमेव समर्पयत्युत तद्द्वारा शक्तिविशेषमपि । आद्ये न त्वदिष्टशक्तिसिद्धिः । न द्वितीयः, मण्यादेः रज्जुसर्पादिमिथ्यावस्तुकारणत्वेन बलीयसामर्थ्याज्ञानक्षोभकत्वेन मिथ्याकार्योपयोगोपपत्तौ पुरुषे शक्त्यादिकल्पकाभावेन तदयोगादित्यभिप्रेत्याह—

मणिमन्त्रमौषधमितीदृशकं
विरहय्य नापरमिहार्पयति ॥
पुरुषोऽपि कश्चिदत एवमियं
परतोऽपि नास्य घटनामटति ॥ ९१ ॥

मणीति । पुरुषो गुरुभूतोऽपरं सामर्थ्यमिह शिष्ये नार्पयतीति सम्बन्धः । आगन्तुकी पुरुषशक्तिर्मायेति पक्षासम्भवमुपसंहरति—अत एवमिति । इयं शक्तिरस्य पुरुषस्य घटनां सम्बन्धसम्भावनां नाटति न गच्छतीत्यर्थः ॥ ९१ ॥

ननु मायां तु प्रकृतिं विद्यात्, दैवी ह्येषा गुणमयी मम माया दुरत्ययेत्यादिवचनादिसिद्धा मायाशक्तिरीश्वरे तावदङ्गीकर्त्तव्या । न च साऽज्ञानमेवेति वाच्यम् । तस्य स्वाश्रयव्यामोहकत्वाद् भ्रान्तिविषयसदृशवस्त्वपेक्षयैव रज्ज्वादौ सर्पादिभ्रमहेतुत्वाच्च । ईश्वरमाया तु ततो विलक्षणा, न हि सा स्वाश्रयमीश्वरं मोहयति, यः सर्वज्ञः सर्ववित् योनिं योनिमधितिष्ठत्येक इत्यादौ तस्य सर्वज्ञत्वमायानियन्तृत्वश्रवणेन तन्मोहितत्वायोगात् । न च तस्या वियदादिभ्रमजनने तत्सदृशवस्त्वन्तरापेक्षाऽस्ति, तदकार्यस्य तस्याभावात् । सैव च मन्त्राद्युपासितेश्वरप्रेरिता योगिप्रभृतिजीववश्या सती इतरान्भ्रामयतीति

सर्वत्र माया न जन्या ततो नोक्तदोष इति मायाऽविद्याभेदवादिनमेकदेशिनं प्रत्याह—

अन्यस्य विभ्रमकरी पुरुषस्य शक्ति-
राकारमन्यमनपेक्ष्य मनीषिता चेत् ॥
वाच्येह लौकिकजनव्यवहारभूमौ
मायागिरस्तदपि दुर्घटमिष्टहानेः ॥ ९२ ॥

अन्यस्येति । स्वाश्रयादन्यस्येत्यर्थः । अन्यमनध्यस्तम् । आकारं भ्रमविषयाकारं तत्सदृशमिति यावत् । इहेत्येतद्विवृणोति—लौकिकेति । मायागिरो वाच्या मनीषिताऽभिमता चेदिति सम्बन्धः । दूषयति—तदपीति । किमुक्तरूपा मायाऽनिर्वचनीया उत सत्या, न प्रथमो घटते, अनिर्वचनीयत्वस्याविद्यास्वरूपलक्षणत्वेन मायाया अपि तथात्वे मायाऽविद्याभेदस्त्वदिष्टो न लभ्येत । न चानिर्वचनीयत्वाविशेषेऽपि स्वपरव्यामोहकत्वतदभावाभ्यां भेद इति वाच्यम् । अविद्याया अपि द्विचन्द्रकेशोण्ड्रादिभ्रमहेतोस्तन्मिथ्यात्वनिश्चयवत् स्वाश्रये व्यामोहकत्वाभावात् । त्वदुक्तरीत्या मायिनां जीवानामीश्वरार्पिततदीयमाययेतरव्यामोहकत्ववत्तयैव वियदादिसत्यत्वभ्रमहेतुभूतया तेषामपि व्यामूढत्वोपगमान्मायाया अपि स्वाश्रयव्यामोहकत्वस्य समानत्वात् । एतेन कर्तुरिच्छया कार्यकरी माया, अविद्या तु नैवमिति तद्भेद इति निरस्तम् । मायाक्षोभकमन्त्रादिप्रयोगवदविद्याक्षोभकालातचक्रभ्रमणादेरपि कर्तुरिच्छया निष्पाद्यमानत्वात् । क्षुब्धायां मायायां तत्कार्यस्य तदनिच्छायामप्यविद्याकार्यवदुत्पद्यमानत्वादुभयत्रापि कार्यस्येच्छा न तु विधानस्यापि तुल्यत्वात् । तरत्यविद्यां विततां हृदि यास्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः ॥ इत्यादिवचनान्मायाऽविद्ययोरभेद एव युक्त इति भावः ॥ ९२ ॥

माया सत्येति द्वितीयकल्पमपसिद्धान्तप्रसङ्गेन दूषयति–

मायामयत्ववचनादखिलं मृषेति
यद् भाष्यकारवचनं तदसङ्गतं स्यात् ॥
प्रत्यक्षमुत्सृजसि कारणमन्यदन्यद्
यत्किञ्चिदानयसि कष्टमतः किमन्यत् ॥ ९३ ॥

मायामयत्वेति । मायायाः सत्यत्वे तत्कार्यस्यापि सत्यत्वमावश्यकं स्यात्, ततश्च मायैव सन्ध्ये सृष्टिर्न परमार्थगन्धोऽप्यस्तीत्यादिभाष्यकारवचनमप्रमाणं स्यात् । मायाकार्यस्यापि सत्यत्वे मायामात्रं त्विति सिद्धान्तसूत्रमप्यसङ्गतं स्यात् । सन्ध्ये सृष्टिराह हीत्युक्तपूर्वपक्षानिरासात् । कात्स्न्र्येनानभिव्यक्तस्वरूपत्वादिति सौत्रहेतुरपि विरुद्धः स्यात्, तस्यासत्यत्वेनैव व्याप्तत्वात् । मायायाः सत्यत्वे तस्या ज्ञाननिवर्त्यत्वायोगाद् भूयश्चान्ते विश्वमायानिवृत्तिः, मायामेतां तरन्ति त इत्यादिवचनमप्यप्रमाणं स्यादिति भावः । किं च मायाद्रष्टॄणां तत्तत्त्वविषयाज्ञानमनुभवसिद्धमस्त्येव, ततश्च तस्यैवान्वयव्यतिरेकाभ्यां दृश्यमानयोर्हेतुत्वशब्दवाच्यत्वयोः सम्भवे सति तदतिरिक्ता शक्तिः शक्तिमती वा माया न कल्पनीया कल्पकाभावात्तदभावेऽपि कल्पनेऽतिप्रसङ्गादित्याह–प्रत्यक्षमिति ॥ ९३ ॥

ननु सर्वज्ञेश्वरेऽज्ञत्वप्रयोजकाज्ञानासम्भवात्तस्मिन् श्रुतिस्मृतिप्रसिद्धा माया ततोऽन्यैव जगत्प्रकृतिरूपाऽभ्युपगन्तव्येत्याशङ्क्य चिन्मात्राश्रिताज्ञानस्य तदात्मकेश्वरे सत्त्वेऽपि तस्य तं प्रति स्वरूपानावरकत्वात्तत्राज्ञत्वाद्यप्रयोजकाज्ञानमेवोक्तमायेत्यभ्युपगन्तुमर्हति, कृतम् अतिरिक्तमायाकल्पनयेत्यभिप्रेत्य परिहरति–

अज्ञानमेव च भविष्यति शक्तिरेषा
सर्वप्रपञ्चजननी परमेश्वरस्य ॥
मायाश्रुतिस्मृतिवचोभिरुदीर्यमाणा
शक्तिग्रहो हि परविभ्रमहेतुशक्तौ ॥ ९४ ॥

अज्ञानमेव चेति । श्रुतिस्मृतवचोभिरुदीर्यमाणा सर्वप्रपञ्च-जननी परमेश्वरस्य मायाशक्तिरेषाऽज्ञानमेव भविष्यतीति सम्बन्धः । न त्वतिरिक्तेति चशब्दार्थः । ननु मायाद्रष्टृणामनुभवसिद्धाज्ञानस्यैव मायात्वेन तदज्ञाने तेषु च मायामायाविशब्दप्रयोगः स्यादित्याशङ्क्यानादिवृद्धव्यवहारानुरोधेनेतरभ्रामकत्वविशिष्टेऽज्ञाने मायाशब्दस्य शक्तिग्रहात्पश्चात्तत्रैव तत्प्रयोगस्तथ तद्वत्यभ्रान्ते मायाविशब्दप्रयोगो नाज्ञानमात्रे तद्वन्मात्रे वा तयोः प्रयोग इति व्यवस्थोपपत्तेर्मैवमित्याभिप्रेत्याह—शक्तिग्रह इति ॥ ९४ ॥

ननु यूपाहवनीयादिशब्दवत् मायां तु प्रकृतिं विद्यादित्यादिवाक्ये मायाशब्दस्य प्रसिद्धार्थेतरपदसमभिव्याहारादलौकिकेश्वरशक्तौ जगदुपादाने सङ्गतिग्रहसंभवात् स्वाश्रयातिरिक्तव्यामोहकत्वविशिष्टाज्ञानेऽस्य शक्तिग्रहकल्पना न युक्तेति, नेत्याह—

न च प्रसिद्धार्थपदान्तराणां
प्रयोगसान्निध्यवशेन शक्तिः ॥
ग्रहीष्यतेऽस्येति समञ्जसं स्या-
दलौकिके शब्द इदं हि युक्तम् ॥ ९५ ॥

न च प्रसिद्धेति । ननूक्तं यूपाहवनीयादिशब्दवदिति तत्राह—अलौकिक इति । लोके वृद्धव्यवहारे यूपादिशब्दप्रयोगाभावात्तदधीनसङ्गतिग्रहस्यासम्भवाद्वेदे प्रयुक्तयूपादिशब्दस्य सङ्गतिग्रहं विना तद्युक्तवाक्यस्यावोधकत्वात्तत्सङ्गतिग्रहे चोपायान्तराभावात्प्रसिद्धार्थपदसमभिव्याहार एव तदुपायो युक्त इत्यर्थः ॥ ९५ ॥

मायाशब्दे ततो वैषम्यमाह—

अयं तु मायेति न शब्द एव-
मलौकिको लौकिक एव तस्मात् ॥
यदर्थवाची जगति प्रसिद्ध-
स्तमेव वेदेऽपि स वक्ष्यतीह ॥ ९६ ॥

अयं त्विति । एवं यूपादिशब्दवत् मायेत्ययं शब्दोऽलौकिको न, किं तु लौकिक एवेति सम्बन्धः । तु किं त्वर्थः । तस्य लौकिकत्वे फलितमाह-तस्मादिति । इह मायां त्वित्यादिवाक्ये लौकिकवृद्धव्यवहारे प्रयुज्यमानमायाशब्दस्य परभ्रमहेत्वनिर्वचनीय एव वस्तुन्युक्तविधया सङ्गतिग्रहात्तयोरेव शब्दार्थयोर्वेदे प्रत्यभिज्ञायमानत्वात्तमर्थमादायैव वाक्यार्थप्रतीत्युपपत्तौ तत्र पृथक्सङ्गतिग्रहे प्रमाणप्रयोजनयोरभावात्सोऽयुक्तः, अन्यथा व्रीह्यादिशब्दानामपि त्वदुक्तविधया वेदे पृथक् सङ्गतिग्रहप्रसङ्गादिति भावः ॥ ९६ ॥

ननूद्भिच्चित्रादिशब्दानां लोके खनित्राद्यर्थवाचिनामपि वेदे उद्भिदा यजेत पशुकामः, चित्रया यजेत पशुकामः इत्यादिप्रयोगेषु लौकिकार्थपरित्यागेन कर्मविशेषनामधेयतदर्थत्वं निरूपितं प्रथमे तन्त्रे ।

तथाहि-तत्र यजेतेत्यस्य यागेनेष्टं भावयेदित्यर्थे सति खनित्रादिवाचकोद्भिदापदस्य न तावत्सामानाधिकरण्येनान्वयः उद्भिद्यागपदयोरेकार्थत्वासंभवात् । न चोद्भिदेति पदेन तद्वतेति विवक्षितत्वात्तदुपपत्तिरिति वाच्यम् । तथा सति मत्वर्थलक्षणाप्रसङ्गात् । नापि वैयधिकरण्येन, तदा हि दध्यादिवदन्यतः प्राप्तयागानुवादेन गुणविधिर्वा स्यात् , सोमेन यजेतेतिवद्विशिष्टविधिर्वा स्यात् । नाद्यः, अधिकारान्तरस्थयाजिनाऽपूर्वयागोपस्थितेस्तदनुवादायोगेन तत्र गुणविध्यसंभवात् । नापि द्वितीयः, तदा हि उद्भित्साध्ययागेन पशुं भावयेदिति वाक्यार्थः स्यात् , स तु न संभवति, यागेन पशुं भावयेदित्येतावतैवाधिकारविधेर्निराकाङ्क्षत्वाद्विशिष्टविषयत्वे गौरवात् , रक्तपटन्यायेन उद्भिदोऽपि वाक्यार्थप्रवेशे योग्यतानुसारेण उद्भिदा यागं यागेन च पशुं भावयेदिखेवान्वयः स्यात् । ततश्च सकृच्छ्रुते यागे वाजपेयाधिकरणोक्तन्यायेन गुणविधानायोद्देश्यतया सिद्धत्वं फले विधेयत्वादनुष्ठेयत्वम् उद्देश्यत्वादेवानूद्यत्वं विधानादेवा-

ज्ञातत्वं गुणसाध्यतया प्राधान्यं फलसाधनतया च गुणत्वम् इत्येवं विरुद्धत्रिकद्वयापत्तिः स्यात् । सोमेन यजेतेत्यस्य तु द्रव्यविशिष्टयागोत्पत्तिविधित्वेनान्वयभेदाभावान्न विरुद्धत्रिकद्वयापत्तिः, तस्मादुद्भिदादिपदार्थस्य लोकसिद्धस्य खनित्रादेः कथमपि वेदवाक्यार्थेऽन्वययोगाद्विडित्थादिपदवत्समभिव्याहृतकर्मनामधेयत्वकल्पनया वैदिकोद्भिदादिपदस्य तत्र पृथक् शक्तिरिति सिद्धम् । तथा मायाशब्दस्यापि वेदे पृथगर्थवत्त्वमिति शङ्कते—

ननूद्भिदादेर्यदि नाम लोके
प्रसिद्धमर्थान्तरवाचकत्वम् ॥
तथापि भावार्थनिपीडितस्य
विजानते कर्माणि शक्तिमस्य ॥ ९७ ॥

ननूद्भिदादेरिति । भावार्थनिपीडितस्येति । भावार्थवाचियाजिसामानाधिकरण्येन त्याजितलौकिकार्थस्येत्यर्थः ॥ ९७ ॥

उक्तन्यायेन वैदिकोद्भिदादिपदस्य पृथगर्थवत्त्वमुपेत्य दार्ष्टान्तिके मायाशब्दे ततो वैषम्यं वदन् परिहरति—

सत्यं न गत्यन्तरमस्ति तत्र
ततस्तथा निश्चितमत्र नैवम् ॥
मायागिरोऽज्ञाननिवेदनेऽपि
न का चिदत्रानुपपत्तिरस्ति ॥ ९८ ॥

सत्यमिति । अङ्गीकृतमेवाह—न गत्यन्तरमिति । तत्र वैदिकोद्भिदादिपदे कर्मनामधेयत्वं विना लौकिकार्थार्पणेन वाक्यार्थप्रतिपत्त्युपयोगित्वं यतो नास्ति ततः कर्मनामतया वेदे पृथक्शक्तित्वं निश्चितमित्यर्थः । मायाशब्दे वैषम्यमाह—अत्र नैवमिति । तत्र हेतुः—मायागिर इति । अत्र मायां तु प्रकृतिं विद्यादिस्यादिवाक्ये मायाशब्दस्य लोके तदर्थत्वेनावगतस्याज्ञानस्य निवेदनेऽपि न का चिदनुपपत्तिरस्ति, तस्यानिर्वचनीयजगत्प्रकृतित्वयोग्यत्वादित्यर्थः ॥ ९८ ॥

मायाशब्दस्य लौकिकाज्ञानार्थत्वे यद्यपि मायां तु प्रकृतिं विद्यादित्यत्र न काचिदनुपपत्तिः तथापि मायिनं तु महेश्वरमित्यत्र साऽस्त्येव सर्वज्ञादिरूपमहेश्वरस्याज्ञानित्वानुपपत्तेरित्याशङ्क्य स्वतः कूटस्थासङ्गाद्वितीयाचिद्रूपेश्वरस्य जडप्रपञ्चजननानुकूलशक्तिरूपाज्ञानवत्त्वेऽपि तस्य तं प्रति जीववत्स्वरूपतत्त्वावारकत्वाभावेनेश्वरस्याज्ञत्वादिप्रसङ्गाभावस्यानेकत्र निरूपितत्वात्सर्वज्ञत्वाद्यविरोध्यज्ञानाश्रयत्वे न काचिदनुपपत्तिरित्याह—

अज्ञानं जडशक्तिमात्रवपुषा सर्वेश्वरस्येष्यते
सर्वज्ञत्वविरोधि तन्न च भवेदुक्तप्रकारेण नः ॥
सर्वज्ञेश्वरसंश्रया भवति सैवाज्ञानमाया श्रुतौ
तस्माद्विद्धिदिवेति वर्णनमिदं वैषम्यदुष्टं तव ॥ ९९ ॥

अज्ञानमिति । मात्रचा सर्वेश्वरं प्रत्यज्ञानस्य तत्त्वावारकत्वं निवारयति । श्रुतौ मायिनमित्यादिश्रुतौ सैव लोकसिद्धाज्ञानरूपा माया सर्वज्ञेश्वरसंश्रया विवक्षिता भवतीति शेषः । वैदिकमायाशब्दस्य लोकसिद्धार्थावेदनेऽनुपपत्त्यभावात्तत्स्योद्विद्यादिपदसाम्योक्तिरयुक्तेति फलितमाह—तस्मादिति ॥ ९९ ॥

ननु लोके मायाशब्दोऽज्ञानवाचीति कथं येन वेदेऽपि तदर्थः स्यात, न तावन्मायाविनोऽज्ञानं तदर्थः, तस्य विशेषदर्शनवतो भ्रमाभावेन तन्मूलाज्ञानायोगात । पार्श्वस्थानां तद्विषयाज्ञानवत्त्वेऽपि तेषु मायावित्वप्रसिद्ध्यभावान्मायाशब्दस्य तदज्ञानवाचित्वस्याप्ययोग इत्याशङ्क्य द्रष्टॄणां भ्रमोपादानभूताज्ञानमेव लोके मायाविनो मायेति गीयते तच्च चिन्मात्राश्रयविषयं मूलाज्ञानमेवेति गूढाभिसन्धिः परिहरति—

मायाऽनिर्वचनीयमेव तु तमो मायाविनो गीयते
द्रष्टॄणां भ्रमकारणं विषयता मायाविता तस्य तु ॥
तं हस्त्यादिविकल्पनाघटितवन्मूढाशया जन्तवो
रज्जुं सर्पतयैव तद्विरहितं जानन्त्यबुद्धत्वतः ॥१००॥

मायाऽनिर्वचनीयमिति । एवेति तमसः सत्यत्वं वारयति । तुरवधारणे तम एवेति तदर्थः । ननु मायाविनि व्याघ्रादिभ्रमकारणमज्ञानं न तस्यास्ति किं तु द्रष्टृणामेव तत् , मायावी तु तद्विषय एव न तदाश्रयः, ततश्चान्याश्रिताज्ञानस्य मायात्वे तदनाश्रयः स कथं मायावी स्यादित्युक्ताभिसन्धिमजानतः शङ्कामङ्गीकृत्यैकदेशिभिरुक्तं परिहारमाह—विषयतेति । तुरवधारणे । तस्याज्ञानस्य विषयतैव मायावित्वं न तदाश्रयत्वं लोके मायाद्रष्टृभिरज्ञात एव पुरुष मायाविशब्दप्रयोगप्रत्ययनियमादित्यर्थः । पुरोऽवस्थितस्य मायाविनस्तैरज्ञातत्वमेव कथमित्याशङ्क्य तस्यान्यथा तैर्दृश्यमानत्वाद्यथावदज्ञातत्वं रज्ज्वादाविव कल्प्यमित्याह—तं हस्त्यादीति । व्याघ्रादिरादिपदार्थः । हस्त्यादय एव विकल्पना विविधरचनात्मिकास्तदुघटितवत्तद्भावमापन्नवज्जानन्तीति सम्बन्धः । वतिना सूचितं स्पष्टयति—तद्विरहितमिति । वस्तुतो हस्त्यादिभावरहितं तं मायाविनं तदात्मना भ्रान्त्या यतो जानन्ति ततस्तस्य यथातथ्येनाज्ञातत्वमावश्यकमिति तदेव तस्य मायावित्वमित्यर्थः ॥ १०० ॥

ननु सूर्यादौ नभोगतत्वेन यथावत्प्रतिभासमानेऽज्ञातत्वाभावेऽपि जलादिगतत्वादिरूपेण प्रतिबिम्बभ्रमदर्शनान्न भ्रमाधिष्ठानस्याज्ञातत्वं नियतं, तथा च कथं तेन मायाविनोऽज्ञातत्वसिद्धिरित्याशङ्क्य सोपाधिकभ्रमाणामुपाधिप्रतिबद्धाधिष्ठानतत्त्वबोधनिवर्त्यत्वाभावेऽपि निरुपाधिकभ्रमाणां नियमेनाधिष्ठानतत्त्वबोधनिवर्त्यानां तदज्ञातत्वाधीनत्वं नियतमेव मायाविगोचरहस्त्यादिभ्रमस्योपाधेरनिरूपणान्निरूपाधित्वे न विवाद इत्यभिप्रेत्य तस्याधिष्ठानतत्त्वबोधयोग्यत्वमुपपादयति—

सम्यग् ज्ञानबलेन तं विरहितं हस्त्यादिभिर्यत्क्षणे
जानीयुस्तदनन्तरं न स भवेद्धस्त्यादियुक्तः पुमान् ॥
तेनास्मत्तम एव तत्र विषये मायाऽस्तु मायाविनः
सोऽज्ञातो वयमज्ञकोटिपतिता मायी स तेनोच्यते ॥१०१॥

सम्यग्ज्ञानेति । मायाविना मन्त्राद्युपसंहारे कृते द्रष्टॄणां नेत्रादिप्रतिबन्धाभावादप्रतिबद्धसंनिकर्षादयमसौ मम रथहस्त्यादिरूप इति तं मायाविनं यदा तत्त्वतो जानीयुः पार्श्वस्थास्तदनन्तरं तेषां पूर्ववत्तद्गोचरभ्रमाभावात्स तत्त्वबोधयोग्य इत्यर्थः । तत्त्वबोधनिवर्त्यभ्रान्त्यधिष्ठानस्याज्ञानविषयत्वनियमे फलितमाह—तेनास्मादिति । येन मायाविगोचरमज्ञानं द्रष्टॄणां सिद्धं तेनेत्यर्थः । तत्र विषये तद्विषयमिति यावत् । उभयसम्बन्ध्यज्ञानस्य मायात्वे कथं तद्विषयस्यैव मायावित्वं न तदाश्रयस्येत्याशङ्क्य तदाश्रयस्याज्ञत्वभ्रान्तत्वादिमतो मायावित्वस्य क्वाप्यदर्शनादज्ञत्वादिरहितस्य तद्विषयस्य लोकवेदयोर्मायावित्वेन व्यवहाराच्च स एव तथोच्यते इति निगमयति—सोऽज्ञात इति ॥ १०१ ॥

एवमज्ञानात्मकमायाया आश्रयविषयभेदमङ्गीकृत्य तद्विषयस्यैव मायावित्वं यदेकदेशिनोक्तं तदाक्षिपति—

नन्वेवं सति रज्जुखण्डलकमप्यज्ञातमज्ञानिभि-
र्मायावीति गिरोच्यतां न तु तथा लोके प्रसिद्धिः क्वचित् ॥
तेनाज्ञाताविलक्षणत्वमुचितं मायाविनो लौकिका
मायावीति पुमांसमेव निपुणं येनाङ्गुरत्यादरात् ॥१०२॥

नन्वेवमिति । अज्ञानविषयस्य मायावित्वे सतीत्यर्थः । खण्डलकं खण्डः । अपिशब्दः स्थाणुत्वेन भ्रमविषयपुरुषसमुच्चयार्थः । उच्यताम् उच्येत । प्रसिद्धिर्व्यवहारः । येनाज्ञातत्वमतिप्रसङ्गि तेन मायाविनो मायावित्वस्याज्ञाताविलक्षणत्वम् अज्ञातत्वादन्यत्वमेव वक्तुमुचितमित्यर्थः । मायामयहस्त्यादिभावं विना तटस्थतया स्वरूपेण दृश्यमानेऽपि नेरज्ञातत्वरहिते मायावित्वं येन तेनापि नाज्ञातत्वं मायावित्वमित्याशयेनाह—लौकिका इति ॥ १०२ ॥

एवमेकदेशिमते पूर्वपक्षिणा दूषिते स्वाशयं प्रकटयन्नाह सि-

द्धान्ती—

नैवं भ्रान्तिनिमित्तकारणमयं संगृह्य सर्वक्षणे
मन्त्रादिप्रचुरं प्रयत्नजनितं तज्जीवनो वर्त्तते ॥
तेनात्रैव तु लोकरूढिरभवन्मायावितागोचरा
यद्वद्ब्राह्मणतापसिद्धिरभवन्मुक्त्वा परिव्राजकान् ॥१०३॥

नैवमिति । यथैकदेशिनोक्तं नैवं किं तु शुद्धचिन्मात्राश्रयविषयं मूलाज्ञानमेव लोकेऽपि माया, सैव लौकिकमायोपादानं, तदधीनाज्ञत्वादिरहितः परमेश्वर एव तयाऽज्ञान् भ्रामयन्सर्वत्र मुख्यो मायावीति भावः । तर्हि कथं लोके जीवविशेषे मायावित्वप्रसिद्धिरित्याशङ्क्य मायाक्षोभकमन्त्रादिप्रयोक्तुस्तत्कार्योत्पत्त्यादौ स्वातन्त्र्यात्तत्कृतव्यामोहाभावाच्च मुख्यमायाविसदृशत्वादज्ञातमुख्यस्य तस्मिन्मुख्यवल्लोके मायावित्वव्यवहारो न तज्ज्ञामूढेष्वभिप्रेत्याह—भ्रान्तिनिमित्तेति । अयं प्रतारकः पुमान्मन्त्रादिप्रचुरं मन्त्रौषधादिप्रधानं प्रयत्नजनितं यत्नेन प्राप्तं, प्रयत्नगुणितमितिपाठे तेन वर्धितं प्रतिघातरहितमिति यावत् । एतादृशं भ्रान्तिनिमित्तकारणं संगृह्य तज्जीवनस्तद्रूपजीवनोपायत्वानयं सर्वक्षणे वर्त्तते इति सम्बन्धः । तेन मायया सहोक्तसम्बन्धविशेषेण, तुशब्दोऽवधारणार्थोऽनेन सम्बध्यते । अत्र मायाक्षोभके पुंसि मायावितागोचरा लोकरूढिर्मायाविशब्दस्यायं मुख्योऽर्थ इति लोकं प्रसिद्धिरभवदित्यर्थः । ननु मायाविशब्दस्य यौगिकत्वाद्योगस्य मायासंबन्धस्य द्रष्टृष्वपि सत्त्वात्कथं तत्क्षोभक एव तत्प्रयोगप्रत्ययाविसाशङ्क्य सामर्थ्याविशेषेऽपि पूर्वपूर्वप्रचुरप्रयोगप्रत्ययवशादेकत्रैव तौ भवतो नान्यत्रेत्येतद् दृष्टान्तेनाह—यद्वदिति । यत्र परिव्राजका अपि विवक्षितास्तत्र केवलब्राह्मणशब्दात्तदप्राप्तिरिति परिव्राजकशब्दस्यापि प्रयोगदर्शनात्केवलब्राह्मणशब्दात्परिव्राजकप्रसिद्धिर्यथा नेत्यर्थः । यद्वा अज्ञातमुख्यानां गौणे मुख्यवद्व्यवहारे दृष्टान्तमाह-यद्वदिति । अमौनं च मौनं च निर्विद्याथ ब्रा-

ह्मणः स ब्राह्मणः ।

शिखा ज्ञानमयी यस्य उपवीतं च तन्मयम् ।
ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः ॥

इत्याद्युक्तान्ब्रह्मविदः परिव्राजकान्मुख्यब्राह्मणान्विहाय शिखादिमत्स्वेव तत्प्रसिद्धिवदीश्वरं मुख्यं मायाविनं विहाय लोके प्राकृतेषु परभ्रामकेषु मायावित्वप्रसिद्धिरित्यर्थः ॥ १०३ ॥

एवं मायाऽविद्ययोरभेदं तत्र बाधकाभावं चोपपाद्य तदनुवादेन फलितमाह—

एवं तावल्लोकासिद्धा न माया
मिथ्याज्ञानाद्विद्यतेऽतश्च तत्र ॥
शक्तिव्याप्तिप्रत्ययौ वर्णयित्वा
वेदाल्लिङ्गाच्चान्यमायात्वसिद्धिः ॥ १०४ ॥

एवं तावदिति । लोकसिद्धमायातत्कार्ये अविद्यातत्कार्याभ्यां न भिद्येते इत्यर्थः । चोऽवधारणे । तत्र लोके मायाशब्दस्याविद्यायां शक्तिप्रत्ययं यन्मायाकार्यं तदविद्याकार्यमिति व्याप्तिप्रत्ययं च निर्वर्त्य वैदिकमायाशब्दाद्विद्यादिद्वैतप्रकृतेस्तत्कार्यद्वैतस्य च कार्यत्वलिङ्गान्मिथ्यात्वं साधयेदित्यर्थः ॥ १०४ ॥

शुक्त्याद्यज्ञाने मायात्वप्रसिद्ध्यभावात्कथं तयोरभेद इत्याशङ्क्य तथापि नाज्ञानादन्यत्र तत्प्रसिद्धिः मूलाज्ञानस्यैवोक्तरीत्या तथा प्रसिद्धत्वादित्याशयेनाह—

जाग्रद्भूमौ या प्रसिद्धेह माया
सा निर्णीता तावदज्ञानमेव ॥
तस्यां शक्तिव्याप्तिविज्ञानसिद्धे-
र्विज्ञातव्या सैव वेदानुमानात् ॥ १०५ ॥

जाग्रद्भूमाविति । ततश्च जाग्रत्प्रपञ्चस्य मायाकार्यत्वश्रुतेरुक्तविधया तन्मिथ्यात्वसिद्धिरिति फलितं निगमयति—तस्यामिति । द्वन्द्वैकवद्भावाद्वेदानुमानादित्येकवचनम् ॥ १०५ ॥

यदि मूलाज्ञानमेव माया तर्हि स्वप्नस्य झटिति बाध्यमानस्य तत्कार्यत्वायोगात्कथं तत्र सूत्रकारस्य मायामात्रत्वव्यपदेश इत्याशङ्क्य शुक्तिरजतादिवत्स्वप्नस्य किंचिदवच्छिन्नचैतन्याज्ञानकार्यत्वस्य वक्तुमशक्यत्वाज्जाग्रद्वत्पूर्णात्मन्येवाध्यासात्तद्गोचरमूलाज्ञानकार्यत्वमेव तस्यावश्यमुपेयम् । अत एव तस्य जाग्रत्प्रत्ययेन न सविलासाविद्यानिवृत्तिरूपो बाधो भवति किं तु मिथ्यात्वनिश्चयमात्ररूपः स च प्रसिद्धमायाकार्येऽपि समानः, तथा च स्वप्ने सूत्रकारस्य मायामात्रत्वनिर्देशो युक्त एवेत्याशयेनाह—

स्वप्नेऽप्येवं स्वप्नदृङ्मोहमात्रा-
दन्या का चिन्न प्रसिद्धाऽस्ति माया ॥
तत्रैवायं सूत्रकारस्य तस्मान्
मायाशब्दो वर्त्तते नापरत्र ॥ १०६ ॥

स्वप्नेऽपीति । तदुपादानभूताऽपीत्यर्थः । शुद्धचैतन्याज्ञानं मोहमात्रशब्दार्थः । अवच्छिन्नचैतन्यगोचराज्ञानमन्यपदार्थः । तस्मात्तत्रैवेति संबन्धः ॥ १०६ ॥

मोहमात्रं तत्रेत्युक्तम् । तथापि स्वप्नद्रष्टुर्व्यामूढत्वादन्यस्य च तत्र भ्रामकस्यादर्शनात् सूत्रकारः केनाशयेन तत्राविद्याशब्दं विहाय मायाशब्दं प्रायुङ्क्तेति वीक्षायां तदाशयमाह—

शक्तिव्याप्तिप्रत्ययौ कारयिष्यन्
स्वप्ने स्थित्वा प्रत्यगज्ञानमात्रे ॥
मायावाचा लोकवत्सूत्रकारो
वेदं लिङ्गं चोपनेतुं प्रवृत्तः ॥ १०७ ॥

शक्तिव्याप्तीति । सूत्रकारः प्रत्यगज्ञानमात्रे स्वप्ने स्थित्वा तमाश्रित्य शक्तिव्याप्तिप्रत्ययौ कारयिष्यन्मायाशब्दस्याज्ञाने शक्तिं मायामयत्वलिङ्गस्य दृश्यत्वकार्यत्वादेराविद्यकत्वेन व्याप्तिञ्च लोके ग्राहयन् लोकवत्तत्सिद्धस्वप्नादिवज्जाग्रत्प्रपञ्चस्याविद्यकत्वे मा-

यामात्रमित्यादिदृश्यत्वादिलिङ्गं च मानतया घटयितुं मायामात्रत्वप्रतिज्ञया स्वप्नं निरूपितवानित्यर्थः ॥ १०७ ॥

एवमाविद्यकत्वेन लोकसिद्धस्वप्ने सूत्रकारस्य मायामयत्वनिर्देशसामर्थ्यान्मायाऽविद्ययोरभेदमुपपाद्य मायायामज्ञानासाधारणधर्मप्रतिपादकभगवद्वचनसामर्थ्यादपि तयोरभेदे विमतिर्न कर्तव्येत्याह श्लोकत्रयेण । तत्र प्रथमं चिदात्मतत्त्वावारकत्वमविद्यालक्षणं मायायामपि भगवतोक्तं तद्विजानतां तयोरेकत्वनिश्चयोऽवश्यंभावीत्याह—

अज्ञानमावरणमावरणं च माया
सर्वेश्वरेण हरिणा दृढमभ्यधायि ॥
चैतन्यवस्तुन इति प्रतिपद्यमाना-
स्तत्त्वं तदेकमिति निश्चयतः प्रतीमः ॥ १०८ ॥

अज्ञानमावरणमिति । चैतन्यवस्तुन आवरणमिति संबन्धः । तदभिधानं प्राकृताभिधानवन्न मन्तव्यमित्याशयेनोक्तं सर्वेश्वरेणेति । दृढं कुतर्कैरन्यथा कर्तुमशक्यं यथा स्यात्तथेत्यर्थः । तदभिधायकं भगवद्वचनं तृतीयपद्ये वक्ष्यति । तन्मायाऽविद्यात्मकं तत्त्वं स्वरूपम् एकमभिन्नं स्वप्रकाशप्रत्यगभिन्नवस्तुनोऽनिर्वचनीयाज्ञानव्यतिरेकेणावरणासंभवात्तदावारकत्वेन भगवतोक्ता माया अज्ञानमेवेति निश्चिनुम इत्यर्थः ॥ १०८ ॥

किं च तत्त्वज्ञानैकनिवर्त्यत्वस्यानिर्वचनीयाज्ञानादन्यत्रासंभवात्तदप्यज्ञानस्यैव लक्षणं तच्च मायायामपि भगवतैवोक्तं, ततोऽपि तयोरभेदः श्रद्धया ग्राह्य इत्याह—

ज्ञानं निवर्त्तकमपि द्वितयस्य तस्य
गीतागतः करुणया भगवानुवाच ॥
तेनापि तत्त्वमिदमेकमिति प्रतीति-
रानीयते कथितलक्षणतुल्यभावात् ॥ १०९ ॥

ज्ञानं निवर्तकमिति । तस्य मायाऽज्ञानात्मकस्य । द्वितय-

स्य भ्रमादवगतस्य । गीतागतो भारतसारभूतगीतायां प्रवक्तृत्वेन प्रवृत्तः प्राकृतवत् रूपाख्याद्यर्थं प्रवृत्तिशङ्कां निवारयितुं करुणयेत्युक्तम् । तेनापीत्यस्य कथितेत्यनेन सम्बन्धः । तेन भगवद्वचनेन । इदम् मायाऽविद्यात्मकम् । तत्त्वं स्वरूपम् । एकमभिन्नम् ॥ १०९ ॥

कानि तानि भगवद्वचनानि यैर्मायाऽज्ञानयोस्तत्त्वावारकत्वं तत्त्वबोधनिवर्त्यत्वं चोक्तमिति वीक्षायां तानि निर्दिशति—

नाहं प्रकाश इति तावदनेन माया-
ऽज्ञानेन चावृतमितीतरदप्यभाणि ॥
मामेव ये तु परमं पुरुषं प्रपन्ना
ज्ञानेन तु प्रभृतिना च धिया निवृत्तिः ॥ ११० ॥

नाहं प्रकाश इति । नाहं प्रकाशः सर्वस्य योगमायासमावृत इत्यनेन मायावारकत्वेनाभाणि । एवमज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इत्यनेनाज्ञानमप्यावारकमभाणि, तेन चिदात्मतत्त्वावारकत्वमुभयोः समानमित्यर्थः । एवं मायाऽज्ञानयोस्तत्त्वज्ञाननिवर्त्यत्वप्रतिपादकं भगवद्वचनं दर्शयति—मामेवेति । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त इत्यनेन मायाया ब्रह्मज्ञाननिवर्त्यत्वमुक्तम् । न चानेन वचनेन भक्त्या मायातरणमात्रं न तु तत्त्वबोधात्तन्निवृत्तिरिति वाच्यम् । ज्ञानी त्वात्मैव मे मतमित्यादिवाक्यशेषे ज्ञानस्यैव प्रशंसादर्शनेन प्रपद्यन्ते इत्यनेन तस्यैव विवक्षितत्वात् । मायाया मुख्यतरणासंभवेन तरति ब्रह्महत्यामित्यादिवत्तरन्तीत्यनेन तन्निवृत्तेरेव विवक्षितत्वाच्च । ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन इत्यनेनाज्ञानस्यापि ज्ञाननिवर्त्यत्वमुक्तमिति तदप्युभयोस्तुल्यमित्यर्थः ॥ ११० ॥

ननु सर्वत्राज्ञानपदस्थनञा ज्ञानाभाव एवोच्यते । सच परिशेषात्तत्यागभाव एव, माया च भावरूपा कथं तदभिन्ना स्यादित्याशङ्क्य अधर्मासुरादिपदानां धर्मादिविरुद्धभावरूपदुरितादिप्रतिपादकत्ववदज्ञा-

नपदस्यापि ज्ञानाविरुद्धभावरूपमायाप्रतिपादकत्वोपपत्तेर्मैवमित्याह—
ज्ञानस्य प्रागभावादपरमभिहितं प्रत्यगज्ञानमेत-
त्संसारव्याधिबीजं कथितनयवशादेव बुध्यस्व बुद्ध्या ॥
ज्ञानेनाज्ञाननाशङ्कथयति भगवानेष गीतागतः स-
न्नज्ञानात् प्रागभावक्षय इति घटते तत्क्षये तत्प्रसूतेः ११॥

ज्ञानस्येति । किं च तत्त्वज्ञाननिवर्त्यतया श्रुतसंसारस्यानि-र्वचनीयं प्रत्यगज्ञानमेवोपादानमित्यनेकधा मानयुक्तिबलेनोपपादितं ततोऽपि न तदभावरूपमित्याह—प्रत्यगज्ञानमिति । किं च सर्वज्ञः श्रीहरिरेव ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन इत्यनेनाज्ञाननाशे हेतुं ज्ञानं कथयति स्म, तदज्ञानस्य ज्ञानप्रागभावत्वे नैव घटते । ज्ञा-नस्य स्वप्रागभावनाशरूपतया तद्धेतुत्वायोगात् । येषां मते प्राग-भावनाशः प्रतियोगिनोऽन्य इत्यभ्युपगमस्तेषां सोऽनुपपन्नः ज्ञानप्रा-गभावस्य तदन्यनाशस्य प्रागभावात्मत्वानुपपत्तेरागन्तुकनाशप्राग-भावोऽन्योऽभ्युपेयः स्यात्ततश्च तस्याप्यन्यो नाशस्तस्याप्यन्यः प्रा-गभाव इति मानहीनप्रागभावतन्नाशानवस्थादोषप्रसङ्गात् । किं च तन्मते ज्ञानसामग्र्यैव तदन्यनाशोत्पत्त्ययोगाज् ज्ञानमेव स्वप्रागभा-वनाशहेतुर्वक्तव्यः स न सम्भवति ज्ञानस्य स्वप्रागभावसमये जन्मा-सम्भवात्तन्नाशसमयोत्पन्नस्य तद्धेतुत्वायोगाच्च तन्नाशानन्तरमेव ज्ञा-नजन्म वाच्यं, ततश्च पश्चाद्भाविज्ञानस्य पूर्वभाविनाशहेतुत्वं सुतरा-मनुपपन्नमिति ज्ञानप्रागभावरूपाज्ञानस्य कथमपि भगवदभिहितज्ञान-निवर्त्यत्वासम्भवात्तन्निवर्त्यमज्ञानं भावरूपमेवोपेयमित्यभिप्रेत्याह—
ज्ञानेनेति ॥ ११ ॥

उक्तविधया मायाया अज्ञानात्मत्वे सति स्वप्नावस्थागतकर्तृत्वा-दिप्रपञ्चस्य सूत्रोक्तं मायामात्रत्वमज्ञानमात्रत्वमेव ततस्तन्मिथ्यात्वसि-द्धिरिति फलितमाह—
मायामात्रमतः समस्तमभवत् स्वप्ने प्रसिद्धं दृशः
कर्तृत्वादि तमोमयं वितथमेवाज्ञानमात्रं यतः ॥

तस्माज्जागरितेऽपि नैतदभवत् स्वाभाविकं यत् पुनस्तादृक्षं तव सर्वदैव तु भवेत् स्वप्नेऽपि चैतन्यवत् ॥११२॥

मायामात्रमिति । अतो मायाया अज्ञानत्वाद् दृशो दृगात्मनो यत्स्वप्ने समस्तं कर्तृत्वादिमायामात्रं प्रसिद्धमभवत्तत्तमोमयं वितथमेवेति सम्बन्धः । तदुद्रष्टृत्वादीनामवस्थोपाधिधर्माणां व्यभिचारेऽपि न तटस्थरूपस्य सर्वत्राव्यभिचाराद्व्यभिचारित्वम् । एवं सति तस्य कुतस्तत्र व्यभिचार इति भावः । स्वाभाविकत्वे बाधकमाह—यत्पुनरिति । तादृक्षं स्वाभाविकम् । कर्तृत्वादेः स्वाभाविकत्वे स्वप्नेऽप्यनुवृत्तिः स्यात्, चैतन्यवदित्यर्थः ॥ ११२ ॥

कादाचित्कमपि स्वाभाविकमस्तु पक्कामघटगतरक्तत्वश्यामत्ववदिति चेन्न । विकारिणि तस्य संभवेऽपि कूटस्थात्मन्यसंभवादित्याह—

सत्यप्यलुप्तचिति यत्त्वयि नास्ति कर्तृ-
भोक्तृप्रमातृमुखमन्यदपीह किं चित् ॥
जाग्रद्दशाऽवगतमप्यखिलं न तत्ते
स्वाभाविकं भवितुमुत्सहते विरोधात् ॥ ११३ ॥

सत्यपीति । न ह्यलुप्तचिद्रूपस्यागन्तुकं कर्तृत्वादि सहजं स्यादित्यर्थः । हेतोरदृष्टत्वे फलितमाह—अप्यखिलामिति । तदखिलमपि ते स्वाभाविकं परमार्थसद्भवितुं नोत्सहत इति सम्बन्धः । अप्रयोजकत्वमाशङ्क्याह—विरोधादिति । सतोऽपि व्यभिचारित्वे तस्य कदा चिदसत्त्वं स्यान्न च तत्संभवति सत्त्वासत्त्वयोरेकत्वे विरोधात् । तदुक्तं श्रीकृष्णेन—

नासतो विद्यते भावो नाभावो विद्यते सतः ॥ इति ।
तस्माद्व्यभिचारि सर्वमनिर्वचनीयमेवेत्यर्थः ॥ ११३ ॥

किं चासन्तोभिन्नयोर्गवाश्वादिमद्धर्मधर्मिभावानुपपत्तेस्तत्सत्यत्ववादिना तयोरभेदोऽपि वास्तवो वक्तव्यः, ततश्चैकस्यानुवृत्तावपर-

स्य व्याहृत्तिर्दुर्घटेति सदृष्टान्तमाह—

स्वाभाविकी हुतभुजः खलु नोष्णता तं
जातु प्रमुञ्चति न तामपि जातवेदाः ॥
एवं भवन्तमपि जागरितोपलब्धं
स्वप्ने भवानपि च जागरितं न मुञ्चेत् ॥ ११४ ॥

स्वाभाविकीति । जागरितोपलब्धं कर्तृत्वादि स्वप्ने न मुञ्चेदित्यनुषङ्गः । मुञ्चति च, तस्मात्कर्तृत्वादेरात्मनश्च धर्मधर्मिभावो न वास्तव इति शेषः ॥ ११४ ॥

ननु स्वप्नेऽपि जागरितवदेव व्यवहारदर्शनाज्जाग्रत्कर्तृत्वादि मुञ्चतीति कथमुक्तमित्याशङ्क्य तदुपपादयति—

स्वप्ने न जागरितमस्ति मृषात्वहेतोः
स्वप्नस्य सत्यमिति जागरितं वदन्ति ॥
स्वप्नस्य बाधनबलादमृतत्वमुक्तं
तस्माच्चिदेव तव रूपमतोऽन्यदार्तम् ॥ ११५ ॥

स्वप्न इति । स्वप्नस्य मृषात्वहेतोस्तद्विलक्षणजाग्रत्कर्तृत्वादि न तत्रास्तीत्यर्थः । ननु सिद्धान्ते जागरितस्यापि मृषात्वात्कथं स्वप्नवैलक्षण्यं तस्येत्यत आह—सत्यमितीति । जागरितोपलब्धवस्तूनामनिर्वचनीयत्वे समानेऽप्यविद्यातिरिक्तदोषाजन्यतया स्वोचितार्थक्रियासामर्थ्यरूपव्यावहारिकसत्यत्वस्य नियतान्वयव्यतिरेकविधिनिषेधशास्त्रसिद्धस्यौपनिषदात्मतत्त्वसाक्षात्कारात्प्राग् बाधाभावात्तत्सत्यत्वं जाग्रत्कृतदुरितध्वंसाय प्रायश्चित्तविधायका धर्मशास्त्रकारा वदन्ति । स्वप्नस्य तु निद्रादिदोषजन्यस्य प्राक्तनैरपि मिथ्यात्वेन निश्चितस्योक्तविपरीतत्वादनृतत्वमेव रज्जुसर्पादितुल्यं सूत्रकारादिभिरुक्तम् । ततश्च स्वप्नप्रपञ्चस्य जाग्रदुपलब्धादन्यत्वात्स्वप्ने न तदनुवृत्तिरित्यर्थः । दृग्दृश्ययोरनुवृत्तिव्यावृत्तिप्रतिपादनफलमाह—तस्मादिति । रूपं वास्तवस्वरूपम् । आर्तं नश्वरं तत्त्वधीबाध्यमिति यावत् ॥ ११५ ॥

जाग्रदवस्थागतस्यापि मृषात्वे तद्गतश्रुतेरपि तथात्वाद्धाष्पधूमादेरिव ततस्तत्त्वबोधो न स्यादित्याशङ्क्य सूचकश्च हि श्रुतेरिति-सूत्राभिप्रेतं परिहारमाह—

स्वप्नोपलब्धमखिलं वितथं तथापि
तत्सूचयत्यवितथं परमार्थवस्तु ॥
जाग्रद्दशावगतमप्यनृतं तथापि
तद्वत्तदप्यवगतिक्षममेव भूम्नः ॥ ११६ ॥

स्वप्नोपलब्धमिति । तत्स्वप्नोपलब्धं कुञ्जरारोहणादि अवितथं स्वप्नप्राप्तत्वद्बाधरहितम् । परमार्थवस्तु अर्थक्रियासमर्थेष्टवस्तु तदपि जाग्रद्गतमनृतमपि श्रुत्याचार्यादि । मिथ्यात्वाविशेषेऽपि तत्त्वमादिवाक्यस्य सर्वथा विषयाबाधात्तत्त्वावेदनसामर्थ्यात्तत्त्वबोधहेतुत्वं घटते, न तथाऽन्यस्य, तद्विषयस्य श्रुत्यादिबाध्यत्वादिति भावः ॥ ११६ ॥

ननु जाग्रत्स्वप्नयोर्मृषात्वे कथं तयोः पूर्वोक्तं वैषम्यं भवेत्, यद्यविद्यातिरिक्तनिद्रादिदोषजन्यत्वात्स्वप्नस्य प्रातिभासिकत्वं तद्दोषापगमे बाधश्चोपपद्यते, जागरितस्य तदभावाद्व्यावहारिकत्वमिति वैषम्यमुच्यते, तर्हि यावन्निद्रा तावत्स्वप्न एव स्यादिति सुषुप्तिर्न स्यात्, स्वप्नवैचित्र्यं च न स्यात्तद्धेतोर्निद्राया एकरूपत्वादित्याशङ्क्य स्वप्नस्यापि सुखदुःखपर्यवसायितयाऽदृष्टसाध्यत्वस्यावश्यकत्वात्सत्यामपि निद्रायां तदुपरमे स्वप्नलयात्सुषुप्तिः स्यात्कर्मवैचित्र्याच्च स्वप्नवैचित्र्यमित्याशयेनाह—

स्वप्नभ्रमोऽपि सुकृतादिनिबन्धनत्वा-
त्तावत् परिस्फुरति यावददृष्टमास्ति ॥
क्षीणे तु तत्र लयमेति जगन्निदाने
गाढे तमस्यनुभवावगते प्रतीचः ॥ ११७ ॥

स्वप्नभ्रम इति । तत्रादृष्टे क्षीण इति सम्बन्धः । प्रतीचस्त-

मसीति सम्बन्धः । गाढे सर्वविशेषप्रकाशशून्ये जगन्निदाने तमसि स्वप्नस्य लयं वदतो ग्रन्थकारस्य मूलाविद्याकार्यत्वं तस्याभिमतम् ॥ ११७ ॥

नन्वाशुतरविनाशिन्याः पुण्यपापक्रियायाः कालान्तरभाविस्वप्नादिहेतुत्वमेवानुपपन्नं कुतस्तदुपरमात्स्वप्नोपरम इत्याशङ्क्य कदाचित्सुकृतं कर्म कूटस्थमिव तिष्ठतीतिवचनाद्विधिनिषेधशास्त्रसामर्थ्याच्च कारकाश्रितक्रियायास्तत्कारकाणां च यावत्फलावसानं स्थायिसूक्ष्मरूपं कल्प्यते, नाशशब्दस्याप्यदर्शनवाचिनः सूक्ष्मरूपसत्त्वानुकूलत्वान्न तावता तदसत्त्वापत्तिः । तथा चादृष्टसूक्ष्मरूपेण स्थायिन्याः क्रियायाः शास्त्रावगतस्वप्नादिहेतुत्वादि युक्तमेवेत्याशयेनाह—

निष्पादिता सकलकारकवर्गसाध्या
सर्वेण कारकगणेन सहैव तावत् ॥
तिष्ठेत् क्रिया परमसूक्ष्मतयेक्ष्यमाणा
सर्वेश्वरेण पुरुषः फलमेति यावत् ॥ ११८ ॥

निष्पादितेति । तथापि जडस्य तस्य कथं कालविशेषे फलारम्भाय प्रवृत्तिश्चेतनस्याप्यज्ञस्य तत्प्रेरणाशक्तेरित्याशङ्क्य फलकालाभिज्ञेश्वरेक्षणप्रेरितं नियमेन तत्र व्याप्रियत इत्यभिप्रेत्याह—**ईक्ष्यमाणा सर्वेश्वरेणेति** । पुरुषः कर्मकर्ता । अर्थात्फलावसाने सूक्ष्मरूपमपि नश्यतीति द्रष्टव्यम् ॥ ११८ ॥

ननु विचित्रस्वप्नस्य विचित्रवासनावदज्ञानादेवोत्पत्तिसम्भवात्तत्र कर्मणो नोपयोग इत्याशङ्क्य वासनोद्बोधद्वारा तत्र तदुपयोग इत्याशयेनाह—

स्वप्नश्च जागरितमप्युभयं तवैव
मोहप्रसूतमपि कर्मफलं विभाति ॥
कर्मक्षये तदखिलं परमात्ममायां
माश्रित्य सूक्ष्ममवतिष्ठत एव लीनम् ॥ ११९ ॥

स्वप्नश्चेति । दृष्टान्तार्थं जागरितग्रहणम् । यथा ज्ञानकार्य-

मपि जागरितं यत्कर्म कुरुते तदभिसम्पद्यते इत्यादिवचनात्कर्मैकार्थम् एवमाविद्यकोऽपि स्वप्न उक्तवचनादेव कर्माधीन उपेय इत्यर्थः। तर्हि स्वप्नारम्भकवासनानां स्वप्नानुभवावसाने नाशात्पुनः स्वप्नो न स्यादित्याशङ्क्य स्वप्नस्यापि निरन्वयनाशाभावाच्चद्वासनाश्चान्याः पुनः स्वप्नहेतवः सुलभा इत्यभिप्रेत्याह-कर्मक्षय इति। तत् कर्मारब्धम्। अखिलं जाग्रत्स्वप्नदृश्यम् ॥ ११९ ॥

ननु किमिदं सूक्ष्मरूपं? वासनेति चेत्, सा किं पराभिमतभावनासंस्कारस्ततोऽन्या वा? नाद्यः, तस्यानुभवमात्रजन्यस्य स्मृतिमात्रहेतोस्त्वदिष्टदृश्यवस्तुजन्यत्वतद्धेतुत्वयोरसंभवान्नष्टस्य दृश्यस्य तद्रूपत्वासम्भवाच्च। न द्वितीयः, तदनिरूपणान्मानाभावाच्च। सा किमनुभूयमानस्थूलवस्त्वभिन्ना भिन्ना वा? नाद्यः, नष्टस्य स्थित्यवस्थातो विशेषाभावप्रसङ्गाद्वस्तुनो नित्यत्वापत्तेः, स्थूलसूक्ष्मरूपयोर्हेतुहेतुमद्भावानुपपत्तेश्चेति। द्वितीये स्थूलस्य नाशे सूक्ष्मरूपेणावस्थानोक्तिर्विरुध्येत, वस्तुनो निरन्वयनाशोऽसतश्चोत्पत्तिरित्यपि प्रसज्येत। न चैतदिष्टम्। मानमपि तत्र न तावत्प्रत्यक्षमस्ति, अननुभवात्। अन्यथा तत्र विप्रतिपत्त्यभावप्रसङ्गात्। नाप्यन्यन्मानमस्ति, तत्र लिङ्गाद्यनिरूपणादिति तत्राह—

उत्थानलिङ्गकृतकल्पनयैतदेवं
विज्ञायते न तु तथावगतं तदानीम् ॥
अज्ञानलीनमखिलं जगदस्ति सूक्ष्मं
तत्रेति नानुभवनादवगम्यते हि ॥ १२० ॥

उत्थानेति। यद्यप्याविद्यककार्याणां वासनापरपर्यायं सूक्ष्मरूपं तेभ्यस्तत्कारणाच्च भेदाभेदाभ्यां सत्त्वासत्त्वाभ्यां च दुर्निरूपमनिर्वचनीयत्वादेव, तथापि कार्याणामुत्पत्तेः प्राक् सत्त्वेऽसत्त्वे वा तदयोगात्सैवानुपपद्यमानाऽनिरूपितविशेषसूक्ष्मरूपं तेषां कल्पयति। न चानुपलब्धिविरोधः। तस्य तदोपलम्भायोग्यत्वात्। नैवेह किं चनाग्र आ-

सीन्मृत्युनैवेदमावृतमासीत् तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियते, अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे इत्यादिश्रुतिस्मृतिपर्यालोचनयाऽपि तदुपेयमिति भावः । तर्हि जागरितादाविव स्वप्नेऽपि सर्वोपाधिसत्त्वे सता सोम्य तदा संपन्नो भवतीत्यादिनोच्यमाना सत्संपत्तिर्विरुध्येतेत्याशङ्क्य तदा तदनुपलम्भेन तदधीनविशेषाभावमात्राच्चदुक्तिरुपपन्नेत्याशयेन तदा तदनुपलम्भमुपपादयति—अज्ञानलीनामिति । तत्र सुषुप्तौ । इतिर्हेतौ । सतोऽपि सूक्ष्मस्यानुपलम्भो लोके प्रसिद्ध इति हिशब्दार्थः ॥ १२० ॥

ननु सुषुप्तावज्ञानमेव नास्ति तत्साधकाभावात्, यत्र लीनं जगत्सूक्ष्मरूपेण तिष्ठेत् न तावत्तत्रेन्द्रियव्यापारोऽस्ति तेषां तदोपरमात्तदधीनलिङ्गादिधीरपि तत्र न सम्भवति । न च साक्षिणैव तत्सिद्धिः, केवलस्य तत्साधकत्वेऽतिप्रसङ्गादित्याशङ्क्य केवलसाक्षिणा तदाऽज्ञानमेवानुभूयते तदान्यस्य तद्ग्राह्यस्याभावादित्यभिप्रेत्याह—

अज्ञानमेव तु तदावगतं त्वदीयं
येनोत्थितो वदसि नावगतं मयाऽद्य ॥
सुप्तेन किं चिदपि गाढतमस्यभूवं
चिप्तः समस्तविषयावगमासमर्थः ॥ १२१ ॥

अज्ञानमेवेति । अवगतमेवेति सम्बन्धः । तुशब्दोऽन्यावगतिनिरासार्थः । तदाऽज्ञानावगतिरपि नेत्याशङ्क्याह—येनेति । सुप्तेन मयेति सम्बन्धः । किं चिन्नावगतमित्यत्र हेतुमाह—गाढेति । असमर्थोऽभूवमिति सम्बन्धः । स्वापकालीनाऽज्ञानव्यवहारस्य व्यवह्रियमाणाज्ञानावगत्यधीनत्वात्तत्सिद्धिरित्यर्थः ॥ १२१ ॥

ननु स्वापादुत्थितस्यास्मरणलिङ्गकस्वापकालीनज्ञानाभावगोचरानुमानादेवोक्तव्यवहारोपपत्तेः कथमनेन स्वापे त्वदभिमताज्ञानतदनुभवसिद्धिरिति चेन्न। सत्यपि ज्ञाने कालान्तरे तस्य तद्विषयस्य वा स्मरणानुदयस्य बहुशो दर्शनेन व्यभिचारिणोऽस्मरणस्य ज्ञाना-

भावगमकत्वायोगाल्लिङ्गान्तरस्याप्यनिरूपणात्तस्य न किं चिदवगतं स्वापे मयेत्येतत्तत्रसमस्तवस्त्वज्ञानस्मरणमेवेत्यवश्यमाश्रयणीयम्। न च स्वापे तदनुभवाभावे तत उत्थितस्य तत्स्मरणं घटते, नापि तत्स्मरणं तन्मूलानुभवश्च ज्ञानाभावगोचराविति युक्तम्। परमते तदा धर्म्यादिज्ञानाभावे तदयोगात्तदङ्गीकारे च सुषुप्तिभङ्गप्रसङ्गात्, न किं चिदवगतमित्यनुपपत्तेश्च। सिद्धान्त्यभिमतसाक्षिणापि विशिष्य प्रतियोग्युपस्थितिं विना ज्ञानाभावग्रहणासम्भवात्तत्स्मरणस्याप्यनुपपत्तेः। तस्मात्समस्तसत्तागोचरभावरूपाज्ञानमेव तदा साक्षिणाऽनुभूतं पश्चाच्च स्मर्यत इति वक्तव्यमित्यभिप्रेत्य विपक्षे बाधकमाह—

अज्ञानमत्र यदि नानुभवात् प्रसिद्धं
नाज्ञासिषं त्विति कुतस्तव निश्चयोऽभूत्॥
अज्ञानमस्त्यवगतं च सुषुप्तिकाले
तेनेति निश्चिनु तवानुभवप्रमाणात्॥ १२२॥

अज्ञानमत्रेति। तवोत्थितस्येति शेषः। सर्वकार्यलयस्थानं तदनुभवं च साधितमुपसंहराति—अज्ञानमस्तीति। तेन नाज्ञासिषमितिनिश्चयेन। ननु स्वापे न किञ्चित्प्रमाणं प्रवर्तते कथमज्ञानानुभवं निश्चिनुयाम्? तत्राह—तवानुभवेति। साक्षिणोऽप्यहङ्कारतद्धर्मादिसाधकत्वेन कल्पितत्वात्तत्सिद्धं नापह्नवमर्हतीत्याशयेन प्रमाणादित्युक्तम्॥ १२२॥

ननूक्तपरामर्शसामर्थ्यात्सुषुप्तावज्ञानतदनुभवौ चेत् स्तः, तर्हि नाहं तदा किं चिदवेदिषमित्यपि परामर्शदर्शनात्तदाहंकारतदनुभवावपि कल्प्येयाताम्। न चैतदिष्टमुपपन्नं वा। तदा सकलकार्यलयाभावाद्विशेषविज्ञानभावाच्च सुषुप्तिभङ्गप्रसङ्गादित्याशङ्क्य तदा सत्संपत्तिप्रतिपादकवचनविरोधादहंकारस्तदनुभवश्च नैवास्ति, सति संपद्य न विदुरित्यादिवचनादज्ञानमात्रं तत्परामर्शबलात्तन्मात्रानुभवश्चोपेयते,

ततो नोक्तदोष इत्याशयेनाह—

स्पष्टानुभूतिविषयो न तमस्तदानी-
मासीदहंकरणहीनतयाऽधुना तु ॥
निष्पाद्य कार्यमिदमंशमहं न जाने
मूढोऽस्मि चेत्यवगतेर्विषयत्वमागात् ॥ १२३ ॥

स्पष्टानुभूतीति । अहं न जानामीति सविकल्पकानुभवविषयो नेत्यर्थः । तर्हि जागरितादौ कथं तादृशसविकल्पकानुभवगोचरत्वं तस्येत्याशङ्क्य तदाधिष्ठानचैतन्याभेदेनैवाविद्यया तस्योत्पादितत्वात्तत्संसर्गगोचरतया तदनुभवस्य सविकल्पकत्वापत्तिरित्याह—अधुना त्विति । तमोविषयत्वमागादित्यनुषङ्गः । एवं चोत्थितस्य नाहमवेदिषमिति परामर्शेऽप्यहंकारस्तदानींतन एव दैवगत्या तदाश्रयकोटिनिक्षिप्ततयाऽनुभूयते साक्षिणा न तु परामर्शविषयतया स्मर्यते ततश्चाहं नावेदिषमित्यस्याहंकारांऽशे परामर्शत्वाभावात्तद्बलात्त्वापेऽहंकारतदनुभवकल्पना नेति भावः ॥ १२३ ॥

ननु सुषुप्तेऽज्ञानमनुभूतं चेत्, किंचिदपि नान्वभूवमिति सर्वानुभवनिषेधोऽनुपपन्नः स्यात्, ततोऽवगच्छामि तदा नाज्ञानं तदनुभवो वाऽस्तीति । किं च तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयरूपमित्यादिश्रुतिसमाश्रयणेन त्वम्पदार्थशोधनाय प्रवृत्ता भाष्यकारादयः सुप्तावज्ञानमपि नास्तीति वदन्ति स्म, ततोऽपि तदा नाऽस्त्यज्ञानमित्याशङ्क्याह—

एतावता तव तमोऽपि सुषुप्तिकाले
नास्तीति बुद्धिरुदितं गुरुभिश्च कैश्चित् ॥
स्थाने क्व चित् क्व चिदतो द्वयमुच्यमानं
ग्राह्यं विचिन्त्य भवता विषयं विभज्य ॥ १२४ ॥

एतावतेति । तदा तत्स्पष्टं सविकल्पकेन नानुभूयत इत्येतावतैव न किं चिदन्वभूवमिति व्यपदेशोपपत्तेस्तत्र तदाऽज्ञानादि ना-

स्तीति बुद्धिरप्येतावता विपर्यस्ता जायते । भाष्यकारादिभिश्चाचार्यैः क्व चित् क्व चित्तंपदार्थशुद्धिप्रकरणे तदा स्पष्टमनुभवाभावादेवाज्ञानं नास्तीत्युदितं न तु तस्यैवाभावात्, तैरेव एतं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढाः सति संपद्य न विदुरित्यादिश्रुत्यर्थतया तदाऽज्ञानस्य निरूपितत्वादित्यर्थः । कथं तर्हि विरुद्धार्थानां तद्वचनानामुपादेयता, तत्राह-अतो द्वयमिति । यतो विरोधधीरापाततोऽतो विचार्य वचनद्वयस्याविरुद्धं विषयं विभागेन कल्पयित्वोभयमप्युपादेयमित्यर्थः ॥ १२४ ॥

किं तदाचार्यैर्विरुद्धवदुक्तं द्वयमिति वीक्षायामाह—

नाज्ञानमास्ति च सुषुप्तिगतस्य पुंसो
गाढे तमस्ययमभूत् पुरुषः सुषुप्तः ॥
इत्युच्यमानमविरुद्धतया विविच्य
ग्राह्यं त्वयाऽनुभवयुक्तिनिरूपणेन ॥ १२५ ॥

नाज्ञानमिति । स्पष्टमननुभवादभावोक्तिर्न किं चिदवेदिषमितिपरामर्शकल्पानुभवात्तदाऽज्ञानाभावे पुनरुत्थानाद्यनुपपत्तिरिति युक्तेश्च तद्भावोक्तिराचार्याणामिति तदुभयोपादेयतां निगमयति—अविरुद्धतयेति ॥ १२५ ॥

एवमन्यैरप्याचार्यैरज्ञानपदं विहाय पदान्तरवद्वाक्यैर्मुखतोऽर्थाच्च तदाऽज्ञानाभाव उच्यते, तदपि स्पष्टं तदनुभवाभावादेव न तदभावादित्याह—

एवं तमोऽपि न बभूव सुषुप्तिकाले
भाषान्तरेण पुरुषः पर एव जीवः ॥
निर्बीजतामुपगतः स निरन्वयेन
न स्पष्टमत्र तमसोऽनुभवोऽस्ति यस्मात् ॥ १२६ ॥

एवं तम इति । भाषान्तरेण शब्दान्तरेण । तदा जीवः परः पुरुष एवेत्यनेनार्थादज्ञानाभावः सूचितः । स जीवस्तदा निरन्वयेन दुःखरागादिसंसारसम्बन्धाभावेन निर्बीजतां संसारकारणरहितताम्-

पगत इति वाक्यान्तरम् । अत्र स्वापे तमसः स्पष्टमनुभवो नास्ति यस्मात्तस्मादेतानि वाक्यान्युक्तानीत्यर्थः ॥ १२६ ॥

अथाऽप्येतादृशवाक्यान्युच्यन्ते, न चैतावता मम तदाऽज्ञत्वाभावोऽभिप्रेतः, किं त्वहं न जानामीत्येवं स्पष्टमनुभूयमानं विद्यमानमपि तदविद्यमानप्रायं बुद्ध्यादिकार्यरहितत्वादिष्टमेवेति ततस्त्वं शुद्ध इत्यादि मदीयमपि वचनं ग्राह्यमित्याशयेनाह—

अज्ञानतज्जमतिहीनतया सुषुप्ते
शुद्धः परोऽसि भगवानसि नित्यमुक्तः ॥
कामश्च कर्म सकलं च तदा कुतस्त्यं
चित्सागरेऽनवकरे त्वयि तायमाने ॥ १२७ ॥

अज्ञानतज्जमतिहीनतयेति । अहंकारघटिताज्ञानगोचरसविकल्पकमतिहीनत्वेत्यर्थः । सकलं कामादिकार्यम् । अनवकरे अवच्छेदकरहिते । तायमाने विस्तीर्णे त्रिविधपरिच्छेदरहिते इति यावत् । चित्सागर इत्यादिसप्तमीचतुष्टयं सप्तम्यधिकरणम् ॥ १२७ ॥

ननु सुषुप्तावुक्तरीत्याऽऽत्मनो भवतु शुद्धतादि, नित्यमुक्तता तु न घटते जाग्रत्स्वप्नयोर्विविधदुःखान्यनुभवतस्तदयोगादित्याशङ्क्य तदा दुःखादिबन्धप्रतिभासेऽपि तस्याप्यन्योपाधिकतया स्फटिकेलौहित्यवन्मिथ्यात्वात्तत्प्रसञ्जकस्याहंकारादेरविद्यकत्वेन तथात्वाज्जाग्रदादावपि वस्तुतो मुक्तः शुद्धश्च भवत्येवात्मा, सुषुप्तौ तु तत्प्रतिभासस्याभावान्नित्यमुक्तत्वादि तस्य नानुपपन्नमित्यभिप्रेत्याह—

आसीदहंकरणमात्ममोहनिमित्तं
तज्जाग्रतश्च भवतः स्वपतश्च दुःखम् ॥
आनीय दर्शयति तन्न सुषुप्तिकाले
बीजक्षयादिति भवानतिनिर्मलोऽभूत् ॥ १२८ ॥

आसीदिति । आनीय मिथ्यैव प्राप्य । तत् दुःखम् । सुषुप्तिकाले नेत्यत्र हेतुः—बीजक्षयादिति । उपाधितयाऽऽत्मनि दुःखप्रसञ्ज-

कोऽहंकारस्तद्बीजं तत्क्षयादित्यर्थः । इतिर्हेतौ । अतिनिर्मलः नित्यशुद्धादिरूपः ॥ १२८ ॥

ननु किं तदात्मतमो यदहंकारादिकारणं स्यात्, अज्ञानमेवेति चेन्न । स्वप्रकाशचिद्रूपात्मनि ज्ञानाभावरूपस्य तस्यासंभवात्, तस्याहंकारादिकारणत्वायोगाच्च, अनादिभावरूपं चाज्ञानं मानहीनम्, तस्य निवर्तकानिरूपणेनानिर्मोक्षप्रसङ्गश्चेति तत्राह —

सद्रूपमावरणतानुभवादभीष्ट-
मज्ञानमात्मचिति नैशतमोवदेतत् ॥
ज्ञानं दिवाकरवदस्य जडप्रकाश-
रूपं निवर्तकमिति प्रवदन्ति धीराः ॥ १२९ ॥

सद्रूपमिति ।भावरूपमित्यर्थः । एतदज्ञानमात्मचिति आवरणतानुभवात्सद्रूपमिति सम्बन्धः । स्वप्रकाशात्मतत्त्वेऽद्वयातिशयानन्दब्रह्मणि तन्नास्ति न प्रकाशत इति विपरीतव्यवहारदर्शनेन तद्योग्यतारूपावरणप्रयोजकतयाऽहं ब्रह्म न जानामीत्यनुभूयमानाज्ञानमेव कल्पयम् । भगवता चोक्तम्–अज्ञानेनावृतं ज्ञानमिति । तच्च भावरूपम् आवरकत्वात् प्रसिद्धतमोवदित्यनुमानाद्भावरूपत्वसिद्धेस्तस्याहंकाराद्युपादानत्वे न का चिदनुपपत्तिः । नापि तन्निवर्तकानिरूपणम्, स्वरूपात्मकचित्प्रकाशस्योक्तावरणप्रतिबद्धस्यानिवर्तकत्वेऽपि महावाक्यजनितब्रह्मभावसाक्षात्कारादावरणनाशे प्रतिबन्धशून्यस्य तस्य दिवाकरवज्जडप्रकाशरूपवृत्तिसाक्षात्कारस्यैव वा तन्निवर्तकत्वोपपत्तेरित्यादि प्रागेवोपपादितं, ततो न किं चिदवद्यमिति भावः ॥ १२९ ॥

किञ्च स्वप्रकाशसंविद्वादिभिस्तदुत्पत्त्याद्यङ्गीकुर्वद्भिस्तदुत्पत्तेः प्राक् तदस्फुरणरूपं तदज्ञानमङ्गीक्रियते तद्भावरूपमेव तैरवश्यमभ्युपेयं, संविद्विषयस्य स्वप्रकाशस्य जडरूपस्य वा ज्ञानस्य तन्मतेऽभावेन तदभावरूपाज्ञानस्यासम्भवात् । वस्तुतस्तेषां संविदुत्पत्त्यादिभ्रा-

न्तिमूलतयाऽपि तदगोचरभावरूपाज्ञानसिद्धिः, उक्तविधया तन्मते तत्र ज्ञानाभावरूपाज्ञानासम्भवादित्याशयेनाह—

प्रावादुकैरपि तथैव तदेषितव्यं
संवेदनेऽस्फुरणमप्युपपद्धिरग्रे ॥
संवेदनं न खलु संविदभावरूप-
मज्ञानमभ्युपगतं न च बुद्ध्यभावः ॥ १३० ॥

प्रावादुकैरिति । अग्रे उत्पत्तेः प्राक् संवेदने अस्फुरणमुपपद्धिः प्रावादुकैरपि तदज्ञानं तथैव भावरूपमेवैषितव्यमिति सम्बन्धः । एवकारोक्ताभावरूपाज्ञानाभावे हेतुमाह—संवेदने न खल्विति । बुद्ध्यभावः संवेदने जडबुद्ध्यभावश्च नाभ्युपगत इति योजनीयम्॥१३०॥

एवमनादिभावरूपाज्ञानमुक्तमेव विस्मरणशीलं प्रत्युपपाद्यास्य जगदुपादानत्वं फलितं वदन्सुषुप्तौ तद्भावाभावत्वादिश्रुत्याचार्यवचसामविरोधं प्रागुक्तमुपसंहरन्नात्मनो नित्यशुद्धत्वादि फलितमाह—

तस्मादशेषजगदेकनिदानभूत-
मज्ञानमात्मविषयं न विरुद्धमूचुः ॥
वेदावसानवचनानि मुनीश्वराश्च
स्थानेषु भूरिषु ततोऽवकरो न कश्चित् ॥ १३१ ॥

तस्मादिति । आत्मविषयमधिकृत्य विरुद्धं नोचुरित्यर्थः । वेदावसानवचनानि—सता सोम्य तदा संपन्नो भवति सति सम्पद्य न विदुरित्येवमादीनि । तद्व्याख्यातारो मुनीश्वराः । भूरिषु बहुषु । स्थानेषु प्रदेशेषु । अवकरोऽशुद्ध्यादिबन्धः ॥ १३१ ॥

एवम्—अज्ञानमस्त्यवगतं च सुषुप्तिकाल इत्यत्रोक्तमज्ञानसत्त्वमुपपाद्य तथापि तदवगतिर्न सम्भवति, तदा अवगन्तुः प्रमातुरभावात् । भावे वा तदुपाधेरहङ्कारस्यापि तदा सत्त्वापत्तेः सुषुप्त्यभावापातात् । न च साक्षिणैतदवगतमिति वाच्यम् । लोके प्रमातुरेव साक्षित्वावगमात् । विनाऽहङ्कारं कूटस्थासङ्गचैतन्यस्य साक्ष्यसम्बन्धायोगेन साक्षित्वासम्भवाच्चेत्याशङ्क्य सुषुप्तावज्ञानमात्रस्य साक्ष्यत्वात्तत्सम्बन्ध-

स्यानादेरपि चैतन्यस्वभावानुरोधेनाज्ञानमात्रमयुक्तत्वोपपत्तेरहङ्कारस्य तत्रानुपयोगादसम्भवाच्चाज्ञानोपहित एव चिदात्मा तदाऽज्ञानसाक्षी तद्द्वाराऽज्ञातवस्तुसाक्षी च, स एव चान्यदाहङ्कारेणाप्युपहितोऽहङ्कारतद्धर्मसाक्षी अन्यथाऽतिप्रसङ्गात्। तदुभयोपहित एव मानजन्यवृत्तिमपेक्ष्य ज्ञातवस्तुसाक्षी भवतीति प्रमातुः साक्ष्यस्याहङ्कारविशिष्टस्य न क्वापि साक्षित्वमित्याशयेनाह—

साक्षित्वमात्मतमसा मतिकञ्चुकेन
मातृत्वमेतदपि नेह सुषुप्तिकाले ॥
यद्धेतुकं भवति यन्न हि तद्विना तत्
सम्भाव्यते न च तदत्र सुषुप्तिकाले ॥ १३२ ॥

साक्षित्वमात्मतमसेति। तर्हि साक्षिणैव सर्वप्रतीतिसम्भवात् किं प्रमात्रेत्याशङ्क्य लोकसिद्धप्रमात्रादिव्यवहारस्य निर्विषयत्वायोगात्तदभावे कर्तृत्वाद्ययोगाच्च स एव बुद्धितादात्म्यापन्नः प्रमाश्रयतया प्रमाता जागरिते भवति। सुषुप्ते तु बुद्धेरेवाभावान्न तद्भावोऽपीत्याह—मतिकञ्चुकेनेति। बुद्ध्यभावेऽप्यज्ञानशबलस्य तदाप्रमातृत्वं किं न स्यादित्याशङ्क्य प्रमाया बुद्धिपरिणामविशेषसंपिण्डितचैतन्यरूपत्वात्तत्कर्तृत्वरूपप्रमातृत्वं बुद्धिसंपिण्डितस्यैव घटते नाज्ञानमात्रशबलस्येत्यभिप्रेत्याह-यद्धेतुकमिति ॥ १३२ ॥

ननु सुषुप्तौ बुद्ध्यभाव एव कुतो येन तदधीनप्रमातृत्वं न भवेत्, न हि तदा बुद्धिर्नष्टेत्यनुभवोऽस्ति। न चाननुभवादेव तदभावः कल्प्यत इति वाच्यम्। तथा सत्यज्ञानस्यापि स्पष्टमननुभवाद् निर्विकल्पकमात्रस्य च तदसत्त्वशङ्काऽनिवर्तकत्वादज्ञानस्याप्यभावः स्यात्, तत्र लीनं कार्यजातं सूक्ष्मरूपेण तिष्ठतीत्येतदप्यननुभवादेव न सिद्ध्येदिति चेत्तत्राह—

अज्ञानमस्ति सकलं च सुषुप्तिकाले
तत्र प्रलीनमिति यद्यपि नास्ति पुंसः ॥

स्पष्टानुभूतिरपवर्गविलक्षणत्वा-
देष्टव्यमेव तु सुषुप्तिभुवस्तथात्वम् ॥ १३३ ॥

अज्ञानमस्तीति। बुद्धेः सविकल्पकतया यावत्सत्त्वं साक्षिभास्यत्वात्सुषुप्ते तदप्रतिभासात्तत्सत्त्वे सुषुप्तिभङ्गप्रसङ्गाच्च तदा बुद्धेरभाव आवश्यकः। अज्ञानादेस्तु स्पष्टमनुभवाभावेऽपि तदस्तितामात्रमुपेयम्। इतरथा कारणमात्राभावान्मुक्तिरेव तदा स्यादिति पुनरुत्थानं न स्यात्। तस्मात्तदवस्थाया मुक्तिविलक्षणत्वाज्जाग्रदादिविलक्षणत्वाच्च समस्तकार्यं तदा लीनमज्ञाने सूक्ष्मरूपेणावतिष्ठत इत्युपेयम्। अन्यथाऽसत उत्पत्त्यनुपपत्तेः। यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति सुषुप्तिकाले सकले विलीने तमोऽभिभूत इत्यादिश्रुतितोऽप्युक्तमेष्टव्यमिति भावः। अक्षरार्थः स्पष्टः ॥ १३३ ॥

ननु सुषुप्तेऽज्ञानं स्वरूपेणास्ति चेत्तर्हि जाग्रत्स्वप्नयोस्तदस्तित्वे विवादाभावाच्चैतन्यवदवस्थात्रयेऽप्यव्यभिचारात्तदात्मस्वभावः स्यात्। ततश्च स्वभावात्तमसो विवेचने निदर्शनाभावात्ततो विवेकासिद्धावशुद्ध एवात्मा स्यादिति शङ्कते—

एवं सतीह तमसो न विविच्य वस्तु
साक्षान्निवेदयितुमस्ति निदर्शनं चेत् ॥
नैतत् परागवगतेर्विषयो विभाति
गाढं तमो न तु तथाऽवगतिः प्रतीचि ॥ १३४ ॥

एवं सतीति। इहावस्थात्रये। मुक्त्यवस्थायाः परोक्षत्वाद्विप्रतिपन्नत्वाच्च न तन्निदर्शनमित्यभिप्रेत्योक्तम्—साक्षादिति। नास्तीति चेदितीतिशब्दो द्रष्टव्यः। यदाऽज्ञानं स्पष्टमनुभूयते तदा प्रमात्राज्ञानमस्तीति पराग्भावेन दृश्यते, आत्मा त्वहमिति दृश्यविलक्षणतयाऽपरोक्षदृग्रूपप्रत्यक्त्वेन स्वयं प्रथते ततश्चाज्ञानस्य घटादिवत्पराक्त्वेन तद्विरुद्धप्रत्यक्स्वभावता नेतिविवेचनादात्मनि शुद्ध्युप-

पत्तिमाह सिद्धान्ती–नैतदिति ॥ १३४ ॥

तथापि सुषुप्तौ तयोः स्पष्टं प्रत्यक्परात्मभावेनानननुभवात्तदा तद्विवेचनं दुःशकमित्याशङ्क्योक्तरीत्या जागरितादौ विवेचितानन्यत्वात्तयोस्तत्रापि विवेचनं सुकरमित्याशयेनाह—

प्रत्यक्पराग्विषयवस्तुविवेचनाय
क्लेशो न सम्भवति कस्य चिदत्र जन्तोः ॥
दृश्यं तमो घटपटादिवदेष तस्य
द्रष्टा सुषुप्तिभुवि चिद्घनविग्रहोऽभूत् ॥ १३५ ॥

प्रत्यक्परागिति । अत्र सुषुप्तौ तस्य तमसश्चिद्घनविग्रह एष आत्मा द्रष्टा साक्षी अभूदिति सम्बन्धः ॥ १३५ ॥

तथाप्यवस्थात्रयस्य चेतनधर्मत्वानुभवात्तत्कलुषितस्यात्मनः कुतः शुद्धत्वमिति चेत्तत्राह—

तिस्रोऽपि चिद्घनतनोस्तव दृश्यभूता
दूरे चकासति मतेर्बहिरेव तावत् ॥
आविस्तिरोभवनधर्मतया ह्यवस्थाः
कः सङ्करो विमलचिद्वपुषस्तवाभिः ॥ १३६ ॥

तिस्रोऽपीति । तिस्रोऽप्यवस्थाः चिदेकरसस्य तव तावद् दृश्यभूतास्ततो घटादिवद्बहिरेव त्वद्धर्मत्वरहिता इति यावत् । किञ्च जाग्रदवस्थाया इन्द्रियादिजन्यबुद्धिवृत्तिरूपत्वात्स्वप्नस्य च तद्गतवासनाविलासत्वात्सुषुप्तेस्तदीयलयात्मकसूक्ष्मरूपत्वादनात्मबुद्धिसम्बन्धिन्यस्ताः स्वरूपनिरूपणदशायां दृगात्मनो दूरे तत्संसर्गानर्हदेशे भासन्ते, ततः कथं तासां तद्धर्मत्वमित्याह–दूरे चकासतीति । तासामागमापायितया रज्जुसर्पवन्मिथ्यात्वादपि तदधीनोऽशुद्धिरात्मनो नेत्याशयेनाह–आविस्तिरोभवनेति । संकरो वास्तवः संश्लेषः ॥ १३६ ॥

नन्ववस्थावदहङ्कारसम्बन्धादग्निसम्बद्धजलौष्ण्यवच्चिदात्मनोऽप्यवस्थावत्त्वं दुष्परिहरमिति तच्छुद्धिर्दुर्घटेत्याशङ्क्य अहङ्कारतत्संबन्धयोरप्यद्वितीयासङ्गचिदात्मन्यविद्यया कल्पितत्वात्तदभावे च तौ वस्तुतो न स्तः, कुतस्तदधीनाऽशुद्धिरित्यभिप्रेत्याह—

त्वय्येव कल्पितमहंकरणं बिभर्ति
तिस्रोऽपि ताः सहितमेव तु तच्च ताभिः ॥
त्वच्चित्प्रकाशविषयत्वमुपेत्य भाति
स्वाज्ञानवत्तव न रूपमतश्चतुष्कम् ॥ १३७ ॥

त्वय्येवेति । ताः अवस्थाः । ननु योऽवस्थावान्स एवात्मा कुतस्तस्य कल्पितत्वमिति प्राक्कृतशङ्कां निराकुर्वन् दृश्यहङ्कारादिसाक्षिणो दृगात्मनस्ततो विवेकमनेकधोक्तं स्मारयति—सहितमिति । मिलितमित्यर्थः । तदहङ्करणम् । चशब्द उक्तशङ्कानिरासार्थः । फलितमाह—तवेति । अहङ्कारोऽवस्थाश्चेत्येतच्चतुष्कं वस्तुतस्तव स्वरूपं त्वद्धर्मश्च नेत्यर्थः ॥ १३७ ॥

उक्तचतुष्टयस्यात्मनः पृथक्त्वे तस्याद्वयत्वं न स्यात्, स्याच्च सांख्यादिमतानुप्रविरित्याशङ्क्याह—

नान्वेति तत्तव चिता व्यतिरेकिता च
दूरे न सम्भवति तस्य चतुष्टयस्य ॥
नाभावरूपभजनाय समर्थमेत-
देवं चिदेव तु चतुष्टयमेतदासीत् ॥ १३८ ॥

नान्वेतीति । तच्चतुष्टयम् । तव चिता त्वत्स्वरूपचैतन्येन । तस्य किं सत्त्वमसत्त्वं वा, आद्येऽपि किं चिदभेदेन सत्त्वमुत भेदेन भेदाभेदेन वा । नाद्यः, जडाजडयोर्व्यभिचार्यव्यभिचारिणोश्च वस्तुतोऽभेदासम्भवात् । न द्वितीयः, भेदस्यैव द्वितीयाध्यायोक्तविधया दुर्निरूपत्वेन सत्त्वायोगात् । किं च तस्यापि भेदेन सत्त्वेऽनवस्थापातात्, तदभेदस्य चोक्तविधयाऽसम्भवात् । न तृतीयः, पक्षद्वयोक्तदोषापत्तेः विरोधाच्चैकत्र भेदाभेदासंभवात् । नाप्यस-

स्वं नरशृङ्गवदपरोक्षत्वानुपपत्तेः, सदनुभवविरोधाच्च । तस्मादन्वयव्यतिरेकाभावपरिहारेणाविद्यातत्कार्यात्मकद्वैतस्य चिदेकता न सन्मात्रत्वे पर्यवसानात्तदेव तत्त्वं तद्विपरीतं त्वनिर्वचनीयं तत्त्वबोधेन बाधितमुक्तस्वरूपेणैवावशिष्यते तत उक्तदोषद्वयप्रसङ्गो नेति भावः ॥ १३८ ॥

स्यादेतदेवं यदि जाग्रदादीनां मिथ्यात्वं चैतन्यस्यैव सत्यतया तदधिष्ठानत्वं च स्याद । न त्वेतदस्ति साधकाभावाद्व्यभिचारित्वस्य स्वापमूर्छाद्यवस्थासु चैतन्येऽपि सत्त्वादित्याशङ्क्य न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इत्यादिश्रुतेः प्रत्यभिज्ञाप्रामाण्याच्च तदापि तदागमापायस्य साक्षिचैतन्यमनुगतमस्त्येव, इतरथा तत्तदवस्थापरामर्शानुपपत्तेः, ततश्च तस्य सत्यत्वाद्व्यभिचार्यवस्थाधिष्ठानत्वं युक्तमित्याशयेनाह—

जाग्रत्स्वप्नसुषुप्तिमूर्छिततनूनिष्क्रान्त्यवस्थासु य-
च्चैतन्यं व्यभिचारिवस्त्वनुगतं तत्सत्यमेवात्मनः ॥
यत्किंचिद्व्यभिचारि तन्ननु मृषा स्रक्सर्पदण्डादिव-
न्नानुस्यूतचिदात्मवस्तु वदितुं शक्यं मृषा रज्जुवत् ॥ १३९ ॥

जाग्रत्स्वप्नेति । तनूनिष्क्रान्तिः स्थूलशरीरान्निर्गमनं मरणमिति यावत् । एतच्च पुनः शरीरप्राप्त्यवस्थोपलक्षणम् । तथाप्यवस्थानां मृषात्वे व्यभिचारित्वमप्रयोजकमित्याशङ्क्य सतोऽसतो वाऽगमापायित्वासम्भवात्तदनिर्वचनीयत्वमावश्यकमिति व्यभिचारित्वस्य मिथ्यात्वेन व्याप्तिसिद्धेर्नाप्रयोजकत्वमित्यभिप्रेत्याह—यत्किं चिदिति । ननिति निश्चये । किं च चैतन्यं मिथ्या मिथ्यासम्बन्धित्वान्मिथ्यावस्तुवदित्याशङ्क्य तत्र व्यभिचारित्वमुपाधिः । न च साधनव्यापकता, पक्षे तदभावादिति सदृष्टान्तमाह—नानुस्यूतेति ॥ १३९ ॥

ननु स्रक्सर्पादे रज्ज्वज्ञानविलसितत्वात्सैव तत्त्वं तद्विपरीतं तु मिथ्येति युक्तम् । नैवमवस्थाधर्मितयोक्तमन्तःकरणमात्माज्ञानविल-

सितं येनात्मैव तत्त्वं स्यात् तस्यानादित्वात्, अन्यथा तद्गतकर्मत-त्फलप्रवाहस्यानादित्वायोगात् आत्मन्यवस्थात्रयेऽपि साक्षितया भासमानेऽज्ञानासंभवाच्च तस्य तद्विलसितत्वायोगादिति तत्राह—

जाग्रत्स्वप्नसुषुप्तिधर्मकमिदं चित्तं त्वदज्ञानतः
प्रादुर्भूतमतस्त्वमेव सततं त्वत्तो न तद्भिद्यते ॥
स्वाज्ञानं च तवानुभूतिबलतः सिद्धं मृषा तत्त्वतो
नासीदस्ति भविष्यतीति भवतः पूर्णा चितिः शिष्यते १४०

जाग्रत्स्वप्नसुषुप्तिधर्मकमिति । न तावदन्तःकरणस्य व्यक्तरूपेणानादित्वम्, तन्मनोऽकुरुत, एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्यादिश्रुतौ जन्मश्रवणात् साक्षिमात्रगम्यस्य तस्यागमापायित्वमन्तरेण कादाचित्कानुभवायोगाच्च "तदापीतेः संसार-व्यपदेशात्" इत्यत्रोक्तन्यायेन सुषुप्त्यादावपि सूक्ष्मरूपेण विद्यमान-त्वादनादिकर्मादिप्रवाहस्यैकाश्रयत्वोपपत्तिः । यत्तु भासमानात्मन्य-ज्ञानमेव नेति; तन्न। भासमाने तस्मिन्ननतिशयानन्दाद्वयब्रह्मात्मताज्ञा-नस्यानुभवयुक्तिसिद्धत्वात् । जडस्य स्वातन्त्र्येण स्वतःस्फुरणायो-गाच्चिदात्मन्यविद्याकल्पितं तदिति स एव सर्वावस्थामहितचितिस-त्तत्त्वमिति भावः । तर्ह्यज्ञानस्याज्ञानविलसितत्वाभावान्मिथ्यात्वासि-द्धौ द्वैतापत्तिरित्याशङ्क्याह—स्वाज्ञानं चेति । अद्वयासङ्गस्वप्रका-शचिदात्मनि तस्य वस्तुतोऽसंभवाज्जाड्यदृश्यत्वाभ्यां तस्मिन्मि-थ्यात्वसिद्धेः कालत्रयेऽपि स्वतः सत्त्वहीनस्य तस्य सविलासस्य प्रतिभानेऽपि वास्तवत्वेन पूर्णानन्दचिदात्माऽवशिष्यत इत्यर्थः ॥१४०॥

ननु सर्वेऽपि वादिनः स्वस्वमते युक्तिजालं वदन्ति, तावता मम न तत्र श्रद्धा भवति। एवं युक्तिभिरुपपादितायामपि त्वमर्थशुद्धौ सा कथं भवेदित्याशङ्क्य युक्तिमात्रस्यापतिष्ठितत्वात्तावता तत्र श्रद्धानुद-यो युक्तः, इह तु युक्त्युपोद्बलितागमवाक्यैरेव स्पष्टं प्रतिपादनाद्-

कृत्वमर्थशुद्धौ श्रद्धा विधेयेत्याह—

ज्योतिर्ब्राह्मणवाक्यमानबलतः संपूर्णरूपा चिति-
र्जाग्रत्स्वप्नसुषुप्तिधर्मरहिता मोक्षाय निश्चीयते ॥
तस्मादस्मदुदीरितं स्वकवपुः श्रद्धत्स्व मानं विना
नास्माभिः प्रतिपादिताचितिरियं वाक्यार्थसंबन्धिनी १४१

ज्योतिर्ब्राह्मणेति । मोक्षाय तद्धेतुवाक्यार्थबोधाय । तत्र ह्यादित्यादिनां व्यवहियमाणवस्तुप्रकाशकज्योतिषामभावे स्वप्नमनोरथादौ व्यवहारहेतुभूतं ज्योतिः किमित्यभिप्रेत्य किंज्योतिरेवायं पुरुष इतिप्रश्नस्यात्मैवास्य ज्योतिरित्युत्तरं श्रुत्वा देहादीनां बहूनामहमितिप्रतिभासात्तत्रासाधारणात्मरूपजिज्ञासया कतम आत्मेति पुनः प्रश्ने तस्योत्तरमुक्तं, योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः इत्यादिना । तेन हि देहेन्द्रियप्राणबुद्धितद्वृत्तिक्षणिकविज्ञानाज्ञानाविलक्षणमात्मानमुक्त्वा तस्य समानः सन्नुभौ लोकावानुसंचरतीति बुद्ध्युपाधिकं संसारं निर्दिश्य तस्य ध्यायतीवेत्यादिना मिथ्यात्वमुक्तम । पुनः सधीः स्वप्नो भूत्वेत्यादिना जाग्रत्स्वप्नमरणजन्मनां पर्यायेण प्राप्तिमनूद्य तेषां व्यभिचारित्वमतत्स्वभावत्वं प्रतिपाद्य पुनः स वा एष एतस्मिन्संप्रसाद इत्यादिना क्रमिकावस्थानुवादपुरःसरं स यत्तत्र किं चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इति क्रियाममभिहारेण तत्तदवस्थागतवस्तुसाक्षिमात्रत्वेन तदसङ्गत्वमुपपाद्यानन्तरं यत्र सुप्तो न कं चन कामं कामयते न कं चन स्वप्नं पश्यतीति सुषुप्तिमवतार्य तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपमित्यादिब्राह्मणशेषेण समस्तकामकर्मादिरहितस्वप्रकाशनित्यचिदानन्दात्मकत्वंपदलक्ष्यं पृष्टात्मरूपं निरूपितम । एवं स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम । दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर इत्यादिश्रुतिभिरप्युक्तरूप एव त्वमर्थो निरूपितः । ततोऽस्मिन्निरूपितेऽर्थे नाश्रद्धाकारणमस्तीति भावः ॥ १४१ ॥

त्वंपदार्थशुद्ध्यर्थमन्यदपि श्रोतव्यमाह मतिं निराकुर्वंस्तान्निर्णय-मुपसंहरति—

एतत्त्वंपदलक्ष्यवस्तु भवता यत् पृष्टमासीत् पुरा
तन्निर्णीतमतोऽन्यदस्ति यदि ते चित्तस्थितं पृच्छ तत् ॥
बुद्धिस्थं कुरु पूर्वमुक्तमखिलं यद्वक्ष्यमाणं च तद्
बोद्धुं, धारय ते मनः स्थिरतरं श्रद्धाधनाढ्याश्रयः ॥१४२॥

एतदिति । तत्पदलक्ष्यप्रश्नप्रकरणे शङ्कितचित्तं प्रति सामान्येन तदनुज्ञां सूचयति–अतोऽन्यदिति । श्रुतस्याविस्मरणं श्रोतव्ये चित्तैकाग्र्यं च श्रवणस्य फलवत्त्वाय शिष्यस्यावश्यकमित्याशयेनाह— बुद्धिस्थमिति । यत् पूर्वमुक्तं तदखिलं बुद्धिस्थं कुरु यच्च वक्ष्यमाणं तद्बोद्धुं लौकिकधनादि विहाय श्रुत्युक्तश्रद्धारूपधनाढ्यबुद्धिः सन् मनः स्थिरतरम् अत्यन्तमेकाग्रं यथा स्यात्तथा धारयेति संबन्धः ॥ १४२ ॥

एवं गुरोरनुज्ञां प्राप्य शिष्यो निःशङ्कः सन्नुदितेऽर्थे जिज्ञासा-निवृत्तिं सूचयन्नापातप्रतिपन्नवस्तुनि जिज्ञासौत्कट्यप्रकटनपुरःसरं तत्पृच्छतीत्याह —

इत्युक्ते गुरुणा स पृच्छति पुनस्त्वंशब्दलक्ष्यं मम
ज्ञातं न्यायबलेन पूर्वमुदितावस्थात्रयापोहनात् ॥
तच्छब्देन तु लक्ष्यमर्थमधुना बोद्धुं मनो मामकं
धावत्याशु तमप्यपोह्य सकलद्वैतप्रपञ्चं वद ॥ १४३ ॥

इत्युक्त इति । पृच्छतीत्यस्य वदेत्यतदुपरीतिपदमध्याहृत्य संबन्धो ज्ञेयः । यद्यपि पूर्वं द्वैतप्रपञ्चमिथ्यात्वमुक्तम्, तथापि वाक्यार्थान्वयितत्पदार्थनिर्णयं विना तद् दृढं न भवतीत्याशयेनापोह्य सकलद्वैतप्रपञ्चमित्युक्तम् ॥ १४३ ॥

आपातप्रतीत्यधीनसंशयकोटिं दर्शयंस्तन्निर्वर्तकनिर्णयाय विषा-

रारम्भः कार्य इत्याह—

किं सप्रपञ्चमिदमस्त्वथ वा समस्त
द्वैतप्रपञ्चरहितं परिपूर्णरूपम् ॥
यद्वोभयात्मकमिदं परमार्थतोऽस्तु
विष्णोः परं पदमिति ह्यविचारणीयम् ॥ १४४ ॥

किं सप्रपञ्चमिति । इदं सा काष्ठा सा परा गतिरित्यादिश्रुत्यवगतं विष्णोः परमं पदमिति सम्बन्धः । परमार्थत इत्येतत्कोटिद्वयेऽपि योजनीयम्, इतरथा कोटीनां विरोधानभिव्यक्तेः ॥ १४४ ॥

ननु ब्रह्मणोऽलौकिकत्वाद्वेदान्तानां च दोषरहितत्वात्कुतस्ते तत्रोक्तसंशय इत्याशङ्क्य सम्भावितासम्भावितविषयविविधवेदान्तवाक्यश्रवणसमुपजातमदीयचित्तदोषादेव स इत्याशयेनाह—

वेदान्तवाक्यगतिरत्र बहुप्रकारा
का चित्कथञ्चिदिति संशय उत्थितो मे ॥
तत्त्वं प्रकाशय निवर्तय मोहमूलं
मत्संशयं मम हिताय भव प्रसीद ॥ १४५ ॥

वेदान्तवाक्येति । गतिः प्रवृत्तिः । अत्र ब्रह्मणि । बहुप्रकारत्वमेवाह—काचिदिति । सृष्ट्यादिवाक्यगतिः सप्रञ्चे नेतिनेत्यस्थूलादिवाक्यगतिर्निष्प्रपञ्चे तदेजति तन्नैजति पश्यत्यचक्षुः स शृणोत्यकर्णः आसीनो दूरं व्रजति शयानो याति सर्वत इत्यादिवाक्यगतिर्विरुद्धोभयरूपे ब्रह्मणि दृश्यते इत्यर्थः । इतिर्हेतौ । तर्हि मया किं कर्तव्यमिति गुरोराशयमाशङ्क्य तत्प्रतिज्ञां स्मरन् स्वाभीष्टं प्रार्थयते—तत्त्वमिति । तत्समन्वयाध्याय एवोपनिषदब्रह्मतत्त्वं प्रकाशितमित्याशङ्क्याह—निवर्तयेति । मोहोऽसंभावनादिबुद्धिर्मूलं यस्य तम् । मया प्रष्टुमपि न ज्ञायते त्वयैव माद्दिशं जानता तद्विधेयमित्याशयेनाह—मम हिताय भवेति । कथमयमेवं निर्बन्धं करोतीत्येवमपि न मन्तव्यमित्यभिप्रेत्याह—प्रसीदेति ॥ १४५ ॥

एवं प्रार्थितो गुरुः "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि" इत्यादिसूत्रसूचितन्यायनिर्णीतत्वाद्वस्तुतो निष्प्रपञ्चं ब्रह्म वेदान्तवेद्यमित्युपपादयति—

न स्थानतोऽप्यस्ति परस्य कश्चिद्
विशेषयोगः परमार्थरूपः ॥
स्वतः पुनर्दूरनिरस्त एव
परस्य तत्त्वस्य विशेषयोगः ॥ १४६ ॥

न स्थानत इति । उपाधितोऽपीत्यर्थः । किं सविशेषत्वं निर्विशेषत्वं च ब्रह्मणः स्वाभाविकम्, उतान्यतरदौपाधिकम् । नाद्यः, वस्तुनः स्वभावतो विरुद्धरूपद्वयायोगात् । द्वितीये किं निर्विशेषरूपं सोपाधिकम्, किंवा सविशेषरूपम् । नाद्यः, वियदाद्युपाधीनां सर्वेषां सविशेषत्वेन स्वतः सविशेषे तदधीननिर्विशेषत्वायोगात्, अन्यथा प्रपञ्चस्यैव तदुपाधिकं निर्विशेषत्वं किं न स्यात् । न द्वितीयः औपाधिकरूपस्य स्फटिकलौहित्यादिवन्मिथ्यात्वेन स्वाभाविकत्वायोगात् स्वभावतो निर्विशेषमेव ब्रह्मेत्यस्मदिष्टसिद्धेः । न च वस्तुतः सविशेषमेव ब्रह्म, निर्विशेषत्वं तस्य स्वाभाविकं वौपाधिकं वा नैवास्तीति वाच्यम् । तत्परानेकश्रुत्यादिविरोधात्, तत्रैव च श्रुतिसमन्वयस्योपपादितत्वादिति भावः ॥ १४६ ॥

ननु "अन्तस्तद्धर्मोपदेशात्" इत्यादिसूत्रैः सगुणं ब्रह्म निरूपितम् । न च न स्थानतोऽपीत्यनेन विरोधः, सगुणत्वस्यौपाधिकत्वेन तत्परिहारादित्याशङ्क्यौपाधिकस्यापि सत्यत्वे तत्परिहारायोगात्तन्मिथ्यात्वमुपेयमित्याशयेनाह—

स्वभावतश्चिद्घनविग्रहस्य
मृषा ह्युपाधिप्रभवा विशेषाः ॥
यथा जपापुष्पनिबन्धनः स्यान्
मृषा मणेर्लौहितिमा तथैव ॥ १४७ ॥

स्वभावत इति । किं च विमतं मिथ्या औपाधिकत्वात् स्फटिकलौहित्यवदित्यनुमानादपि तन्मिथ्यात्वसिद्धिरित्याह—यथेति । न च स्फटिकमणावपि तदा सत्यमेव लौहित्यमुत्पन्नमिति साध्यवैकल्यमिति वाच्यम् । तद्गतशुक्लरूपे स्थिते तदुत्पत्त्ययोगात्, तन्नाशस्य च तदा रूपनाशे क्लृप्तकारणाभावेनासम्भवात् । एवं तद्वास्तवलौहित्योत्पत्तिकारणासम्भवाच्च तदसम्भवः । नापि जपापुष्पतद्रूपाभ्यामविवेकमात्रात् स्फटिके लौहित्यव्यवहारस्य तद्रूपस्यैव वा स्फटिके भ्रान्त्या प्रतिभासो न तत्रानिर्वचनीयं लौहित्यान्तरमस्तीति वाच्यम् । नेदं जपापुष्पं तल्लौहित्यं च स्फटिके नास्तीति स्पष्टं विवेकदर्शनात् । तस्मिन्सति स्फटिके तद्रूपारोपासम्भवाच्चेत्यादि प्रपञ्चेन पद्मपादाचार्यादिभिरेवोपपादितम् । तस्मान्मिथ्यालौहित्यमेव स्फटिके भातीति न साध्यवैकल्यमिति भावः ॥१४७॥

नन्वीश्वरत्वजीवत्वयोरनादित्वेन स्फटिकलौहित्यवदौपाधिकत्वायोगाद्वास्तवत्वमुपेयम्, ततश्च वस्तुत एवात्मनः सविशेषत्वमित्याशङ्क्याह—

मायोपाधेरद्वयस्येश्वरत्वं
कार्योपाधेर्जीवता च प्रतीचः ॥
मिथ्यैव स्याद् बन्धुजीवप्रसून-
संपर्कोत्था रक्ततेवाभ्रकादेः ॥ १४८ ॥

मायोपाधेरिति । ईश्वरत्वं हि जगत्सृष्ट्यादौ निरङ्कुशं सामर्थ्यम्, तच्च कूटस्थासङ्गाद्वितीयस्य स्वतो न घटत इति तत्समर्थस्वाभासमायाप्रयुक्तमेव ब्रह्मण ईश्वरत्वं तदुपाधिकमेव, अनादेरपि तस्य मायासम्बन्धवत्तदधीनसत्ताकतया तत्प्रयुक्तत्वोपपत्तेः । तेन तस्य व्यावहारिकत्वेऽपि मिथ्यात्वमपरिहार्यम् । यद्यपि जीवत्वमप्यज्ञत्वरूपमनादि, तथापि बुद्ध्यादिकार्ये सति तदुपहितस्य कर्तृत्वादिविक्षेपरूपानर्थरूपेणापि भातीति तेन रूपेण तस्य कार्योपाधिकत्वव्यपदेशः,

स्वरूपेण तु तदप्यविद्याप्रयुक्तत्वादविद्योपाधिकमिति तदपि कर्तृत्वादिना सह मिथ्येति स्वतो निर्विशेषं ब्रह्मेत्यर्थः । औपाधिकत्वस्य मिथ्यात्वेन व्यभिचारशङ्कानिरासायोदाहरणान्तरमाह—बंधुजीवेति । तत्प्रसूनं बन्धुलमारक्तं प्रसिद्धम् । अभ्रकं स्वच्छधातुविशेषः, आदिपदेन तत्तुल्यमन्यदुपादीयते ॥ १४८ ॥

ननु शुक्लवस्त्रादौ भल्लातकनीलीद्रव्यादिरसौपाधिककालिम्नो यावद्वस्त्राद्यपायमपायादर्शनात्तत्र तस्य सत्यत्वमुपेयम्, ततश्च तत्रौपाधिकत्वं मिथ्यात्वं व्यभिचरतीति नेत्याह—

भल्लातकादिरसयोगनिबन्धनं च
वस्त्रे कलङ्कितमनेन यथा निरस्तम् ॥
तस्यापि पक्षपतितत्वमभीष्टमेव
तस्मादसौ न भवति व्यभिचारभूमिः ॥ १४९ ॥

भल्लातकादीति । कलङ्कितमिति भावप्रधानं, कालिमेति यावत् । पटादिगतस्वाभाविकशौक्ल्यनाशे क्लृप्तकारणाभावेन तन्नाशायोगात्, स्थिते च तस्मिन् वास्तवरूपान्तरोत्पत्त्ययोगात् तदुत्पत्तौ क्लृप्तकारणाभावाच्च तत्र तद् वस्तुतो न घटते, तदिदमुक्तमनेन यथा निरस्तमिति । एवं च तदपि स्फटिके लौहित्यादिवदेव मिथ्येति कल्प्यते । तत्र स्वाभावे सत्येव भावात्, तत्रोपाधिभूतद्रव्यसंसर्गस्य मधुरोदके लवणसंसर्गवद् दुर्निवारत्वात्तत्प्रसञ्जितस्य मिथ्याभूतस्यापि कालिम्नो यावद्द्रव्यसत्त्वं स्थित्युत्पत्तेश्च । ततश्चोक्तहेतोरेतादृशं न व्यभिचारस्थलत्वेनोभयसंप्रतिपन्नमित्याह—तस्यापीति ॥ १४९ ॥

नन्वद्वितीयात्मनि जीवेश्वरत्वादिविशेषस्य मिथ्यात्वेऽपि तस्यौपाधिकत्वं कुतः सिध्येदित्याशङ्क्य तत्र श्रुतिं प्रमाणयति—

यथा ह्ययं ज्योतिरात्मा विवस्वा-
नपो भिन्ना बहुधैकोऽनुगच्छन् ॥

उपाधिना क्रियते भेदरूपो
देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥ १५० ॥

यथा ह्ययमिति । अयं नभस्येकत्वेन प्रत्यक्षो ज्योतिरात्मा तद्रूपो विवस्वान् सूर्यः पात्रभेदेन बहुधा भिन्ना आपः स्तोकास्तोकादिरूपेण भिन्नास्वप्सु एक एवानुगच्छन्प्रतिबिम्बभावेन प्रविशन्नुपाधिना स्वतः प्रकारतश्च भिन्नानुरूपोपाधिना भेदरूपः क्रियते, भेदो रूप्यतेऽनेनेति भेदरूपस्तस्य धर्मी प्रतियोगी च स्वप्रतियोगिकमिथ्याभेदवान् ज्ञाप्यत इति यावत् । एवं देवः स्वरूपप्रकाशेन दीप्यमानोऽयमात्माऽजोऽपि क्षेत्रेषु महाभूतान्यहङ्कार इत्यादिना भगवतोक्तेषूपाधिषु प्रतिबिम्बभावेन प्रविष्टो मिथ्यैव भेदरूपः क्रियते, स्वस्तस्तु शुद्धबुद्धाद्वितीयानन्दरूप इत्यर्थः ॥ १५० ॥

एवमीशितव्यजीवभेदस्यौपाधिकत्वात्तदपेक्षमीश्वरत्वमप्यौपाधिकत्वान्मिथ्या, साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिसिद्धशुद्धचिदात्मानन्दाखण्डात्मस्वरूपमेव सत्यमिति स्वमतमुक्त्वा मतान्तरमुत्थापयति—

ऐश्वर्यमस्य परमात्मन उक्तमन्यैः
साक्षात् स्वरूपमवबोधसुखादितुल्यम् ॥
तेनेशते किल यथायथमीशितव्यान्
भृत्यान् प्रतीश्वरतया जगतीभृतोऽपि ॥ १५१ ॥

ऐश्वर्यमिति । साक्षादुपाधिं विना । ऐश्वर्यं द्विविधं स्वाभाविकमौपाधिकं चेति, तत्र निरुपाधिकस्य परमात्मनः स्वरूपभूतमैश्वर्यं स्वाभाविकमेकरूपं च । अन्तर्याम्यादिषु तु तदीश्वरत्वं मायोपाधिकं तरतमभूतं च, तत्राद्यं दृष्टान्तेन दर्शयति—अवबोधेति । सत्ताऽऽदिशब्दार्थः । ननु ब्रह्मादीनामधिकारिणां सविशेषाणामेवैश्वर्यं शास्त्रादिना प्रसिद्धं, तत्कथं निर्विशेषात्मनि स्यादित्याशङ्क्य तेषामपि परमात्मस्वरूपभूतैश्वर्येणैव स्वेशितव्यान् प्रतीश्वरत्वं तच्चै-

तन्येनैव बोद्धृत्ववदित्यभिप्रेत्याह-तेनेति । ईशते नियामका भवन्ति, किलेत्यस्वारस्यं सूचयति ॥ १५१ ॥

ननु तेषामैश्वर्यं ज्ञानकर्मादिसाध्यं तारतम्यान्वितं च तत्कथं परात्मस्वरूपात्मकं स्यादित्याशङ्क्य न तत्तेष्वपि ज्ञानकर्मादिजन्यं किं तु तदभिव्यङ्ग्यं व्यञ्जकतारतम्याच्चौपाधिकं तारतम्यं नानात्वं चेति सुखादिदृष्टान्तेन वदन् द्वितीयं दर्शयति—

नित्यं प्रियादिषु सुखं प्रतिबिम्बितं स-
ल्लोके वदन्ति विषयेन्द्रियसंप्रयोगात् ॥
उत्पन्नमन्यदिति तद्वदिहेश्वरत्वं
मायातदुत्थमतिषु प्रतिबिम्बितं सत् ॥ १५२ ॥

नित्यमिति । प्रियमोदप्रमोदा अभीष्टवस्तुदर्शनलाभोपभोगजन्याः स्वरूपसुखाभिव्यञ्जका अन्तःकरणवृत्तिविशेषाः । प्रतिबिम्बितं सत् प्रतिबिम्बभूतमित्यर्थः । अन्यदिति । नानेति चेत्यर्थः। इह लोकागमयोः, प्रतिबिम्बितं सदीश्वरत्वमुत्पन्नमन्यदिति च वदन्तीत्यनुषङ्गः । यथा सुखस्य चैतन्यस्य च वस्तुतः कूटस्थैकरसस्वरूपत्वेऽप्यन्तःकरणपरिणामरूपोपाधिषु, प्रतिबिम्बनात्तदुपाधिका उत्पत्तिनाशनानात्वतारतम्यव्यपदेशाः, एवमैश्वर्यस्यापि स्वतो निरपेक्षत्वकूटस्थत्वैकरूपत्वे सत्यप्युपाधिवशात्सापेक्षत्वादिव्यपदेशा उपपन्ना इत्यर्थः ॥ १५२ ॥

तत्र मायाप्रतिबिम्बितमैश्वर्यमन्तर्यामिणस्तन्मते तत्प्रतिबिम्बितचैतन्यस्येश्वरत्वात्, तदैश्वर्यस्येशितव्यापेक्षित्वोत्कृष्टत्वभिन्नत्वानि मायोपाधिकानि, समष्ट्यष्टिबुद्ध्युपाधिकहिरण्यगर्भैश्वर्यस्य चोत्पत्तिनाशतारतम्यादि बुद्ध्युपाधिकमित्याशयेन पूर्वपद्यस्य चरमचरणार्थं विभजते—

मायानिविष्टवपुरीश्वरबोध एष
सर्वेश्वरो भवति सर्वमपेक्षमाणः ॥

बुद्धिप्रविष्टवपुरेष तथेश्वरः स्या-
दात्मीयभृत्यजनवर्गमपेक्षमाणः ॥ १५३ ॥

मायानिविष्टवपुरिति । ईश्वरबोधः स्वतो निरपेक्षैश्वर्यरूपबोधात्मा एष परमात्मा मायाप्रतिबिम्बितः सन्समस्तमीक्षितव्यमपेक्ष्य निरङ्कुशैश्वर्यवान् भवति, एष एव परमात्मा बुद्धिप्रतिबिम्बितहिरण्यगर्भादिरूपः सन्कतिपयेक्षितव्यान्प्रति तारतम्यान्वितकादाचित्कैश्वर्यवान्स्यादित्यर्थः ॥ १५३ ॥

तर्हि निरुपाधिकपरमात्मस्वरूपात्मकैश्वर्यं वृथा, तस्याकिञ्चित्करत्वाद् बुद्ध्युपाधिकजीवैः प्राप्तुमशक्यत्वाच्चेत्याशङ्क्य, तादृशपराभेदसाक्षात्कारवतो बुद्ध्याद्युपाधिबाधे तत्प्रतिबिम्बितभावरहितस्य प्रतिबिम्बान्तरात्मत्वायोगाद् बिम्बरूपनिरुपाधिकपरमात्मभूतस्य तत्स्वरूपभूतनिरपेक्षैश्वर्यस्यापि लाभात्स्वाराज्यरूपाप्तकामत्वसिद्धेर्न वृथेत्याह—

सम्यग्ज्ञानध्वस्तसर्वप्रपञ्चः
स्वीये रूपे निर्गुणे निर्विशेषे ॥
पूर्णैश्वर्ये स्वप्रकाशस्वभावे
स्वाराज्येऽस्मिन् स स्वराडेव तिष्ठेत् ॥ १५४ ॥

सम्यग्ज्ञानेति । अत्यन्ताभिन्नगुणवत्त्वाभावेऽपि तादात्म्येन विशेषत्वशङ्कानिरासाय निर्विशेष इत्युक्तम् ॥ १५४ ॥

ऐश्वर्यावाप्तिरूपमुक्तेर्ज्ञानलभ्यत्वे श्वेताश्वतरश्रुतिं प्रमाणयति—

ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ॥
तस्याभिध्यानात्तृतीयं देहभेदे
विश्वैश्वर्यं केवल आप्तकामः ॥ १५५ ॥

ज्ञात्वा देवमिति । तस्येश्वरस्याभिध्यानादाभिमुख्येन प्रसक्तत्वेन ध्यानात्तं देवं ज्ञात्वा साक्षात्कृत्य देहे सत्येव सर्वेषां पाशा-

नामविद्यास्मितादिरूपक्लेशानामपहानिः क्रियते, तैः क्षीणैः क्लेशैः कर्मनारम्भात्तन्मूलजन्ममरणयोरात्यन्तिकहानिर्भवति, ततः प्रारब्धकर्मणां भोगान्नाशेन देहस्य भेदे जाते सति केवलो निर्विशेष एव उक्तापेक्षया तृतीयं विश्वैश्वर्यं प्राप्यात्मकामस्तिष्ठतीत्युक्तश्रुत्यर्थावगमान्मुक्तावैश्वर्यसिद्धिरिति तदभिमानः ॥ १५५ ॥

ननु पूर्वार्द्धेन ज्ञानाद्बन्धनिवृत्तिरूपा मुक्तिः स्पष्टमेवोक्ता, उत्तरार्धेन तु तस्याभिध्यानादिति सगुणाहंग्रहोपासनमनूद्य तत्फलं तृतीयं बन्धमोक्षापेक्षया तृतीयं तदुभयविलक्षणं विश्वैश्वर्यं समस्तस्थूलसूक्ष्मोपाधिकेशितव्यविषयं हिरण्यगर्भैश्वर्यम् । तत्र च न बन्धो दुःखाभावात्, नापि मोक्षो द्वैतविषयत्वादविद्याकार्यत्वान्मुक्तिहेतुविद्यानधीनत्वाच्च, तस्मात्तत्तृतीयं तत्प्राप्य स्थितस्तत्रैव विवेकवैराग्यादिमान् स्वयंप्रतिभातवेदान्तवाक्योदिततत्त्वसाक्षात्कारादेव तद्देहक्षये केवल आप्तकामो नित्यशुद्धादिरूपब्रह्मैव भवतीति क्रममुक्तिरेवाभिप्रेता, ततः कथमियं श्रुतिः परमुक्तावैश्वर्यसत्त्वे मानमित्यरुच्या तत्र छान्दोग्यश्रुतिं दर्शयति—

स स्वराडिति च विद्यते श्रुति-
र्वर्णितेऽवरवपुः प्रकाशिनी ॥
तेन सत्यसुखबोधवद् भवे-
दीश्वरत्वमिति के चिदूचिरे ॥ १५६ ॥

स स्वराडिति । साम्राज्यादितत्स्वाराज्यस्याप्यैश्वर्यात्मनाप्रसिद्धेरुक्तश्रुत्या तत्र तत्सिद्धिरिति भावः । एवमेकदेशिमतं सदृष्टान्तमुपपाद्य तदुपसंहरति—तेनेति ॥ १५६ ॥

तद् दूषयति—

तन्न भाति चतुरस्रमुच्चकै-
स्तत्प्रमाणविरहादिह श्रुतौ ॥
सत्यबोधसुखवन्न तत्परा
सत्युवाच यत ईश्वरं श्रुतिः ॥ १५७ ॥

तन्न भातीति । चतुरस्रं सुन्दरं नैव भातीत्यर्थः । किं परमात्मनश्चिदेकरसात्मकं स्वरूपमेव वास्तवमैश्वर्यं यत्तत्त्ववित्तां प्राप्यम् किं वा सर्वज्ञत्वसर्वनियन्तृत्वादिरूपो धर्मः । नाद्यः, अखण्डचैतन्यैकरसस्य मुक्तोपसृप्यस्य सिद्धान्तिनाऽप्यङ्गीकारान्मतभेदायोगेन तत्रैश्वर्यपरिभाषाया अनिवार्यत्वात् । द्वितीये किं धर्मधर्मिणोरत्यन्तभेदः, उत भेदः, भेदाभेदो वा । नाद्यः, धर्मधर्मिभावानुपपत्तेः, सापेक्षनिरपेक्षयोर्वास्तवाभेदासम्भवाच्च । न द्वितीयः, अत्यन्तभिन्नयोरपि गवाश्वादिवद्धर्मधर्मिभावानुपपत्तेः, मुक्तावपि तत्सत्त्वेऽद्वैतविघातात् , भेदस्वरूपतत्प्रमाणयोर्द्वितीयाध्यायोक्तरीत्या दुर्निरूपत्वेन तत्सत्यत्वायोगाच्च । एतेन तृतीयोऽपि विकल्पो निरस्तः । किं च भेदस्याभेदाभावात्मत्वेन तयोरेकत्र विरोधादयं पक्षोऽसम्भवी, अभेदाविरुद्धवस्त्वन्तरत्वे च भेदग्रहात्कार्ष्ण्यभेदभ्रमनिरासो न स्यात्तस्य तदविरोधात् , तत्सत्त्वेऽपि स्तम्भकुम्भादीनामिव धर्मधर्मिभावाभावाच्च । किं चोक्तमैश्वर्यं दृश्यमदृश्यं वा, आद्ये न तस्य सत्यत्वं दृश्यस्य मिथ्यात्वनियमात् , तद्गोचरदर्शनतत्संबन्धानिरूपणेन तदसम्भवश्च । द्वितीये तत्स्वप्रकाशमुपेयमन्यथा तदसत्त्वप्रसङ्गात् । तथा च तस्यात्ममात्रत्वमिति कुतस्तद्धर्मत्वम् । किं चोक्तेश्वरत्वस्योशितव्यापेक्षत्वान्मुक्तौ तदभावात्तदपेक्षेश्वरत्वमपि न स्यात् । पूर्वमपि तत्सापेक्षत्वान्मायिकमेवेति त्वदुक्तं तद्द्वैविध्यमसम्भवीति भावः । किं च लोके वेदे च तत्त्वसाक्षात्कारवतां मुक्तावप्यात्मैश्वर्यमस्तीत्यस्य गमकाभावात्तदसिद्धिरित्याह—तत्प्रमाणेति । ननु सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतेर्यथा ब्रह्मणः सत्याद्यात्मत्वसिद्धिरेवं सर्वस्य वशी सर्वस्येशान इत्यादिश्रुतेस्तस्येश्वरत्वसिद्धेस्तद्वास्तवं ब्रह्मणः, ततश्च तद्भावमापन्नस्य विदुषस्तदैश्वर्यं दुर्निवारमित्याशङ्क्य तत्पराऽतत्परश्रुतिप्रतिपन्नत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यान्नैवमित्याशयेनाह—सत्यबोधेति ॥ १५७ ॥

उक्तमेव वैषम्यं स्पष्टयति—

तत्परश्रुतिवचःप्रमाणकं
सत्यबोधसुखविग्रहं परम् ॥
ब्रह्म तद्वदिह नेश्वरत्वभाक्
तत्परश्रुतिवचःप्रमाणकम् ॥ १५८ ॥

तत्परश्रुतीति । इह विचारदशायां तद्वत्सत्यादिरूपवत्तत्परश्रुतिवचःप्रमाणकं नेति सम्बन्धः । सत्यं ज्ञानमनन्तमित्यादिवाक्यानां जिज्ञासितब्रह्मस्वरूपलक्षणाभिधायित्वात्तस्य चापूर्णत्वाद्ब्रह्मणः सत्याद्यात्मत्वस्य वास्तवत्वाभावे तल्लक्ष्यब्रह्मत्वायोगात्तज्ज्ञानान्मुक्तिश्रुतेरनन्तरसंदर्भेण तदानन्त्यादेः प्रतिपादनात्तस्यासत्त्वादिज्ञाने निन्दाश्रवणाच्च तत्प्रकरणस्यार्थान्तरायोगात्तेषां सत्याद्यात्मब्रह्मणि तात्पर्यं युक्तम् । सर्वस्य वशीत्यादेस्तु सापेक्षैश्वर्याभिधायित्वात्तस्याविद्यादशायामेव सम्भवात्तन्मात्रस्य कार्यलिङ्गकानुमानगम्यत्वेनापूर्वत्वाभावान्निरतिशयानन्दब्रह्मभावादेव परमपुरुषार्थसिद्धौ तस्याप्रयोजनत्वादनन्तरं स एष नेतिनेत्यात्मेत्यादिनिषेधश्रुतिविरोधाच्च सा न तदैश्वर्यपरा किं तु तदनुवादेन तदुपलक्षितस्य प्रत्यगभेदपरा । सवा एव महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्मेति तस्यैवोपसंहारादिति भावः ॥ १५८ ॥

ननु स स्वराड् भवतीति निरपेक्षसाम्राज्यस्य तत्त्वज्ञानफलत्वप्रतिपत्तेः कथं तदपह्नव इत्याशङ्क्याह—

या फलश्रुतिरिहोपवर्णिता
सा न तत्परतयाऽवगम्यते ॥
तत्त्वमादिवचनं हि तत्परं
तत्परा न तु फलश्रुतिः क्वचित् ॥ १५९ ॥

या फलश्रुतिरिति । स्वाराज्यं यदि निरतिशयानन्दानुभवे नैरपेक्ष्यलक्षणं स्वातन्त्र्यं तदिष्टमेव, तदावरणापगमे तादृशब्रह्मभूतस्य

तदवश्यंभावात्। यदि तु सर्वस्य तदिच्छावशवर्तित्वादिरूपं स्वातन्त्र्यं स्वाराज्यं, तन्न, तस्य तदाऽसम्भवात्। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुत्या द्वैतगोचरसर्वव्यवहारप्रतिषेधात्, आविद्यकस्य द्वैतस्याविद्यानिवृत्तौ निवृत्तेरवश्यंभावाच्च। तदपेक्षस्य तस्य तदाऽनुपपत्तेः। सापेक्षस्य तत्कल्पितत्वाच्च स्वाराज्यश्रुतिर्न तत्परेत्यर्थः। किं चार्थवादावगतफलस्य प्रधानवाक्यापेक्षितत्वनिबन्धनं प्रतितिष्ठन्तीत्याद्यर्थवादस्य स्वार्थपरत्वमङ्गीक्रियते। प्रकृते तु सच्चिदानन्दानन्तब्रह्मात्माभेदपरतत्त्वमादिमहावाक्यैः प्रधानभूतैर्नोक्तरूपस्वाराज्यं फलमपेक्षितं प्रत्युत तदर्थविरोधि तत् फलमिति तत्परता तदर्थवादस्य नैवोपपद्यत इत्याशयेनाह–तत्त्वमादिवचनमिति ॥ १५९ ॥

प्रधानवाक्यानपेक्षितार्थकार्थवादस्य स्वार्थपरत्वेऽतिप्रसङ्गमाह–

सामगानमपि तत्स्वरूपतां
जक्षणं च जगतश्च सर्जनम् ॥
अश्नुवीत फलवाक्यतः श्रुतं
तत्स्वरूपमिति यद्युपेयते ॥ १६० ॥

सामगानमिति। फलवाक्यतः श्रुतं तत्स्वरूपमिति यद्युपेयते तदा सामगानमित्यादौ योजनीयम्। तदेतत्साम गायन्नास्ते हावु२ जक्षत्क्रीड़न् रममाणः यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति इति फलश्रुत्यवगतं सामगानादि। अपिचशब्दैः सूचितमिमाँल्लोकान् कामान्नीकामरूप्यनुसंचरन् तस्य सर्वेषु लोकेषु कामचारो भवति मनसैतान्कामान्पश्यन् रमत इत्यादिश्रुतिगतं कामान्नादि च तत् स्वरूपं स्यादित्यर्थः। मुक्तिर्मुक्तो वा तच्छब्दार्थः ॥१६०॥

ननु सिद्धान्तेऽर्थवादगतं देवताविग्रहादि यथोपेयते एवं मुक्तस्य सामगानाद्यभ्युपेयतां, तथा चोक्तातिप्रसङ्गोऽपीष्ट एवेत्याशङ्क्य सत्यं मानान्तरादिविरोधाभावादर्थवादजन्यदेवताविग्रहादिप्रत्ययस्य स्वतःप्रामाण्यस्योत्सर्गतः प्राप्तस्यानपायात्तदुपगमो युक्तः, सा-

मगानादेस्तु शरीरादिसापेक्षत्वान् मुक्ता च अथायमशरीरोऽमृतः अशरीरं वाव सन्तं तथा विद्वान्नामरूपाद्विमुक्त इत्यादिश्रुतिभिः शरीरादिप्रतिषेधात्तदपेक्षसामगानादिरर्थवादादन्यपरादवगतोऽभ्युपगन्तुमयुक्त इत्याह—

अर्थवादगतमभ्युपेयते
न प्रमान्तरविरोधि यन् मतम् ॥
सामगानमथ जक्षणादि वा
तत्परश्रुतिविरुद्धमिष्यते ॥ १६१ ॥

अर्थवादगतमित्यादिना । स्पष्टार्थान्यक्षराणि ॥ १६१ ॥

तर्हीश्वरत्वस्य परमात्मनि शरीराद्यनपेक्षत्वादुक्तश्रुतिविरोधाभावादर्थवादावगतं तदुपेयमित्याशङ्क्य तथापि निर्विशेषपरश्रुत्यन्तरविरोधात्तदपि सामगानादितुल्यमित्याशयेनाह—

ईश्वरत्वमपि तत्परश्रुतिर्नेतिनेति परिदुःखिता सती ॥
वारयत्यवशिनष्टि केवलं चित्स्वरूपमनवद्यविग्रहम्॥१६२॥

ईश्वरत्वमपीति । नेतिनेत्यस्थूलमनणु अतोऽन्यदार्तमित्यादिश्रुतिर्भेददर्शनाद्भयादिभाजः संसारिणो दृष्ट्वा दुःखिता सती आत्मातिरिक्तं सर्वं निराकृत्याभयानन्दानुभूतिमात्रमात्मानं परिशेषयति, तद्विरोधादीश्वरत्वमपि तदा नोपेयमित्यर्थः ॥ १६२ ॥

ननूदाहृतश्रुतिर्मायोपाधिकमेवेश्वरत्वादिविशेषं निषेधति न तु स्वाभाविकं भगवतो भगशब्दादीरितं ततश्च भगवत्प्राप्तिरूपायां मुक्तौ तदुपेयमित्याशङ्क्याह—

सोपाधीश्वरतानिषेधनपरा सा नेतिनेति श्रुतिः
साक्षाद् भागवतं निरस्तनिखिलोपाधिस्वरूपं पुनः ॥
विश्वैश्वर्यमिहोच्यमानमधुना मोक्षे ततस्तत्परै-
र्वाक्यैरस्य विरुद्धतानवसरो मुख्यं ततो गृह्यताम्॥१६३॥

सोपाधीति । साक्षादित्यस्य विवरणं निरस्तेति । पुनःशब्द-

स्तुशब्दसमानार्थः। इह सत्यराडित्यादिवाक्ये मोक्षे उच्यमानं विश्वै-श्वर्यं तु निरस्तनिखिलोपाधिस्वरूपं भगवतमिति सम्बन्धः। निषेध-श्रुतीनां सोपाधिकविशेषनिषेधपरत्वे फलितमाह—तत इति। अ-स्य निरुपाधिकैश्वर्यस्य। अविरोधे फलितमाह—मुख्यमिति॥१६३॥

सिद्धान्ती सोपाधिकैश्वर्यातिरेकेण निरुपाधिकस्वरूपभूतैश्वर्ये मानाभावादुक्तविभागो न युक्तः, निरपेक्षपरमात्मवस्तुनः सापेक्षैश्व-र्यस्वरूपत्वं चायुक्तम्, अत एव भगवच्छब्दोऽपि मायिकैश्वर्यादिसम्ब-न्धं निमित्तीकृत्य तत्र वर्तते, यदि मुक्तिदशायामुदितत्वात्तस्य नि-रुपाधिकत्वं स्वरूपत्वं चास्थीयेत निषेधश्रुतीनां च सोपाधिकस्वरूप-विषयत्वं तदाऽतिप्रसङ्ग इत्याशयेन दूषयति—

सामगानमथ जक्षणं जग-
त्सर्जनं च निरुपाधि गृह्यताम्॥
नेतिनेति वचसा निषिध्यते
जक्षणादिकमुपाधिसंश्रयम्॥ १६४॥

सामगानमिति। स्पष्टार्थान्यक्षराणि॥ १६४॥

सामगानादौ मानाभावादयुक्तं द्वैविध्यमिति यद्युच्येत तदैश्व-र्येऽपि तुल्यमिति स्वाशयं परमतानुवादेनाविष्करोति—

सामगानमथ जक्षणं जग-
त्सर्जनं च न खलु द्विधेष्यते॥
तत्प्रमाणविरहादिहेति चे-
दीश्वरत्वमपि न द्विधा भवेत्॥ १६५॥

सामगानमथेत्यादिना। इहात्मनि लोकवेदयोरिति वा। न द्विधा भवेदित्यत्रापि तत्प्रमाणविरहादित्यनुषङ्गः॥ १६५॥

यत्तूक्तम् "ऐश्वर्यमस्य परमात्मन उक्तमन्यैः साक्षात् स्वरूप-मवबोधसुखादितुल्यम्" इति तत्र दृष्टान्तमुपेत्य दार्ष्टान्तिके वैषम्यं वक्तुं ज्ञाने तावद् द्वैविध्यमुपपादयति—

ज्ञानमस्ति खलु बाह्यगोचरं
निर्विशेषमविनाशि च द्विधा ।
बाह्यगोचरमपोह्य केवला
स्वापमोक्षसमये चितिः स्थिता ॥ १६६ ॥

ज्ञानमस्तीति। बाह्यगोचरम्, इन्द्रियादिसन्निकृष्टार्थविषयं तज्जन्यं चेत्यर्थः। एवमन्तःकरणवृत्तिरूपमेकं ज्ञानमुक्त्वा तत्साधकमपरं साक्षिरूपमस्तीत्याह—निर्विशेषमिति। विषयकरणाद्यनपेक्षमित्यर्थः। तस्यैवाविनाशित्वं विशेषणम्। इति ज्ञानं द्विधाऽस्ति खल्विति सम्बन्धः। तत्राद्यं सापेक्षत्वादागमापायित्वाच्च नात्मनः स्वरूपं किं त्वौपाधिकमलीकं च, द्वितीयं तु सदाभावान्निरपेक्षत्वाच्च परमार्थात्मस्वरूपमेव, तस्य ततो भेदे मानाभावात्, ज्ञानोत्पत्त्याद्यनुभवस्येतरविषयत्वादित्यभिप्रेत्याह—बाह्यगोचरमिति ॥ १६७ ॥

ननूक्तद्वितीयज्ञाने मानाभावात्प्रतिज्ञामात्रेणोक्तद्वैविध्यादि न सिद्ध्यतीति चेन्न। अहङ्कारतद्धर्मकामसङ्कल्पादीनां धारावाहिकप्रत्ययानां स्वप्नमनोराज्यसुषुप्तीनां च स्वप्रकाशनित्यचैतन्यं विना स्वकाले प्रतिभासायोगात्तेषु च मानप्रवृत्तेरसकृन्निरस्तत्वात्स्वकाले प्रतिभासानङ्गीकारे च तेषां कालान्तरे परामर्शायोगात्तदा तत्साधकं नित्यचैतन्यमावश्यकमित्यभिप्रेत्योक्तज्ञानद्वये वैदिकं प्रति श्रुतिं प्रमाणयति—

पश्यन्न पश्यति गिरा कथयांबभूव
साक्षादनश्वरविनश्वरचिद्विभागम् ॥
तात्पर्यतः श्रुतिवचः स्फुटमेव नैव-
मैश्वर्यवस्तुनि विभागवचःश्रुतिर्नः ॥ १६७ ॥

पश्यन्न पश्यतीति। साक्षान्मुख्यवृत्त्या। उक्तमपि तात्पर्यहीनमुपेक्ष्यं स्यादयं तु न तथेत्याह—तात्पर्यत इति। तेन पदद्वयेन स्फुटमेवेत्येतद्दृष्टं सुषुप्तिमधिकृत्य यद्वै तन्न पश्यति पश्यन्वै तन्न

पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति श्रुतिवाक्यं तदा द्वैतं न पश्यतीति यन्न तत्सर्वथा ज्ञानाभावात्किं तु पश्यन्वै तन्न पश्यतीत्यनया गिरा स्वप्रकाशस्वरूपज्ञानं प्रतिपादयदेव द्वैतविषयमिन्द्रियाद्यधीनं सविकल्पकज्ञानं निषेधति, तदा स्वप्रकाशस्वरूपज्ञानसत्त्वे हेतुं चाह—न हीति। द्रष्टुरात्मनः स्वरूपभूताया दृष्टेर्द्रष्टुरहङ्कारस्य या दृष्टिः साक्षिरूपा तस्या वा दृष्टेर्विपरिलोपो न विद्यते, अविनाशित्वात्सर्वविनाशसाक्षित्वेन तदर्हत्वादित्येवं नित्यदृष्टिमुपपाद्य तदितरदृष्टीर्निषिद्धेत्युपपादयति—न तु तद्द्वितीयमस्तीत्यादिना। इयं च श्रुतिरुक्तार्थपरा यद्वै तन्न जिघ्रतीत्याद्यनन्तरसन्दर्भेणास्यैवार्थस्याभ्यासात्, ततश्चोक्तज्ञानद्वैविध्यादौ विमतिर्न कार्येत्यर्थः। एवं ज्ञानदृष्टान्तं सप्रमाणकमङ्गीकृत्य दार्ष्टान्तिकमप्रामाणिकत्वादनङ्गीकार्यमित्याह—नैवमिति ॥ १६७ ॥

इदानीं सुखदृष्टान्तादपि दार्ष्टान्तिके वैषम्यं वक्तुं ज्ञानवत्सुखद्वैविध्यं प्रामाणिकत्वादुपेयत इत्याह—

एवं न वा अर इति श्रुतमेव तावत्
पुत्राद्युपाधि पुरुषस्य सुखं विनाशि ॥
नित्यं निरन्तरमनन्तमपारमुक्तं
ब्राह्मं सुखं वचनकोटिशतैश्च यत्नात् ॥ १६८ ॥

एवं न वा इति। सक्तचन्दनवस्त्रालङ्कारादिविषयजन्यं विनाशि सुखपदवाच्यमेकमनुभवसिद्धम्, विषयाद्यभावदशायामपि परप्रेमास्पदत्वेनानुभीयमानमात्मरूपं नित्यं चापरं सुखं सिद्धम्। तथा श्रुतितोऽपि तद्द्वैविध्यमुपेयम्। न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्तीत्यादिश्रुतिर्ह्यात्मसुखशेषतया पुत्रादीनां प्रियत्वं वदन्ती तदधीनमनित्यं सुखं दर्शयति। एवं यो वै भूमा तत्सुखं विज्ञानमानन्दं ब्रह्म एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजी-

वन्ति आनन्दरूपममृतं यद्विभाति आनन्दं ब्रह्मणो विद्वानित्यादि-श्रुतिभिः, प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्, उपैति शांतरजसं ब्रह्मभूतमकल्मषम्, सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्, यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः इत्यादिस्मृतिभिश्च निख-निरतिशयाद्वितीयपूर्णब्रह्मस्वरूपसुखं च तात्पर्येण दर्शितम् । आ-नन्दादयः प्रधानस्येति सूत्रमपि तद्विषयमेव, तथा च तद्द्वैविध्यं युक्तमिति भावः ॥ १६८ ॥

इदानीं "नैवैश्वर्यवस्तुनि विभागवचःश्रुतिर्नः" इत्युक्तं विद्व-ण्वन्मुखादपि वैषम्यं दार्ष्टान्तिकस्याह—

ऐश्वर्यवर्णनमिह द्विविधं न वेदे
नित्यं क्व चित् क्व चिदनित्यमिति प्रतीमः ॥
ऐश्वर्यमात्रकथनं पुनरस्ति मोक्षा-
दर्वाक्षु मोक्षसमये च न तत्परं तत् ॥ १६९ ॥

ऐश्वर्यवर्णनमिति । न तावदिह लोके नित्यादिरूपेण द्विविधमैश्वर्यं प्रतिद्धं । नापि वेदे परावरात्मनोर्नित्यानित्यत्वविभागे-नैकत्रानेकत्र वा तच्छ्रुतं येन विशेषनिषेधश्रुतिरौपाधिकविषया कल्प्येत्यर्थः । नन्वेष सर्वेश्वर इत्यादिना मोक्षदशायां श्रूयमाणत्वात्, तथा ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता इन्द्रो दिव इन्द्र ईशः पृथिव्याः वैवस्वतं सङ्गमनं जनानां यमं राजानमित्यादिना मोक्षादर्वाग्भूमिष्वपि श्रूयमाणत्वान्नित्यानित्यभा-वेन द्विविधमप्यैश्वर्यं प्रामाणिकमित्याशङ्क्य मोक्षदशायां तदभिधा-यकार्थवादस्य श्रुत्यन्तरविरोधादिना सामगानादिश्रुतिवदतत्परत्व-स्योक्तत्वान्नैवमित्याशयेनाह—ऐश्वर्यमात्रेति ॥ १६९ ॥

ननु पारमेश्वरं निरङ्कुशमैश्वर्यं नेतीत्यादिश्रुत्या न निषेद्धुं शक्यम्, तस्यान्यतोऽप्राप्तस्य निषेधायोगात् । न च श्रुतिप्राप्तस्यैव तस्य निषेध इति वाच्यम् । श्रुतेस्तत्परत्वाभावे तत्प्रापकत्वायो-

गात्, तस्यास्तत्परत्वे वा तद्विरोधादेव निषेधकश्रुत्या तन्निषेदुधुमशक्यम्। न च सिद्धे वस्तुनि विकल्पोऽवतरति, ततश्च निषेधश्रुतिस्तदतिरिक्तविषयेति तद्विरोधाभावादैश्वर्यश्रुतिस्तत्परेत्याशङ्क्य "प्रियशिरस्त्वाद्यप्राप्तिरूपचयापचयौ हि भेदे" इतिसूत्रावष्टम्भेन परिहारमाह—

प्रियशिरस्त्वकथा खलु यादृशी
भवति तादृशमेव तदीरणम्॥
तदनु नेति च नेतिवचः श्रुते-
र्यदपि मोक्षगतं स्तुतये हि तत्॥ १७०॥

प्रियशिरस्त्वेति। आनन्दमयस्य ब्रह्मत्वपक्षे विज्ञानमयकोशगतप्रियमोदादिकमुपासनार्थमानन्दमयावयवत्वेन प्रापयन्ती तस्य प्रियमेव शिर इत्यादिका श्रुतिर्न तत्परा, तस्यास्तथोपासनपरत्वात्। एवं सत्यकामत्वसत्यसङ्कल्पत्वसंयद्वामत्वादिश्रुतिरपि व्यावहारिकेश्वरेऽनुमानावगतमुपासनार्थं प्रापयन्ती न तत्परा उपासनाविधिपरत्वात्तस्याः। तथा तत्पदवाच्यव्यावहारिकेश्वरेऽवान्तरतात्पर्येण श्रुतिप्रापितमनुमानप्रापितं वा ऐश्वर्यं मुक्तावपि स्तुत्यर्थमनूद्य सृष्ट्यादिश्रुत्यर्थवन्महावाक्यापेक्षिततत्पदलक्ष्यसिद्ध्यर्थं निषेधोपपत्तेर्न मुक्तावैश्वर्यसिद्धिरित्यर्थः। एष सर्वेश्वर इत्यादिश्रुतेः स एष नेतिनेत्यात्मेतिश्रुतिसमभिव्याहारेणैकवाक्यत्वादपि तन्निषेध आवश्यक इत्याह—तदन्विति। ननु निषेध्यं चेत्तन्न मोक्षे कीर्तनीयं पङ्कप्रक्षालनन्यायापातादित्याशङ्क्याह—यदपीति॥ १७०॥

ननु क्व चिन्निषेधवाक्यसमभिव्याहारं विनाऽप्यैश्वर्यं परमात्मनो निर्दिश्यते। यथा इदं सर्वमसृजत भीषाऽस्माद्वातः पवते इत्यादौ, तत्कथं न वास्तवमित्याशङ्क्य तद्वाक्यानामपि निर्विशेषवस्तुपरत्वं भाष्यकारोक्तरीत्या स्वीकार्यमन्यथा तत्परबहुश्रुतिविरोधापरिहारा-

दित्याशयेनाह—

स्वातन्त्र्यमीश्वरगिरा गुणमार्गवृत्ति-
माश्रित्यपूर्वगुरवः प्रतिपादयन्ति ॥
सिंहस्य शौर्यगुणवत् परमेश्वरस्य
स्वातन्त्र्यलक्षणगुणोऽव्यभिचारिरूपः ॥ १७१ ॥

स्वातन्त्र्यमिति । अपारवश्यमित्यर्थः । गुणमार्गवृत्तिं गौणवृत्तिम् । भाष्यकारा हि "कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः" इत्यधिकरणे इदं सर्वमसृजतेतिवाक्यं स्वातन्त्र्यं दर्शयन् परमात्मानमपरप्रयोज्यत्वेनेश्वरमब्रवीदित्याहुः । तथा चेश्वरशब्दस्य गौण्या वृत्त्या तत्स्वातन्त्र्यमात्रपरत्वात्तदेव सृष्ट्यादिवाक्याभिप्रेतमिति भावः । ननु स्ववाच्याव्यभिचारिगुणयोगमभिप्रेत्यान्यत्र गौणः शब्दः प्रयुज्यते स्वातन्त्र्यं त्वीश्वरशब्दवाच्ये राजपुत्रादौ व्यभिचरतीत्याशङ्क्य मुख्यमैश्वर्यमीश्वरस्यैवेति स एवेश्वरशब्दवाच्यस्तत्र च स्वातन्त्र्यमव्यभिचारीति तद्विषयगौणप्रयोगो युक्त इति सदृष्टान्तमाह— सिंहस्येति ॥ १७१ ॥

ननु परमात्मन्येवेश्वरशब्दो गौण इति भाष्यकारैरुक्तं ततः कथं स एव तद्वाच्यः कथं वा स्वातन्त्र्यमित्याशङ्क्याविद्यादशायां तच्छबलस्यैश्वर्यं निरङ्कुशमिति स एवेश्वरशब्दवाच्यस्तद्बलादेव च तस्य स्वातन्त्र्यं सिद्ध्यति स एव निरुपाधिकस्तस्य गौणोऽर्थ इति तत्रापि तत्प्रयोगोपपत्तिरित्याह—

ऐश्वर्यवस्तु परिगृह्य तदत्यजन्तः
सामर्थ्यसिद्धिमुपपादयितुं क चिच्च ॥
सर्वेश्वरश्रुतिवचः समुदाहरन्ति
स्वातन्त्र्यलक्षणगुणस्य तमस्वितायाम् ॥ १७२ ॥

ऐश्वर्यवस्त्विति । पूर्वगुरवस्तमस्वितादशायां स्वातन्त्र्यलक्षणगुणस्येश्वरत्वस्यार्थात्सिद्धिमुपपादयितुमैश्वर्यवस्तु परिगृह्य मायो-

पाधिकं मुख्यमैश्वर्यं स्वीकृत्य तदत्यजन्तस्तदनिराकृत्यैव क्वचित्सगुणप्रकरणे सर्वेश्वरत्वविषयश्रुतिवचः समुदाहरन्तीति सम्बन्धः ॥ १७२ ॥

इदानीं सर्वेश्वरश्रुतिसामर्थ्यात्स्वातन्त्र्यसाधनप्रकारं सदृष्टान्तमाह—

सिंहश्रुतिर्न घटते यदि शूरताऽस्य
न स्यात्तथैव परमेश्वरताश्रुतिश्च ॥
नैश्वर्यलक्षणगुणः परमात्मनश्चे-
दित्यर्थलब्धिमभिसंदधते महान्तः ॥ १७३ ॥

सिंहश्रुतिरिति । ऐश्वर्यं लक्षणं गमकं यस्य स्वातन्त्र्यलक्षणगुणस्य स तथोक्तः। यथा सिंहत्वव्यापकत्वात् सिंहशब्देनानुक्तमपि शौर्यं तदर्थेऽर्थात्सिद्ध्यति तथा यस्य यं प्रत्यैश्वर्यं तस्य तदपारवश्यमिति व्याप्तेः सर्वावश्यत्वलक्षणस्वातन्त्र्यं विना सर्वेश्वरत्वायोगात्तच्छ्रुतिबलादेवेश्वरेऽनुपचरितस्वातन्त्र्यगुणसिद्धिरित्यर्थः ॥१७३॥

ननु श्रुतार्थापत्तिगम्यस्य श्रुतत्वाभावादीश्वरे श्रुत्यविरुद्धवस्तुत्वादिलिङ्गकपारतन्त्र्याशङ्का दुर्निरासा स्यादित्याशङ्क्य श्रुतार्थापत्तिगम्यं विना श्रुतार्थस्यैवानिर्वाहाच्छ्रुतिमूलार्थापत्तेः श्रुतितुल्यत्वं श्रुत्यैव प्रापितमिति न्यायवित्संमतम्, तथा च तद्विरोधेऽप्यनुमानमुदेतुं नार्हतीत्याशयेनाह—

औतार्थवृत्तिबललभ्यमपीह वस्तु
औतं वदन्ति निकटत्वमनुस्मरन्तः ॥
आसन्नवृष्टिमपि देवमुदीरयन्ति
वर्षन्तमेव हि जना भुवि तादृगेतत् ॥ १७४ ॥

औतार्थेति । मुख्यार्थे शब्दस्य या वृत्तिस्तत्सामर्थ्यलभ्यमित्यर्थः । तदव्यवहितस्य तच्छब्देन व्यवहारं दृष्टान्तेनोपपादयति—आसन्नेति । देवं पर्जन्यम् । अत्रेश्वरश्रुतिलक्षितस्वातन्त्र्यस्य

शुद्धात्ममात्रतया विवक्षितत्वान्न तेन तस्य सगुणत्वापत्तिरित्यपि द्रष्टव्यम् ॥ १७४ ॥

ननु सूत्रकार एव "पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" इतिसूत्रेण जीवस्य स्वाभाविकमैश्वर्यमविद्यादशायां देहाद्यभिमानवशात्तिरोहितमीश्वरध्यानान्मुक्तावभिव्यज्यते इत्याह । तत्कथं मुक्तौ निर्विशेषत्वमात्मन इति शङ्कां सूत्रकाराभिप्रायप्रदर्शनेन परिहरति—

ऐश्वर्यमज्ञानतिरोहितं सद्
ध्यानादभिव्यज्यत इत्यवोचत् ॥
शरीरिणः सूत्रकृतस्य यत्तु
तदभ्युपेत्योदितमुक्तहेतोः ॥ १७५ ॥

ऐश्वर्यमिति । अस्य शरीरिण इत्यादौ योज्यम् । यस्त्ववोचदिति सम्बन्धः । तत्र हि स्वप्नरथादेः कल्पनकारणाभावेऽपि जीवस्येश्वरांशत्वात्स एव स्वकीयैश्वर्यवशाद्वास्तवमेव स्वप्नप्रपञ्चं सृक्ष्यतीतिशङ्कायां विद्यमानस्याप्यैश्वर्यस्य तदा तिरोहितत्वाज्जीवस्य तद्वन्न विचित्रवास्तवप्रपञ्चस्रष्टृत्वमित्यभ्युपगमवादेनोक्तं सूत्रकारेण न स्वसिद्धान्ततया, न स्थानतोऽपि परस्येत्यादिनोक्तश्रुतिन्यायविरोधापातात, तन्निरोधाभावादेदुर्निरूपत्वाच्चेत्यर्थः ॥ १७५ ॥

किं च सूत्रोक्तमित्येतावता न वास्तवमैश्वर्यमभ्युपेयं, तस्य श्रुतिवत्स्वतःप्रमाणत्वाभावात्प्रमाणापेक्षितन्यायमात्रसूचकत्वाच्च । न च जीवस्य स्वाभाविकैश्वर्ये किं चित्प्रमाणं न्यायो वा शक्यते वक्तुम् । न चेश्वरांशत्वाज्जीवे तदैश्वर्यमस्तीति वाच्यम् । तस्यैव भेदादिना दुर्निरूपत्वेनासिद्धेः । अंशस्यांशिगतसामर्थ्यवत्त्वानियमाच्च । ईश्वरैश्वर्यस्यापि स्वाभाविकत्वे मानं नेत्युक्तमित्याशयेनाह—

अथ वा चितिवत् प्रतीयतां
पुरुषस्येश्वरतापि वास्तवी ॥

यदि किं चन कारणं भवे-
न्न विना सा तदिहाभ्युपेयते ॥ १७६ ॥

अथ चेति । एतदनास्थायाम् । कारणं प्रमाणम् ॥ १७६ ॥

किं च "कामादीतरत्र तत्र चायतनादिभ्यः" इति सूत्रे छान्दोग्ये अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश इति प्रस्तुतदहराकाशस्य य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इत्युक्तसत्यकामादिगुणानां, बृहदारण्यके स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशान इति परात्मन्युक्तवशित्वादिगुणानां चेतरेतरोपसंहारो वर्णितः । तत्र दहर उत्तरेभ्य इत्युक्तन्यायाद् दहराकाशो ब्रह्मैव तथापि तद्विद्या सगुणब्रह्मविषया, तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामानिति कामादिगुणानामपि वेदत्वश्रवणाद् बृहदारण्यकेऽपि अत ऊर्ध्वं विमोक्षायैव ब्रूहीति प्रश्नोपक्रमात्स एष नेति नेत्यात्मेत्युपसंहाराच्च तद्विद्या निर्गुणविषया, तथा च भिन्नविद्ययोरुपसंहृतानामेतेषामुपासनं प्रमितिर्वा न प्रयोजनम्, ततश्चोपसंहृतैः कामादिगुणैः सगुणत्वं बृहदारण्यके न विवक्षितं सूत्रकारस्य । एवं वशित्वादिभिरप्युपसंहृतैरिव श्रुतैरपि सगुणत्वं ब्रह्मणो न विवक्षितमिति गम्यत इत्याशयेनाह—

कामादि तत्र च भवेदितरत्र चेति
यत् सूत्रकारवचनं तदुदीक्षमाणाः ॥
कामादिकेन दहरस्थगुणेन तुल्यं
सर्वेश्वरादिगुणजातमिति प्रतीमः ॥ १७७ ॥

कामादीति । उदीक्षमाणा उक्तरीत्या विचारयन्तो वयमित्यर्थः ॥ १७७ ॥

तर्हि तेषामितरेतरत्रोपसंहारस्य किं फलमित्याशङ्क्य बृहदारण्य-

के सत्यकामादिगुणोपसंहारस्य परिशेषात् स्तुतिमात्रं फलमिति तावदाह—

दहरस्थगुणोपसंहृतेः
स्तुतिमात्रं स्थिरहृद्य नापरम् ॥
फलमस्ति परात्मनिष्ठिते
वचने वाजिभिराहृते महत् ॥ १७८ ॥

दहरस्थेति । महत् साक्षात्पुरुषार्थपर्यवसायि ॥ १७८ ॥

तथापि वशित्वादिगुणानां वस्तुतत्त्वबोधप्रकरणे श्रुतत्वाद्वस्तुविशेषकत्वमित्याशङ्क्य सूत्रकारेणैव तेषां सत्यकामादिगुणसमानयोगक्षेमत्वाभिधानादुपसंहृतानामिव श्रुतानामपि स्तावकत्वमुक्तविधया स्वातन्त्र्योपलक्षकत्वं चोपेयं न वस्तुस्वभावत्वं केनापि प्रकारेणेत्याशयवानाह—

दहरादुपसंहृतैर्गुणैः सदृशाश्चेद् वशितादिलक्षणाः ॥
न तदा परमात्मरूपतां प्रतिपत्तुं कलयाऽपि शक्नुयुः ॥ १७९

दहरादुपसंहृतैरिति । स्पष्टार्थान्यक्षराणि ॥ १७९ ॥

ननु तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति श्रुतावव्याकृतात् परस्य शुद्धस्य परमेश्वरत्वाभिधानात्तस्य तद्वास्तवमित्याशङ्क्य वशित्वादिसन्निधिपठितसर्वेश्वरत्वस्यैवात्रापि प्रत्यभिज्ञायमानत्वात्तस्य च पूर्वोक्तविधया स्तावकत्वादिदमपि तथैवेत्याह—

परमेश्वरतागुणोऽप्यतः स्तुतये तस्य परस्य वस्तुनः ॥
परिकीर्तित इत्युपेयतामविशेषाद् वशितादिलक्षणैः ॥ १८०

परमेश्वरतेति । अतःशब्दार्थं विशदयति—अविशेषादिति ॥ १८० ॥

नन्वीश्वरत्वं प्रतिवेदान्तं बहुशः श्रुतत्वात्तद्वास्तवं स्वरूपमित्याशङ्क्य कारणत्वसाक्षित्वप्रतिबन्ध्या परिहरति श्लोकद्वयेन—

कारणत्वमपि चित्सुखादिव-
त्तत्स्वरूपमिति किं न गृह्यते ॥

ईश्वरत्वविषये विपश्चितां
पक्षपातकरणे न कारणम् ॥ १८१ ॥

कारणत्वमपीति । कारणत्वस्य सापेक्षत्वान्निरपेक्षात्मस्वरूपं तदिति न गृह्यत इत्याशङ्क्येश्वरत्वस्यापीशितव्यापेक्षत्वं तुल्यमित्याशयेनाह—ईश्वरत्वविषय इति ॥ १८१ ॥

साक्षितापि परमात्मनो भवे-
दीश्वरत्ववदियं न संशयः ॥
नित्यसिद्धनिजबोधरूपव-
द्रूपमेव निरुपाधिकं विभोः ॥ १८२ ॥

इयं श्रुतियुक्तिसिद्धा । साक्षितायाः साक्ष्यसापेक्षत्वान्न परमात्मस्वरूपत्वमित्यपि न शङ्कनीयम्, उक्तोत्तरत्वादित्याशयेनाह—न संशय इति । इयं साक्षिताऽपि विभोः परमात्मनो निरुपाधिकं रूपमेव भवेदिति सम्बन्धः ॥ १८२ ॥

साक्षित्वं कारणत्वं च ब्रह्मणः श्रुत्या नैवोक्तमिति वैषम्यमाशङ्क्य तत्र मन्त्रानुदाहरति त्रिभिः—

एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ॥
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च ॥ १८३ ॥

एको देव इत्यादिना । ब्रह्मविष्ण्वादिभेदनिरासाय एक इत्युक्तम् । तस्य जडत्वनिरासाय देव इति । द्योतनस्वभावश्चिद्रूप इत्यर्थः । तस्य ब्रह्माण्डाद्बहिरवस्थितिशङ्कां निराकरोति—सर्वभूतेष्विति । तत्रानुपलम्भविरोधं परिहरति—गूढ इति । तर्हि परिच्छिन्नत्वं, नेत्याह—सर्वव्यापीति । तथाप्याकाशादिवत्परोक्षत्वशङ्कां वारयति—सर्वभूतान्तरात्मेति । तर्हि जीववत्कर्तृत्वादिसंसारी स्यात्, नेत्याह—कर्माध्यक्ष इति । कर्मसु बुद्ध्यादिव्यापारेषु क्रियमाणेषु

स्वयं संनिधिमात्रेणाध्यक्ष एव न तु तद्वानित्यर्थः । ततोऽन्यस्य जगदुपादानत्वशङ्कां वारयति–सर्वभूताधिवास इति । सर्वाणि भूतान्यध्यस्ततया वसन्त्यस्मिन्निति स तथोक्तः । जगदाकारेण परिणामित्वं निराकरोति–साक्षीति । साक्ष्यवस्तुनः साक्षिधर्मत्वायोगादाध्यासिकसम्बन्धेनैव तत्साक्षीत्यर्थः । तर्हि साक्षादीक्षणात्साक्षीतीक्षणव्यापारवत्त्वान्न कौटस्थ्यमिति नेत्याह–चेता, स्वरूपभूतचितैवाभासको न व्यापारद्वारेणेत्यर्थः । तत्र व्यापाराभावे हेतूपरागाभावं हेतुमाह–केवलः, असङ्ग इत्यर्थः । तर्हि सुखादिगुणसम्बन्धादसङ्गत्वं कथमित्याशङ्क्य तस्य तत्स्वरूपत्वान्न गुणगुणिभावोऽस्तीत्याह—निर्गुण इति । सर्वसाक्षित्वादेव तस्यान्योऽपि भावोऽभावो वा वास्तवो धर्मो नेति चशब्दार्थः ॥ १८३ ॥

जीववद्देहद्वयपरिच्छिन्नत्वं वारयति—

न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते ॥
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ॥ १८४ ॥

न तस्येति । तर्हि तदधीनत्वात्कर्तृत्वादेस्तद्रहितस्य सर्वकर्तृत्वं सर्वज्ञत्वं वा कथं स्यात्तदभावे वा कथमीश्वरत्वमिति चेत्तत्राह–न तत्समश्चेति । देहादिपरिच्छेदाभिमानिन एव सर्वज्ञत्वादि दुर्घटं तद्रहितस्य तु स्वातन्त्र्यं ज्ञातृत्वादौ, सम एव न कुतोऽभ्यधिकः, अतः स एव सर्वज्ञः सर्वकर्ता चेति तस्य कारणत्वमीश्वरत्वं च सिद्धमित्यर्थः । देहादिहीनस्य किञ्चित्कर्तृत्वमपि न सम्भवति, कुतः सर्वकर्तृत्वमित्याशङ्क्य यस्य देहाद्यधीनं सामर्थ्यं तस्य तदभावे सामर्थ्याभावान्मास्तु कर्तृत्वादि, यस्य तु स्वतःसिद्धा मायारूपा परा निरतिशया विविधा विचित्रकार्यानुकूला शक्तिस्तस्य देहादिना विना किं हीयत इत्याह--पराऽस्येति । श्रूयते, मायिनं

तु महेश्वरमित्यादौ । तथापि जडया तया कथं सर्वज्ञत्वसिद्धिरित्यत आह–स्वाभाविकीति । ज्ञानस्य स्वरूपभूतस्य यद्बलमनावृतत्वं तेन व्याकृताव्याकृतसर्वविषयावच्छिन्नस्फुरणरूपफलक्रिया तदभिव्यक्तिः, स्वाभाविका देहादिनिरपेक्षैव सिद्धा यः सर्वविदित्यादिश्रुतौ, तत ईश्वरत्वादि नानुपपन्नमित्यर्थः ॥ १८४ ॥

तथापि तस्य सर्वेश्वरत्वं सर्वकारणत्वं च कथं, तस्यापि स्वाम्यन्तरादेः संभवादित्याशङ्क्याह—

न तस्य कश्चित् पतिरस्ति लोके
न चेशिता नैव च तस्य लिङ्गम् ॥
स कारणं वै करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः ॥ १८५ ॥

न तस्य कश्चिदिति । पतिः स्वामी । ईशिता नियन्ता । तदभावे हेतुमाह-नैव चेति । लिङ्ग्यते चेतनोऽनेनेति कार्यकारणसंघातो लिङ्गम् । यो हि देहादिपरिच्छिन्नोऽशनायादिमान्भवति तस्यैव स्वाम्यादिः संभाव्यते, ईश्वरस्य तु तदभावादेव स्वाम्यन्तराद्यसंभवात्स्वयं सर्वेश्वर इत्यर्थः । सर्वकारणत्वमुपपादयति–स कारणमिति । सर्वकार्यस्येति शेषः । न तस्य कश्चित्पतिरस्तीत्यत्र हेत्वन्तरमाह–करणेति । चक्षुरादिकरणानामधिपाः सूर्यादयस्तेषामप्यधिष्ठाय पालयिता, अतो न तस्य कश्चित्पतिरस्तीत्यर्थः । सर्वकारणत्वादि निगमयति–न चास्य कश्चिदिति । यतोऽस्य कश्चिज्जनिता नास्ति ततोऽयमेव मूलकारणम्, यतश्चान्योऽधिपो नास्ति ततोऽयं सर्वेश्वर इत्यर्थः ॥ १८५ ॥

ईश्वरत्ववत्कारणत्वादेः श्रौतत्वं निगमयति—

इति श्रुतिः कारणसाक्षिभाव-
मैश्वर्यवद् वक्ति परस्य पुंसः ॥
अतत्परत्वान्न तदिष्यते चेद्
द्वयं तृतीयं न तथैषितव्यम् ॥ १८६ ॥

इति श्रुतिरिति । कारणत्वं साक्षित्वं चेति द्वयमन्यपरमन्त्रादिसमर्पितत्वाद्वस्तुस्वभावतया नोपेयत इत्याशङ्क्य तृतीयमीश्वरत्वं मन्त्रादिना तेन सहैवोक्तत्वात्तद्वदेव न ग्राह्यमित्याह–अतत्परत्वादित्यादिना ॥ १८६ ॥

कारणत्वादिश्रवणस्याखण्डैकरसत्वपरश्रुत्यन्तरविरोधादतत्परत्वं चेदीश्वरत्वश्रवणस्यापि तत्तुल्यम, तेन त्रयमपि वर्जनीयमित्याह—

अतत्परत्वं श्रवणस्य तुल्यं
त्रिषु त्रयं तेन विवर्जनीयम् ॥
अथेष्टमेकं त्रयमेषितव्यं
विशेषहेतोरनिरूपणेन ॥ १८७ ॥

अतत्परत्वमिति । ईश्वरत्वस्याखण्डस्वरूपमात्रत्वान्न श्रुत्यन्तरविरोधश्चेत्कारणत्वाद्यपि तथेष्यताम, तस्य सापेक्षत्वान्न निरपेक्षवस्तुमात्रत्वं चेदीश्वरत्वस्यापि तत्तुल्यमित्याशयेनाह—अथेष्टमिति ॥ १८७ ॥

तर्हि त्रयमपि वस्तुरूपं सत्यं च भवत्वित्याशङ्क्य तत्र तावदीश्वरेशितव्ययोः परस्परापेक्षत्वेन तद्भावस्य मिथ्यात्वं वदंस्तस्याखण्डवस्तुस्वरूपत्वमयुक्तमित्याशयवानाह —

ईशितव्यमनपेक्ष्य नेश्वरो
नेशितव्यमपि तद्वदीश्वरम् ॥
अन्तरेण घटते ततो मृषा
मोहमात्रपरिकल्पितं द्वयम् ॥ १८८ ॥

ईशितव्यमिति । ईश्वरो न घटत इति सम्बन्धः । ईश्वरत्वं न सम्भवतीति यावत् । तद्वदीश्वरत्ववदीशितव्यमपीश्वरमन्तरेण न घटते, द्वयोरप्यन्योऽन्याधीननिरूपणतया परस्परप्रमापेक्षकत्वादुभयोरपि प्रमित्यनुपपत्तेरुभयं भ्रान्तिमात्रसिद्धत्वादनिर्वचनीयमित्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ १८८ ॥

एवं कारणत्वमपि सापेक्षत्वात्कार्यवत्कल्पितम्, तथाहि, कारणत्वस्य कार्यान्वियतपूर्वभावात्मत्वात्कार्यत्वस्य च कारणान्वियतपश्चाद्भावात्मत्वेन परस्परापेक्षत्वात्पूर्वोत्तरभावयोरपि परस्परापेक्षत्वादित्याह—

कार्यवस्तु विरहय्य कारणं
न क्व चिद् घटयितुं क्षमेमहि ॥
नापि कारणमपोह्य केवलं
कार्यवस्तु परिकल्पयेमहि ॥१८९॥

कार्यवस्त्विति । कारणं तत्त्वम्, तथा च तदपि न वस्तुस्वरूपमिति भावः ॥ १८९ ॥

इदानीं साक्षितायाः अपि सापेक्षत्वेन कल्पितत्वान्न वस्तुरूपत्वमित्यभिप्रेत्याह—

साक्ष्यवस्तु परिहृत्य साक्षिता
साक्षिणं च परिहृत्य साक्ष्यता ॥
नेष्यते न घटते च तेन तत्
सव्यपेक्षमुभयं परस्परम् ॥ १९० ॥

साक्ष्यवस्त्विति । एकैकं परिहृत्योभयस्याप्यसम्भवे फलितमाह—तेनेति । परस्परापेक्षत्वे फलितमाह—न घटत इति । तदुभयं वस्तुतो न घटते, ततः कल्पितत्वात्साक्षित्वमपि न वस्तुरूपमिति चशब्दार्थः ॥ १९० ॥

ननु मातृमेयादेः परस्परसव्यपेक्षत्वेऽपि सत्यत्ववदीश्वरत्वादेरपि तत्किं न स्यादित्याशङ्क्य दृष्टान्तासिद्धिमभिप्रेत्य तत्राप्युक्तन्यायेन कल्पितत्वं साधयति—

न प्रमेयमपहाय मातृता
नापि मातृविरहे प्रमेयता ॥
मातृमेयरहिता न च प्रमा
न प्रमाणरहितं प्रमाफलम् ॥ १९१ ॥

न प्रमेयामिति । प्रमारहिते च न मातृमेये इति चशब्दार्थः । एवं प्रमायाः प्रमाणापेक्षत्वं तस्य च प्रमापेक्षत्वमिति परस्परापेक्षत्वात्सर्वमेतत्कल्पितमित्याशयेनाह—न प्रमाणेति । प्रमैव फलम् ॥१९१॥

एवं कर्मादिकारकप्रेरकस्य कर्तृत्वात्कर्तुरीप्सिततमस्य कर्मत्वात्तयोरपि परस्परापेक्षत्वम् । एवं क्रियाकारकयोः क्रियातत्फलयोश्च परस्परापेक्षत्वेन कल्पितत्वान्न सत्यत्वमिप्सितमभिप्रेत्याह—

कर्तृ कर्म परिहृत्य नेष्यते
कर्म कर्तृरहितं न च क्वचित् ॥
कर्तृकर्मरहिता न च क्रिया
न क्रियाविरहितं क्रियाफलम् ॥ १९२ ॥

कर्तृ कर्मेति । क्रियाफलं कार्यम् ॥ १९२ ॥

एवं सामान्यविशेषयोरप्यनुवृत्तव्यावृत्तस्वरूपयोः परस्परापेक्षत्वान्मृषात्वमित्याह—

सामान्यं न विशेषवस्तुविरहे तस्माद् विना तन्न च
स्वातन्त्र्येण घटामुपाश्नुति ततः सापेक्षमेतद् द्वयम् ॥
यत् सापेक्षमिहेक्षितं भवति तन्मायामयं स्वप्नव-
त्तस्मादीश्वरतादि कल्पितवपुः स्वीकुर्महे न्यायतः॥१९३॥

सामान्यमिति । तस्मात् सामान्यात् । तद् विशेषवस्तु । घटां घटनाम् । उपाश्नुति उपगच्छति । आस्तां तावद् यत्परस्परापेक्षं तत् मिथ्येति यदेव यत्किंचित्सापेक्षं तत्सर्वं मायिकं किमु परस्परापेक्षमित्याशयेनाह-यत्सापेक्षमिति । फलितं निगमयति-तस्मादिति ॥ १९३ ॥

किं च किं भिन्नयोरीश्वरेशितव्यभावः, उताभिन्नयोः, भिन्नाभिन्नयोर्वा । नाद्यः, भिन्नस्येश्वरस्य जीवैः सह सम्बन्धानिरूपणेन तस्य तत्प्रेरणादिरूपेशनानुपपत्तेः तदभेदपरश्रुत्यादिविरोधाच्च । न द्वितीयः, अत्यन्ताभिन्ने तद्भावायोगादित्यभिप्रेत्य तृतीयेऽपि पक्षे

स्वतोऽभिन्नयोर्जीवेश्वरयोर्भेदः किमौपाधिक उत निरुपाधिकः। आद्येऽपि स किं सत्योऽसत्यो वा, सत्यत्वपक्षेऽपि भेदस्यौपाधिकत्वं किमभेदेनाविरोधायोच्यते तत्सत्यत्वाय वा। नान्त्यः, व्याघातादित्यभिप्रेत्य विरोधायेतिपक्षं दूषयति पादत्रयेण—

अभिन्नता भिन्नतया विरुद्धा
विभिन्नताऽभिन्नतया तथैव ॥
उपाधिभेदे परिकल्पितेऽपि
विना पुनस्तं किमुदीरणीयम् ॥ १९४ ॥

अभिन्नतेत्यादिना। वस्तुतोऽभिन्ने वस्तुनि सत्यस्यौपाधिकभेदस्य काप्यदर्शनात्तस्याप्यभेदेन विरोधोऽपरिहार्य इत्यर्थः। औपाधिकभेदस्यासत्यत्वपक्षे तदधीनेश्वरत्वेशितव्यादिभावस्यापि तथात्वापत्तेरिष्टापत्तिमभिप्रेत्य भेदस्यानौपाधिकत्वपक्षे कैमुतिकन्यायेनाभेदेन विरोधं वदंस्तयोरेकत्रासम्भवमाह—विनेति। तमुपाधिम, यदा सोपाधिकस्यापि विरोधस्तदा निरुपाधिकभेदस्याभेदेन विरोध इति किं वक्तव्यम, ततोऽयमपि पक्षो न सम्भवतीत्यर्थः॥ १९४॥

ननु स्वभावतः शीतेऽपि जलेऽग्निसम्बन्धादौष्ण्यं सत्यमेव दृष्टं ततोऽपि दाहादिदर्शनाद, एवमौपाधिकोऽपि भेदः सत्यः किं न स्यादित्याशङ्क्य दृष्टान्तासंप्रतिपत्त्या परिहरति—

स्वभावतो यन् मिथुनं विरुद्धं
न तन्निमित्तान्तरतः कदा चिद् ॥
उपैति साख्यं परमार्थवृत्त्या
भ्रमादलभ्यं न च किं चिदस्ति ॥ १९५ ॥

स्वभावत इति। साख्यं सामानाधिकरण्यम। तत्रापि जलगताग्न्यौष्ण्यस्यैव दाहादिहेतुत्वं संभवति जलगतस्यौष्ण्यादौ मानाभावान्न तत्र शैत्यौष्ण्ययोः सामानाधिकरण्यमित्यर्थः। तर्हि कथं जलगततयौष्ण्यादिप्रतीतिः, शैत्यं च

तद्गतं किमिति न प्रतीयत इति तत्राह—भ्रमादिति । स्वत उष्णाग्निरूपोपाधिसम्बन्धात् स्फटिकलौहित्यादि भ्रमादेव जलादावौष्ण्यादेः प्रतिभासः, तदीयशैत्यस्य च स्फटिकशौक्ल्यवदुपाध्यभिभवदोषादप्रतिभासश्च घटते, इतरथा जलगतौष्ण्यशैत्ययोरुत्पत्तिविनाशयोः क्लृप्तकारणानिरूपणात्तयोः प्रतिभासाप्रतिभासौ न स्यातामिति भावः ॥ १९५ ॥

ननु त्वन्मत इव भेदाभेदयोः साहित्यं परमतेऽपि किं न स्यादित्याशङ्क्य मन्यते वास्तवाभेदे सत्यपि भेदस्यानिर्वचनीयाविद्याप्रयुक्तत्वेन मिथ्यात्वात्तयोः समसत्ताकत्वाभावेनाविरोधाच्छुक्तौ रजततदभावयोरिव साहित्यं घटते । एवं त्वन्मतेऽप्यनिर्वचनीयमोहोपाधिको भेदः स्वाभाविकस्त्वभेदो जीवेश्वरयोरिति यद्यभ्युपगमस्तदोमिति ब्रूमः । यदि तु मोहातिरिक्तसत्योपाधिकृतो भेदो वास्तव इत्यभ्युपगमः, स न सम्भवति समसत्ताकयोर्विरुद्धयोरेकत्रैकदा साहित्यायोगात्तद्घटकोपाधेरेवासम्भवादिति दृष्टान्तेनाह—

न रविशार्वरसख्यकृदीक्ष्यते
जगति कश्चिदुपाधिरमोहतः ॥
यदि भवेत् स भवेद् भवतो मतः
स न भवेद् यदि सोऽपि न सम्भवेत् ॥ १९६ ॥

न रवीति । शार्वरं तमः । अमोहतो मोहातिरेकेण । रविशार्वरयोः साहित्यहेतुरुपाधिरदर्शनादेव मा भूदभिन्ने वस्तुतो भेदघटक उपाधिः किं न स्यादित्याशङ्क्य तस्यापि कुत्राप्यदर्शनात्तत्समानयोगक्षेमत्वमाह—यदि भवेदिति । सोऽपि त्वदभिमतोऽपि ॥ १९६ ॥

मोहोऽपि कथमात्मवस्तुन्यनुपपन्नं भेदं घटयेदित्याशङ्क्य न हि दृष्टेऽनुपपन्नं नामेति न्यायेन परिहरति—

स्वमपि खादति खण्डितमीक्षते

निजशिरो नयनेन करार्पितम् ॥
किमपि दुर्घटमस्य न विद्यते ॥
यदि विमूढमतिर्भवति स्वयम् ॥ १९७ ॥

स्वमपीति । खादतीत्यादिक्रियाद्वयं स्वप्नोन्मदादिदशायामपि द्रष्टव्यम् । एवं जागरितेऽपि नभोनैल्यचन्द्रप्रादेशिकत्वादि वस्तुतोऽघटितं मोहादेव घटितमित्यभिप्रेत्याह-किमपीति ॥ १९७ ॥

एवमीश्वरेक्षितव्यभेदस्याविद्यकत्वेन मिथ्यात्वात्तदधीनेश्वरत्वादिकमपि तथेति स्वतो निर्विशेषमात्मतत्त्वमित्युक्तम् । इदानीं यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतिभिर्जगत्कारणत्वप्रतिपत्तेः कथं निर्विशेषत्वमित्याशङ्क्य कारणत्वादेरपि वक्ष्यमाणविधया दुर्निरूपत्वेनाविद्यकत्वात्तच्छ्रुतेरप्यतत्परत्वात्स्वतः कूटस्थैकरसं वस्त्वित्याह—

इतश्च निर्भेदकमात्मतत्त्वं
निरूपणे कारणकार्यतादेः ॥
अनादिमायैकनिबन्धनत्वा-
दसम्भवादस्य तु वस्तुवृत्त्या ॥ १९८ ॥

इतश्चेति । तमेव हेतुं विवृणोति—कारणेति । तद्विशेषोपादानोपादेयत्वादिरादिपदार्थः । मायामात्रनिबन्धनत्वे हेतुरसम्भवादिति । अस्य कारणकार्यतादेर्वक्ष्यमाणरीत्या निरूपणे वस्तुवृत्त्या ऽसम्भवादेवेति सम्बन्धः । तुरवधारणे ॥ १९८ ॥

तत्र कार्यताया दुर्निरूपत्वात्तन्निरूपितकारणताऽपि तथेति मन्वानोऽसतः सतो वा कार्यत्वमिति विकल्प्य प्रथमं दूषयति असन्न कार्यमित्यारभ्य सतोऽपि कार्यत्वमयुक्तमित्यन्तेन ग्रन्थेन—

असन्न कार्यं गगनप्रसून-
वन्ध्यासुतादेः करणाप्रसिद्धेः ॥
न प्रागसत् कार्यमिति प्रवादः

प्रशस्यते तस्य विरोधहेतोः ॥ १९९ ॥

करणमुत्पत्तिरुत्पादनं वा, तदप्रसिद्धेरित्यर्थः । ननूत्पत्तेः पूर्वमसतोऽपि कार्यस्याभावप्रतियोगित्वं वन्ध्यासुतादेर्विशेषोऽस्ति ततस्तदुत्पत्त्याद्युपपद्यत इति चेन्न, निःस्वरूपेऽसति धर्मभूतस्य स्वस्वरूपात्मकस्य वा सतोऽभावप्रतियोगित्वस्याप्यसंभवात्, तस्याप्यसत्त्वेऽसतः कार्यस्य तेन विशेषेण विशेषवत्त्वं न स्यात् । इतरथा वन्ध्यासुतादेरपि तेन विशेषेण तद्वत्त्वप्रसङ्गात् । तर्ह्यभाव एवासतः कार्यस्य विशेष इति चेन्न, तस्यासता सम्बन्धाभावेन विशेषत्वायोगात् । न चाभावस्वरूपमेव तत्सम्बन्ध इति वाच्यम् । तथा सति वन्ध्यासुतादेरपि स विशेषः स्यात्, अभावमात्रस्य तद्रूपसम्बन्धस्य च सर्वासत्साधारणत्वात् । किं चासतः कार्यस्याभाव एव वन्ध्यासुतादेरिवासंभवी यत्तस्य विशेषः स्यादिति भावः । ननु वन्ध्यासुतादेरत्यन्तासत्त्वात्तस्योत्पत्तिरभावो वा मास्तु, कार्यस्य तूत्पत्तेः प्रागेवासत्त्वादत्यन्तासत्त्वाभावात्तदुत्पत्त्याद्युपपत्तिरिति नेत्याह—न प्रागिति । तत्र किं कार्यस्य सत्त्वासत्त्वे धर्मौ स्वरूपं वा आद्येऽपि किं भिन्नयोर्धर्मिणोस्तौ धर्मावेकस्यैव वा । आद्ये नासतः कार्यत्वसिद्धिः । उत्पन्नस्य सतः कार्यस्य ततोऽन्यत्वात् कार्यस्याप्युत्पत्तेः प्रागसत्त्वं न स्यात् । तदा अमतस्तस्य ततोऽन्यत्वात् । न द्वितीयः, धर्मिणं विना कादाचित्कधर्माभावेनासत्त्वकाले तद्धर्मिकार्यसत्त्वस्यावश्यकत्वेन तत्र तद्विरोध्यसत्त्वस्यानुपपत्तेः सत्कार्यवादापातात् । नाप्याद्यद्वितीयः, सत्त्वासत्त्वयोर्भिन्नयोर्विरुद्धयोश्चाविरुद्धाभिन्नवस्तुस्वरूपत्वायोगात्, तयोर्भिन्नवस्तुस्वरूपत्वे वा नासतः कार्यत्वसिद्धिरित्यादिनोक्तदोषोऽपरिहार्यः स्यात् । तस्मादसतः कालान्तरसत्त्वायोगाद्यदसत्तत् सर्वदाऽसदेवेति नासतः कार्यत्वसंभावनेत्यर्थः ॥ १९९ ॥

किं चासतः कार्यस्योत्पत्तेः प्रागसदिति प्राक्कालविशेषितत्वमेव न घटते येन तदत्यन्तासतो व्यावर्त्येत, न हि निरुपाख्यस्यासतः

केन चिद्विशेषणेन योग उपपद्यतेऽङ्गीक्रियते वा । इतरथा निरुपाख्यत्वव्याघातात् । प्रत्यक्षादिप्रमाणानामन्यतमस्य तत्साधकत्वायोगात्तत्साधकान्यप्रमाणापत्तेश्चेत्यभिप्रेत्यासतो विशेषणमात्रासंभवं सदृष्टान्तमाह—

विशेषणानामसति प्रवृत्ति-
र्न दृश्यते क्वापि न युज्यते च ॥
युधिष्ठिरात् प्रागभवन्नरेन्द्रो
वन्ध्यासुतः शूर इतीह यद्वत् ॥ २०० ॥

विशेषणानामिति । स्पष्टार्थान्यक्षराणि ॥ २०० ॥

एवमसतः कार्यत्वासम्भवमुक्त्वा तदुत्पत्तेरप्यसंभवमाह—

उत्पत्तिरप्यस्य निरूप्यमाणा
न का चिदागच्छति युक्तिमार्गम् ॥
स्वसत्तया स्वैः समवायिकारणै-
रपीह या स्यात् समवायिताऽस्य ॥ २०१ ॥

उत्पत्तिरपीति द्वयेन । अस्यासत उत्पत्तिर्निरूप्यमाणाऽसत्कार्यवादिभिरनेकधोच्यमाना का चिदपि न युक्तिसहेत्यर्थः । तैरुच्यमानां तामनूद्य तदसंभवं प्रतिजानीते । स्वसत्तयेत्यादिना । अस्य कार्यस्य स्वसत्तया या समवायिता स्यात्कार्ये सत्तायाः समवाय इति यावत् । इह कारणेषु स्वैः समवायिकारणैः सह या वा समवायिता स्यात्, वार्थोऽपिशब्दः, समवायिकारणगतबहुत्वं न विवक्षितम्, स्वस्य समवायिकारणसमवायितेति यावत् ॥ २०१ ॥

असज्जनिः सेत्युपवर्ण्यमानं
सुदुर्घटं न ह्यसतो युजैभिः ॥
सदेव सद्भिः सह सर्ववस्तु
सङ्गच्छते न त्वसदेव सद्भिः ॥ २०२ ॥

साऽसज्जनिरित्युपवर्ण्यमानं निरुच्यमानमसज्जन्मात्यन्तमसम्भ-

वीत्यर्थः । तत्र हेतुः–न हीति । जन्मनः प्रागसतः केनापि सम्बन्धानर्हस्योक्तसत्तादिभिर्युजा सम्बन्धो न युज्यत इत्यर्थः । असतः सम्बन्धानर्हत्वे युक्तिमाह–सदेवेति । सम्बन्धस्य सत्सम्बन्धिद्वयपारतन्त्र्यनियमात्तस्या सत्पारतन्त्र्यायोगात्स सतोरेव घटेत न सदसतोरित्यर्थः ॥ २०२ ॥

ननु त्वन्मते सतो ब्रह्मणोऽसङ्गतया केनापि सम्बन्धाभाववत्तद्व्रतां च जड़ानां सत्त्वाभावात्कथं सदेव वस्तु सद्भिः सह सङ्गच्छत इत्युक्तमित्याशङ्क्य परमतेनेदमुक्तमित्यभिप्रेत्य तन्मते सम्बन्धिनः सत्त्वनियमं दर्शयंस्तद्रहितकार्यस्य सम्बन्धासम्भवमाह—

सती हि सत्ताऽस्य पटस्य दृष्टा
तथैव सन्तः पटतन्तवोऽपि ॥
तया च तैश्चास्य कथं पटस्य
सम्बन्धिता स्यादसतो वदैतत् ॥ २०३ ॥

सती हीत्यादिना । एतद् एतदुत्तरं वदेत्यर्थः ॥ २०३ ॥

तर्हि जन्मना लब्धसत्ताकस्य कार्यस्य कारणैः सत्तया चान्वयो भवित्वित्याशङ्क्य तदन्वय एव तज्जन्मेति त्वयोक्तत्वादात्माश्रयतापत्तेर्जन्मैवानुपपन्नं स्यादित्याह—

स्वकारणैस्तन्तुभिरेवमस्य
स्यसत्तया चान्वय एव जन्म ॥
तवेष्टमेवं सति जन्म तस्य
न शक्यते वर्णयितुं पटस्य ॥ २०४ ॥

स्वकारणैरिति । अक्षरार्थः स्पष्टः ॥ २०४ ॥

ननु कार्यस्य जन्मनः पूर्वमसत्त्वेऽपि जन्मक्षणे सत्त्वात्तदैव सत्तादिनाऽन्वयात्सदेव सद्भिरन्वेतीति नियमोऽत्रापि घटत इत्याशङ्क्य किं तदसतो जन्म तत्क्षणे तत्सत्त्वं किं वा सत्ताद्यन्वय एव तदुभयमिति चेत्तर्हि सत्ताद्यन्वयक्षणे सत्ताद्यन्वयवतः सत्ताद्यन्वय इत्युक्तं

स्यान्नैतद्युक्तम्। असत्यनुपपन्नस्यैव जन्मादेः स्वोपपादकत्वायोगादित्यभिप्रेत्य प्रागुक्तमसतः सदन्वययोग्यत्वं सोदाहरणं स्मारयति—

तदन्वयात् प्रागसतः कथं स्या-
त्तदन्वयो न ह्यसदन्वयाय ॥
सता समर्थं न हि वन्ध्यया त-
त्पुत्रः समन्वेति कदा चिदत्र ॥ २०५ ॥

तदन्वयादिति । सत्ताकारणे तच्छब्दश्रुत्या परामृश्येते । असत्सता सहान्वयाय न हि समर्थं योग्यमित्यन्वयः। अत्र जगति । किं च कार्यस्य न केवलं सत्तादिसमवाय एव जन्म, तस्य सदा सत्त्वेन तदर्थकारणवैफल्यापातात् । नापि कार्योपलक्षितस्तत्समवायः, उक्तदोषापरिहारात् । तस्मात्कार्यविशिष्टः सत्तादिसमवायः कार्यजन्मेति वाच्यम् । तच्चासतः कार्यस्यानुपपन्नम् । आगन्तुकविशेषणविशिष्टस्य विशेषणसाध्यत्वात्प्रागसतश्च कार्यस्य तत्साधकत्वायोगात् । तस्मादुक्तं जन्मलक्षणमसम्भवीति भावः ॥ २०५ ॥

ननु पटस्याद्यसमयसम्बन्ध एव जन्म न सत्तादिसमवायस्तस्य द्वितीयादिक्षणेऽपि सत्त्वादिति नवीनास्तत्राह—

न च किं चिदन्यदसतो वदितुं
पटवस्तुनोऽत्र शकनीयमितः ॥
जनिशब्दवाच्यमनवद्यतया
तदयुक्तमेवमसदुद्भवनम् ॥ २०६ ॥

न च किं चिदिति । असतः सत्तादिनेवोक्तविधया न चाद्यक्षणेनापि सम्बन्धः सम्भवी । किं चासतः कार्यस्य तेन संयोगस्तावन्न सम्भवति तस्य संयोगिहेतुकत्वादसत्तद्धेतुत्वायोगात् । नापि समवायः, अस्य परेणाप्यनङ्गीकारात् । नापि स्वरूपसम्बन्धः, असत्त्वे निःस्वरूपत्वेनोक्तरीत्या स्वरूपासम्भवेन तद्रूपसम्बन्धस्याप्यसम्भवात्, परैर्नष्टानष्टयोरपि स्वरूपसम्बन्धाङ्गीकरात् द्वितीयादिक्षण-

वर्त्तिकार्यरूपमप्याद्यक्षणेन सह सम्बन्धः स्यादिति तदापि तदुत्पत्त्यापत्तेश्च । स्वरूपसम्बन्धस्यान्यत्रापि दुर्निरूपत्वाच्च । किं च सर्वक्षणस्य स्वपूर्वक्षणोत्तरभावित्वेन तदाद्यत्वं चासम्भवि । न च तत्तदुत्पत्तिक्षण एव तदाद्यक्षण इति वाच्यम् । परस्पराश्रयापातात् । ननु स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारक्षण आद्यक्षणः कार्यस्येति चेन्न । स्वशब्देनाद्यक्षणावच्छिन्नकार्याभिधाने परस्पराश्रयापातात् । तत्तत्कार्यमात्राभिधाने च द्वितीयादिक्षणवर्तिकार्यस्यापि स्वशब्दार्थत्वं स्यात्ततश्च द्वितीयादिक्षणवर्तिकार्यसमानकालीनपदार्थप्रतियोगिका ध्वंसास्तृतीयादिक्षणेष्वेव सम्भावितास्तदनाधारत्वं द्वितीयादिक्षणेष्वप्यस्तीति तेऽप्याद्याः क्षणाः स्युस्ततश्च जन्मलक्षणे आद्यविशेषणं व्यर्थं स्यात्, स्याच्च द्वितीयादिक्षणसम्बन्धेष्वतिव्याप्तिः । किं च स्वसमानकालीनेत्यादिलक्षणे किं तादृशयत्किञ्चिद्वस्तुप्रतियोगिकध्वंसानाधारत्वं विवक्षितमुत स्वसमानकालीनयावद्वस्तुप्रतियोगिकध्वंसानाधारत्वम् । नाद्यः, पटसमानकालीनस्य कस्य चिद्वस्तुनो मासाद्यनन्तरं ध्वंससम्भवात्तदनाधारत्वं पटसम्बन्धिद्वितीयादिक्षणेष्वप्यस्तीति तत्रातिव्याप्तिः स्यात् । द्वितीये यावत्त्वं वस्तुविशेषणं वा स्याद् ध्वंसविशेषणं वा । नाद्यः, पटसमकालीनाकाशादिसमस्तवस्तूनां परमते ध्वंसाभावेन तद्घटितलक्षणासम्भवात् । न द्वितीयः, पटसमानकालीनदशद्वादशादिवस्तूनां कालान्तरभाविनो यावन्तो ध्वंसास्तदनाधारत्वं पटीयद्वितीयादिक्षणेष्वप्यस्तीत्युक्तदोषतादवस्थ्यात् । चरमध्वंससमकालीनस्य कस्यापि वस्तुनो ध्वंसाभावेन तदीयाद्यक्षणे तद्घटितलक्षणस्याव्याप्तेश्च । किं च यावदुक्तध्वंसानाधारत्वं नाम किं तदाधारभिन्नत्वं किं वा ध्वंसात्यन्ताभाववत्त्वम् । आद्ये कल्पान्तरीयादिक्षणानामेव वर्णितध्वंसाधारत्वसम्भवात्तद्भिन्नत्वं पटीयसर्वक्षणेष्वप्यस्तीति स दोषस्तदवस्थ एव । द्वितीयेऽपि वर्णितध्वंसात्यन्ताभावानां त्रैकालिकत्वेन पटीयद्वितीयादिक्षणेष्वावश्यक-

स्त्वेन तत्राभिव्याप्तेरपरिहारादित्यलमतिप्रसङ्गेन । एतदभिप्रेत्योक्तम्—अन्यज्ज्ञानिशब्दवाच्यमनवद्यतया वदितुं न शक्नुमः न श्रावयितव्यमिति । एवमसदुत्पत्तेर्दुर्निरूपत्वमुपपाद्य फलितमाह—तदयुक्तमिति ॥ २०६ ॥

यद्यपि वैशेषिकादिभिर्वर्णितप्रकारेण कार्योत्पत्तिर्दुर्निरूपा, तथापि कापिलमतानुवर्तिभिर्निरुच्यमानात्यन्तानभिव्यक्तस्य कारकाधीनाभिव्यक्तिरित्येवमादिरूपा निरपवादेत्याशङ्क्यासत्कार्यवादिभिस्तदनङ्गीकारात् । अगत्याऽऽङ्गीकारे वा सत्कार्यवादापत्तेः स्वसिद्धान्तहानिः स्यादित्याह—

न च वर्णितादपरमत्र भवा-
ननुमन्यते जनिवचोऽर्थमितः ॥
यदि वर्ण्यते किमपि तत्र भवेत्
स्वमतप्रहाणमलिनीकरणम् ॥ २०७ ॥

न चेति । चोऽवधारणे । इतो वैशेषिकादिभिर्वर्णितादपरं जनिवचोऽर्थं जन्म भवानसत्कार्यवादी नैवानुमन्यत इति सम्बन्धः । किमपि तत्र सत्कार्यवाद्युक्तेष्वेकमपि लक्षणं यदि त्वया वर्ण्यते तदा स्वमतप्रहाणरूपं मलिनीकरणं दोषस्तव भवेदित्यर्थः ॥ २०७ ॥

तदा कणादोक्तिविरोधादपि सिद्धान्तहानिरित्यभिप्रेत्य तन्निर्मितजन्मलक्षणमाह—

समवायिकारणगणेन तथा
सह सत्तया च पटवस्त्विह यत् ॥
समवैति तत् कणभुगिच्छति त-
ज्ज्ञानिशब्दवाच्यमिति नान्यदितः ॥ २०८ ॥

समवायीति । इह जगति पटवस्तु समवायिकारणादिना सह समवैतीति यत्तत्तज्ज्ञानिशब्दवाच्यं तस्य पटस्य जन्म इतो नान्यदिति कणभुगिच्छतीति सम्बन्धः ॥ २०८ ॥

तर्ह्यतीव तपस्विना तेन महामुनिनोक्तमादरणीयमित्याशङ्क्य तदुक्तेर्मन्वादिस्मृतिवदनुष्ठेयविषयत्वाभावात्सिद्धपदार्थनिर्णयोपयुक्तन्यायमात्रसूचकत्वात्तन्न्यायानां चोक्तरीत्या बलवत्प्रतिन्यायपराहतत्वान्नैवमित्याह—

न तदत्र सम्भवति युक्तिवशा-
दुपवर्णितं तदतिविस्तरतः ॥
न च किं चिदन्यदुचितं भवतो
वदितुं स्वपक्षमपरित्यजतः ॥ २०९ ॥

न तदत्रेति । अत्र कार्ये तदुक्तं जन्म न सम्भवतीति द्वितीयतच्छब्दार्थः । तर्हि तदुक्तं त्यक्त्वाऽन्योक्तमेवाद्रियतामित्याशङ्क्याऽसत्कार्यवादिनस्तदयुक्तमुपवर्णितापसिद्धान्तदोषापत्तेरित्याह—न च किं चिदिति ॥ २०९ ॥

जन्मनः प्रागसतः कार्यस्य जन्मेति पक्षस्योपपादितां दुर्निरूपतामनूद्य फलितमाह—

निरूपणायां न यतोऽस्ति कश्चि-
दुत्पत्तिशब्दार्थ इह त्वदीये ॥
पक्षे ततो दुर्घटताप्रसिद्धि-
रसज्जनेरुक्तनयेन तावत् ॥ २१० ॥

निरूपणायामिति । दुर्घटताप्रसिद्धिः सा सिध्येदित्यर्थः । तावदित्यनेनानन्तरं पक्षान्तरनिराकरणारम्भं सूचयति ॥२१०॥

इदानीमुत्पत्तेः प्रागपि सत एव कार्यस्योत्पत्तिरितिमतं कारकव्यापारवैयर्थ्यापत्त्या दूषयति—

सतोऽपि कार्यत्वमयुक्तमेव
निरूपणे कारणकृत्यहानेः ॥
न कारणव्यापृतिरत्र शक्या
सतः स्वरूपे वदितुं फलाय ॥ २११ ॥

सतोऽपीति । कार्यसिद्धिरेव कारणव्यापारसाध्येति चेत् सा किं कार्यसत्त्वेव तद्गुणसत्ता वा तदावरणनिवृत्तिर्वा तदभिव्यक्तिर्वा तदनभिव्यक्तिनिरासो वा । नाद्यः, तन्मते कार्यस्वरूपस्य कारणव्यापारात् प्रागपि सत्त्वेन तदसाध्यत्वादित्याह—न कारणेति ॥ २११ ॥

द्वितीयं शङ्कते—

गुणं क्षिपत् कारणमर्थवत्त्वं
लभेत चेन्नात्र गुणस्य भावात् ॥
न चेद् गुणोऽसत्करणं प्रसक्तं
निरर्थकं कारणकर्म तस्मात् ॥ २१२ ॥

गुणमिति । क्षिपत्साधयत् । कार्यवत्तद्गुणोऽपि तत्र प्राक् सन्नसन्वेति विकल्प्याद्ये कार्यवदसाध्यतेत्याह—नात्रेति । द्वितीयमनूद्यापसिद्धान्तापातेन दूषयति—न चेद् गुण इति । कारणव्यापारात् प्रागिति शेषः । उक्तपक्षद्वये कारणव्यापारवैयर्थ्यं फलितमाह—निरर्थकमिति ॥ २१२ ॥

तृतीयमनुवदति—

मलं निरस्यार्थवदिष्यते चेन्
मलोऽपि सन्नैव निरस्य इष्टः ॥
सतोऽविनाशादसतोऽजनेश्च
वृथा ततः कारणमत्र पक्षे ॥ २१३ ॥

मलमिति । अर्थवत्कारणमित्यनुषङ्गः, असतः सत्त्ववत् सतोऽप्यसत्त्वानङ्गीकारात्तव मते तन्निरासोऽप्ययुक्त इत्याह मलोऽपीति । सन्मलो निरस्योऽपि नैवेष्ट इति सम्बन्धः, अविनाशादिति च्छेदः । किं च विनाशोऽपि प्रागसन्सन्वा, नाद्यः, असज्जनेस्तवाऽनिष्टत्वादित्याह—असत इति । अजनेरिति च्छेदः । न द्वितीयः, प्रागेव सति मलविनाशे कारणकर्मवैयर्थ्यादिति चार्थः । मलनिरासेऽप्यनुपयोगे फलितमाह—वृथेति ॥ २१३ ॥

अभिव्यक्त्यनभिव्यक्तिनिरासयोरपि कारणव्यापारात्प्राक् सत्त्वे तद्वैयर्थ्यम् असत्त्वे चापसिद्धान्तापत्तिरिति प्रागुक्तदोषादेव चतुर्थपञ्चमपक्षावप्यनुपपन्नावित्याह—

तस्मादभिव्यक्तिकरी न हेतु-
प्रवृत्तिरत्रार्थवती घटेत ॥
न चानभिव्यक्तिनिरासमृत्या
तस्मान्न सत्कार्यवचः प्रशस्तम् ॥ २१४ ॥

तस्मादिति । उक्तदोषादित्यर्थः । तर्हि कारणव्यापारस्यानुपयोग एवास्तु कार्यजन्मनीत्याशङ्क्य स्वप्रक्रियाव्याघाताच्च सत्कार्यवाद एव त्याज्य इति फलितमाह—तस्मान्नेति ॥२१४॥

किं च सतः कार्यस्याभिव्यक्तिरेव जन्मेति पक्षे तदभिव्यञ्जककारणव्यापारस्य सत्त्वं किं सदातनमुत कदा चिदेव, आद्ये सर्वाभिव्यञ्जकानां नित्यत्वात्तदधीना सर्वकार्याभिव्यक्तिरपि सदा स्यादित्याह—

नित्या च कारकगणस्य सती प्रवृत्ति-
र्नित्यं व्यनक्ति सकलं फलमित्यवश्यम् ॥
वक्तव्यमत्र न लयो न सुषुप्तिमूर्च्छे
नो चेन्न सृष्टिरिति कष्टमुपस्थितं वः ॥ २१५ ॥

नित्या चेति । द्वितीये कारणव्यापृतेरपि कार्यत्वात्तत्सत्त्वस्य कादाचित्कत्वेऽपसिद्धान्तापात इति चार्थः । फलं कार्यम् । ओमिति चेत्, तत्र वक्तव्यं किं कार्याभिव्यक्तिस्तदुपलब्धेरन्या नैव वा, तत्राद्ये कार्यतदभिव्यक्त्योः सदा सत्त्वापातात्प्रलयकालेऽपि लयो न स्यादित्याह । अत्रेति । अभिव्यक्तेरपि नित्यत्वापगम इत्यर्थः । तदुपलब्धिरेवाभिव्यक्तिरिति पक्षे तस्या अपि सर्वस्या उक्तरीत्या नित्यत्वापातात्सर्वप्रकारज्ञानोपरमात्मके सुषुप्तिमूर्छे न स्यातामित्याह । सुषुप्तीति । लयाभावे ज्ञानज्ञेयात्मक-

प्रपञ्चस्य सृष्टिरपि न स्यात्सदा सत्त्वादेव ततश्च कस्य चिदुत्पत्तये नाशाय वा प्रेक्षावतः प्रवृत्त्ययोगात्सत्कार्यवादिनोऽचलस्य जीवनमपि दुर्घटं स्यादित्याशयेनाह—नो चेदिति ॥ २१५ ॥

ननु वेदान्तिभिरप्यसत उत्पत्त्याद्यनङ्गीकारादर्थात्सत एव तद्वक्तव्यं ततश्च स्वपक्षेऽप्युक्तदोषप्रसक्तेः सपरं प्रति नोद्भावनीयः, "यत्रोभयोः समो दोष" इति न्यायादित्याशङ्क्यास्माभिः सतोऽप्युत्पत्त्यादेरनङ्गीकारात्तत्रोक्तदोषाप्रसक्तेर्नैवमित्याह—

वेदान्तवादिसमयेऽपि समानमेत-
द्वाच्यं परैर्न खलु वाच्यमिहाप्रसक्तेः ॥
अस्मन्मते न खलु संव्यवहारमात्रे
मायामये किमपि दूषणमस्ति यस्मात् ॥२१६॥

वेदान्तेति । तर्हि दृश्यमानमुत्पत्त्यादि कस्येत्याशङ्क्य सत्त्वादिना दुर्निरूपतयाऽनिर्वचनीयस्य नभोनैल्यादिवद्व्यवहारमात्रालम्बनस्य तदिति वदन् पक्षद्वयोक्तदोषाप्रसक्तिमुपपादयति । अस्मन्मत इति । यस्मादस्मन्मते पूर्ववर्णितपक्षद्वयोक्तदोषाणामप्रसक्तिस्तस्मात् ॥२१६॥

छान्दोग्यवाक्यकारेण ब्रह्मनन्दिनापि पूर्वपक्षेऽसतः सतश्चोत्पत्तौ दोषमुक्त्वा सांव्यवहारिकमायामयत्वपक्षेण समाधानमुक्तम् । नासत उत्पत्तिरनिष्पाद्यत्वान्नापि सतः प्रवृत्त्यानर्थक्यात्सत्त्वाविशेषात्, अभिव्यक्त्यर्थमिति चेन्न, तस्या अपि सत्त्वात्प्रवृत्तिनित्यत्वाच्च सदाऽभिव्यक्तिप्रसङ्गः, न संव्यवहारमात्रत्वादिति तद्वचनं चोक्तन्यायोपोद्बलितवाचारम्भणादिश्रुतिमूलकमवश्यमुपादेयमित्याशयेनाह—

आत्रेयवाक्यमपि संव्यवहारमात्रं
कार्यं समस्तमिति नः कथयाम्बभूव ॥
सत्कार्यवादविषयो न हि दोषराशि-
र्मायामये भवितुमुत्सहते विरोधात् ॥ २१७ ॥

आत्रेयवाक्यमिति । अस्मिन्मते सत्कार्यवादोक्तदोषाप्रसक्तिं तावदुपपादयति—सत्कार्येति । सद्विलक्षणत्वपक्षे सत्त्वनिबन्धनदोषराहित्यस्यावश्यकत्वात्तद्विरोधात्तदोषाप्रसक्तिरित्यभिप्रेत्य विरोधादित्युक्तम् ॥ २१७ ॥

कार्येऽसद्वैलक्षण्यस्याप्यङ्गीकारादसत्कार्यवादपक्षोक्तदोषाणामप्यत्राप्रसक्तिमाह—

काणाददर्शनसमाश्रयदोषराशि-
र्दूरान्निरस्त इह संव्यवहारमात्रे ॥
वेदान्तभूमिकुशलो मुनिरत्रिवंश्य-
स्तेनाह कार्यमिह संव्यवहारमात्रम् ॥ २१८ ॥

काणादेति । सत्कार्यवादिभिः कार्यकारणयोरत्यन्तभेदानङ्गीकारात्स वादोऽद्वैतवादस्येषदासन्नस्तथापि तत्रत्यदोषा यदाऽत्र निरस्तास्तदा दूरनिरस्ता अत्यन्तभेदगर्भासत्कार्यवादगतदोषा इत्याशयेन दूरादित्युक्तम् । येनात्र सदसत्पक्षद्वयोक्तदोषासम्भवस्तेन ब्रह्मनन्दी सिद्धान्तत्वेन कार्यत्वाद्यनिर्वचनीयस्यैवाहेति प्रकृतं निगमयति—वेदान्तेति ॥ २१८ ॥

ननु ब्रह्मनन्दिनाऽनेकपक्षाणामुक्तत्वात्तत्र विवर्त्तपक्षादरणे को हेतुरित्याशङ्क्य छान्दोग्यषष्ठप्रपाठकप्रमेयाद्वितीयसद्वस्तुसिद्धये "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिश्रुतिमुपजीव्य विवर्त्तवादस्य तेनोक्तत्वात्स एव तदभिमतसिद्धान्त इति स एवादरणीय इत्यभिप्रेत्याह—

षष्ठप्रपाठकनिबद्धमुदीरितं य-
त्तत् सत्यमेव खलु सत्यसमाश्रयत्वात् ॥
तत्रैव यत् पुनरुवाच समुद्रफेन-
दृष्टान्तपूर्वकमदो व्यवहारदृष्ट्या ॥ २१९ ॥

षष्ठप्रपाठकेति । ननु तत्रैव समुद्रफेनतरङ्गादिदृष्टान्तेन परि-

णामवादस्यापि तेनोक्तत्वात्कथं सोऽपि नादरणीय इत्याशङ्क्य तेनैव सत्कार्यवादस्योक्तरीत्या दूषितत्वात्तद्व्यास्तवत्वं नाभिमतं किं तु व्यवहारदृष्टिमाश्रित्याद्वैतसम्भावनार्थमित्याशयेनाह—तत्रैवेति ॥२१९॥

ननु सर्वभेदरहितमुख्याद्वैतसंभावनाय विवर्तवाद एव सन्निहित इति स एव वर्णनीयो न भेदसत्यत्वाविरोधी परिणामवादो व्यवहारदृष्टिपालनाय वर्णनीय इत्याशङ्क्यात्यन्तभेदसत्यत्वेऽभिनिविष्टचित्तस्य प्रथमत एव विवर्त्तवादे प्रवेशो दुर्घट इति तदभिनिवेशत्यजनाय व्यवहारदृष्टिं रक्षता परिणामवादः प्रथमतस्तमुपपादितः पश्चात्तदृष्टिमपि युक्तयसहत्वेन शनै स्त्याजयित्वा ततोऽपि निकटं विवर्त्तवादमुपवर्ण्य शुद्धाद्वैतं रक्षति स्म ब्रह्मनन्दी, ततस्तस्य परिणामोक्तिरपि युक्तैव सूत्रकारस्येवेत्याशयेनाह—

पूर्वं विकारमुपवर्ण्य शनैःशनैस्तद्-
दृष्टिं विसृज्य निकटं परिगृह्य तस्मात् ॥
सर्वं विकारमथ संव्यवहारमात्र-
मद्वैतमेव परिरक्षति वाक्यकारः ॥२२०॥

पूर्वं विकारमिति । विसृज्य परित्यज्य तस्माद्विकारवादान्निकटं मुख्याद्वैतसिद्धयेऽन्तरङ्गं सर्वमपि विकारं संव्यवहारमात्रं विवर्त्तवादमथ पश्चात्परिगृह्य सिद्धान्तत्वेनोररीकृत्याऽपवाददृष्टिविषयं मुख्याद्वैतमेव सर्वानुपपत्तिपरिहारेण साधयतीत्यर्थः॥२२०॥

ब्रह्मनन्दिरचितवाक्यानां सूत्ररूपाणां भाष्यकर्त्ता द्राविड़ाचार्योऽप्यद्वयब्रह्मणः प्रत्यगभेदो वाक्यकाराभिप्रेत इति कथयति स्म ततो व्यवसीयते ब्रह्मनन्दिनो विकारवादोऽनभिमत इत्याह—

अन्तर्गुणा भगवती परदेवतेति
प्रत्यग्गुणेति भगवानपि भाष्यकारः ॥
आह स्म यत्तदिह निर्गुणवस्तुवादे
सङ्गच्छते न तु पुनः सगुणप्रवादे ॥ २२१ ॥

अन्तर्गुणेति । सेयं देवतैक्षतेतिश्रुतिमनुसृत्य परदेवतेति ब्रह्मैवोच्यते । अन्तर्गुणेत्युक्तं विशदयति । प्रत्यग्गुणेति । गुणशब्दः स्वरूपपरः, अन्या देवताः परामूपाः परदेवता तु प्रत्यगात्मरूपा अपरोक्षचिदेकरसेत्यर्थः । निर्गुणवस्तुवादे विकारादिसमस्तविशेषरहितं परमार्थत आत्मवस्त्वितिं मते ॥ २२१ ॥

एवं सतोऽसतो वा कार्यत्वासंभवादनिर्वचनीयस्यैव तदिति तन्निरूप्य कारणत्वमप्यनिर्वचनीयं न वास्तवमित्युक्तम्, किं च भिन्नयोरभिन्नयोश्च कार्यकारणभावायोगात्सोऽनिर्वचनीय इत्यभिप्रेत्य भिन्नयोस्तद्भावं निराकरोति—

न खलु कारणकार्यसमन्वयो
भवति जातु चिदत्र विभिन्नयोः ॥
किमिह सागरसह्यसमाश्रयो
भवति कारणकार्यसमन्वयः ॥ २२२ ॥

न खल्विति । कारणकार्यशब्दौ भावपरौ जातु चित्कदाचिदपि । खलुशब्दसूचितां भेदस्य तदभावेन व्याप्तिं दर्शयति—किमिहेति । न च सह्यसागरयोरेकस्य नियतपूर्ववर्तित्वाभावादेव कार्यकारणत्वाभावो न भेदमात्रादिति वाच्यम् । भेदस्य तदभावेनापि व्याप्तत्वाद्भिन्नयोस्तद्भावस्याप्ययोगादिति भावः ॥२२२॥

एवं कार्यकारणयोरभेदेऽपि तद्भावो न युक्त इति सनिदर्शनमाह—

न च तथायमभिन्नसमाश्रयो
भवितुमुत्सहतेऽनभिवीक्षणात् ॥
न हि घटो विदधाति घटं क्व चि-
न्न च पटः पटमित्थमनीक्षणात् ॥ २२३ ॥

न च तथेति । यथायं कार्यकारणभावो भिन्नाश्रितो न सम्भवति तथाऽभिन्नसमाश्रयोऽपि नेत्यर्थः । अनभिवीक्षणमेवोप-

यसम्मतोदाहरणेन विशदयति। न हीति। विदधाति जनयति ॥२२३॥

किं च कारणत्वेनाभिमतं वस्तु किं चिद्व्यापारविशिष्टतया कुर्वद्रूपं सत्कार्यजनकमुताकुर्वदुदासीनमेव तथा, आद्ये तत् कुर्वद्रूपमपि कार्यमकार्यं वा। आद्ये कुर्वत्तद्रूपजनकतया कुर्वद्रूपमन्यदुपेयम्। एवं तस्यापि कार्यत्वात्तज्जनकमन्यत्तदुपेयमित्यनवस्थापातान्नैकमपि कार्यं सिध्येदित्याह—

कुर्वत्कारणपक्षमाश्रितवतः कुर्वच्च कुर्वत्कृतं
तत्कुर्वच्च तथाविधान्यकृतमित्येषाऽनवस्था भवेत्॥
कुर्वद्रूपमकार्यमिष्टमिति चेन्नित्यं जगज्जायतां
नित्यं मा जनि वा विशेषविरहादेतत् समस्तं जगत्॥२२४॥

कुर्वत्कारणेति। कुर्वद्रूपमकार्यमिति पक्षमुत्थापयति। कुर्वद्रूपमिति। तर्हि तत्सर्वकारणानामस्ति न वा, आद्ये तस्याऽकार्यस्य सदा भावात्तत्कार्यं सर्वं सदा जायेत, कारणानां तदभावे तु तद्रहितानामजनकत्वात्सर्वं कार्यं कदापि न जायेतेत्याह—नित्यमिति॥ २२४॥

अकुर्वज्जनकमिति पक्षमतिप्रसङ्गेन दूषयति—

सर्वं सर्वसमुद्भवाय घटते कुर्वन्न चेत् कारणं
न ह्यस्मिन् क्व चिदस्ति कस्य चिदपि व्यापारवत्ता यतः॥
तस्मात् कारणकार्यतादि सकलं मायामयं तत्त्वतो
नासीदस्ति भविष्यतीति सकलं चैतन्यशेषं महत्॥२२५॥

सर्वं सर्वेति। घटते घटेतोपयुक्तं स्यादिति यावत्, अस्मिन्पक्ष इति शेषः। क्वचित् कार्ये। ननूदासीनस्याप्यन्वयव्यतिरेकाभ्यां क्व चित् क्व चिदेव कारणत्वग्रहान्नोक्तातिप्रसङ्ग इति चेन्न, उदासीनस्य वनस्थदण्डादेरिवान्वयादेरेवाभावात्, न च व्यापारदशायां दण्डत्वादिसामान्यावच्छेदेनैवान्वयादिग्रहात्तेनैवाकारेण दण्डादेर्घटादिहेतुत्वमिति वाच्यम्, व्यापारारहितवनस्थदण्डादाव-

न्वयाद्यभावनिश्चये सति सामान्येनान्वयादिग्रहस्यैवासम्भवात् । न च तस्येतरकारणसन्निधाने सत्यन्वयादिग्रहान्नोक्तदोष इति वाच्यम् । उदासीनस्य तत्सन्निधेरेवासम्भवाद्व्यापारवत एवान्वयादिना कारणत्वं वक्तव्यम् । व्यापारवतश्च तत्प्रागेव निरस्तमिति मायिकतया मिथ्यैव कारणादीति फलितमाह—तस्मात्कारणेति । मायामयेनापि तेन द्वैतापत्तिरित्याशङ्क्य पारमार्थिकद्वैतस्य कालत्रयेऽप्यभावान्मायिकस्यापि तत्त्वधीबाध्यत्वाद्वस्तुतश्चैतन्यमेव वाऽद्वितीयं परिशिष्यत इत्याह । तत्त्वत इति ॥ २२५ ॥

ननु कुर्वत्त्वं विनापि यस्य यत्र शक्तिस्तत्कारणं यत्तु यस्य शक्यं तत्तत्कार्यमिति सर्वत्र कार्यकारणभावनियमसिद्धिरित्याशङ्क्याह—

सकलशक्तिविकल्पनयान्वये
सकलशक्यविकल्पनयान्वयः ॥
सकलशक्यविकल्पनयान्वये
सकलशक्तिविकल्पनयान्वयः ॥ २२६ ॥

सकलशक्तीति । शक्तिशक्ययोः परस्पराधीननिरूपणत्वात्सकलशक्तीनां विकल्पनयेदमत्रैव शक्तमिति व्यवस्थयाऽन्वये सति सकलशक्यानामपि विकल्पनयेदमस्यैव शक्यमिति व्यवस्थयान्वयः स्यात्, सकलशक्यानामुक्तव्यवस्थान्वये सति सकलशक्तीनामप्युक्तव्यवस्थयाऽन्वयो भवेदित्यर्थः ॥ २२६ ॥

ततः किमित्यत आह—

इति परस्परसंश्रयता यदा
वद कथं जगतः परमार्थता ॥
यदि पुनर्जगतोऽपरमार्थता
परममस्ति पदं परमात्मनः ॥ २२७ ॥

इति परस्परेति । शक्तिशक्यात्मककारणकार्यात्मकस्य

जगतः परस्पराधीनसिद्धिकतया वस्तुतोऽसम्भवान्मायामात्रत्व-सिद्धिरित्यर्थः। कार्यकारणात्मकद्वैतस्य मिथ्यात्वे तदधिष्ठानमा-त्मतत्त्वं नित्यशुद्धादिरूपं श्रुतिप्रमाणात्सिध्यतीति फलितमाह। यदि पुनरिति ॥ २२७ ॥

एवं विवर्तवादेनाविद्यातत्कार्यात्मकजगतोऽपरमार्थत्वादद्व-यानन्दं ब्रह्मैव वास्तवमित्युक्तम्, परास्य शक्तिर्विविधैव श्रूयते इति श्रुतेः, जडाजडात्मकानेकशक्तिप्रतिपत्तेर्जडात्मकाविद्याशक्तेर-सत्त्वेऽपि चिच्छक्तेः सत्यत्वात्तच्छक्तिमद्ब्रह्मापि सत्यमेव तत्परि-णामश्च जगदिति ये मन्यन्ते तन्मतमनुवदति—

चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते
सत्यैवास्य जड़ा परा भगवतः शक्तिस्त्वविद्योच्यते ॥
संसर्गाच्च मिथस्तयोर्भगवतः शक्त्योर्जगज्जायते-
ऽसच्छक्त्या सविकारया भगवतश्चिच्छक्तिरुद्रिच्यते २२८

चिच्छक्तिरिति। विमला स्वतोविकारा चिच्छक्तिरिति मतं वारयति। चैतन्यमिति। तस्या अपीतरशक्तिवदसत्यत्वमा-शङ्क्य चैतन्यस्य सत्यत्वात्तद्रूपा सापि तथैवेत्याह। सत्यैवेति। ननु चिच्छक्तेः कूटस्थत्वादपरायाश्च जडत्वात्कथं ताभ्यां जगज्जनिरि-त्यत आह। संसर्गादिति। तथापि कूटस्थायाश्चिच्छक्तेः कथं विकार इत्याशङ्क्य स्वतस्तदभावेऽप्यौपाधिकः सम्भवतीत्याह। असच्छक्त्येति। उद्रिच्यते कथं विकारात्मनोद्रेकं गच्छती-त्यर्थः ॥ २२८ ॥

तन्मतं निगमयति—

इत्येवं कथयन्ति के चिदपरे श्रद्धालवस्तत् पुनः
कस्यां चिद् भुवि संमतं च विदुषां नेष्टं तु भूम्यन्तरे ॥
कर्मोपास्तिविधानभूमिषु तथा सत् संमतं निर्गुणे
तत्त्वे तत् परवेदवाक्यविषये त्वालोचिते नेष्यते ॥२२९॥

इत्येवमिति। प्रकारिप्रकारानुवादायेदं पदद्वयम्। तेषामुक्तेऽर्थे न किञ्चिन्मानमस्ति किं तु स्वगुरुवाक्येषु श्रद्धामात्रेणैवं वदन्तीत्यभिप्रेत्य के चिदिति। उक्तानेव विशदयति। अपर इति। परास्य शक्तिर्विविधेति श्रुतिस्त्वेकस्या एव परायाः मायाशक्तेः कार्यभेदेनैव विविधत्वं वदति। देवात्मशक्तिं स्वगुणैर्निगूढामिति तस्या एव सत्त्वादिगुणमयत्वोक्तेश्चिच्छक्तिर्नैवात्र श्रूयते नाप्यन्यत्रेति भावः। किं च यैरिदं मतं प्रवर्तितं तेषामपि पूर्वोक्तविकारदृष्टिदशायामेवेदमभिमतं शक्तिशक्तिमतोरभेदे वस्तुतद्भावायोगात्, भेदे च ब्रह्मणो जड़त्वापत्तेर्विज्ञानमानन्दमित्यादिश्रुतिविरोधाच्च, तस्मादुक्तदृष्टिदशायामिदं युक्तं न विवर्तदृष्टिदशायामित्याह। तत्पुनरिति। कस्यां चिदित्युक्तं विशदयति। कर्मेति। नेष्टमित्युक्तं विवृणोति। निर्गुण इति। निर्गुणतत्त्वपरवाक्यविषयालोचनं न स्थानतोऽपि परस्येत्यत्र प्रदर्शितमिति भावः॥ २२९॥

किं च प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इति सूत्रनिर्णीतमूर्त्तामूर्तब्राह्मणतात्पर्यादपि भूतभौतिकतत्तद्भासनात्मकसमस्तप्रपञ्चनिषेधेनाद्वयाच्चिदानन्दादिरूपाखण्डब्रह्मण एव परमार्थतया निर्धारितत्वादुक्तपरिणामवादस्तत्त्वतो न ग्राह्य इत्याशयेनाह—

मूर्त्तामूर्त्ततदुत्थलिङ्गपुरुषव्याप्तिश्रभूता चिति-
र्वीप्सापूर्वकनेतिनेतिवचनप्रध्वस्तसर्वद्वया॥
संपूर्णे परमे सुखे परिहृताशेषे शिवे शाश्वते
नित्ये शुद्धमहिम्नि तायिनि परे भूम्न्यक्षरे तिष्ठति॥२३०॥

मूर्तामूर्त्तेति। तायिनि व्यापके, द्वे वाव ब्रह्मणो रूपे मूर्तं चैवाऽमूर्त्तं चेत्यादिनाऽध्यात्ममधिभूतं च पृथिव्यग्नेर्जांसि मूर्तं वाय्वाकाशे अमूर्तमिति सर्वं जगद् द्वैराश्येनोपपाद्य अध्यात्ममधिदैवं चा-

मूर्तरसात्मकं लिङ्गात्मकं पुरुषं चोक्त्वा तस्य हैतस्य पुरुषस्य रूपं यथा माहारजतं वास इत्यादिना तद्वासनामयं स्वप्नादिप्रपञ्चमुपन्यस्य अथात आदेशो नेतिनेतीत्यादिना वीप्सया प्रकृतसमस्तद्वैतं साक्षात्प्रतिषेधन्ती श्रुतिस्तस्य सर्वस्य मिथ्यात्वमेव दर्शयति । न ह्येतस्मादित्यादिना च प्रतिषेधावधिभूतं रूपि ब्रह्म वास्तवं प्रतिपादयति । ततो न परिणामवदो युक्त इत्यर्थः ॥ २३० ॥

ननु सत्यत्वेन प्रसिद्धस्य प्रपञ्चस्य श्रुत्यापि प्रतिषेधो न शक्यः कर्तुं सत्यत्वानुभवविरोधादित्याशङ्क्य स्वतः परतो वा तत्सिद्धेरसम्भवात्स्वतः सिद्धचैतन्ये तादाम्येनाध्यासादेव तथानुभव इत्यभिप्रेत्य प्रकारान्तेण तत्सिद्धयनुपपत्तिमाह—

जगन्महिम्ना न जगत्प्रसिद्धि-
र्न चिन्महिम्नाऽपि जगत्प्रसिद्धिः ॥
न च प्रमाणाज्जगतः प्रसिद्धि-
स्ततोऽस्य मायामयताप्रसिद्धिः ॥ २३१ ॥

जगदिति । जड़मेयवस्तुसामर्थ्येनेत्यर्थः । तर्हि स्वप्रकाशचैतन्यसामर्थ्यात्तत्प्रसिद्धिर्न हीत्याह । न चिन्महिम्नेति । तथाऽपि प्रत्यक्षादिमानबलात्तत्प्रसिद्धिनेत्याह । न प्रमाणादिति । अत्र सर्वत्र हेतूननन्तरमेव वक्ष्यति । कथं तर्हि तत्प्रथेत्याशङ्क्य स्वप्नवद् भ्रान्तिरेव सेत्यभिप्रेत्य तदुपपत्तये जगतोऽनिर्वचनीयमायाविलसितत्वमाह । तत इति ॥ २३१ ॥

इदानीं प्रतिज्ञातान् अर्थान् हेतुभिः साधयति क्रमेण—

जडत्वहेतोर्न जगन्महिम्ना
न चिन्महिम्ना तदसङ्गभावात् ॥
न च प्रमाणात्तदकारकत्वात्
कृतस्य जाड्यादजड़ाऽजनेश्च ॥ २३२ ॥

जड़त्वेति । त्रिष्वपि नकारेषु जगतः प्रतिद्धिरित्यनुप-

ज्ञनीयम् । जड़ानां स्वतः परस्परतया वा सिद्धौ स्वसत्तायां संशयाद्यनुपपत्तिः स्यात्ततो न जगन्महिम्ना तत्सिद्धिः, नापि स्वप्रकाशचिन्महिम्ना तस्याः कूटस्थासङ्गात्मरूपतया वस्तुतो जड़सम्बन्धासम्भवेन तत्साधकत्वायोगात्, प्रमाणानामपि स्वरूपेण साधकत्वायोगाज्जडमजड़ं वोत्पाद्य फलं तत्साधकत्वं वाच्यम्, न च तद्युज्यते तेषां व्यञ्जकत्वेन कारकत्वायोगात् । न च स्वप्रकाशसंविज्जनकत्वमेव व्यञ्जकत्वमिति वाच्यम्, जन्यस्य घटादिवत्स्वप्रकाशत्वायोगात् स्वप्रकाशवस्तुनः कूटस्थतया जन्मायोगाच्चेत्यर्थः ॥ २३२ ॥

ननु स्वप्रकाशचिन्महिम्नैव जड़प्रसिद्धिः सेत्स्यति, न च तयोः सम्बन्धाभावः, विषयविषयिभावरूपस्य तस्य सम्भवादित्याशङ्क्य तस्य दृग्दृश्यमात्रप्रयुक्तत्वेऽतिप्रसङ्गात्तत्प्रयोजकतयाऽन्यस्तयोरसाधारणः सम्बन्धो वक्तव्यः, तादात्म्यं संयोगः समवायो वा दृग्दृश्ययोर्न सम्भवति, न चान्यो मुख्यः सम्बन्धोऽस्ति यस्तयोर्विषयविषयिभावसम्बन्धे मूलं भवेदिति तदपेक्षविषयविषयिभावोऽपि नेत्यभिप्रेत्याह—

न सङ्करो नापि च संयुतिस्तयो-
र्न चास्ति तद्वत् समवायसम्भवः ॥
ततो न चिच्चैत्यसमन्वयं प्रति
प्रतीयते का चन मूलसङ्गतिः ॥ २३३ ॥

न सङ्कर इति । भेदाभेदयोः सङ्करस्तादात्म्यमिति यावत् । दृशा दृश्यस्याऽऽविद्यकं तादात्म्यं चेदोमिति ब्रूमः, वास्तवं तु तादात्म्यं प्रत्यक्परात्मभावेन विरोधान्न सम्भवति, भेदाभेदयोरपि परस्परं विरोधात्सङ्करात्मकं न तत् कुत्रापि सम्भवति, एवमद्रव्यत्वाद् दृशस्तया संयोगोऽपि न घटते, गुणादीनामपि दृश्यानां तदयोगाच्च, नापि सर्वस्य दृश्यस्य

दृशा समवायः केन चिदङ्गीक्रियते, तस्याप्रामाणिकत्वेन सर्वत्रासत्त्वाच्च, अतो दृग्दृश्ययोर्मूलसम्बन्धस्य कस्याप्यभावान्न विषयविषयित्वसम्भव इति भावः ॥ २३३ ॥

ननु दृग्दृश्ययोर्विषयविषयिभावे योग्यतैव मूलसम्बन्ध इत्याशङ्क्याह—

न योग्यतामात्रनिबन्धनो भवे-
ज्जडात्मनोरत्र विवक्षितोऽन्वयः ॥
तदा हि तस्या अनपायिरूपतः
सदात्मनः स्यादनपायिसंसृतिः ॥ २३४ ॥

न योग्यतेति । सा किं तत्स्वरूपमेव तदतिरिक्ता वा, द्वितीयेऽपि सा नित्याऽनित्या वा । न द्वितीयः, तत्कारणानिरूपणात्, कूटस्थासङ्गरूपाया दृशः स्वतः परतो वा तदसम्भवाच्चेत्यभिप्रेत्येतरपक्षयोः सदा दृश्यदर्शनापत्तेस्तदधीनसंसृतेः कदाप्यपायो न स्यादित्याह—तदा हीति । तस्या योग्यतायाः ॥ २३४ ॥

ननु स्वरूपसम्बन्ध एव दृग्दृश्ययोर्विषयविषयिभावनियामक इति चेन्न । तस्य ज्ञानस्वरूपमात्रत्वेऽतिप्रसङ्गः, घटादिरूपज्ञेयविशेषस्वरूपत्वे चान्यस्य तद्विषयत्वं न स्यात्, तस्य ज्ञेयमात्रस्वरूपत्वेऽप्यतिप्रसङ्गस्तुल्यः । अत एव न ज्ञानज्ञेयोभयस्वरूपत्वम् , तथात्वे उक्तदोषापरिहारात् । ननु सम्बन्धान्तरमन्तरेण विशिष्टप्रत्ययविषयत्वमेव स्वरूपसम्बन्ध इति चेन्न । विशिष्टप्रत्ययत्वस्य सम्बन्धघटितत्वेनात्माश्रयत्वापातात् । किं च वर्णितविषयत्वं प्रति विशिष्टप्रत्ययो विशेषणमुपलक्षणं वा स्यात् । आद्ये विशिष्टप्रत्ययाविशिष्टविषयत्वरूपसम्बन्धावगाहिविशिष्टप्रत्ययस्य विशेषणगोचरत्वमपि स्यात् न च तदुपपद्यते न वा परैस्तदुपेयते, द्वितीये विषयत्वमात्रं स्वरूपसम्बन्ध इत्युक्तं स्यात्, तथा चाति-

प्रसङ्गोऽपरिहार्यः स्यात्, तस्मादाविद्यकानिर्वचनीयस्वरूपसंबन्धादेव वियदादिजड़प्रपञ्चस्य चिन्महिम्ना प्रसिद्धिर्वक्तव्येति जड़स्य सर्वस्य चिद्विवर्तत्वमावश्यकमित्याह—

ततो वियन्मुख्यमदो जगज्जड़ं
चिदात्मनोऽस्यैव विवर्त्त इष्यताम्॥
अनाद्यविद्यापटसंवृतात्मन-
स्तदोपलभ्यत्वमसुष्य कल्प्यते॥ २३५॥

ततो वियदिति। तर्हि सर्वस्यैव चित्यध्यासात्सर्वं सदा तया प्रतिभासेतेत्याशङ्क्याह तच्चैतन्यस्य स्वयमप्यप्रतिभासादन्यभासकत्वं दूरापेतम्, यस्य तु प्रमाणजवृत्तिज्ञानेऽनावृतचित्सम्बन्धः सम्भवति तदेव तदा तया भासत इति तान्नियमोपपत्तिरित्याशयेनाह—अनाद्यविद्येति॥ २३५॥

ननु संविदो मानफलत्वेन भेदाभावोत्पत्तिनाशादयोऽनुभूयन्ते ततः सा कथं सर्वाधिष्ठानं स्यात्, वियदादिकं वा कथं तद्विवर्त इत्याशङ्क्य तद्भेदादिरूपाधिपरामर्शं विनानवगमात् स तत्रोपाधिकल्पित एव भ्रान्त्याऽनुभूयते न तु प्रमाणत इति पूर्वमेवोपपादितम्, ततः सैव कूटस्थाऽद्वयादिरूपा सर्वविवर्ताधिष्ठानमिति नोक्तदोष इत्यभिप्रेत्याह—

संवित्तिभेदतदभावतदीयजन्म-
नाशादयो न खलु मानबलेन लभ्याः॥
न ह्यस्ति मानमिह किं चन तद् यदस्या
धर्मस्वरूपविषयीकरणे समर्थम्॥ २३६॥

संवित्तीति। किं च स्वप्रकाशरूपायाः संविदः प्रकाशान्तरागोचरत्वात्सा स्वरूपेण भिदादिधर्मित्वेन वा मानान्तराद्न सिध्यति, स्वयं तु स्वसत्तामात्रस्य साधिका न भेदादेरपीति साधकाभावादेव संवित्तिभेदाद्यसिद्धिरित्याह। न ह्यस्तीति॥२३६॥

कथं तर्हि संविदो मानफलत्वमित्याशङ्क्य निरुपाधिकायाः संविद उक्तविधया कूटस्थत्वादिसिद्धौ तद्विरोधाद्वस्तुतो न मानफलत्वमपीत्याह—

तस्मान्न मानफलता निरुपाधिकस्य
संवेदनस्य घटतेऽविषयत्वहेतोः ॥
एवं च मानफलसिद्धिसमन्वयेन
सिद्धिर्जड़स्य जगतो न कदा चिदस्ति ॥२३७॥

तस्मादिति । तच्छब्दार्थमेवाह—अविषयत्वेति । उत्पत्त्यादिसाधकमानाविषयत्वादित्यर्थः । उक्तरीत्या स्वप्रकाशसंवेदनस्य मानफलत्वायोगान्मानस्य जड़त्वे च जगदान्ध्यप्रसङ्गात् परमते मानफलभूतसम्वेदनविषयत्वेन या जड़स्य सिद्धिस्तदसत्त्वादिशङ्कानिवृत्तिरङ्गीकृता सा नैव घटत इति फलितमाह—एवं चेति ॥ २३७ ॥

ननु सिद्धान्तेऽपि प्रत्यक्चैतन्ये पराचो जड़स्य सम्बन्धायोगात्कथं चैतन्यमहिम्ना जड़प्रसिद्धिः स्यात्, न चासम्बद्धमेव चैतन्यं तत्साधकमतिप्रसङ्गात्, परोक्षापरोक्षविभागायोगाच्चेत्याशङ्क्य चिज्जड़योः परस्परतादात्म्याभ्यासोपगमादाध्यासिकसम्बन्धादेव जड़ंसाधयच्चैतन्यं वृत्तिविशेषसंसृष्टविषयाभिव्यक्तंसत्तमपरोक्षतयाऽवभासयति, केवलतदाकारवृत्त्यभिव्यक्तंसत्परोक्षतया तमवभासयतीति न किं चिदस्मन्मतेऽनुपपन्नमित्याशयेनाह—

इतरेतराध्यसनमस्त्वनयो-
रुभयोरितो दृगदृशोरनिशम् ॥
अपरस्परव्यतिकरानभवा-
दिह शुक्तिकारजतविभ्रमवत् ॥ २३८ ॥

इतरेतरेति । सम्बन्धान्तरासम्भवोऽतःशब्दार्थः । तथाप्येकतराध्यास एव भवतु नेतरेतराध्यास इत्याशङ्क्याध्यस्तमेव हि

परिस्फुरति भ्रमेष्वित्यादिनोक्तं स्मारयन् घटः स्फुरति सन् घट इत्याद्यनुभवं सदृष्टान्तं तत्सिद्धौ हेतुत्वेनाह—अपरस्परेति ॥ २३८ ॥

चिज्जड़योरितरेतराध्यासेऽध्यस्तयोस्तयोर्मिथ्यात्वाच्छून्यमेव तत्त्वं स्यादिति यदि कश्चिदुक्तानुसन्धानाच्चतुरः शङ्कते, तं प्रथमाध्यायोक्तं परिहारं स्मारयति।

संसिद्धा सविलासमोहविषये वस्तुन्यधिष्ठानगी-
र्नाधारेऽध्यसनस्य वस्तुनि ततोऽस्थाने महान् संभ्रमः॥
केषां चिन् महतामनूनतमसां पाण्डित्यगर्वादय-
मन्योन्याध्यसने निरास्पदमिदं शून्यं जगत् स्यादिति२३९

संसिद्धेति। सर्वभ्रमेष्वधिष्ठानाधारयोर्भेदादज्ञातविशेषांशस्याधिष्ठानत्वात्तदध्यस्तसमानाधिकृततया प्रतिभासमानसामान्यांशस्याधारत्वादाधारस्यैव प्रतीत्यनुरोधेनाध्यस्तसंसृष्टरूपेण तत्राध्यस्तत्वोपगमात्तेन रूपेण तस्य मिथ्यात्वेऽपि तद्विशेषस्याज्ञातस्याधिष्ठानपदवेदनीयस्याध्यासबाधकतत्त्वधीगोचरस्य सच्चज्ञानादिरूपस्य परमात्मनः परमार्थत्वेन परिशेषान्न शून्यवादप्रसङ्गः, तदज्ञानादेव केषां चिदस्मन्मते तदापादनमित्यर्थः ॥ २३९ ॥

किं च द्वितीयाध्याये पुरुषबुद्ध्यवस्थाभेदेन जगतः परिणामत्वद्विविधविवर्तत्वाश्रयणेन ब्रह्माद्वितीयत्वप्रतिपादनादपि न शून्यवादप्रसङ्ग इत्यभिप्रेत्य तत्रोक्तं श्लोकचतुष्टयमनुवदति—

कृपणमध्यमपक्वधियां नृणां
मतिविलासविधान्त्रितयं क्रमात् ॥
परिणतिर्बहुजीवतमस्विता
परमपुंसि तमःपरिकल्पना ॥ २४० ॥

कृपणेति। अत्यन्तभेदाभिनिवेशेनाहमीशादिपरतन्त्रः संसार्येवेति ये दीनधियस्ते कृपणधियः, अत्यन्तभेदवादे कार्यका-

रणभावाद्यनुपपत्तेस्तं परित्यज्य ब्रह्मपरिणाम एव जगदिति ये मन्यन्ते ते मध्यमधियः, विरोधाद्यनुसन्धानेन तमपि परित्यज्य ब्रह्मणि मायया ऽध्यस्तमानिर्वचनीयं जगदिति ये मन्यन्ते ते पक्वधियः, एतेषां बुद्धिवृत्तित्रैविध्यमपेक्ष्य क्रमेणात्यन्तभेदधीत्याजनाय परिणामवादः, परिणामधीत्याजनायानेकजीवाज्ञानकल्पनया विवर्तवादः, तस्यापि त्याजनेन शुद्धचिदानन्दरूपः परमात्मैव स्वाविद्यया स्वप्नादितुल्यं बन्धमनुभवति स्वविद्यया मुच्यत इत्यद्वितीयब्रह्मसत्यतोपपादिता ततो न शून्यताप्रसङ्ग इत्यर्थः॥२४०॥

परिणामादिसृष्टिकल्पनायां किं मूलमित्याङ्क्य सच्च त्यच्चाभवत् वाचारम्भणं विकारो नामधेयमित्यादिश्रुतिः, भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् तदनन्यत्वमारम्भणशब्दादिभ्य इत्यादि सूत्राणि, उक्तश्रुतिसूत्रविषयभाष्याणि चात्र मूलमित्याशयेनाह—

श्रुतिवचांसि मुनिस्मरणानि च
द्वयविशारदगीरपि सर्वशः ॥
त्रयमपेक्ष्य विधात्रितयं विना
न हि घटामुपयान्ति कदा चन ॥ २४१ ॥

श्रुतिवचांसीति । त्रयमपेक्ष्य प्रवृत्तानीति शेषः । एतदेव व्यतिरेकमुखेन द्रढयति । विधात्रितयमिति ॥ २४१ ॥

आसां सृष्टीनां विरुद्धविषयाणां नानापुरुषनिष्ठानां कथमद्वितीयब्रह्मधीपर्यवसानामित्याशङ्क्यावस्थाभेदमपेक्ष्यैकत्रैव तासां सम्भवस्योक्तत्वादेषा शङ्का प्रागेव निरस्तेत्याशयेनाह—

पुरुषमेकमपेक्ष्य च भूमिका-
त्रितयमास्ति पुरोदितमेव तत् ॥
तदनुसारवशादखिलश्रुति-
स्मृतिवचांसि वयं घटयामहे ॥ २४२ ॥

पुरुषमेकामिति । तदनुसारवशादेकपुरुषवर्तिक्रमिकदृष्टि-भेदानुरोधात् ॥ २४२ ॥

ननु सूत्रकारस्यैव परिणामादिदृष्टित्रयसूत्रणे किं मूल मित्याशङ्क्य ततः श्रुतिवचांसीत्यनेन सूचितं सूत्रमूलं विवृण्वन्नि-गमयति—

परिणतिं च विवर्तदशाश्रयं
स्थितमनुक्रमतः श्रुतिशासने ॥
अनुशशास मुनिप्रवरः सुधीः
पुरुषबुद्धिमपेक्ष्य यथाक्रमम् ॥ २४३ ॥

परिणतिं चेति । सच्च त्यच्चाभवात्, इन्द्रो मायाभिः पुरु-रूप ईयते, अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतिवाक्यार्थ-निर्णयायाद्वैतधीपर्यवसायिदृष्टित्रयं सूत्रयामास सूत्रकार इत्यर्थः २४३

ननु नामरूपात्यक्तप्रपञ्चस्य ब्रह्मपरिणामत्वे तद्विवर्तत्वे वा-तन्मध्यपातिश्रुतीनामपि ब्रह्मकार्यत्वेन पौरुषेयत्वापत्तेरप्रामाण्यं स्यात, ततश्च कुतस्तदर्थनिर्णयाय सूत्रप्रणयनमिति मीमांसकं-मन्यः शङ्कते—

यदि परिणतिरेषा चिद्विवर्तोऽथ वा स्याद्
भवति ननु तदानीं वेदशास्त्रे विरोधः ॥
न हि खलु कृतकत्वेऽपौरुषेयत्वहेतु-
र्भवितुमलमियं नो मानता स्वप्रयुक्ता ॥ २४४॥

यदि परिणतिरिति । नन्वित्येतदादौ द्रष्टव्यम्, वेद एव शास्त्रं वेदशास्त्रं तत्र विरोधस्तत्प्रामाण्यानुपपत्तिरित्यर्थः । ननु पौरुषेयत्वेऽपि वेदस्य प्रामाण्यं तार्किकैः प्रतिष्ठापितं ततः कथं तद-प्रामाण्यापात इत्याशङ्क्य तन्मतस्य निरसिष्यमाणत्वादस्माभिर्वैदिकै-रपौरुषेयत्वहेतुका स्वतः प्रमाणतैव वेदस्यास्थीयते सा न तत्पौ-रुषेयत्वे घटत इत्याह । न हि खल्विति ॥ २४४ ॥

ननु सूत्रकारेणैव ब्रह्मणः शास्त्रयोनित्वाभिधानाद्वेदस्य तत्कार्यत्वमपरिहार्यमित्याशङ्क्य तर्हि परतः प्रामाण्यापातात् वैशेषिकादिमतप्रवेशः स्यादित्याह ।

कणभुगभिमतिर्वा कल्पनीया तदानीं
सुरगुरुमतमेवोपास्यमाहोस्विदुचैः ॥
इति निपतति चोद्यं ब्रह्मणो विश्वसृष्टि-
र्यदि भवति न चेद् वा नित्यमायाति विश्वम् ॥२४५॥

कणभुगिति । तन्मते वेदवाक्यरचनामूलभूतप्रमाणानिरूपणात्तदपि नाङ्गीक्रियत इत्याशङ्क्य तर्हि वेदाप्रामाण्यापत्तेर्लोकायतादिमतप्रवेशः स्यादित्याह । सुरगुरुमतमिति । बृहस्पतिना राजपुत्राणां विमोहनाय कामशास्त्रस्य रचितत्वात्सुरगुरुमतमित्युक्तम् । नामरूपात्मकप्रपञ्चस्य ब्रह्मकार्यत्वे वेदस्य पौरुषेयत्वचोद्यं निगमयति । इतीति । तर्हि वेदस्य ब्रह्मकार्यत्वमेव त्यज्यत इत्याशङ्क्य तदा वेदतत्प्रतिपाद्ययोर्नित्यत्वापातात्सर्गप्रलयादि न स्यादित्याशयेनाह । न चेदिति ॥ २४५ ॥

यदि पुरुषनिर्वर्तितत्वमात्रं वेदस्य पौरुषेयत्वं तद्भाट्टानां प्राभाकराणां च तुल्यं ततश्च तदस्मन्मते दोषत्वेन नोद्भावनीयमिति परिहरति ।

ननु सदृशमिदं वश्चोद्यमस्मासु कस्माद्
विनिहितमुभयेषां पूर्वमीमांसकानाम् ।
अवगतिकृतमेतद् वाचकत्वं पदाना-
मवगतिरियमिष्टा नश्वरी तत्क्षणेन ॥ २४६ ॥

ननु सदृशमिति । नन्विति निश्चये । अनादिपदसंदर्भस्य वेदत्वाङ्गीकारान्मीमांसकमते तस्य कथं पुरुषनिर्वर्तित्वं तुल्यमित्याशङ्क्य–अवगतीति । एकस्यानेकस्य वा वर्णमात्रस्य पदत्वायोगाद् वाचकत्वमेव पदत्वं वर्णानाम्, तच्च क्रमविशेषवद्वर्णविशेषेषु

व्युत्पत्तिकालेऽवगम्यते, ततश्च क्रमविशेषघटितत्वात्पदत्वस्य वर्णानां वित्यावैभूतां स्वतः क्रमायोगात्प्रत्येकवर्णानुभवगतक्रमारोपवतां तेषां पदत्वं वक्तव्यम् । तदारोपस्य चानित्यतया पुरुषनिर्वर्तितत्वात्तद्घटितं पदमपि तथेति न पदानामनादितेत्यर्थः॥२४६॥

किं च पदसंदर्भमात्रस्यावेदत्वात्क्रमविशेषवत्पदसंदर्भस्यैव वेदत्वं वक्तव्यम्, न च मीमांसकमते पदेषु स्वतः क्रमोऽस्ति तेन प्रत्येकपदगोचरधीगतनियतक्रमारोपगतैव पदानां वेदतेति न वेदस्य नित्यत्वम्, पदेष्वानुपूर्वीविशेषारोपस्यानित्यत्वात्तद्घटितवेदस्यापि तदवश्यम्भावात्तदधीनाप्रामाण्यमपरिहार्यं स्यादित्याह—

अवगतिगतमेवापेक्ष्य पूर्वापरत्व-
प्रतिनियममियं वो वेदता वेदराशेः ॥
क्षणिकमभवदित्थं वेदशास्त्रं समस्तं
कथमिव तदिदानीं वेदशास्त्रं प्रमाणम् ॥ २४७ ॥

अवगतिगतमिति । पदावगतिगतमित्यर्थः । पूर्वापरत्वप्रतिनियमं नियतपूर्वापरीभावम् । इयं प्रतिभासमाना । वेदराशेः पदसन्दर्भस्य ॥ २४७ ॥

उक्तविधया वेदस्यानित्यत्वेऽपि स्वप्रमेयधर्माधर्मादिगोचरमानान्तरानपेक्षत्वात्स्वगतानुपूर्व्यां पुरुषस्वातन्त्र्याभावादनपेक्षत्वमपौरुषेयत्वं चेति तत्प्रामाण्यस्य स्वतस्त्वसिद्धिः, उक्तं च—यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रतेत्याशयेन शङ्कते—

पुरुषमतिनिवेशो नास्ति वेदप्रमेये
विषय इति यदीष्टा मानता स्वप्रयुक्ता ॥
सदृशमिदमिदानीं कारणं मानतायां
परमपुरुषसृष्टे वेदशास्त्रेऽप्यभीष्टम् ॥ २४८ ॥

पुरुषमतीति । कार्यस्यापि वेदस्य स्वतः प्रामाण्यप्रयो-

जकतया यदुक्तं स्वार्थप्रवृत्तमानान्तरानपेक्षत्वादि तत्तस्य ब्रह्मकार्यमतेऽपि तुल्यं तदस्य तन्मते तदप्रामाण्यापादनमसङ्गतमित्याह—सदृशमिदमिति । इदानीमविद्यादशायाम् ॥ २४८ ॥

सदृशमित्येतदेवोपपादयति—

न हि खलु मतिपूर्वा ब्रह्मणः सृष्टिरिष्टा
निगदितुरिव सृष्टिर्वेदविद्यासु नित्यम् ॥
भवति तु पुनरेषा तस्य निश्श्वासकल्पा
श्रुतिवचनमपीदं वस्तु वक्ति स्फुटं नः ॥२४९ ॥

न हीति । वेदविद्यासु सृष्टिरिति सम्बन्धः । ब्रह्मण इति पञ्चमी षष्ठी वा, द्वितीये ब्रह्मणो मतिपूर्वेति योजनीयम् । तदनिष्टत्वस्य वादिप्रसिद्धत्वं निपातद्वयार्थः । ब्रह्मणः सर्वज्ञतया वेदार्थाभिज्ञत्वात् तत्कृता वेदसृष्टिः कथं तन्मतिपूर्वा न भवेदित्याशङ्क्य तन्मते तस्य तत्सृष्टावप्रयोजकत्वात्सा न तत्पूर्विकेत्यत्र दृष्टान्तमाह । निगदितुरिति । यथा कस्य चिद्वेदार्थाभिज्ञस्याप्युपाध्यायस्य वेदवाक्योच्चारणं न तदर्थज्ञानाधीनं किं तु पूर्वमधिगतवेदस्मरणमात्राधीनं केवलपाठकेषु तथैव दर्शनादेवं ब्रह्मणोऽपि तदर्थज्ञानं विद्यमानमपि तत्सृष्टावप्रयोजकमित्यर्थः । नित्यं सर्वकल्पेषु । तदीयज्ञानस्तत्र तत्प्रयत्नोऽप्यनुपयुक्त इत्याशयेनाह—भवतीति । अस्य महतो भूतस्य निश्श्वसितमेतद्यदृग्वेदो यजुर्वेद इत्यादिश्रुतिरुक्तार्थे मानमित्याह । श्रुतिवचनमिति । अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवेत्यादिस्मृतिवचनमप्यर्थः ॥ २४९ ॥

पुरुषनिर्वर्तितत्वमात्रेण वेदस्य स्वतः प्रामाण्याभावे परमतेऽपि तदापत्तिरिति पूर्वमुक्तम्, इदानीं मीमांसकं प्रति तस्य हेतोरिन्द्रियेषु व्यभिचरितत्वेनाभासत्वमभिप्रेत्येन्द्रियवदेव वेदस्यापि स्वतः प्रामाण्यं दुर्निवारमित्याह—

अपि च पुरुषकर्मोद्भूतिकानीन्द्रियाणि
स्फुटमवगमयन्ति स्वंस्वमन्यानपेक्षम् ॥
विषयमिति हि दृष्टं तद्वदिष्टं च तस्मा-
दिह किमपि न चोद्यं वाच्यमेतद् भवद्भिः२५०

अपि चेति । अदृष्टद्वारा पुरुषकृतानि श्रोत्रादीनीन्द्रियाणि शब्दादिरूपं स्वस्वासाधारणविषयमन्यमानानपेक्षं यथा स्यात्तथाऽवगमयन्तीति कार्यवशादेव दृष्टं, तथा तदिष्टं च भवताम्, ततश्च वेदस्यापि तथा स्वत एव प्रामाण्योपपत्तेर्भवदीयचोद्यायोग इत्यर्थः ॥ २५० ॥

तदैक्षत बहु स्यां प्रजायेय सोऽकामयत बहु स्यामित्यादिश्रुतयो वीक्षणपूर्वकं ब्रह्मणो मानसृष्टिमाचक्षाणा मानान्तरापेक्षां वेदसृष्टिं सूचयन्ति, मानं विनेक्षणानुपपत्तेरिति शङ्कते—

श्रुतिवचनमनेकं वक्ति तस्येक्षितृत्वं
मतिमदिति ततस्तन्नेष्यते कस्य हेतोः ॥
इति यदि मनुषे तन् मैव मंस्थाः कुतश्चेत्
सकलकरणहानिं ब्रह्म नः शास्ति शास्त्रम्॥२५१॥

श्रुतिवचनमिति । उदाहृतश्रुतिषु मानाधीनेक्षणाश्रवणात्तन्न शङ्कनीयमित्याह–तन्मैवेति । तथापि तस्यानुपपत्त्या मानान्तराधीनमीक्षणमित्युक्तत्वात्कुतस्तस्मिन्निषेध इति शङ्कते । कुतश्चेदिति । न तस्य कार्यं करणं च विद्यते अचक्षुष्कमश्रोत्रमवागमनः अप्राणो ह्यमनाः शुभ्रः असङ्गो ह्ययं पुरुष इत्यादिशास्त्राद्ब्रह्मणः कार्यकरणराहित्यप्रतिपत्तेर्मानाधीनमीक्षणं तस्यायुक्तमित्याह–सकलेति ॥ २५१ ॥

तर्हि तदैक्षतेत्यादिश्रुतिर्निरालम्बना स्यादित्याशङ्क्य साभासमायावृत्तिरेव तत्रेक्षणं विवक्षितं नास्मदादेरिव मानाधीना बुद्धिवृत्तिस्तस्य बुद्ध्यादिराहित्योक्तेरित्याह—

चितिगतजड़शक्तेराद्य इष्टो विवर्त-
श्चितिनिकटनिवेशाल्लब्धदीप्तिर्जड़ोऽपि ॥
श्रुतिशिरसि निषण्णैरीक्षणं कथ्यते त-
न्न तु परमपदस्यापीक्षणं बुद्धिवृत्तिः ॥ २५२ ॥

चितिगतेति । मायावृत्तेर्ब्रह्मधर्मत्वं कथमिति वीक्षायामाह । चितिनिकटेति । चित्यध्यासादित्यर्थः ॥ २५२ ॥

एवं वेदस्य ब्रह्मजत्वेऽपि स्वार्थगोचरमानान्तरानधीनत्वाद् ब्रह्मणस्तदीयस्वरानुपूर्व्यादौ स्वातन्त्र्यभावाच्च निरपेक्षत्वापौरुषेयत्वाभ्यां स्वत एव प्रमाणं वेद इति श्रुत्वोपरते मीमांसके तदसहमानस्तार्किकः प्रत्यवतिष्ठते—

ननु च डित्थडवित्थपदादिवत्
सकलमेव तु सामयिकं पदम् ॥
अनुमिमीमहि पूर्वनिदर्शना-
दनुमितिर्भवतीति किमद्भुतम् ॥ २५३ ॥

ननु चेति । करचरणादिमत्पिण्डविशेषमुत्पन्नं दृष्ट्वा तद्व्यवहाराय तज्जनकादिना स्वबुद्धिरचितं डित्थादिपदं तत्र सङ्केतितं तदभिधायकं दृष्टम्, ततश्च विवादास्पदं गोघटादिपदं केनचित्स्वार्थे सङ्केतितं पदत्वात् डित्थादिपदवदित्यनुमानेन सर्वपदार्थसम्बन्धस्य मानान्तरापेक्षत्वसिद्धौ तादृशपदसंदर्भात्मकवेदस्यापि तदपेक्षा दुर्वारेति कथं तस्य निरपेक्षतालक्षणं प्रामाण्यमित्यर्थः । क्वाचित्कदर्शनमात्रेण कथमेतदनुमानमतिप्रसङ्गादित्याशङ्क्य व्यभिचारादर्शनादिदमनुमानमुक्तदृष्टान्तेन कस्य न भवेदित्याह—पूर्वनिदर्शनादिति ॥ २५३ ॥

डित्थादिपदार्थसम्बन्धस्यागन्तुकत्वमुक्तानुमाने उपाधिः, न च साधनव्यापकता इदानीं व्यवहियमाणगवादिपदार्थसम्बन्धस्यैवानादिदृढव्यवहारगोचरत्वेन तस्यानादित्वात् सर्गाद्यकालीनोऽ

पि गवादिपदार्थसम्बन्धव्यवहारस्ततः पूर्वकालीनतत्सम्बन्धानुस्मृतिनिबन्धनो गवादिपदार्थसम्बन्धव्यवहारत्वादिदानींतनतद्व्यवहारवदित्यनुमानात्, ततः कृतयुगस्यादौ ब्रह्मपूतो महयशाः सर्वज्ञो धृतिमानृषिः पुनराजायते स्मरन्निति‌त्यादिवचनात्सर्गादिमुत्रां हिरण्यगर्भादीनामीश्वरानुगृहीतानां कल्पान्तरीयपदार्थसम्बन्धानुसन्धानोपपत्तेश्च तत्सम्बन्धस्यानादित्वनिश्चयात्तद्वि‌रोधात्तस्य सर्गकालेऽपि कृतकत्वं वक्तुमशक्यमित्याशयेनाह—

अनादिवृद्धव्यवहारलक्षणे
कथं प्रमाणे परिपन्थिनि स्थिते ॥
गवादिशब्दे समयोऽनुमास्यते
डवित्थशब्दादिवदेतदुच्यताम् ॥ २५४ ॥

अनादिवृद्धेति । वृद्धव्यवहारो लक्षणं लिङ्गं यस्य पदार्थसम्बन्धानादित्वानुमानस्य तत्तथोक्तम् ॥ २५४ ॥

किं च सर्वपदानां तदर्थेषु सङ्केतकर्तरि मानाभावाच्च तदसिद्धिः, तथाहि, स न तावत्प्रत्यक्षेण सिद्ध्यति, अननुभवात्, इतरथा तद्विप्रतिपत्त्यनुपपत्तेः, नाप्यनुमानेन, तस्य सोपाधिकत्वेन दूषितत्वात्, उपमानं तु सादृश्यादिव्यवस्थितवस्तुविषयं तत्र न शङ्कनीयम्, नाप्यागमेन, सर्वपदार्थसम्बन्धानां केन चित्सङ्केतितत्वप्रतिपादकवचनादर्शनात्, नाप्यर्थापत्त्या, तेन विनानुपपद्यमानवस्तुनोऽभावात्, इदानींतनपदार्थसम्बन्धव्यवहारस्यानादिवृद्धव्यवहाराधीनताया उपपादितत्वात् । तस्माद्भावसाधकप्रमाणेष्वेकस्याप्यभावात्तत्सद्भावो दुर्लभः प्रत्युत भावसाधकमानपञ्चकानुदयरूपाभावमानात्तदभाव एवेति निश्चीयत इत्याह—

सतः प्रमाणाभिमतेषु पञ्चसु
प्रमाणमक्षादिषु किं चिदीक्ष्यते ॥
नहीह सम्बन्धरि तेन तस्य वः

खपुष्पकल्पत्वमभावमानतः ॥ २५५ ॥

सत इति । भावस्येत्यर्थः । सप्तमी निर्धारणार्था, तेन मानपञ्चकानुदयेन, एतत्त्वभावमानत इत्येतद्विशेषणम्, तृतीयार्थे च तसिः ॥ २५५ ॥

ननु रात्रौ विद्यमानान्यपि कानि चिद्वस्तूनि कथमपि नोपलभ्यन्ते, एवं दिवसेऽपि तारकादीनि, तद्वत्सतोऽपि सङ्केतयितुरनुपलम्भोपपत्तेस्तावता कथं तदभावसिद्धिरित्याशङ्क्य दृष्टान्ते पूर्वं पश्चाद्वोपलम्भेन तदभावायोगात्तदोपलम्भप्रतिबन्धकवशादेव तदनुपलम्भो युक्त इत्याह—

पुरोपलब्धो विषयो न दृश्यते
यदा प्रमाणैरिह भावगोचरैः ॥
तदा तु तत्रानुपलब्धिकारणं
किमप्यभावादपरं हि मृग्यते ॥ २५६ ॥

पुरोपलब्ध इति । एतच्च पश्चादुपलभ्योपलक्षणम्, अनुपलब्धिकारणं तत्प्रयोजकम्, उपलब्धिप्रतिबन्धकामिति यावत् । किमपि दृष्टमदृष्टं वा ॥ २५६ ॥

सर्वपदसङ्केतकर्तरि तु कदापि भावप्रमाणस्य कस्याप्यनुदयात्तदभावनिश्चयोऽवश्यभावीति सदृष्टान्तमाह—

अत्यन्तानुपलब्धवस्तुनि पुनर्यः पञ्चकानुद्भव-
स्तस्याभावनिमित्तकः स न पुनस्तत्रापरं कारणम् ॥
अन्विच्छन्ति मनीषिणो न हि शशेऽदृष्ट्वा विषाणास्तितां
तत्रादर्शनकारणान्तरपरा हेत्वन्तरान्वेषिणः॥ २५७ ॥

अत्यन्तेति । तस्यात्यन्तानुपलब्धवस्तुनः समानपञ्चकानुद्भवः, स एव तत्रेति परामृश्यते, अदृष्ट्वेति छेदः, तत्र शशे, अदर्शनस्य शृङ्गादर्शनस्य, कारणान्तरपरा अभावातिरेकिप्रयोजकार्थिनः सन्तस्तज्जिज्ञासवो न हीति सम्बन्धः ॥ २५७ ॥

किं चादौ सङ्केतकर्त्रा तानि तानि पदानि स्वमुखेनोच्चार्य श्रावयित्वा तेषां तत्तदर्थविशेषेषु स्वकृतसाङ्केतिकसम्बन्धो ज्ञापनीयः । न च विना शरीरमुच्चारणादि सम्भवति । न च सङ्केतकर्तृत्वादेव शरीरमपि तस्यानुमीयत इति वाच्यम् । तथापि नानाशरीरे मानाभावाद् दृष्टानुरोधेन तस्यैकमेव शरीरं भवद् भवेत् । न चैकेन शरीरेण सर्वासु शब्दव्यवहारभूमिष्वतीवोच्चनीचासु गिरिनदीसमुद्रादिभिर्दुर्गमासु युगपत् क्रमेण वा कश्चित्कथं गन्तुमलम्, अगच्छन्वा तत्तद्देशवासिनः स्वकृतं साङ्केतिकं सम्बन्धं ग्राहयेत्, तद्ग्रहे च तेषां शाब्दव्यवहारो न स्यादित्यभिप्रेत्याह—

विषमदुर्गमदेशसहस्रगः
कथमिवैष नरः समयक्रियाम् ॥
सकलशब्दतदर्थनिवेशिनीं
वद विधातुमलं स्वयमेकलः ॥ २५८ ॥

विषमेति । नरदृष्टान्तानुमितस्य नरसाम्यमभिप्रेत्यैष नर इत्युक्तम् ॥ २५८ ॥

किं च लोके सङ्केतयिता श्रुतेन शब्दान्तरेण कं चिदर्थं निर्दिश्यायं डित्थ इति व्यवहर्तव्य इति सङ्केतं कुरुते, सर्गाद्यकालीनानां जनानां तु स्तनन्धयकल्पानामेकत्रापि पदे व्युत्पत्त्यभावात्तान्प्रति पदान्तरेणार्थविशेषनिर्देशायोगादज्ञाते तस्मिन्पदविशेषस्य सङ्केतोऽशक्यो ग्राहयितुमित्याह—

अपि च किं चिदपि प्रतिपादकं
न हि यदा पदमस्ति जगन्मुखे ॥
अनभिधाय पदं न तदा कथं
समयमेष करिष्यति शङ्करः ॥ २५९ ॥

अपि चेति । जगन्मुखे सर्गाद्यकाले । शङ्कर आनुमा-

निक ईश्वरः ॥ २५९ ॥

नन्वव्युत्पन्नान्प्रति गोघटादिकमङ्गुल्यादिव्यापारविशेषरूपाभिनयेन निर्दिश्य तत्र गवादिपदानां सङ्केत ग्राहयिष्यतीश्वर इति शङ्कामनूद्यापवदति—

अभिनयेन करिष्यति चेदयं
समयमेतदतीव हि दुर्घटम् ॥
न हि पदार्थसहस्रविमिश्रिते
गवि तदाऽभिनयात् समयो भवेत् ॥ २६० ॥

अभिनयेनेत्यादिना । हिशब्दसूचितं हेतुमाह—न हीति । गवादेर्नानाविधावयवगुणक्रियासामान्यादिभिः सङ्कीर्णत्वादभिनयेनाप्येकतरनिर्धारणायोगाद् गवादिपदानामर्थविशेषे सबन्धो दुर्बोधः, शब्दार्थविशेषयोरुपस्थितावपि तयोर्वाच्यवाचकभावरूपसम्बन्धविशेषोऽपि दुरवबोधः, तन्निरूपकाभावादिति भावः ॥ २६० ॥

किं च शब्दानुगते वस्तुनि शब्दसङ्केतस्य परस्पराश्रयापातेन ग्रहीतुमशक्यत्वान्मानान्तराधिगतेऽर्थे तद्ग्रहो वक्तव्यः, ततश्च धर्माधर्मस्वर्गनिरयदेवतादिपदार्थानां मानान्तरायोग्यत्वात्तेषु सङ्केतग्रहासम्भवात्तेषां पदानामबोधकत्वं स्यादित्याह—

अपि च लौकिकमानबलाश्रया-
दधिगते विषये समयो भवेत् ॥
अनुपलब्धसतत्त्वकदेवता-
प्रभृतिकार्थगतः समयः कुतः ॥ २६१ ॥

अपि च लौकिकेति । स्पष्टार्थान्यक्षराणि ॥ २६१ ॥

किं च सङ्केताधीनव्यवहारस्य तत्कर्तृस्मरणं व्यापकं दृष्टं गवादिशब्दार्थसम्बन्धव्यवहारे तु तदभावान्नायं सङ्केताधीन इत्याह—

अपि च कर्तुरनुस्मरणं भवेद्
यदि चकार पुमान् समयं गिराम् ॥
न खलु कर्तृगबुद्धिबलं विना
व्यवहृतिर्भवति व्यवहर्तरि ॥ २६२ ॥

अपि च कर्तुरिति । तस्य व्यापकत्वं विपक्षबाधकप्रदर्शनेनोपपादयति—न खल्विति । सङ्केतकर्तुराप्तत्वस्मरणं तदधीनव्यवहारस्य मूलम् । इतरथा प्रतारकादिकृतत्वाशङ्कया तदधीनव्यवहारो न स्यादित्यर्थः ॥ २६२ ॥

उक्तां व्याप्तिमुदाहरणनिष्ठतया विशदयति—

न खलु पाणिनिपिङ्गलसंज्ञया
व्यवहरन्ति तयोः स्मरणं विना ॥
पदपदार्थपरस्परसङ्गतिं
निरमिमीत ततो न जगद्गुरुः ॥ २६३ ॥
मतिमतां प्रवरो वृषभध्वजः
कणभुगादिमुनिप्रवरः प्रभुः ॥
ननु धरादिजगद्रचनाबला-
दनुमितोऽनवखण्डितशक्तिकः ॥ २६४ ॥

this is not Commentator's ?

न खल्विति । पाणिनिकृता वृद्धिरादैजित्याद्या, पिङ्गलकृता धी श्री स्त्रीमित्याद्या । ननु कार्यलिङ्गकानुमानादेव स्वतः सर्वज्ञः सर्वशक्तिरीश्वरः सिध्यति, स एव स्वेच्छया कायव्यूहं कृत्वोत्तममध्यमबृद्धभावं प्राप्य स्वप्रयुक्तपदेभ्यः स्वकृतसङ्केतानुसारेण व्यवहरति स्म, तत्कालीनास्तद्व्युत्पन्ना जनास्तद्व्यवहारदर्शनादेव तस्मिन्प्रवर्तकज्ञानमनुमाय तत्तद्विषयेषु व्यवह्रियमाणवस्तुषु सामान्यतो विशेषतश्चावापोद्वापाभ्यां पदसम्बन्धं ज्ञात्वा स्वयमपि तथैव व्यवहरन्तोऽन्येष्वपि तद्व्यवहारं प्रवर्तयन्तीति कल्पयतां पण्डितानां सङ्केतकर्तुरनुस्मरणमिहाप्यस्तीति शङ्कां नि-

राकुर्वन्प्रकृतं निगमयति सार्द्धेन-पदपदार्थेत्यादिना ।

इदमत्राकूतम्, न तावत्कार्यलिङ्गकानुमानात्सर्वज्ञसिद्धिः, पक्षीकृताङ्कुरादिमात्रगोचरज्ञानवतस्ततः सिद्धावपि तस्य सर्वगोचरज्ञानासिद्धेः, क्षितिगिरिसागरादीनां कार्यत्वमेवासिद्धं कुतस्तत्कर्तृसिद्धिः, न च तेषां सावयवत्वेन कार्यत्वमनुमीयत इति वाच्यम् । अवयवारब्धत्वरूपसावयवत्वस्याप्यसिद्धेः, नापि मध्यमपरिमाणत्वं तत्कार्यत्वे लिङ्गम्, महत्त्वस्येवाप्ययोजकत्वात् । नन्वङ्कुरादिकार्यानुमितं ज्ञानं लाघवादेकं नित्यं च सिध्यद् विनिगमकाभावात्सर्वगोचरं सिध्यतीति तद्वतः सर्वज्ञत्वसिद्धिरिति चेन्न, लाघवादेव कृतिमात्रवतस्तत्कर्तृत्वसम्भवेन तद्गोचरज्ञानस्यैवासिद्धिप्रसङ्गात् । न च ज्ञानेच्छयोरपि प्रत्येकं कारणत्वेन सिद्धौ तयोर्नित्यत्वसर्वविषयत्वादेरपि लाघवादेव सिद्धेर्नित्यकृत्याश्रयस्य सर्वज्ञत्वादिसिद्धिरिति वाच्यम् । तथा सति शरीरेन्द्रियादेरपि प्रत्येकं कारणत्वेन सिद्धौ तस्यापि नित्यत्वादिप्रसङ्गात्, तस्याप्यङ्गीकारे च न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुतेर्भोगायतनस्यैव शरीरत्वाच्च तद्वत ईश्वरस्य संसारोऽपरिहार्यः स्यात् । न तस्य कार्यं करणं च विद्यते अकायमव्रणमित्यादिश्रुतिविरोधाच्च नेश्वरस्य वास्तवशरीराद्यङ्गीकारः कर्तुं शक्यः, शरीरादेस्तत्त्वावच्छेदेनानित्यत्वावधारणात्तद्विरोधान्नित्यशरीराद्यनुमानमशक्यमिति चेन्न, तर्हि ज्ञानेच्छाकृतीनामपि लाघवेन ज्ञानत्वाद्यवच्छेदेनानित्यत्वावधारणात्तद्विरोधात्तन्नित्यत्वमप्यनुमातुं दुर्लभमिति कुतः सर्वज्ञत्वादिसिद्धिः, सुप्तप्रबुद्धन्यायेन कल्पान्तरीयशब्दार्थसम्बन्धव्यवहारप्रवर्तकेषु हिरण्यगर्भादिषु श्रुतिस्मृत्याद्यवगतेषु सत्सु नेश्वरस्य कायव्यूहादिकल्पनया तत्प्रवर्तकत्वकल्पनमुचितम् । तत्कल्पनेऽपि त्वदुक्तरीत्या कल्पान्तरीयशब्दार्थसम्बन्धव्यवहारप्रवर्तकत्वमेवेश्व-

रस्य कल्प्यतां नापूर्वसङ्केतादिकरणमपि, कल्पनागौरवापातात्, तस्मात्सर्वपदार्थसम्बन्धसङ्केतकर्तरि मानाभावान्मोहमात्रादेव तदभ्युपगम इत्यानुमानिकेश्वरे परपरिकल्पितं जगद्गुरुत्वादि वर्णितरीत्या दुर्घटमित्यभिप्रायेण जगद्गुरुरित्यादीनि तद्विशेषणान्यनूदितानि ॥ २६३ ॥ २६४ ॥

सिद्धान्तेऽपि नामरूपात्मकप्रपञ्चस्येश्वरजन्यत्वोपगमात्कथं तन्निराकरणमित्याशङ्क्यास्माभिः कूटस्थसच्चिदानन्दैकरसस्य परमात्मनः शास्त्रवश्यान्मायया विचित्रजगदभिव्यक्तिहेतुत्वाङ्गीकारात्तेन मानान्तरेणार्थमुपलभ्य रचितत्वाभावाद्वेदस्यापौरुषेयतया स्वतः प्रामाण्यसिद्धिरित्याशयेनाह—

अपि तु वैदिकवाङ्मनसातिगा-
नुदितलुप्तचिदेकरसात् प्रभोः ॥
अभवदानकदुन्दुभिनन्दना-
दमतिपूर्वमिदं सकलं जगत् ॥ २६५ ॥

अपि त्विति । वैदिकश्चासौ वाङ्मनसातिगश्चासावनुदितालुप्तचिदेकरसश्च तस्मादिति विग्रहः । तस्यैवावतारित्वप्रख्यापनायानकदुन्दुभिनन्दनादित्युक्तम् । तस्य सर्वज्ञत्वादि यद्यपि श्रुत्यादिसिद्धमस्ति, तथापि वेदाद्यभिव्यक्तौ न तत्प्रयोजकमित्यमतिपूर्वमित्युक्तम् ॥ २६५ ॥

कार्यलिङ्गकानुमानात्पराभिमतसर्वज्ञेश्वरासिद्धावप्युपदेशलिङ्गकानुमानात्तत्सिद्धिरिति वदंस्तदङ्गभूतां व्याप्तिं तावद्दर्शयति—

ननु लौकिकवचसां नरमतिपूर्वकरचना
परिदृश्यत इति वैदिकवचसामनुमिनुमः ॥
वचनं श्रुतिशिरसामपि नरधीकृतरचनं
वचनत्वत इव लौकिकजननिर्मितवचनम् २६६

नन्वित्यादिना । वैदिकवचसां नरमतिपूर्वकरचनामनुमि-

तुम इति विपरिणतानुषङ्गः। इदानीं तदनुमानमाह—वचनमित्यादिना। श्रुतिशिरसामिति वैदिकमात्रस्योपलक्षणम्, वैदिकवचसामित्युपक्रमादिवशब्दोऽन्ते योजनीयः॥ २६६॥

तथाप्यसर्वज्ञमतिपूर्वकत्वमादायार्थान्तरतया न सर्वज्ञेश्वरसिद्धिरित्याशङ्क्य वेदार्थस्य भूतभविष्यदादिरूपस्यापरिमितस्य धर्माधर्मादिरूपस्य च स्वतः सर्वज्ञत्वं विना मानान्तरैर्ज्ञातुमशक्यत्वात्तदधीनजीवपूर्वकरचनाया वेदे बाधाद्वाक्यत्वहेतोः पक्षधर्मताबलात्स्वतः सर्वज्ञ एव वेदरचनाकर्तृत्वेन सिध्यतीत्याह—

न च मादृशजनधीकृतरचनं श्रुतिवचनं
भवितुं क्षममिति वैदिकरचनाबलमिषतः॥
अनुमीयत इह शूलभृदिति चेदिदमशुभं
न हि वैदिकवचसामभिभवनास्पदमनुमा॥ २६७

न च मादृशेति। इतिर्हेतौ। अस्मदाद्यशक्यरचनस्यापि वेदस्यानादित्वसम्भवात्कर्त्रपेक्षैव नेत्याशङ्क्याप्तप्रणीतत्वाभावे तदप्रमाण्यशङ्काया दुर्निवारत्वात न तत्प्रामाण्यायाप्तरचितत्वं वक्तव्यमित्यभिप्रेत्याह। वैदिकेति। वैदिकवाक्यरचनासामर्थ्यव्याजेन स्वतः सर्वज्ञादिरूप ईश्वरोऽनुमीयते इत्यर्थः। दूषयति—इदमशुभमिति अनुमितेश्वरज्ञानस्य मूलाभावेऽप्यनादित्वात्प्रामाण्यं यथोपेयते तद्वत्तस्यापि पूर्वोक्तविधयाऽपौरुषेयस्यानादितयाऽनाप्तप्रणीतत्वादिशङ्काशून्यस्य स्वतः प्रमाणत्वोपपत्तेः कृतं तत्कर्तृसर्वज्ञत्वादिसाधयितुम्, अलमित्यादिकल्पनयेत्यर्थः। वेदस्यापौरुषेयत्वप्रतिपादकश्रुतिविरुद्धं चेदनुमानं स्वयमेवाप्रमाणं सद्वेदपौरुषेयत्वादि न साधयितुमलमित्याह। न हीति॥ २६७॥

कासौ श्रुतिर्वेदस्यापौरुषेयत्वप्रतिपादिकेति वीक्षायामाह—

ब्रह्म स्वयम्भु परमात्मपदस्य वेदो
निःश्वासकल्प इति चापरमामनन्ति॥

वाक्यं तदस्य मतिपूर्वकताऽनुमानं
सद्यो निरस्यति न चेदपबाधितं स्यात् ॥२६८॥

ब्रह्मेति । वेद इत्यर्थः । परमेष्ठिब्रह्मण इति पूर्ववाक्ये हिरण्यगर्भस्यापि वेदादेव विद्याप्राप्तिमभिधाय वेदस्यापि लौकिकवाक्यवन्मानान्तराधीनार्थत्वशङ्कानिरासाय ब्रह्म स्वयम्भु न केन चिद्रचितमिति श्रुतिः स्पष्टमेव वेदापौरुषेयत्वमाह । तथाऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इत्यादिश्रुतिरप्युपक्रमोपसंहाराभ्यां पुरुषनिःश्वासवद्वेदानां मतिपूर्वकतां निराकुर्वती तेषां मतिपूर्वकत्वानुमानं बाधते, तदबाधे स्वप्रामाण्यायोगादित्यर्थः ।२६८।

न केवलमृग्वेदादिरूपशब्दप्रपञ्चस्यैवामतिपूर्विका सृष्टिः, किंतु इष्टं हुतं प्राशितं पायितमयञ्च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानीति श्रुतेः सर्वस्यैव कार्यजातस्य जन्मादयः सर्वे विकारा निःश्वासवदमतिपूर्वका एव ततश्च परेषां कार्यलिङ्गकानुमानमपि श्रुतिविरुद्धार्थत्वादप्रमाणमित्याह—

सृजति रचति संहरति प्रभुः
सकलमेव निविश्य नियच्छति ॥
अमतिपूर्वमिति श्रुतिशासने
वद कथं मतिपूर्वकताऽनुमा ॥ २६९ ॥

सृजतीत्यादिना । निविश्य चिदाभासद्वारा सम्बन्धं प्राप्य । नियच्छति नियमयति ॥ २६९ ॥

ननु मन्त्रायुर्वेदवत्तत्प्रामाण्यमाप्तप्रामाण्यादित्युक्तेः कथमाप्तोक्तत्वमन्तरेण वेदप्रामाण्यमित्याशङ्क्य किमाप्तोक्तत्वं तस्यानुमानिकं तद्विधायकश्रुतिगम्यं वा, नाद्यः, तस्य निरस्तत्वादित्यभिप्रेत्य द्वितीये त्वप्रमाणतया शङ्कितश्रुत्या तदसिद्धेस्तत्प्रामाण्यमादौ ज्ञा-

तव्यम्, ततश्च परस्पराश्रयापातादेकमपि न सिध्येदित्याह—

आप्तोक्तत्वप्रत्यये मानभावो
वेदस्यास्य ज्ञायते मानभावे ॥
विज्ञाते सत्याप्तपूर्वत्वसिद्धि-
रित्यन्योन्याश्रयत्वप्रसङ्गः ॥ २७० ॥

आप्तोक्तत्वेति । स्पष्टोऽर्थः ॥ २७० ॥

वेदस्याप्तप्रणीतत्वाभावे तदुत्थविद्यायाः कथं प्रामाण्यसिद्धिरित्याशङ्क्य किं सिद्धिशब्दोदिता तज्ज्ञप्तिः पर्यनुयुज्यते तत्सत्ता वा नाद्यः, वेदस्यापौरुषेयत्वसाधनेनाप्तप्रणीतत्वादिनिबन्धना-प्रामाण्यशङ्कानवकाशात्, तदुत्पन्नविद्या यदा गृह्यते तदा प्रमाणत्वेनैव गृह्यते इति ज्ञानस्य प्रामाण्यज्ञप्तौ स्वतस्त्वसिद्धिरित्याशयेनाह—

तस्मादेषा स्वप्रयुक्तप्रमाण-
भावज्ञाना विदविद्याभ्युपेया ॥
प्रामाण्यं स्यात् स्वप्रयुक्तं च तस्या
वस्तुस्थित्या ज्ञप्तिवन्नान्यतस्तत् ॥ २७१ ॥

तस्मादेषेति । न द्वितीयः, अपौरुषेयवेदस्याप्रामाण्यप्रयोजकाभावात्तदुत्थज्ञानप्रामाण्यस्य ज्ञानजनकमात्रप्रयोज्यत्वेन हेत्वन्तरानपेक्षत्वादुत्पत्तावपि स्वतस्त्वसिद्धेरिति तज्ज्ञप्तिदृष्टान्तेनाह । प्रामाण्यमिति । वस्तुस्थित्या वस्तुस्वभावेन, एतदज्ञानविजृम्भिततत्प्रामाण्यस्य परतस्त्वकल्पनमिति भावः ॥ २७१ ॥

एवं वेदोत्थप्रमाया उत्पत्तिज्ञप्त्योः स्वतस्त्वमुक्त्वा तद्वदेव चैतन्याभिव्यक्तिरूपफलेऽपि हेत्वन्तरानपेक्षत्वलक्षणं स्वतस्त्वमाह—

ज्ञप्त्युत्पत्त्योर्यद्वदेव प्रवृत्ता-
वस्या युक्ता मानता स्वप्रयुक्ता ॥
वेदोत्थाया बुद्धिवृत्तेर्न हीय-
मुत्पद्यान्यत् संविदे काङ्क्षतीति ॥ २७२ ॥

ज्ञप्त्युत्पत्त्योरिति। प्रवृत्तौ फलजन्मनि। विद्योत्पत्ति-नान्तरीयकतया तत्फलसिद्धेस्तत्रान्यापेक्षा न घटत इत्याह—न हीति। संविदे अभिव्यक्तचिते ॥ २७२ ॥

ननु वेदपौरुषेयत्वानुमानविरोधेन तन्निःश्वसितत्वादिश्रुतिरे-वान्यथानीयतामित्याशङ्क्य निरपेक्षत्वे सत्युत्तरभावित्वाच्छ्रुतेः प्र-बलत्वाद्वर्णितन्यायेन वेदस्य पुरुषमतिपूर्वकत्वासंभवाच्च तदनुमान-स्यैवाभासत्वमुपेयमित्युक्तानुवादपूर्वकं निगमयति—

विश्वं विष्णोरुत्थितं नामरूपं
निःश्वासादिप्रख्यमित्याह वेदः ॥
यत्तत्तथ्यं वर्त्मना वर्णितेन
तस्मान्मिथ्या पौरुषेयानुमानम् ॥ २७३ ॥

विश्वमिति। यदाह वेदस्तत्तथ्यमिति सम्बन्धः॥२७३॥

एवं वाक्यत्वलिङ्गकानुमानं निराकृत्य वेदस्य ब्रह्मपरिणा-मत्वे तद्विवर्त्तत्वे वा पौरुषेयत्वेनाऽनपेक्षत्वक्षतिरिति चोद्यस्या-पि बुद्धिपूर्वरचितत्वाभावादिनोक्तं परिहारं निगमयति—

परिणामविवर्त्तयोरतः
परिकल्पावपि वेदगोचरः ॥
न च चोद्यलवोऽपि विद्यते
कथितेनैव पथाऽनपेक्षतः ॥२७४॥

परिणामेति। अत इत्येतद्विवृणोति—कथितेनेति ॥२७४॥

एवं तत्त्वंपदलक्ष्यशुद्धवस्तुप्रदर्शनाय नामरूपात्मकप्रपञ्चस्य ब्रह्मविवर्त्तत्वमुक्त्वा तत्प्रसङ्गागतां वेदपौरुषेयत्वशङ्कां निराकृत्ये-दानीं तत्त्वंपदवाच्ययोर्हेयोपादेयविभागप्रदर्शनाय पदद्वयवाच्या-र्थानिर्दिशति द्वयेन—

उपाधिमौपाधिकमान्तरं चि-
दाभासनं चित्प्रतिबिम्बकं च ॥

चिद्बिम्बमेव चतुरः पदार्थान्
विविच्य जानीहि तदर्थभाजः ॥ २७५ ॥

उपाधिमित्यादिना । चिदाभासस्य सत्यत्वं स्फटिकलौहित्यवदुपाधेर्बहिर्भावश्च व्यावर्त्तयितुमौपाधिकमान्तरमिति विशेषणद्वयम् । तदर्थभाज इत्यत्रार्थशब्दो भावप्रधानः । तत्पदवाच्यत्वलक्ष्यत्वोपेतानित्यर्थः ॥ २७५ ॥

तथा त्वमर्थेऽपि चतुष्टयन्तद्
विवेचनीयं निपुणेन भूत्वा ॥
मतिश्चिदाभासनमेवमस्यां
बिम्बन्तदीयं प्रतिबिम्बकं च ॥ २७६ ॥

यथा तत्पदार्थचातुर्विध्यं तथा त्वमर्थेऽपीत्यर्थः । तदुपाध्यादिरूपम् । विवेचनीयमित्युक्तं विशदयति । मतिरित्यादिना । मतिरन्तःकरणम् ॥ २७६ ॥

तत्पदवाच्यत्वेनोक्तोपाध्यादिचतुष्टयस्वरूपं विशेषतो दर्शयति—

उपाधिरज्ञानमनादिसिद्ध-
मस्मिंश्चिदाभासनमीश्वरत्वम् ॥
तदन्विता चित् प्रतिबिम्बकं स्या-
दुदीर्यते शुद्धचिदेव बिम्बम् ॥ २७७ ॥

उपाधिरिति । अज्ञानगतचित्प्रतिबिम्ब एवेश्वर इति मतेनाज्ञानरूपोपाधेरपि तत्पदवाक्यतामिमता, चित्प्रतिबिम्बस्याज्ञानसंसर्गयुक्तजगत्कारणत्वमीश्वरत्वमित्युच्यते, तच्च चित्प्रतिबिम्बे चिदाभासव्यवहारालम्बनम्, तस्यौपाधिकत्वेन मिथ्यात्वात्, उक्ताभासान्विता च चितिः स्वप्राधान्येन चित्प्रतिबिम्बमिति कथ्यते, वस्तुत उपाधिसंसर्गादिरहिता शुद्धचिदेव बिम्बमित्युच्यत इत्यर्थः ॥ २७७ ॥

त्वंपदवाक्यमप्युपाध्यादिचतुष्टयस्वरूपं विशेषेण दर्शयति—

उपाधिरन्तःकरणं त्वमर्थे
जीवत्वमाभासनमत्र तद्वत् ॥
तदन्विता चित् प्रतिबिम्बमेव-
मनन्वितां तामिह बिम्बमाहुः ॥ २७८ ॥

उपाधिरन्तःकरणमिति । प्रमातृत्वादिदशायामेव त्वमिखभिलापदर्शनात्तस्य चान्तःकरणोपाधिकत्वात्तदपि त्वंपदवाच्यमध्यपातीति भावः । जीवत्वं लिङ्गोपाधिकं कल्पितसंसारित्वं तस्य स्वरूपेण मिथ्यात्वादाभासत्वम् । तद्वत् तत्पदवाक्यनिर्विष्टेश्वरत्ववत् । तदन्वितेत्याद्युक्तार्थम् ॥ २७८ ॥

एवं पदद्वये वाक्यार्थविभागमुक्त्वा तत्र मिथ्याभूतमर्थं विहाय सत्यभूतेऽर्थे पदद्वयञ्जहदजहल्लक्षणया पर्यवस्यतीत्यभिप्रेत्य तद्गतसत्यमिथ्याविभागमाह—

उपाधिना सार्द्धमुपाधिजन्य-
मौपाधिकं सर्वमवेहि मिथ्या ॥
भागं मृषा चित्प्रतिबिम्बकेऽपि
बिम्बं पुनः सत्यमशेषमेव ॥ २७९ ॥

उपाधिनेति । अद्वितीयासङ्गप्रकाशचिदात्मनि वास्तवाज्ञानासम्भवात्तत्तावन्मिथ्या । एवं तत्कार्यमन्तःकरणं तदुभयोपाधिकमीश्वरत्वञ्जीवत्वं चेत्येतत्सर्वमज्ञानाधीनसत्ताकत्वात्स्वरूपतो मिथ्येति निर्द्धारयेत्यर्थः । चित्प्रतिबिम्बे ततो विशेषमाह । भागमिति । चित एव चिदाध्यासविशिष्टतया चित्प्रतिबिम्बपदाभिलप्यत्वात्तत्र विशेषणांशमेवाज्ञानं मिथ्येत्यवेहीत्यनुषङ्गः । बिम्बस्वरूपे तु न भागस्यापि मृषात्वं तस्य निर्भागशुद्धचिन्मात्रत्वात्, प्रतिबिम्बगतसत्यचिद्भागस्यापि तन्मात्रत्वात्तत्स्वरूपमशेषं सत्यमेवावेहीत्याह । बिम्बमिति । एवं च तत्त्वंपदाभ्यां मिथ्याभूतमर्थं

विहाय सत्यभूतशुद्धचिन्मात्रमेकदेशलक्षणयोपादाय सामानाधिकरण्यबलेन तदभेदं प्रतिपादयत्तद्वाक्यमखण्डार्थमिति भावः ॥२७९॥

तत्त्वंपदवाच्ययोरुक्तचातुर्विध्यमलौकिकत्वादसम्भवीति शङ्कां निराकुर्वन्नुपाध्यादिचतुष्टयं लोकेऽपि प्रसिद्धमित्याह—

अप्पात्रमप्पात्रगतत्वमेव-
मप्पात्रगोऽप्पात्रगताद् बहिश्च ॥
दिवाकरो दिव्यवतिष्ठमानो
न शक्यतेऽपोहितुमिद्धतेजाः ॥ २८० ॥

अप्पात्रमिति । सजलं शरावादीत्यर्थः । अप्पात्रगतत्वं प्रतिबिम्बे कल्पितधर्मजातोपलक्षणार्थम् । तदन्वयी दिवाकरप्रतिबिम्बोऽप्पात्रगोऽप्पात्रगताद्बहिस्तदुपाधितद्धर्मसंसर्गरहितः । तत्र हेतुर्दिवि आकाशेऽवतिष्ठमानः यथावत्प्रकाशमानः, तत्रापि हेतुरिद्धतेजा इति । तस्याप्पात्रगतत्वादिकल्पितधर्मजातस्याभासपदवेदनीयस्य मिथ्यात्वेन हेयत्वेऽपि स तु स्वरूपेण वस्तुभूतो न हेय इत्यर्थः ॥ २८० ॥

ननु दृष्टत्वादेव दिवाकरे भवत्तुल्यो विभागः, न तु परमात्मनि, तथा दर्शनाभावादिशाशङ्क्य यथा ह्ययं ज्योतिरात्मा विवस्वान् एक एव हि भूतात्मा भूतेभूते व्यवस्थित इत्यादिशास्त्राद्बिम्बप्रतिबिम्बादिदृष्टान्तेनात्मैकत्वप्रतिपादनादुक्तप्रकारेण तदुपपादनीयं न त्वन्यथा कर्तुं शक्यमित्याह—

पुरं पुरस्थत्वमथो पुरस्थं
पुराद् बहिः शुद्धमवस्थितञ्च ॥
तथा परं ब्रह्म सुसूक्ष्मयाऽपि
धिया निराकर्त्तुमशक्यमेव ॥ २८१ ॥

पुरमित्यादिना । अज्ञानमन्तःकरणं च पुरम्, पुरस्थत्वं चिदाभासः, पुरस्थं चित्प्रतिबिम्बम् । तथा पुराद्बहिरवस्थितमतः

शुद्धचिद्बिम्बस्वरूपं परं ब्रह्म चोक्तविधया निराकर्तुमशक्यमित्यर्थः ॥ २८१ ॥

ननूक्तविभागाङ्गीकारे ब्रह्मणो दिवाकरस्येव सद्वयत्वं सविशेषत्वं च स्यादित्याशङ्क्य तत्रोक्तविभागस्यानिर्वचनीयाज्ञानमूलकत्वेन मिथ्यात्वात्तदपोहेनैव महावाक्यप्रमितशुद्धबिम्बस्वरूपेऽखण्डचिदेकरसे नोपाधितोऽपि विशेषः सम्भावितो दूरस्थ एव स्वाभाविको विशेष इति परिहरन्नुपपादितं निगमयति—

न स्थानतोऽप्यस्ति परस्य तस्माद्
विशेषयोगः परमार्थरूपः ॥
स्वतः पुनर्दूरनिरस्तमेव
परस्य तत्त्वस्य विशेषवत्त्वम् ॥ २८२ ॥

न स्थानत इति । तस्मादित्यादौ योज्यम् ॥ २८२ ॥

किं च समन्वयाध्याय एव सकलवेदान्तानामद्वितीयाखण्डैकरसे ब्रह्मणि तात्पर्यं न्यायतः प्रतिपादनात्तद्विरुद्धं वास्तवं सद्वयत्वादिकं तत्र न शङ्कनीयमित्याह—

श्रुतेश्च तात्पर्यमखण्डरूपे
परे पुरस्तादुपवर्णितं च ॥
ततोऽपि तस्याद्वयरूपतोऽन्य-
द्रूपान्तरं कल्पयितुं न शक्यम् ॥ २८३ ॥

श्रुतेश्चेति । रूपान्तरं चेतनमचेतनं च ॥ २८३ ॥

ब्रह्मणो जगत्कारणत्वनियन्तृत्वादिप्रतिपादकभेदश्रुतिविरोधाद्वैपरीत्यं किं न स्यादित्याशङ्क्य तद्दौर्बल्ये हेतुं तावदाह—

भेदश्रुतिस्त्वन्यपरा समस्ता
समस्तवेदेषु न तत्पराऽसौ ॥
अतत्परा तत्परवेदवाक्यै-
र्विरुद्ध्यमाना गुणवाद एव ॥ २८४ ॥

भेदश्रुतिरिति । अरूपदेव हि तत्प्रधानत्वादिति सूत्रकारेणैव ब्रह्मणो निर्विशेषत्वस्याभेदश्रुतीनां तत्परत्वस्य च निर्धारितत्वाद् भेदस्यान्यतः सिद्धत्वादपुरुषार्थत्वान्निन्दितत्वात्तत्रोपक्रमादितात्पर्यलिङ्गाभावाच्च तच्छ्रुतिरतत्परेत्यर्थः । कल्पितत्वमाह—अतत्परेति । न विधौ परः शब्दार्थ इति न्यायेन तत्परश्रुतेरन्यथा नयनायोगात्तद्विरुद्धाऽतत्परतया दुर्बला भेदश्रुतिरेव लक्षणया ब्रह्मप्रशंसापरा कल्पनीयेत्यर्थः ॥ २८४ ॥

किं चाभेदश्रुतेः स्वार्थपरत्वेन प्रधानत्वात्तत्सन्निधिपठितभेदश्रुतिस्तद्गुणभूता न तद्बाधिका किं तु तदनुगुणतया सा नेतव्येति वक्तुं दृष्टान्तं तावदाह—

न ह्यर्थवादा विधिभिर्विरुद्धा
विध्यर्थसङ्कोचकरा भवन्ति ॥
किं तु प्रधानानुगुणं यदेषा-
मालम्बनं तत् खलु कल्पनीयम् ॥२८५॥

न ह्यर्थवादा इति । तर्हि तेषां निरालम्बनत्वं तदपि नेत्याह । किं त्वित्यादिना । प्रधानानुगुणं विधेयप्रशंसारूपम् ॥ २८५ ॥

प्रधानविरोध्यर्थवाद एव नास्ति यो दृष्टान्तो भवेदित्याशङ्क्य तमुदाहृत्य तत्रोक्तमर्थं दर्शयति—

यथा ह्यजक्षीरविधेः समीपे
यज्जातिलादेः परिकीर्तनं तत् ॥
प्रधानसङ्कोचभयादपास्य
स्वमर्थमासीद् गुणवाद एव ॥ २८६ ॥

यथा हीति । जातिलयवाग्वा जुहुयाद् गवीधुग्यवाग्वा वा न ग्राम्यान् पशून् हिनस्ति नारण्यानित्यनेन प्राणिहिंसारहितत्वारण्यतिलादिद्रव्यकोऽपि होमः प्रशस्त इत्युक्त्वा, अथो ख-

ख्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेति तन्निन्दापूर्वकमजक्षीरेण जुहोतीति विशिष्टहोमविधानात्तत्परतयेदं सर्वमेकं वाक्यम्। तत्र यद्यर्थवादगतजर्तिलादिद्रव्यं विधेयं स्यात्तदा प्रधानवाक्यविहिताजक्षीरस्य विकल्पापत्त्या तद्विध्यर्थसङ्कोचः स्यात्। तदयुक्तं गुणानुरोधेन प्रधानसङ्कोचायोगात्। तस्मात्सर्वदोषरहिततयाजक्षीरहोमः प्रशस्त इत्येवं तत्स्तुतिं जर्तिलेत्याद्यर्थवादो लक्षणया बोधयतीत्यर्थः॥ २८६॥

उक्तदृष्टान्ते प्रधानानुरोधेनार्थवादस्यान्यथा नयने सतीहाप्यद्वैतब्रह्मप्रकरणे पठ्यमानसृष्ट्यादिवाद्यर्थवादोऽपि प्रधानाविरोधाय लक्षणया ब्रह्मप्रशंसापरो नेय इत्याह—

एवं सतीहापि विरुध्यमानं
वचो यदद्वैतपरैर्वचोभिः॥
तदस्तु गौणं यदि वा परस्य
मायाप्रसूतद्वयवादि मुख्यम्॥ २८७॥

एवं सतीति। गौणं गुणकीर्तनपरं स्तावकमिति यावत्। प्रकारान्तरेण तदविरोधमाह—यदि वेति। परस्य मायातत्प्रसूतद्वयवादि सन् मुख्यमस्त्वित्यर्थः॥ २८७॥

सृष्ट्यादिवाक्यं हि इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिना समभिव्याहारान्मायिकं सृष्ट्यादि बोधयन्निषेध्यसमर्पणेन निषेधवाक्यशेषभूतमिति तदीयमुख्यार्थस्वीकारेऽपि न वास्तवाद्वैतविरोधिता तस्येति चतुर्थचरणार्थमेव विशदयति—

भेदश्रुतिः कल्पितमेव भेद-
मालम्ब्य मुख्यार्थवती भवित्री॥
अतत्परा तत्परवाक्यभङ्ग-
स्त्विष्टोऽन्यथा याति विना निमित्तम्॥२८८॥

भेदश्रुतिरिति। सृष्ट्यादिवाक्यस्य मायिकद्वैतविषयत्वे

कथं तत्त्वावेदनरूपं प्रामाण्यम्, तदभावे वा कथं तत्त्वावेदकब्रह्मवाक्येनैकवाक्यतेत्याशङ्क्य तस्य निष्प्रयोजने स्वार्थे तात्पर्याभावान्निषेध्यसमर्पणेन निषेधवाक्यैकतादारेण तात्त्विकाद्वयब्रह्मपरत्वात्तत्र तत्त्वावेदनप्रामाण्योपपत्तिरित्याशयेनाह—अतत्परेति। किमित्येवं प्रणाड्या सृष्ट्यादिवाक्यस्याद्वितीयब्रह्मणि तात्पर्यं कल्प्यते साक्षात्स्वार्थ एव तत्किं न स्यादित्याशङ्क्य तथा सति शेषविरोधः स्यात्, सचान्याय्यः नप्रधानाद् गुणो यत इति स्थितेरित्यभिप्रेत्याह—तत्परवाक्येति। आयाति आपतेत्। भेदश्रुतेरभेदश्रुतिवदुपक्रमोपसंहारैकरूप्यादिलिङ्गाभावात्तस्यास्तत्परत्वं निर्निमित्तम्। अतत्परश्रुतिविरोधात्तत्परश्रुतिभङ्गोऽपि निर्निमित्त इत्याशयेन विना निमित्तमित्युक्तम् ॥ २८८ ॥

एवमद्वैतप्रकरणगतभेदश्रुतेरतत्परतया मायिकद्वैतविषयत्वेन वा तदविरोधं तत्पराद्वैतश्रुतेरुपपाद्योपासनाप्रकरणगतभेदश्रुतेरप्यतत्परत्वात्कर्मकाण्डवन्मायिकविषयत्वं वदंस्तद्विरोधोऽपि नेत्यभिप्रेत्याह—

यदपि किं चिदुपासननिष्ठितादु
वचनतः प्रतिभाति परात्मनः ॥
सकलगन्धरसादिमयं वपु-
स्तदपि कल्पितभेदसमाश्रयम् ॥ २८९ ॥

यदपीति। उपासनाप्रकरणपठितमप्युपासनां विधाय मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस इत्यापोदिनास्यसमर्पणात्तद्वाक्यमुपास्तिविधिपरं न वस्तुपरम्। उपासनं च वाचं धेनुमुपासीतेत्यादाविवारोपितोपास्यरूपमादायाप्युपपद्यत इति निर्गुणश्रुतिबलादुपेयमिति न ततोऽपि वस्तुतः सविशेषत्वमित्यर्थः ॥ २८९ ॥

ननु सगुणवाक्यबलान्निर्गुणवाक्यमेव प्रशंसापरतया प्राकृतगुणाभावविषयतया वाऽन्यथा नीयतामित्याशङ्क्य सगुणवाक्यानामुक्तविधयाऽन्यपरत्वेन दौर्बल्यान्निर्गुणवाक्यानां तु स्वार्थपराणां प्रबलत्वाद् दुर्बलानुरोधेन प्रबलस्यान्यथा नयनं न कस्यापि संमतमित्याह—

न खलु निर्गुणवस्तुपरं वचः
सगुणवाक्यविरोधनिमित्ततः ॥
स्वविषयादपसारयितुं बला-
दतिबलिष्ठपदान्वयमिष्यते ॥ २९० ॥

न खल्विति । निमित्ततो बलादिति संबन्धः । न तावन्निर्गुणवाक्यं ब्रह्मप्रशंसापरतया नेतुं शक्यम्, सर्वगुणनिषेधेन स्तोत्रापरपर्यायप्रशंसायाः कर्तुमशक्यत्वात्, वस्तुतः सगुणस्य गुणप्रतिषेधे निन्दाया एव प्रतीतेश्च । नापि तत्प्राकृतगुणाभावपरमिति वक्तुं शक्यम् । सर्वेषां गुणानां प्राकृतत्वेन विशेषणायोगात् । न च सर्वगन्धः सर्वरस इत्यादिवचनैरप्राकृतगुणसिद्धेर्विशेषणोपपत्तिरिति वाच्यम् । तत्र गुणानामप्राकृतत्वाप्रतीतेः, पृथिव्यादिगतगन्धादिभिरेव तत्कारणब्रह्मणः सर्वगन्धादिमत्त्वेनोपास्तिविधिसंभवे तदतिरिक्ताप्राकृतगुणकल्पनायोगाच्च, इतरथा सर्वशब्दात्तत्राप्राकृतदुर्गन्धादिरपि भवेत् । तस्मात्केवलो निर्गुणश्चेत्यादिवाक्यमन्यथा नेतुमशक्यम् । तदिदमभिप्रेत्योक्तमतिबलिष्ठपदान्वयमिति ॥ २९० ॥

निर्गुणवाक्यानां तत्परत्वादन्यथा नेतुमशक्यत्वाच्च तदनुरोधेन सगुणवाक्यानामारोपितद्वैतविषयत्वे सति तत्पदवाच्ये भागत्यागलक्षणयोपादेयस्वरूपं दर्शयन्पदार्थशोधनमुपसंहरति—

तस्मात्तत्परवेदवाक्यगतिभिर्न्यायेन चात्मप्रभं
सर्वद्वैतविवर्जितं विगलितध्वान्तं शिवं शाश्वतम् ॥

प्रत्यग्रूपमरूपगन्धरसकं तच्छब्दवाच्यं स्थितं
वाक्यार्थान्वयि लक्षितं भगवतो विष्णोः पदं गृह्यताम् ९१

तस्मात्तत्परेति । प्रवृत्तिर्गतिशब्दार्थः । उपाधीनामौपाधिकानां च मिथ्यात्वसाधको न्यायो न्यायेनेत्युक्तः, शिवं सुखैकतानम् । तस्य परोक्षत्वं निवारयति —प्रत्यग्रूपमिति । अरूपगन्धरसकमिति शक्यमानसमस्तगुणराहित्योपलक्षणार्थम् । उक्तरूपस्य तत्पदलक्षितत्वे हेतुर्वाक्यार्थान्वयीति ॥ २९१ ॥

निर्गुणवस्तुबोधादेव परपुरुषार्थलाभात्तदेव वेदान्तगम्यमित्यत्र कठश्रुतिं प्रमाणत्वेनोदाहरति—

अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत् ॥
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्यनीयं पदमीदृशं हरेः ॥ २९२ ॥

अशब्दमिति । अव्ययम् उपक्षयरहितम् । नित्यं सदा । महतः समष्टिबुद्धिरूपहिरण्यगर्भात् । ध्रुवं कूटस्थम् । निचाय्य तं मृत्युमुखात्प्रमुच्यत इतिमन्त्रगतचतुर्थचरणस्य तात्पर्यार्थमाह–निचायनीयमिति ॥ २९२ ॥

जीवजगदीश्वराणां शुद्धब्रह्ममात्रत्वात्तदेव सत्यमभिप्रेत्य तत्र श्वेताश्वतरमन्त्रमुदाहरति—

भोक्ता भोज्यं प्रेरितारं च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥
जीवेशानौ सृज्यमानं जगच्च
शुद्धं ब्रह्मेत्याह वेदान्तवाक्यम् ॥ २९३ ॥

भोक्तेति । द्वितीयार्थे प्रथमा । मत्वा युक्तितोऽसत्यतया निश्चित्य । ब्रह्मेति च्छान्दम् । अथ वा मे मया तत्त्रिविधं सर्वं ब्रह्म प्रोक्तमिति मन्त्रदृशो वचनम् । अस्य मन्त्रस्य तात्पर्यार्थ-

माह-जीवेशानाविति ॥ २९३ ॥

ननु ब्रह्मविदाप्नोति परमितिवचनात्तत्पदलक्ष्यसत्यज्ञानानन्दानन्तात्मकब्रह्मबोधादेव सत्यादिवाक्यसिद्धान्मोक्षसंभवात्कृतं तत्त्वमादिवाक्यैरिति तत्राह—

पदार्थबोधेन कृतार्थता न ते
मतिः परोक्षा हि पदार्थगोचरा ॥
अतो महावाक्यनिबन्धनैव धी-
रबोधविच्छेदकरी भविष्यति ॥ २९४ ॥

पदार्थबोधेनेति । अविद्यायामन्तरे वर्तमानाः अनीशया शोचति मुह्यमान इत्यादौ संसारस्यात्मनि ब्रह्मभावाज्ञानाधीनत्वश्रवणात्समूलस्य संसारस्यापरोक्षाध्यासरूपत्वादात्मनो ब्रह्माभेदसाक्षात्कारं विना तन्निवृत्त्ययोगात्सत्यादिवाक्यजनितबोधस्य प्रत्यगभिन्नब्रह्मगोचरत्वाभावेन परोक्षत्वात्तदवगतब्रह्मानन्त्यस्य वियदादिवज्जीवस्वरूपबाधयाप्युपपत्तेस्तद्बलेनापि तदभेदसाक्षात्कारायोगादात्मानं चेद्विजानीयादयमस्मीति पूरुषः य एव वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यादिश्रुतौ प्रत्यगभिन्नब्रह्मबोधस्यैव मोक्षहेतुत्वश्रवणाच्च तज्जनकमहावाक्यैर्विना कृतार्थत्वायोगात्तद्वैयर्थ्यं न शङ्कनीयमित्यर्थः ॥ २९४ ॥

तथापि समानार्थकमहावाक्यबाहुल्यं वृथेत्याशङ्क्य नियमाध्ययनसंस्कृतमहावाक्यस्यैव फलवत्प्रमितिहेतुत्वमिति विशेषज्ञापनाय सर्वशास्त्रासु महावाक्यानि पठ्यन्ते इयमिप्रेत्याध्ययननियमसंस्कृतमहावाक्यमेवाप्रतिबद्धसाक्षात्कारहेतुरित्याह—

स्वाध्यायधर्मपठितं निजवेदशाखा-
वेदान्तभूमिगतमादरपालितं च ॥
संन्यासिना परदृशा गुरुणोपदिष्टं
साक्षान्महावचनमेव विमुक्तिहेतुः ॥ २९५ ॥

स्वाध्यायेति । ब्रह्मचर्यगुरुशुश्रूषाद्यङ्गानुष्ठानपूर्वकमधीतमित्यर्थः । तत्र नियमाध्ययनप्राप्तये पुनर्विशिनष्टि । निजवेदेति । स्वशाखाध्ययने नियमविधानात्तन्मध्यपातिमहावाक्यमपि तथैवाध्येतव्यमित्यर्थः । नियमेनाधीतमपि विस्मृतं चेन्न फलायेत्याशयेनाह—आदरेति । आचार्यवान् पुरुषो वेदेति वचनात्तत्स्वयमेव विचारितं न फलवदित्याशयेनाह—सन्न्यासिनेति । ब्रह्मनिष्ठायाः संन्यासिन एव संभवादेवमुक्तम् । साक्षाद्विमुक्तिहेतुरित्यन्वयः, विमुच्यतेऽनेनेति विमुक्तिस्तत्त्वसाक्षात्कारः ॥२९५॥

ननु कथं महावाक्यात्तत्त्वसाक्षात्कारोदयः, शब्दस्य परोक्षधीहेतुत्वनियमादित्याशङ्क्य किं मानान्तराधीनस्तत्त्वसाक्षात्कार इत्यभिप्रेतमुत महावाक्यात्परोक्षधीमात्रोत्पत्तेस्तत्साक्षात्कार एवेति विकल्प्याद्यमपवदति ।

नावेदविद्धि मनुते पुरुषं बृहन्त-
मित्याह वेदवचनं कथमन्यथैतत् ॥
वाक्यान्तरं च कथमाह पुमांसमेनं
साटोपमौपनिषदत्वविशेषणेन ॥ २९६ ॥

नावेदविदिति । अवेदविदः परमात्मनि मतिनिषेधात्तस्य मानान्तरायोग्यत्वप्रतिपत्तेस्ततस्तत्साक्षात्कारः कथं स्यादित्यर्थः । न द्वितीयः, तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुत्या पुरुषस्यौपनिषदत्वविशेषणेनोपनिषदेकप्रमाणकत्वावगतेरपरोक्षब्रह्मात्मनि परोक्षज्ञानस्य प्रामाण्यासम्भवाच्छब्दजन्यस्यापि ज्ञानस्यापरोक्षविषयत्वेनापरोक्षत्वसम्भवाच्च तत्रोपनिषद्भिः साक्षात्कार एव युक्तः, इतरथोक्तश्रुतिः कदर्थिता स्यादिति भावेनाह—वाक्यान्तरमिति । साटोपमौपनिषदात्माभिज्ञेन सह तदनभिज्ञस्य विवादानर्हतामकटनमाटोपस्तत्सहितं यथा स्यात्तथेत्यर्थः ॥२९६॥

ननु नावेदविदित्यनेन वेदमात्रस्यौपनिषदमित्यनेन चोपनि-

षन्मात्रस्य ब्रह्मात्मनि प्रामाण्योक्तेः कथं महावचनमेव विमुक्तिहेतुरित्युक्तमित्याशङ्क्य वेदोपनिषत्पदाभ्यां महावाक्यस्यैवाभिधानान्न विरोध इत्याह।

उपनिषादिति वेद इत्यपीदं
समभिवदन्ति महावचो महान्तः॥
फलवदवगतिः स्यादन्तरेणैतदेकं
वचनमिति न शक्यं वक्तुमित्यादरोऽस्मिन् २९७

उपनिषादिति। वेदशब्दस्तावद् वेदयतीति व्युत्पत्त्याऽनवगतब्रह्मात्मतत्त्ववेदकमहावाक्यस्यैव वाचकः, योगवृत्त्यैव प्रवृत्तिसम्भवे रूढेरकल्पत्वात्। उपनिषच्छब्दो यद्यपि वक्ष्यमाणव्युत्पत्त्याऽविद्यानिवर्त्तकतत्त्वधीवाचकस्तथाऽपि तद्धेतुमहावाक्यं लक्षणया तदर्थो न वेदान्तमात्रमिति तत्त्वविदां व्यवहार इत्यर्थः। ननु वेदयतीतिव्युत्पत्तेर्वेदमात्रे संभवात्कथं महावाक्यमेव वेद इति तेषामादर इति तत्राह। फलवदिति। फलवती परमपुरुषार्थहेतुभूताऽवगतिस्तत्त्वसाक्षात्कार एकमेकत्वगोचरमेतद्वचनं महावाक्यमन्तरेणापि स्यादिति वक्तुं न शक्यमिति यस्मात्तस्मात्तेषां महावाक्ये वेद इत्यादर इत्यर्थः। एकस्मिन्नपि श्लोके पूर्वोत्तरार्द्धयोर्भिन्नत्वाच्छन्दोभेदो न दोषाय, तत्त्वनिरूपणचित्तत्वाद्वा छन्दोभेदो नालोचित इति द्रष्टव्यम्॥२९७॥

वृद्धप्रसिद्ध्या वेदोपनिषत्पदयोर्महावाक्यविषयत्वे सिद्धे फलितमाह—

उपनिषादिति शब्दो वेदशब्दश्च तस्मा-
च्छ्रुतिशिरसि निविष्टो योज्यतामत्र वाक्ये॥
अपरमखिलमस्यैवाङ्गभूतत्वहेतो-
रिह समभिनिविष्टं तद्गिरो वाच्यमासीत्॥२९८॥

उपनिषादिति शब्द इति। तस्मादित्येतदादौ योज्यम्। श्रुतिशिरसि औपनिषदं पुरुषमिति नावेदविदिति च वाक्य इ-

त्यर्थः । अत्र वाक्ये प्रकृते महावाक्ये । कथं तर्हि महावाक्यव्यतिरिक्तपदसंदर्भेऽपि लोकवेदयोर्वेदोपनिषत्पदप्रयोग इत्याशङ्क्य तत्र साक्षात्परम्परया वा महावाक्यशेषत्वाच्छेषिणाऽभेदोपचारात्तत्रापि तत्पदप्रवृत्तिरित्याह-अपरमिति । वाच्यं विषय इति यावत् ॥ २९८ ॥

महावाक्यमेव तत्त्वसाक्षात्कारहेतुरित्यत्र श्रौतं लिङ्गमाह—

पित्रा तत्त्वमसीतिबोधनमनु स्पष्टं विजज्ञाविति
च्छान्दोग्ये यदवोचदेतदिह नो लिङ्गं भवेज् ज्ञापकम् ॥
सर्वत्रैव महागिरामुपनिषच्छब्दो अवेद् ग्राहको
वेदश्चायमतोऽन्यदस्य निकटं तेनात्र वेदादिगीः ॥ २९९ ॥

पित्रेति । छान्दोग्ये षष्ठे नवमे पर्याये तत्त्वमसि श्वेतकेतो इत्येतदनन्तरं तद्धास्य विजज्ञाविति श्वेतनेनास्य पितुरुपदेशात्तदुपदिष्टं तत्त्वं विजज्ञौ विस्पष्टं साक्षादेव ज्ञातवानित्युक्तत्वान्महावाक्यमेवाविद्यानिवर्त्तकबोधहेतुरिति गम्यते, इतरथा तदुक्तिवैयर्थ्यादित्यर्थः । लिङ्गमित्येतद्विवरणं ज्ञापकमिति । महावाक्यानामेव फलवत्त्वमितिहेतुत्वे फलितमाह-सर्वत्रेति । अत इत्यादौ योज्यम् । वेदो वेदशब्दः । अन्यत्र वेदादिपदप्रयोगस्य गतिमुक्तां स्मारयति । अन्यदिति ॥ २९९ ॥

ननु वार्तिककारैरत्र चोपनिषच्छब्दो ब्रह्मविद्यैकगोचर इत्युपक्रम्य उपनीयेममात्मानं ब्रह्मापास्तद्वयं यतः निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेदित्यादिना ब्रह्मविद्यैवोपनिषत्पदवाच्येत्युक्तत्वात्कथम्महावाक्यं तदर्थ इत्याशङ्क्य तदुक्तमप्यङ्गीकरोति—

उपनिषद्वचसा परमात्मधीः
सहजशक्तिवशेन निगद्यते ॥
तदुपचर्य्य महागिरि वर्त्तते
निकटभावपेक्ष्य तु मुख्यगीः ॥ ३०० ॥

उपनिषदूवचसेति । अवयवगतशक्तिः सहजशक्तिपदार्थः । कथं तर्हि महावाक्यं तदर्थस्तत्राह । उपचर्य्येति । महावाक्यस्योपनिषत्पदवाच्यतत्त्वधीहेतुत्वेन तदभेदोपचाराल्लक्षणया वा तदर्थतेत्यर्थः । तर्हि महावाक्यमुपनिषत्पदस्य मुख्योऽर्थ इति कथमुक्तमित्याशङ्क्य तस्य मुख्यार्थभूतधीहेतुतया तदपेक्षया तत्सन्निधानात्तदुक्तिरित्याह—निकटभावामिति ॥ ३०० ॥

ननु महावाक्यस्यावान्तरवाक्यस्य चोपनिषत्पदवाच्यत्वाभावे समाने कथं तत्रोपनिषत्पदस्य मुख्यामुख्यत्वव्यवस्थेत्याशङ्क्य वाच्यार्थेन साक्षात्संबद्धे महावाक्ये मुख्यवदुपस्थापकत्वात् तस्य मुख्यत्वव्यपदेशोऽन्यत्र तु तदभावादमुख्यत्वव्यपदेश इत्याशयेन निकटभावमपेक्ष्येत्युक्तं विवृणोति—

उपनिषद्वचनाभिहितात्मधी-
निकटवर्त्ति महागिरि मुख्यवत् ॥
उपनिषद्वचनं तदवान्तरे
वचसि गौणवदत्र विवक्ष्यते ॥ ३०१ ॥

उपनिषद्वचनमिति । अत्र लोकवेदयोः ॥ ३०१ ॥

महावाक्यस्यैव कथं तत्त्वधीनैकव्यमितिशङ्कायां पित्रा तत्त्वमसीत्यादिनोक्तं स्मारयन् फलितमाह—

यतो महावाक्यत एव पुत्रो
विजज्ञिवानस्य पितुः सकाशात् ॥
इति श्रुतं तेन स एव वेद-
स्तथा च सैवोपनिषच्च सिद्धा ॥ ३०२ ॥

यत इति । स सैवेति महावाक्यं परामृश्य विधेयापेक्षया लिङ्गान्तरनिर्देशः ॥ ३०२ ॥

एवं नावेदवित् तं त्वौपनिषदं पुरुषमिति श्रुतिबलाच्छ्रौतलिङ्गबलाच्च महावाक्यमेव फलवत्प्रमितिहेतुरित्युपपादितमनूद्य

फलितं महावाक्यवैयर्थ्यचोद्यनिरासं निगमयति—

विना महावाक्यमतो न कश्चित्
पुमांसमद्वैतमवैति जन्तुः ॥
ततः पदार्थावगमान्न मुक्ति-
र्घटिष्यते तस्य परोक्षभावात् ॥ ३०३ ॥

विना महावाक्यमिति । पुमांसं शोधिततत्त्वमर्थम् । अद्वैतं ब्रह्माभिन्नम् । तस्य केवलपदार्थावगमस्य ॥ ३०३ ॥

ननु तत्त्वमादिमहावाक्यस्यैव मुक्तिहेत्वपरोक्षधीहेतुत्वात्तेनैवालं किं सत्यं ज्ञानमित्याद्यवान्तरवाक्येन परोक्षधीहेतुना, ततस्तदर्थो वृथा निरूपित इति नेत्याह—

पदार्थबोधं परिहृत्य वाक्यं
न शक्तमात्मानुभवावसानाम् ॥
धियं समानेतुमपेक्षितत्वा-
दतः स यत्नेन निरूपितोऽभूत् ॥ ३०४ ॥

पदार्थबोधमिति । आत्मानुभवावसानाम् आत्मतत्त्वाभिव्यक्तिफलां साक्षात्काररूपामिति यावत् । पदार्थधियो वाक्यार्थधियो हेतुत्वेनापेक्षितत्वान्न कस्यापि वैयर्थ्यमित्यर्थः ॥३०४॥

तथापि तत्त्वंपदाभ्यामेव तदर्थावगतेः कृतमवान्तरवाक्यैरित्याशङ्क्य तन्मात्रेण वाक्यार्थान्वययोग्यार्थासिद्धेस्तदर्थशोधकावान्तरवाक्यापेक्षया ताभ्यां तादृशार्थोपस्थितेर्नावान्तरवाक्यवैयर्थ्यमित्यभिप्रेत्य तद्बलावगतौ पदार्थौ निर्दिशति—

तच्छब्दादवगतमद्वितीयमासीत्
प्रत्यक्कं समधिगतं त्वमित्यनेन ॥
प्रत्यक्कं न खलु विना द्वितीयमेवं
नाद्वैतं भवितुमलं विना प्रतीचा ॥ ३०५ ॥

तच्छब्दादिति । तयोरपि परस्परं भेदे वाक्यार्थेऽनुपयोगं

मत्वा युक्तितस्तदभेदे सम्भावयति—प्रत्यक्त्वमिति। अद्वितीय-ब्रह्मणः सर्वाधिष्ठानतया सर्वान्तरत्वात्तदभेदं विना त्वंपदसमर्पितं प्रत्यक्त्वं सर्वान्तरसाक्षिचैतन्यात्मकं न घटते, सर्वान्तराद्बहिर्भूतस्य सर्वान्तरत्वायोगात्। एवं तत्पदसमर्पितमप्यद्वितीयं वर्णितप्रत्यग-भेदं विना न घटत इति युक्तितस्तावभिन्नावपि सम्भावितावि-त्यर्थः॥ ३०५॥

नन्ववान्तरवाक्यसिद्धयोः प्रत्यगद्वितीययोरुक्तयुक्त्याऽभेदनि-श्चयसम्भवात् किं महावाक्यैरित्याशङ्क्य युक्तेः सम्भावनाधीहे-तुतया प्रमाणानुग्राहकत्वेन स्वतो निर्विचिकित्सधीहेतुत्वायोगा-त्तज्जनितधियस्तदभेदगोचरत्वेऽप्यप्रमाणजन्यतया परोक्षत्वात्तद-विद्यानिवृत्त्यक्षमत्वाच्च तन्निवर्त्तकनिर्विचिकित्सापरोक्षधीहेतुभूत-महावाक्यानि भवन्ति तावदर्थवन्तीत्याशयेन यौक्तिकप्रतीतितो वाक्यजाऽनुभवस्य विशेषमाह—

तर्कप्रतीतिसमयेऽपि तदद्वितीयं
प्रत्यक् परिस्फुरति तत्प्रतिबिम्बितं सत्॥
वेदान्तवाक्यजनिताद्वयबुद्धिभूमि-
निष्ठं पुनः स्फुटतरं भवतीति भेदः॥ ३०६॥

तर्कप्रतीतीति। तत्प्रतिबिम्बितं प्रत्यक्षवत्तस्यां स्वाकारार्पकं सत् स्फुरति न त्वपरोक्षवदनावृतमित्यर्थः। भेदो विशेषः॥ ३०६॥

नन्वेकमेव शुद्धं वस्तु पदार्थज्ञाने यौक्तिकज्ञाने वाक्यजन्य-ज्ञाने च प्रतिबिम्बितं सत् स्फुरति चेत् तत्र स्फुटत्वास्फुटत्वविशेषः कुत इत्याशङ्क्य तदभिव्यञ्जकज्ञाननिष्ठयोग्यतारूपस्वाभाव्यतारतम्यनिबन्धनः स इति सदृष्टान्तमाह—

अधममध्यमशुद्धिनि दर्पणे
परमशुद्धिनि चाननमात्मनः॥

तरतमक्रमतः प्रतिभासते
तादिव तत्त्वमिह प्रतिपत्तिषु ॥ ३०७ ॥

अथमेति । दर्पणे शुद्धिर्वैमल्यम् । क्रमतो व्यवस्थातः । तादिव आननवत् । तत्त्वमात्मतत्त्वम् । इह आसु ॥ ३०७ ॥

ननु शोधितयोस्तत्त्वमर्थयोः परस्परावैलक्षण्यलिङ्गेनाभेदानुमानसम्भवात्तस्य प्रमाणत्वेन निश्चायकत्वात्किं महावाक्येनेत्यत आह—

एकदेशमुपलभ्य धर्मिण-
श्चैकदेशमपरं विजानते ॥
धर्मिधीव्यवधिकारणादतो
नानुमा ह्यनुभवाय वस्तुनः ॥ ३०८ ॥

एकदेशमिति । धर्मिणः पक्षस्य व्याप्यविशिष्टरूपैकदेशदर्शनात्तद्व्यापकविशिष्टैकदेशान्तरं सर्वत्रानुमिन्वते, तदुक्तं शबरस्वामिना, एकदेशदर्शनादेकदेशान्तरे बुद्धिरनुमानमिति, ततश्च तदर्थस्य पक्षीभूतस्य परोक्षत्वेन तद्द्वारोत्पद्यमानानुमितेरपि तद्विशेषणाभेदगोचरायाः परोक्षत्वेन तदपरोक्षानुभवत्वाभावात्ततस्तदविद्याद्यनिवृत्तेस्तन्निवर्त्तकाखण्डवस्तुसाक्षात्काराय तत्त्वमादिवाक्यमर्थवदित्यर्थः ॥ ३०८ ॥

एवं महावाक्यानामर्थवत्त्वं निरूप्य पदार्थशोधनप्रकरणमुपसंहरति—

एवं तावत्तत्त्वमर्थौ विशुद्धौ
बोद्धव्यं चेदन्यदप्यस्ति पृच्छ ॥
यद्यद् बुद्धं तत्तदादाय निष्ठे-
र्यच्चाबुद्धं तत्र चाधत्स्व चेतः ॥ ३०९ ॥

एवं तावदिति । वाक्ये निर्गुणनिष्ठिते च निखिले न्यायादियत्तामतिरित्यत्र संक्षिप्तं तृतीयपादार्थं प्रपञ्चयितुं तत्प्रश्ना-

यानुमतिं ददाति । बोद्धव्यमिति । यद्यदित्यादियुक्तार्थम् ॥३०९॥

यद्यपि द्वैतसत्यत्वादिनिरासेनाद्वयं वस्तु तत्पदलक्ष्यं निरूपितं त्वंपदलक्ष्यमपि सर्वोपप्लवरहितं विज्ञानघनरूपं प्रत्यङ्मात्रमित्युक्तम् , तथापि तदुभयवाचकपदानां नानाशाखागतानामेकत्रोपसंहारेण तल्लक्ष्ययत्तानिर्द्धारणं विनाऽभेदरूपवाक्यार्थे सर्वतो निर्विचिकित्सानुभवायोगात्तत्त्वमादिवाक्यात्तादृशानुभवाय तद्गतपदार्थवाचकजातेयत्तावुभुत्सया शिष्यप्रश्नमवतारयति—

बुद्ध्वा तत्त्वंपदार्थावनुभवविषयं कर्तुकामस्तदैक्यं
वाक्याद्वाक्यार्थनिष्ठाच्छ्रुतिशिरसिगतादञ्जसा तत्त्वमादेः।
तच्छेषापन्नमस्मिञ्छ्रुतिशिरसि वचो जातमन्यद्यदस्ति
तस्येयत्तावुभुत्साकुलितनिजमतिः पृच्छति स्मैष भूयः॥

बुद्ध्वा तत्त्वमित्यादिना ॥ ३१० ॥

प्रतिपित्सितेऽवगते भूयः कथं प्रश्न इत्याशङ्क्य तद्बीजं सकारणं दर्शयति—

अद्याप्यवान्तरवचः परिमाणबोध-
वैकल्यमस्ति मम तेन महावचोऽपि ॥
वाक्यार्थबुद्धिमनुमूतिफलावसानां
नोत्पादयत्यहरहः श्रुतमप्यशक्ते ॥ ३११ ॥

अद्यापीति । अशक्तेरुक्तकारणेन शक्तिप्रतिबन्धादित्यर्थः ॥ ३११ ॥

इदानीं प्रश्नस्वरूपं प्रकटयति—

विधिमुखेन परस्य निवेदकं
वचनजातमवान्तरसंज्ञितम् ॥
यदपि भेदनिषेधमुखेन त-
त्परिमितिं प्रतिपादय मे प्रभो ॥ ३१२ ॥

विधिमुखेनेति । ज्ञानानन्दादिभावस्वरूपसमर्पणेनेत्यर्थः।

यदित्येतदत्रापि योजनीयम् । निषेधमुखेन परस्य निवेदकमित्यनुषङ्गः । तत्परिमितिं तदुभयेयत्ताम् ॥ ३१२ ॥

कर्मब्रह्मणोऽपि सर्ववेदान्तप्रत्ययत्वात्तेषु वेदान्तेषु सगुणनिर्गुणपरत्वविभागं कृत्वा निर्गुणपरेषु तेष्वानन्दादयः प्रधानस्येत्यादिनोक्तन्यायात्स्वशाखागतनिर्गुणवाक्येष्वश्रूयमाणान् परशाखागतेषु तेषुतेषु श्रूयमाणानानन्दनित्यसर्वगतविभुपूर्णामृताभयसर्वज्ञेश्वरान्तर्याम्यादिशब्दान् स्वशाखागतसत्यज्ञानानन्तादिवाक्येषूपसंहरंस्तदियत्तां स्वयमेव ज्ञास्यसीत्याहाचार्यः—

सकलवेदशिरःसु परात्मधी-
परवचःसु परापरबोधतः ॥
अपुनरुक्तपदान्युपसंहरन्
परिमितिं स्वयमेव तु वेत्स्यसि ॥ ३१३ ॥

सकलेति । सकलवेदशिरस्सु परापरबोधतः सगुणनिर्गुणपरत्वविवेकेन परात्मधीपरवचःसु अपुनरुक्तपदानीति सम्बन्धः ॥ ३१३ ॥

ननु यत् सत्यादिवाक्यावगतं वस्तु तदेव किमुपसंहृतानन्दादिपदसमभिव्याहारात् प्रतीयते किं वा ततोऽर्थान्तरमपि, आद्ये तदुपसंहारवैयर्थ्यम्, द्वितीयेऽखण्डार्थत्वं तस्य न स्यात्, उपसंहृतपदार्थवैशिष्ट्यस्य ततः प्रतीतेरित्याशङ्क्याह—

अपुनरुक्तपदानि विना यतो
न परिपुष्कलबुद्धिसमुद्भवः ।
अपुनरुक्तपदानि ततस्तत-
स्त्वमुपसंहर तत्त्ववुभुत्सया ॥ ३१४ ॥

अपुनरुक्तेति । अपुनरुक्तानन्दादिपदलक्षितानन्दादिव्यक्त्यभिन्नब्रह्मधीः परिपुष्कलबुद्धिशब्दार्थः, सैव हि तस्मिन् तद्विपरीताकारसंशयादिविरोधिनी, ततश्च न पदान्तरोपसंहारवैय-

र्थम् । नाप्यखण्डार्थत्वहानिः, ब्रह्मणि सत्यादिपदलक्ष्यभेदबोधेऽपि विशिष्टार्थबोधकत्वेन तदुपपत्तेरिति भावः ॥ ३१४ ॥

नन्वेवं सति भाववस्तुपरप्रकरणे तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्द आत्मेति प्रियादीनां शिरआद्यवयवात्मत्वश्रुतेस्तेषामप्यन्यशाखागतब्रह्मवाक्येषूपसंहारः स्यादित्याशङ्क्य तन्निवारणाय मुख्यामुख्यब्रह्मवाक्यविवेकं कृत्वा तत्र मुख्यब्रह्मवाक्यगतपदानामेवोपसंहारः कार्य इति तावदाह—

कुरु परापरवाक्यविवेचनं
तदनु शब्दसमाहरणं कुरु ॥
प्रियशिरःप्रभृतीनि च यत्नवा-
नुपचितापचितानि परित्यज ॥ ३१५ ॥

कुरु परापरेति । एवं चानन्दमयस्याब्रह्मत्वात्तद्वाक्यगतप्रियशिरस्त्वादीनां मुख्यब्रह्मवाक्येषूपसंहारो न कर्त्तव्य इत्याह—प्रियशिर इति । तेषामब्रह्मधर्मत्वे लिङ्गं चाह—उपचितेति । तत्र प्रियं नामेष्टवस्तुदर्शनमात्राद्य ईषत्संतोषः, तस्य स्वत्वेन प्राप्तौ ततोपीषदधिकः स मोदः, तदुपभोगेन ततोऽप्यधिकः स प्रमोदः, तस्मात्सामान्यमात्रमानन्द इति ॥ ३१५ ॥

तेषामुपचितादिरूपत्वेऽपि ब्रह्मधर्मत्वं किं न स्यादित्याशङ्क्यामुपचयापचयौ हि भेद इति सूत्रावयवावष्टम्भेन परिहरति—

उपचितापचितानि न निर्गुणे
प्रियशिरःप्रभृतीनि कदा चन ॥
निपुणधीरपि कश्चन योजये-
दपि तु कोशगुणाः कथिता ह्यमी ॥ ३१६ ॥

उपचितापचितानि न निर्गुण इति । निर्गुणे वस्तुनि स्वाभाविकगुणगुणिभावायोगान्न तद्धर्मतेत्यर्थः । तर्हि तेषां

केवलाचेतनेऽप्यसम्भवान्निराश्रयत्वापत्तिरित्याशङ्क्य तेषां साभासबुद्धिधर्मत्वात्तदभेदात्तत्कारणानन्दमयकोशे ते कथिता इत्याह—अपि त्विति ॥ ३१६ ॥

निरूपितमुपसंहरन् वक्ष्यमाणं प्रस्तौति—

इति वचःपरिमाणमुदीरितं
विधिवचःसु निषेधगिरां शृणु ॥
बहु निषेध्यममूष्वपि तेन ता-
स्वपि समाहर पूर्ववदेव तत् ॥ ३१७ ॥

इतीति । विधिमुखेन वस्तुबोधवाक्येषूपसंहार्यपदेयत्तोक्तेत्यर्थः । निषेधगिरां परिमाणमित्यनुषङ्गः । निषेधस्य नञर्थस्यैकरूपत्वात्तदुपसंहारो वृथेत्याशङ्क्य निषेधप्रतियोगिभेदेन तद्भेदात्तदियत्तानिरूपणं कार्यमित्याह—बहु निषेध्यमिति । तान्निषेध्यम् ॥ ३१७ ॥

निषेध्योपसंहारो वृथेत्याशङ्क्य तदुक्त्यभिप्रेतं विवृणोति—

अपुनरुक्तनिषेध्यनिषेधकृ-
द्बहुपदाहरणं कुरु तास्वपि ॥
यदि पुनर्न समाहरणं भवेत्
परिमितप्रतिषेधनमायतेत् ॥ ३१८ ॥

अपुनरुक्तेति । ननु प्रतिषेधानामात्मस्वरूपत्वाभावात्तदुपसंहरणं वृथेत्याशङ्क्य स्थूलादिप्रतिषेधाभावे तत्तदात्मत्वशङ्कायां दुर्निवारत्वाच्छाखान्तरगतापुनरुक्तप्रतिषेधानुपसंहारे च तन्निषेध्यात्मत्वशङ्कायां अनिराकरणाच्च सर्वप्रतिषेधोपसंहार आवश्यक इत्याशयेनाह—यदि पुनरिति ॥ ३१८ ॥

ननु सत्यादिवाक्यस्थपदानामप्यनृतादिव्यावृत्तिधीहेतुत्वात् स्थूलादिनिषेधवाक्यस्थपदानामपि निर्विशेषवस्तुबोधित्वात्कुतो विधिनिषेधविभाग इत्याशङ्क्य विधिवाक्यस्थपदानां साक्षाल्ल-

क्षितभावरूपस्वार्थसमर्पणमर्थात्तद्विरोधिकल्पितरूपव्यावर्त्तनं चेति कृत्यद्वयमास्ते निषेधवाच्यस्थपदानां तन्नेति वैषम्यात्तद्विभागोपपत्तिरित्यभिप्रेत्याह—

विधिवचस्युभयं तु पदेपदे
भवति संग्रहवर्जनरूपकम् ॥
स्वकवपुः परिकल्पितरूपयो-
र्नं तु निषेधवचःसु तथा मतम् ॥ ३१९ ॥

विधिवचसीति। पदेपदे प्रतिपदम्, स्वकवपुः साक्षात् स्वसमर्पितसच्चिदानन्दादिभावात्मकवस्तुस्वरूपम्, तस्य तत्र कल्पितात्मजडादिरूपस्य च यथाक्रमं संग्रहादिरूपं द्वयं भवतीति सम्बन्धः ॥ ३१८ ॥

चतुर्थचरणार्थमेव विवृणोति—

यदिह किं चिदबोधसमुद्भवं-
तदखिलं प्रतिषेधति केवलम् ॥
न तु किमप्युपगृह्य परे पदे
भगवतो निविशेत निषेधगीः ॥ ३१९ ॥

यदिहेति। प्रतिषेधतीत्यत्र निषेधगीरिति योजनीयम्, किमप्युपगृह्य भावात्मकं किमपि स्वरूपं समर्प्य भगवतः परे पदे शोधिततदर्थे कल्पितनिषेधमात्रेणाधिष्ठाने भावरूपविशेषानवगमादिति ॥ ३१९ ॥

विधिनिषेधयोरुक्तवैषम्यमुपसंहरन् केन चिद्देशेन साम्यमप्याह—

इति विशेष इह प्रतिपादितो
विधिनिषेधगिरोरुभयोरपि ॥
अपुनरुक्तपदाहरणं पुन-
र्विधिनिषेधवचः स्वविशेषतः ॥ ३२० ॥

इति विशेष इत्यादिना । स्पष्टोऽर्थः ॥ ३२० ॥

सर्वेषां निषेधपदानामेकवाक्यत्वमापन्नानां दृश्यमात्रनिषेधपराणामजहल्लक्षणया श्रुताश्रुतविषयत्वं विधिपदानां तु श्रुतार्थमात्रस्वरूपं समर्पयतां तदभाव इतिं वैषम्यान्तरमाह द्वयेन--

श्रुतपदैरुपसंहृतिशालिभि-
र्यदवशिष्टनिषेध्यनिषेधनम् ॥
तदपि पूर्यमिहाभिमतं श्रुतेः
श्रुतपदान्युपलक्षणमेव हि ॥ ३२१ ॥

श्रुतपदैरित्यादिना । पूर्यं समुच्चेतव्यम् । इह श्रुतनिषेधसमूहे । तदुपस्थापकाभावमाशङ्क्याह—श्रुतपदानीति । यद्यपि नेह नानास्ति किं चनेत्यादिना सामान्येन दृश्यमात्रनिषेधः श्रुतः, तथापि तं कर्णौ पिधायाशृण्वतेव कतिपयविशेषनिषेधकैरस्थूलादिपदैरेव कल्पितसर्वनिषेध उक्तरीत्योपपादित इति द्रष्टव्यम् । अथ वा नेतिनेत्यादेरपि लोकप्रसिद्धदृश्यमात्रनिषेधकत्वादवशिष्टपरीक्षककल्पितप्रधानमहदहङ्कारपरमाणुद्व्यणुकविशेषसमवायादिप्रतिषेधसंग्रहार्थं श्रुतपदान्युपलक्षणमित्युक्तमित्यविरोधः ॥ ३२१ ॥

सत्यादिपदानामपि लक्षकत्वं तुल्यमित्याशङ्क्य तेषां स्वार्थैकदेशलक्षकत्वेऽपि श्रुतार्थापरित्यागेनाश्रुतलक्षकत्वं नेति वैषम्यमाह--

समुपसंहृतशब्दसमन्वितैः
श्रुतपदैर्विधिवाक्यगतैः पुनः ॥
समुपलक्ष्यतया न परात्मनः
किमपि रूपमिहाभ्यधिकं मतम् ॥ ३२२ ॥

समुपसंहृतेति । स्पष्टोऽक्षरार्थः ॥ ३२२ ॥

ननु निषेधकपदैरवशिष्टनिषेधोपलक्षणावद्विधिपदैरप्यवशि-

ष्टब्रह्मरूपमुपलक्ष्यतामित्याशङ्क्याविशिष्टरूपस्यैवाभावान्नैवमित्याह—

न खलु संश्रुतसंहृतशब्दयो-
रविषयः परमात्मन इष्यते ॥
किमपि रूपममुत्र हि नास्ति नः
किमपि मानमतो न तदस्ति नः ॥ ३२३ ॥

न खल्विति। तस्य निष्पमाणत्वे तत्साधकमानाभावे हेतुमाह—अमुत्रेति। तस्मिन् रूप इत्यर्थः। किमपि शास्त्रं प्रत्यक्षादि वेत्यर्थः। रूपान्तराभावं निगमयति—अत इति। अश्रुतमतिषेध्यप्राप्तिमात्रेण तत्प्रतिषेधसंभवात्तदुपलक्षकत्वं प्रतिषेधकपदानां युक्तम्, पारमार्थिकब्रह्मरूपस्य तु वेदैकवेद्यतया मानान्तरात्तदसिद्धेस्तत्परवेदवाक्यानां च श्रुतस्वरूपबोधनेनैव निराकाङ्क्षत्वान्न तदुपलक्ष्यं रूपान्तरमस्तीति भावः ॥ ३२३ ॥

ननु कर्मकाण्डे प्रधानपरतन्त्रत्वादितिकर्त्तव्यतानां नानाशाखागतानां तत्प्रयुक्तिबलादुपसंहारो युक्तः, ब्रह्मणि तु विधिनिषेधपदानामनितिकर्त्तव्यत्वात्कथं तदुपसंसारसिद्धिरित्याशङ्क्य तथापि तेषां परमात्मप्रतिपत्तिप्रयोजनकत्वेन प्रत्येतव्ये तस्मिन् प्रधाने गुणभूतत्वाद् च गुणानां च गुणिपरतन्त्रत्वात् स गुणी प्रधानभूतो यत्रयत्र श्रुतो भवति तत्रतत्र गुणभूतपदजातं पुष्कलतत्प्रतिपत्तिप्रयुक्तोपसंहार्यं भवतीत्याशयेनाह—

गुणतया हि पदानि परात्मनो
विधिनिषेधवचः स्ववतस्थिरे ॥
गुणगणो गुणितन्त्रतया गुणी
भवति यत्र हि तत्र भवत्यसौ ॥ ३२४॥

गुणतयेति। यत्र गुणी भवति तत्रासौ गुणगणो गुणितन्त्रतया भवतीति सम्बन्धः ॥ ३२४ ॥

उपसंहारप्रकारमुपसंहरन् पुनः शिष्यं प्रति प्रश्नायानु-

मतिं ददाति—

विधिनिषेधवचः परिमाणत-
स्तव मया कथितं नयवर्त्मना ॥
यदपरं तव वस्तु बुभुत्सितं
तदिह नः पुरतः प्रकटीकुरु ॥ ३२५ ॥

विधिनिषेधेति । वचः कथितमिति सम्बन्धः । प्रकटीकुरु प्रश्नेनेति शेषः ॥ ३२५ ॥

सम्यग्ज्ञानसमीपदूरभवयोर्हेत्वोर्विवेकज्ञतेत्युक्तचतुर्थपादार्थप्रपञ्चयितुं तद्विषयप्रश्नमवतारयति—

अन्तरङ्गबहिरङ्गसाधने
भेदतः कथय तद्बुभुत्सितम् ॥
ज्ञानजन्मन इदं जिघृक्षितं
हेयमेतदिति चोपपत्तिभिः ॥ ३२६ ॥

अन्तरङ्गेति । ज्ञानजन्मन इत्येतत्प्रथमं च योज्यम् । तदन्तरङ्गादिसाधनम् । तद्बुभुत्सा निष्प्रयोजनेति शङ्का निवारयति—ज्ञानजन्मन इति । जिघृक्षितं ग्रहीतुमिष्टमनुष्ठेयमिति यावत् । इति यन्मयापाततोऽवगतं तच्चोपपत्तिभिः कथयेत्यर्थः ॥ ३२६ ॥

किं त्वया कार्यत्वेन साधनमवगतमिति वीक्षायां तदेव विशदयति—

अन्तरङ्गमपवर्गकाङ्क्षिभिः
कार्यमेव यतिभिः प्रयत्नतः ॥
त्याज्यमेव बहिरङ्गसाधनं
यत्नतः पत्तनभीरुभिर्भवेत् ॥ ३२७ ॥

अन्तरङ्गमिति । अपवर्गो ज्ञानम् ॥ ३२७ ॥

पृष्टं साधनजातं श्रुतिन्यायानुसारेणैवोच्यते त्वयापि श्रद्धया

श्रोतव्यमितिगुरुराह—

उच्यते शृणु विविच्य साधनं
ज्ञानजन्मनि यदूचिवान् गुरुः ॥
अन्तरङ्गबहिरङ्गभेदतः
शब्दशक्तिमनुसृत्य वैदिकीम् ॥ ३२८ ॥

उच्यते इति । गुरुः सूत्रकारः ॥ ३२८ ॥

वैदिकीं शब्दशक्तिमनुसृत्यैतद्विवृण्वन् लक्षणभेदेन पृष्टं साधनभेदं दर्शयति—

यच्छ्रुतं विविदिषोदयाय तत्
सर्वमेव बहिरङ्गसाधनम् ॥
अन्तरङ्गमवगच्छ तत् पुन
र्यत् परावगतिसाधनं श्रुतम् ॥ ३२९ ॥

यच्छ्रुतमिति । यत्परमात्मनो विविदिषासाधनत्वेन विहितं तत्तत्त्वज्ञानं प्रति बहिरङ्गसाधनम्, तच्च तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति श्रुतिविहितं नित्यं वेदानुवचनादि, तस्येह जन्मन्यतीतजन्मनि वा विविदिषार्थतया प्राग्भावित्वेन ज्ञानं प्रति विप्रकर्षाद्बहिरङ्गत्वम्, यत्तु परमात्मसाक्षात्कारोद्देशेनैव विहितं तदन्तरङ्गसाधनम्, तच्च तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदिति दर्शनोद्देशेन विहितं शमादि श्रोतव्य इत्यादिश्रुतिविहितं श्रवणादि च, तस्य विविदिषानन्तरमेव ज्ञानोदयपर्यन्तमनुष्ठेयत्वेन प्रत्यासन्नत्वादन्तरङ्गत्वम् । तदुभयं चोक्तश्रुतिप्रमाणकमित्यर्थः ॥ ३२९ ॥

विविदिषावाक्येन सर्वेषामपि कर्मणां संयोगपृथक्त्वेन विविदिषासाधनत्वं विधीयते इति मते तयोर्लक्षणान्तरं वदन् बहिर-

ङ्त्वादि स्पष्टयति—

यद्धि कारतयाऽवगम्यते
दूरतस्तदिह साधनं धियः ॥
अन्तरङ्गमखिलं तु तत् पुन-
र्व्यञ्जकं भवति यत् परात्मनः ॥ ३३० ॥

यद्धीति । अदृष्टद्वारेणैव फलोत्पादकं कारकम्, जन्मान्तरीयमपि यज्ञादि तद्द्वारा विविदिषामुत्पादयद्धीहेतुरितिदूरस्थत्वात्तद्बहिरङ्गम् । दृष्टद्वारेण तु तत्त्वधीहेतुरभिव्यञ्जकम्, शमादिकं श्रवणादिकं च दृष्टप्रतिबन्धनिवृत्तिद्वारा तद्धेतुरिति तत्परात्मनो व्यञ्जकं तद्धियो निकटभावित्वादन्तरङ्गमित्यर्थः ॥३३०॥

एवमन्तरङ्गबहिरङ्गविवेकमुक्त्वा यदुक्तं यतिभिरन्तरङ्गमवश्यं कार्यं बहिरङ्गन्तु त्याज्यमिति तद्विपक्षबाधमुखेनोपपादयति ।

कारकस्य करणेन तत्क्षणाद्
भिक्षुरेष पतितो भवेद् यथा ॥
व्यञ्जकस्य परिवर्जनात्तथा
सद्य एव पतितो भवेदसौ ॥ ३३१ ॥

कारकस्येति । यज्ञादिरूपस्य तस्याग्निपत्नीवित्यादिसापेक्षत्वात् संन्यासिनश्च तद्भूतस्य तु नातद्भाव इत्यादिनोक्तन्यायेन सत्संग्रहे पातित्यं यथाऽवश्यंभावि, एवं व्यञ्जकश्रवणाद्यकरणेऽपि तस्य तत्तुल्यम्, अरुन्मुखान् यतीन् त्वंपदार्थविवेकायेत्यादिवचनप्रामाण्यादित्यर्थः ॥ ३३१ ॥

ननु विविदिषन्तीत्यत्रेष्यमाणतया वेदनमेव प्रधानं प्रतीयते, ततश्च यज्ञादिकर्मणां तत्रैव विनियोगस्तस्मिन्वाक्ये विधीयते न विविदिषायामप्रधानभूतायां तथा सति तेषु प्रथमोक्तबहिरङ्गलक्षणाभावाच्छमादिवदन्तरङ्गलक्षणभावाच्चोक्तान्तरङ्गादिविभागानु-

पपत्तिरिति तत्राह—

प्रत्ययार्थविषयं हि कर्मणा-
मुच्यते विविदिषेयुरित्यतः ॥
न प्रकृत्यभिहितार्थवेदने
वेदवाचि विनियोगशासनम् ॥ ३३२ ॥

प्रत्ययार्थेति । वेदवाचि विविदिषन्ति यज्ञेनेत्यादिवेदवाक्ये कर्मणा यागादीनां प्रत्ययार्थविषयं सन्प्रत्ययार्थेच्छाविषयं विनियोगशासनं विविदिषेयुरित्यत उच्यते कथ्यते न प्रकृत्यभिहितार्थवेदने तदुच्यत इति सम्बन्धः । विविदिषन्तीत्यस्यापूर्वार्थत्वाद्धिधौ परिणतं रूपं विविदिषेयुरित्युक्तम् । हिशब्दो वक्ष्यमाणन्यायसूचनार्थः ॥ ३३२ ॥

तत्सूचितं न्यायमेव दर्शयति—

न प्रधानमहाय वेदने-
नान्वयं व्रजति कर्म साधनम् ॥
सङ्गतिर्भवति वेदनेच्छया
वेदनेन न तु कर्मणां क्वचित् ॥ ३३३ ॥

न प्रधानमिति । यद्यपि वेदनस्येष्यमाणतयाऽर्थतः प्राधान्यमस्ति, तथापि विविदिषन्ति वेदितुमिच्छन्तीति शब्दतः प्रकृत्यर्थवेदनस्य विशेषणतया प्रत्ययार्थेच्छायाश्च विशेष्यतया तयोर्गुणप्रधानभावप्रतीतेस्तत्र प्रधानतयाऽवगतेच्छां विहाय गुणतयाऽवगतवेदनेन यज्ञादि कर्म साधनतयाऽन्वयं न प्राप्नोति, किं तु तस्य प्रधानभूतवेदनेच्छयैव तथा संगतिर्भवितुं युक्ता, यथा राजपुरुषमानयेत्युक्ते शब्दतः प्रधानतयावगतपुरुषेणैवान्वेत्यानयनक्रिया न त्वर्थतः प्रधानेनापि राज्ञा तद्वत्प्रकृतेऽपि यज्ञादिकर्मणां शब्दतः प्रधानभूतेच्छयैवान्वयो न गुणभूतवेदनेनेत्यर्थः ॥३३३॥

ननु शाब्दं प्राधान्यं वेदनेऽपि तुल्यमिति नेत्याह—

न प्रधानमिह वेदनं भवेत्
प्रत्ययार्थविषयां प्रधानताम् ॥
उत्ससर्ज भगवान्निरङ्कुशं
येन पाणिनिरलङ्घ्यशासनः ॥ ३३४ ॥

न प्रधानमिहेति । तत्र गमकमाह । प्रत्ययार्थविषयामिति । तन्निष्ठामित्यर्थः । उत्ससर्ज उत्सर्गतः सर्वप्रत्ययार्थेषु ज्ञापितवान् । येन पाणिनिः प्रत्ययार्थप्रधानतामुत्ससर्ज तेन वेदनं न प्रधानमिति सम्बन्धः । स हि सर्वत्र प्रकृतेरुपरि प्रत्ययमर्थविशेषे विदधानस्तदर्थस्य प्रकृत्यर्थापेक्षया प्राधान्यं सूचयति । उक्तं च कात्यायनेन, प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः प्राधान्येनेति । ततो वेदनस्य न शाब्दं प्राधान्यमित्यर्थः ॥ ३३४ ॥

तथापि तस्योत्सर्गस्य सनूप्रत्ययार्थेऽपवादादन्यथात्वमित्याशङ्क्य निरङ्कुशमित्यनेन सूचितमपवादाभावं विशदयति—

प्रत्यये सनि न चापवादकं
किं चिदित्युदितवानसौ मुनिः ॥
येन तत्र गुणभावमुद्वहेत्
प्रत्ययाभिहितमर्थवस्तु नः ॥ ३३५ ॥

प्रत्यये सनीति । तदर्थ इत्यर्थः । तत्र विविदिषन्तीतिपदे । प्रत्ययाभिहितं सनूप्रत्ययोक्तमर्थवास्त्वच्छारूपं वस्तु नाऽस्मान् प्रति मुनिरपवादकं न चोदितवानिति सम्बन्धः ॥ ३३५ ॥

ननु धातोः कर्मणः समानकर्तृकादिच्छायां वेति सूत्रे धात्वर्थस्य सनर्थंप्रति कर्मत्वेन प्राधान्योक्तेरपवादानुक्तिसिद्धेत्याशङ्क्याह—

धातोः कर्मण इत्युवाच भगवान् यत् पाणिनिस्तत् पुनर्धात्वर्थस्य न वेदयत्यभिमतं प्राधान्यमायुष्मतः ॥

किन्त्वार्थं न तु शब्दगम्यमवदत्तेनापि तद् योक्ष्यते
नोत्सर्गस्य विना निमित्तमपरं संकोचनं युज्यते ॥३३६॥

धातोः कर्मण इति । आयुष्मतस्तत्राभिमतामितरान्वयप्रयोजकत्वेनेष्टं धात्वर्थस्य वेदनस्य प्राधान्यं न वेदयतीति सम्बन्धः । ननु कर्मत्वविशेषणात्तत्प्राधान्यं प्रतीयते प्रधानेन चेतरान्वयो युक्त इत्याशङ्क्य शब्दप्राधान्यस्यान्वयप्रयोजकत्वादत्र तदभावान्नैवमित्याशयेनाह । किं त्विति । आर्थमिष्यमाणत्वसामर्थ्यलभ्यम् । ननु प्रतीयते चेत्तत्प्राधान्यं शाब्दमेव किं न स्यादित्याशङ्क्य तत्प्रतीतेरन्यथोपपत्तौ सत्यां विनापवादकं प्रत्ययार्थप्राधान्यविषयोत्सर्गस्य सङ्कोचायोगात्तस्य शब्दत्वं न कल्पनीयमित्यभिप्रेत्याह—तेनापीति । आर्थिकप्राधान्येनापीत्यर्थः । तद् कर्मत्वप्रयुक्तप्राधान्यम्, योक्ष्यते युक्तं भविष्यतीत्यर्थः ॥३३६॥

ननु सूत्रगतकर्मपदेन धात्वर्थस्य शाब्दत्वरूपमेव प्राधान्यं प्रतीयते कर्मत्वस्येप्सततमत्वस्य प्राधान्यार्थत्वादित्याशङ्क्य तस्य शाब्दत्वरूपविशेषसूचकस्यात्राभावान्नैवमित्याह—

धातोः कर्मण इत्युदीरणमिदं साधारणं दृश्यते
शाब्दार्थत्वविशेषसूचकतया न ह्यत्र सूत्रे पदम् ॥
धात्वर्थस्य तु कर्मतावचनमश्रोच्चारितं केवलं
तत्त्वार्थेऽप्युपपद्यमानमधुना नोत्सर्गपीडाकरम् ॥३३७॥

धातोः कर्मण इत्युदीरणमिति । तस्यार्थत्वरूपविशेषसूचकाभावोक्तिर्दृष्टान्तार्था । सूचकपदाभावमेव विशदयति—धात्वर्थस्येति । तथापि तस्यार्थिकत्वाभ्युपगमः किंनिबन्धन इत्याशङ्क्य प्रत्ययार्थप्राधान्यविषयोत्सर्गपीडापरिहाराय तथाभ्युपगम इत्याह । तत्त्वेति ॥ ३३७ ॥

तर्हीच्छाप्राधान्यमपि न शाब्दं गमकाभावादित्याशङ्क्योत्स-

र्गतस्तत्सिद्धिमभिप्रेत्यात्रापि तद् गमकमस्तीत्याह —

इच्छायामिति सूत्रकारवचनं प्रधान्यपक्षे भवे-
दिच्छार्थस्य समञ्जसं न खलु तत् सन्प्रत्ययार्थे गुणे ॥
धात्वर्थे ननु सन् भवेदिति वदेदिच्छा गुणश्चेद् भवे-
दिच्छायामिति वक्ति तेन वदति प्राधान्यमिच्छागतम् ॥

इच्छायामितीति । इच्छार्थस्येच्छारूपप्रत्ययार्थस्य प्राधान्यपक्षे इच्छायामिति सूत्रकारवचनं भवेत्, सन्प्रत्ययार्थे तस्मिन् गुणे सति तद्वचनं न खलु समञ्जसमिति सम्बन्धः । इच्छायामिति सप्तम्या तस्याः सन्प्रत्ययविषयत्वनिर्देशात्तस्या एव प्राधान्येन तदभिधीयत इति गम्यत इत्यर्थः । यदीच्छागुणकधात्वर्थ एव प्राधान्येन विवक्षितः स्यात्तदा सूत्रमन्यथा स्यादित्याह–धात्वर्थ इति । इष्टापत्तिशङ्कां परिहरन्निगमयति । इच्छायामिति ॥३३८॥

इच्छाप्राधान्यस्य श्रौतत्वसाधनफलमाह—

तस्मात् कर्म समस्तमेव तु भवेदिच्छाजनेः साधनं
शास्त्रेणोक्तमतः समस्तमपि तद् यत्नेन हेयं यतेः ॥
द्रष्टव्यत्वमनूद्य साधनतया यत्तत् प्रतीचः श्रुतं
वेदान्तश्रवणादिकं भवति तत्कर्त्तव्यमावश्यकम् ॥३३९॥

तस्मादिति । विविदिषन्तीत्यत्र प्रत्ययार्थेच्छायाः प्राधान्येन श्रवणात्प्रधानपदार्थशेषतया चेतरपदार्थानामन्वयाद् वेदानुवचनादिकं समस्तं शास्त्रीयं कर्म त्रिविदिषामात्रसाधनं न त्विष्यमाणवेदनसाधनमित्येतद्वचनबलात् सिद्धमित्यर्थः । एवं च विवेकवैराग्यादिसंपन्नस्योत्पन्नविविदिषाकस्य यतेः प्रयोजनाभावात्प्रत्यवायहेतुत्वाच्च तद्बहिरङ्गसाधनं सर्वात्मना हेयमिति फलितमित्याह । अत इति । किं तर्हि तेन कर्त्तव्यमिति वीक्षया पूर्वोक्तमन्तरङ्गसाधनमेवावश्यकत्वात्तदभिलषितसाधनत्वाच्चानुष्ठेयमित्याह–द्रष्टव्यमिति । प्रतीच इत्यस्यानेनान्वयः तं । श्रोतश्रु-

व्यादिवाक्याच्छमादिवाक्याच्चेति शेषः ॥ ३३९ ॥

ननु वेदान्तविज्ञानसुनिश्चितार्था इत्यादिवचनादात्मतत्त्वनिश्चये वेदान्तानां हतुत्वावगमात्तेषां चाकर्त्तव्यत्वात्स्वतः प्रमाणत्वाच्चेतिकर्त्तव्यानपेक्षत्वाद्यज्ञादीनां शमादिसहितश्रवणादीनां च तद्धेतुकधीसाधनत्वमेव नास्ति तत्र कुतोऽन्तरङ्गत्वादिविभागसिद्धिरित्याशङ्क्य सत्यं वेदान्तवाक्यमेव निरपेक्षं तत्कारणं तथाऽपि प्रतिबन्धनिरासितया एतेषामपि तत्रोपयोगात्साधनत्वादिव्यपदेश इत्याह—

वेदान्तवाक्यमिह कारणमात्मबोधे
हेत्वन्तराणि परिपन्थिनिबर्हणानि ॥
यज्ञादिकानि दुरितं क्षपयन्ति बुद्धे-
स्तत्त्वंपदार्थविषयं तम उत्तराणि ॥ ३४० ॥

वेदान्तेति । तथापि कथं तेष्वन्तरङ्गत्वादिविभाग इत्याशङ्क्य तत्र विशेषमाह । यज्ञादिकानीति । बुद्धेर्दुरितमिति सम्बन्धः । कर्मणां विविदिषार्थत्वश्रवणात्तस्याश्च विषयसौन्दर्यलभ्यायाः साक्षात्तज्ज्ञन्यत्वयोगात्तत्प्रतिबन्धकदुरितध्वंसविवेकवैराग्यद्वारा तेषां विविदिषायामुपयोगाद्बहिरङ्गत्वम्, विशिष्टाधिकारिकर्तृकश्रवणादेस्तु विविदिषान्तरभाविनस्तत्त्वंपदार्थाज्ञाननिवृत्तिद्वारेष्यमाणाज्ञान एवोपयोगादन्तरङ्गत्वमित्यर्थः ॥ ३४० ॥

नन्वज्ञानमेकमेव तच्च शुद्धप्रत्यगभिन्नाद्वितीयब्रह्मगोचरं वाक्यार्थबोधादेव च तन्निवृत्तिरिति प्रागुक्तम्, ततश्च तत्त्वंपदार्थाज्ञाननिवृत्तिः श्रवणादिसाध्येत्येतदयुक्तमित्याशङ्क्य नानाऽविद्याकल्पकपन्दप्रज्ञजनदृष्ट्यनुरोधेनेदमुक्तम्, वस्तुतस्त्वविद्या पूर्णब्रह्मगोचरैकैव तन्निवर्त्तिका विद्याऽप्येकैवेति प्रकृष्टप्रज्ञानां संमतमित्याह—

तत्त्वंपदार्थविषयं तम इत्यपीद-
मवागवस्थजनदृष्टिमपेक्ष्य गीतम् ॥
अज्ञानमुत्तमदृशां पुनरेकमेव
संसारमूलमपवर्गफला च विद्या ॥ ३४१ ॥

तत्त्वंपदार्थेति । विद्या चैकैवेति योजनीयम् ॥ ३४१ ॥

किं तर्ह्यस्मिन्मते श्रवणादिकृत्यमित्याशङ्क्याह—

अज्ञानसंशयविपर्ययरूपकाणि
ब्रह्मात्मबुद्धिजननप्रतिबन्धकानि ॥
तत्त्वंपदार्थविषयाणि निवर्त्तयन्ति
ह्यावृत्तिमान्ति मननश्रवणादिकानि ॥ ३४२ ॥

अज्ञानसंशयेति । विशेषदर्शनाभावोऽज्ञानशब्दार्थः । श्रवणं वेदान्ततात्पर्यगोचराज्ञानसंशयादिप्रतिबन्धं निवर्त्तयति, मननं तु मतान्तरादिविरोधधीप्रयुक्तप्रमेयासंभावनादिरूपं प्रतिबन्धं निवर्त्तयति, निदिध्यासनं तु चित्तचाञ्चल्यादिरूपं प्रतिबन्धं निवर्त्तयतीति विशेषो द्रष्टव्यः । दृष्टफलत्वादेव तेषामवहननादिवद्यावत्फलोदयमावृत्तिरपि कार्येत्यभिप्रेत्यावृत्तिमन्तीत्युक्तम्, ॥३४२॥

श्रवणादेरुक्तप्रतिबन्धनिवर्त्तकत्वयोग्यतामर्थाज्ज्ञापयंस्तत्स्वरूपमाह—सार्द्धेन—

शब्दशक्तिविषयं निरूपणं
युक्तितः श्रवणमुच्यते बुधैः ॥
वस्तुवृत्तविषयं निरूपणं
युक्तितो मननमित्युदीर्यते ॥ ३४३ ॥

शब्दशक्तीत्यादिना । शक्तिशब्देनात्राधिकारिजिज्ञासितवस्तुबोधनसामर्थ्यरूपतात्पर्यं वाक्यगतमभिधीयते, पदगतशक्तीनां लोकत एवावगम्याद्युक्तितो निरूपणानपेक्षत्वात्तत्सार्थक्यायापौरुषेये वेदे पुरुषाभिप्रायरूपतात्पर्यनिरासाय च तत्र शक्तिशब्दस्तादृशतात्पर्यविषयः प्रयुक्तः, तद्विषयनिरूपणं तन्निर्णयानुकूलो मानसव्यापार उपक्रमोपसंहारादिविविधयस्तर्कसहितः श्रवणमित्युच्यत इत्यर्थः । तथा च तस्य तात्पर्यनिर्णयद्वारा तदज्ञानसंशयादिनिवर्तकत्वसंभव इति भावः । तत्त्वंपदलक्ष्यं वस्तु, तदैक्य-

याथात्म्यं वस्तुतत्त्वम्, युक्तितस्तद्विषयं निरूपणं भेदादिप्रपञ्चमिथ्याविषयदृश्यत्वाद्यनुपपत्तिरूपयुक्तिभिस्तदद्वितीयत्वसंभावनाधीहेतुभूतमानसव्यापारो मननम्, तच्च तदसंभावनादिनिवर्त्तकमित्यर्थः ॥ ३४३ ॥

निदिध्यासनस्वरूपमाह—

चेतसस्तु चितिमात्रशेषता
ध्यानमित्यभिवदन्ति वैदिकाः ॥
अन्तरङ्गमिदमित्थमीरितं
तत् कुरुष्व परमात्मबुद्धये ॥ ३४४ ॥

चेतस इति । समस्तजडविषयाकारत्वत्यागेन चेतसश्चिदेकरसात्माकारतयाऽवस्थानं ध्यानं तदेव निदिध्यासनम्, तेन च चित्तस्य तत्त्वसाक्षात्कारायोग्यतारूपश्चित्तचाञ्चल्यरूपप्रयुक्तप्रतिबन्धो निवर्त्तते, ततश्च तेषां पूर्वोक्तप्रतिबन्धनिवर्तकत्वं युक्तमिति भावः । एवं श्रवणादीनां फलवत्त्वं प्रसाध्य तन्निरूपणमुपसंहरन् फलितमाह—अन्तरङ्गमिति । प्रतिबन्धनिवृत्तिं विना परमात्मतत्त्वसाक्षात्कारायोगात्तन्निवर्तकश्रवणादि तदर्थिनावश्यमनुष्ठेयमित्यर्थः ॥ ३४४ ॥

पूर्वं श्रवणादिवदनुष्ठेयं निदिध्यासनपदाभिधेयमुक्तमिदानीं वार्तिककारैरुक्तमर्थान्तरमाह—

श्रवणमननबुद्ध्योर्जातयोर्यत् फलं त-
न्निपुणमतिभिरुच्चैरुच्यते दर्शनाय ॥
अनुभवनविहीनायैवमेवेति बुद्धिः
श्रुतमननसमाप्तौ तन्निदिध्यासनं हि ॥ ३४५ ॥

श्रवणेति । आदरेण निरन्तरं श्रवणमननात्मकबुद्ध्योर्दर्शनाय जातयोस्तदुद्देशेनानुष्ठितयोर्यदान्तरालिकं फलं तन्निपुणमतिभिर्वार्तिककारैरुच्चैस्तात्पर्येण निदिध्यासनमुच्यते इति सम्बन्धः । तदेवान्तरालिकं फलं विशदयति—अनुभवनेति । उक्तरीत्या

श्रुतमननसमाप्तौ तदुत्कर्षे सत्यनुभवनविहीना ब्रह्मात्मत्वापरोक्ष्य-रहिताहं ब्रह्मैवेत्येवमाकारनिर्विचिकित्सा या बुद्धिः सा तत्फलं तन्निदिध्यासनमित्यर्थः । हिशब्दस्तदुक्तयुक्तिसूचनार्थः । सा चेयम्, आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्युक्तान्येव दर्शनादीन्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञाननेनेत्यत्रानूद्यन्ते तत्र च निदिध्यासनस्य विज्ञानपदेनानुवादान्न तदूध्यानं किन्तूक्तात्मनिर्णयज्ञानमेव, विज्ञानपदस्य निर्णयज्ञाने रूढत्वान्निदिध्यासनपदस्यान्यत्र ध्याने प्रयोगादर्शनेन तत्र तस्य रूढिकल्पकाभावात्, प्रकृतवाक्ये तु विज्ञानपदेनानुवादबलात्प्रसिद्धविज्ञानमेव निदिध्यासनमिति निश्चीयत इति॥३४५॥

तथापि ओमित्येवं ध्यायथ आत्मानं तस्याभिध्यानाद्योजनादित्यादिश्रुत्या ध्यानमप्यात्मसाक्षात्कारायानुष्ठेयमित्यभिप्रेत्य वेदान्तवाक्यमिह कारणमात्मबोध इत्यादिनोक्तमुपसंहरति—

पूर्वाण्यदृष्टपरिपन्थिनिबर्हणानि
दृष्टं हरन्ति च विरोधिनमुत्तराणि ॥
वाक्यं निरस्तसकलप्रतिबन्धकं स-
दात्मानमद्वयमखण्डमबुद्धमाह ॥ ३४६ ॥

पूर्वाणीति ।यज्ञादीनीत्यर्थः । विविदिषाप्रतिबन्धकं दुरितमदृष्टम् । प्रमाणप्रमेयासम्भावनादिकं दृष्टम् । उत्तराणि श्रवणादीनि । वाक्यं तत्त्वमादिमहावाक्यम् ॥ ३४६ ॥

ननु यज्ञाद्यनुष्ठितवतामपि केषां चिद्विविदिषा न जायते ततश्च व्यभिचारात्सा न तत्साध्येत्याशङ्क्याह—

यज्ञादिचापितसमस्तकल्मषाणां
पुत्रादित्रयगतसङ्गवर्जितानाम् ॥
संशुद्धे पदयुगलार्थतत्त्वमार्गे
प्रायेणोद्भवति हि जन्मनीह विद्या ॥ ३४७ ॥

यज्ञादीति। तेषां सर्वात्मना प्रतिबन्धककल्मषनिवृत्त्यभावात्तदनुदयेऽपि समस्तप्रतिबन्धककल्मषक्षये तदुदयोभवेदेव, कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्त्तत इत्यादिवचनादित्यर्थः। सत्यामपि विविदिषायां पुत्रवित्तलोकैषणाविक्षिप्तचित्तानां परिपक्वविद्योदयायोगात्तदर्थमेषणात्रयसंत्यागोऽपि कार्य इत्याशयेनाह। पुत्रादीति। तावतापि युक्तविद्योदयायोगान्मानमेयविचारेण तत्त्वंपदार्थावपि संशोधनीयावित्याह—सशुद्ध इति। तत्त्वज्ञानोपायत्वं मार्गशब्दार्थः। वर्णितपुष्कलसाधनसंपन्नस्य शोधिततत्त्वंपदार्थस्याधिकारिणः किमस्मिन्नेव जन्मनि मुक्तिहेतुर्विद्योदेति किं वा जन्मान्तर इति शङ्कायामनियम इत्याह—प्रायेणेति। ऐहिकमप्यप्रस्तुतप्रतिबन्ध इति सूत्रोक्तन्यायसूचको हिशब्दः॥ ३४७॥

न्यायसिद्धार्थमेव विशदयति—

अत्रैव जन्मनि भवेदपवर्गदायि
वाक्यप्रसूततमनुभूतिफलावसानम्॥
ज्ञानं निवारकनिमित्तवशादमुष्मिन्
जन्मन्यपीति वचनादवगम्यते हि॥ ३४८॥

अत्रैव जन्मनीति। अनुभूतिः साक्षात्कारस्तत्फलमविद्यानिवृत्तिस्तदवसानं तत्पर्यवसायि साक्षात्काररूपमिति यावत्, निवारकमिह जन्मनि ज्ञानजन्मप्रतिबन्धकं निमित्तं जन्मान्तरस्य तद्वशात्तत्प्राबल्यादित्यर्थः। जन्मान्तरकृतश्रवणादिना जन्मान्तरे ज्ञानजन्म भवतीत्यत्र मीनमाह—वचनादिति। स्मृतिवचनाच्छ्रौतलिङ्गाच्चेति हिशब्दार्थः॥ ३४८॥

तत्र श्रौतं लिङ्गं दर्शयति—

ज्ञानोत्पत्तिं वामदेवस्य गर्भे
श्रुत्वा विद्वः साधनं प्राच्यमस्य॥

योगभ्रष्टस्मृत्यवष्टम्भतोऽपि
ज्ञातव्यं तत् साधनं प्राच्यमस्य ॥ ३४९ ॥

ज्ञानोत्पत्तिमिति । गर्भ एव शयानो वामदेव एवमुवाचेत्यादिना वामदेवस्य गर्भे एव ज्ञानोत्पत्तिः श्रूयते, न च तस्य तदा श्रवणादि सम्भवति, ततो जन्मान्तरीयाच्छ्रवणादेस्तस्य गर्भे ज्ञानोदय इति गम्यते, न च तस्य पूर्वजन्मन्येव सर्वात्मकब्रह्मभावानुभवो जातस्तत्स्मरणादेव पुनर्गर्भेऽपि तस्य सर्वात्मभावोक्तिरिति वाच्यम्, तत्त्वसाक्षात्कारे जाते पुनर्गर्भवासायोगात्, न च तस्याधिकारित्वे किं चिद्बाधकमस्ति, तस्माद्वामदेववदन्यस्यापि संन्यासिनः पुष्कलसाधनानुष्ठानवतो यदि जन्मान्तरप्रापकं प्रबलं कर्मास्ति तदा नेह ज्ञानजन्म किं तु जन्मान्तरे भविष्यति, यस्य तु तादृशं कर्म नास्ति तस्यात्रैव ज्ञानजन्मेत्युत्सर्गत ऐहिकमेव ज्ञानं भवतीत्यर्थः । स्मृतिवचनं दर्शयति । योगभ्रष्टेति । अनुष्ठितसाधनस्यानुत्पन्नसाक्षात्कारस्यैव देहपाते सति तस्य अप्राप्य योगसंसिद्धिं कां गतिं कृष्णगच्छतीत्यर्जुनेन प्राप्तव्यगतिप्रश्ने कृते भगवता शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत इति तस्य पुनर्जन्मोक्त्वा तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकमिति विद्याप्राप्त्यभिधानात्कस्य चित् प्राचीनसाधनाज्जन्मान्तरेऽपि विद्योदयो भवेदित्यर्थः ॥ ३४९ ॥

ननु श्रवणादेर्दृष्टफलत्वात्कारीर्यादेरिवैहिकमेव तत्फलं युक्तं न त्वामुष्मिकमपीत्याशङ्क्य दृष्टफलत्वेऽप्यैहिकफलकत्वनियमो नेति सदृष्टान्तमाह—

चित्रादिवद् भवति साधनजातमस्य
ज्ञानप्रसूतिकरामित्यवगच्छ सर्वम् ॥
अभ्यग्रशुष्यदखिलौषधिकस्य पुंसो
वृष्टिप्रदोष्टिरधिकारवशादिहैव ॥ ३५० ॥

चित्रादिवदिति । चित्रया यजेत पशुकामः सांग्रहण्या यजेत ग्रामकाम इत्यादिना दृष्टपश्वादिसाधनत्वेन विहितचित्रा-यागस्य पश्वादिफलप्रापकत्वमसति प्रतिबन्धेऽस्मिन्नेव जन्मनि स्यात्, अत्र तस्यानुपलम्भे तु प्रतिबन्धकवशादिहाप्राप्तिर्जन्मा-न्तरे च प्राप्तिरिति यथा कल्प्यते साङ्गस्य कर्मणोऽनुष्ठितस्य फलावश्यम्भावनियमात्, तथा दृष्टफलस्यापि श्रवणादेरिह वामुत्र वा विद्याप्रसूतिकरत्वं युक्तमित्यर्थः । तर्हि कारीर्यादिफलभूतं वृ-ष्ट्यादिकमप्येवमेव स्यात्तस्यापीहानुपलम्भे सत्यामुष्मिकत्वकल्प-नादिति नेत्याह । अभ्यग्रेति । सन्निहितो वर्त्तमान इष्ट्यारम्भस-मयोऽभ्यग्रशब्दार्थः । पुंसो या इष्टिः साऽधिकारवशादिहैव वृ-ष्टिप्रदेति सम्बन्धः । अधिक्रियते अनेनेत्यधिकारो विधिपुरुषसं-बन्धनिमित्तं शुष्यदोषधिसंजीवनकामना तत्काले शुष्यदोषधीनां जन्मान्तरभाविवृष्ट्या जीवनासंभवात्तदर्था वृष्टिरिहैव स्यात्, तद-नुपलम्भे त्वङ्गवैकल्यं कल्पनीयमिति भावः ॥३५०॥

नन्वन्तरङ्गसाधनानुष्ठानस्येह वाऽमुत्र वा विद्याहेतुत्वनिय-मवद्बहिरङ्गसाधनानुष्ठानस्यापि नियतं विविदिषाहेतुत्वं वक्तव्य-म्, न चैतदस्ति, अनादिभवपरम्परायां केषु चिज्जन्मसु सर्वेषां वेदानुवचनाद्यनुष्ठानवतामपि विविदिषाभावादित्याशङ्क्य सर्वेषां समस्तप्रतिबन्धकदुरितनिवर्त्तकानुष्ठानविशेषाभावाद्विविदिषाभाव इ-त्यभिप्रेत्य तन्निवर्तकं तदनुष्ठानविशेषमाह—

बहिरङ्गसाधनमशेषगुरोः
परमेश्वरस्य चरणाम्बुजयोः ॥
नियमात् समर्पितमशेषमघं
विनिहन्ति बुद्धिनिलयं सुमहत् ॥ ३५१ ॥

बहिरङ्गेति । मत्तः स्मृतिर्ज्ञानमपोहनं चेति भगवद्वचनात्स एव सर्वगुरुः, ततश्च तत्प्रीणनमवश्यं कार्यमित्यभिप्रेत्याशेषगुरो-

रित्युक्तम् । क्रियमाणमात्रविषयत्वं समर्पणस्य नियमादित्युक्तम् ॥ ३५१ ॥

तर्ह्यन्तरङ्गसाधनानामप्यनुष्ठेयत्वाविशेषादीश्वरार्पणं कार्यमिति नेत्याह—

न तथान्तरङ्गमुपलब्धिजनेरुपकारकं शमदमप्रभृति ॥
तदनुष्ठितं परमहंसजनैः
परमात्मतत्त्वमुपलम्भयति ॥ ३५२ ॥

न तथेति । तथा बहिरङ्गवदीश्वरे समर्पणेनेत्यर्थः । अत्र च स्वयमेव नियामकं वक्ष्यति । तथाप्यनधिकारिणानुष्ठितं श्रवणादि न तदुपकारकं किन्तु विवेकवैराग्यादिपूर्वकं त्यक्तैषणात्रयाधिकारिणानुष्ठितं सदात्मतत्त्वसाक्षात्कारकरमित्याह । तदनुष्ठितमिति ॥ ३५२ ॥

कर्मणामीश्वरेऽर्पितानां चित्तशुद्ध्यादिद्वारा ज्ञानहेतुत्वमित्यत्र मानमाह—

भगवाननादिनिधनः कृपया
हरिरेतदाह जगदेकहितः ॥
सकलं समर्प्य मयि युक्तमनाः
कुरु कर्म शुद्धिकरमित्यसकृत् ॥ ३५३ ॥

भगवानिति । यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् । शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि । यज्ञायाचरतः कर्म समग्रं प्रविलीयत इत्यादिभगवद्वचनमुक्तार्थे मानमित्यर्थः । तेषां वचनानामुक्तार्थे तात्पर्यवत्त्वज्ञापनायासकृदित्युक्तम् ॥ ३५३ ॥

अन्तरङ्गसाधनानामीश्वरार्पणं कार्यमित्यत्र मानाभावात्तेषां तेन विनापि तत्त्वधीहेतुत्वं युक्तमिति वैषम्यमाह—

न तथान्तरङ्गफलसंन्यसनं
क्व चिदूचिवानत इदं विदितम् ॥
अनपेक्ष्य तत्फलपरित्यजनं
परमात्मनिश्चयफलं तदिति ॥ ३५४ ॥

न तथान्तरङ्गफलेति । इदमुक्तं विवृणोति । अनपेक्ष्येति । तच्छब्दद्वयमन्तरङ्गसाधनविषयमितीदं विदितमिति सम्बन्धः ॥ ३५४ ॥

उक्तविभागे नियामिकां युक्तिमप्याह—

अपि च बन्धनहेतुतया श्रुतं
सकलमीक्षणकौशलशालिनः ॥
भवति शुद्धिकरं न च बन्धकृद्
भवति कर्म तथा घटते हि तत् ॥ ३५५ ॥

अपि चेति । सकलं कर्मेति सम्बन्धः । पाठान्तरे ब्रह्मार्पणबुद्ध्यानुष्ठानं समसमीक्षणकौशलम् । यद्यपि कर्मणां स्वभावतो बन्धफलत्वं, पुण्यः पुण्येन कर्मणा भवति पापः पापेन धर्मरज्ज्वा व्रजेदूर्ध्वं पापरज्ज्वा व्रजेदध इत्यादिवचनादवगतम्, तथापि तानीश्वरे समर्पितानि बन्धहेतुत्वं विहाय चित्तशुद्धिकराणि भवन्ति, उक्तं हि, एवं क्रियायोगपथा सर्वे संसृतिहेतवः । त एव ह्यात्मनाशाय कल्पन्ते कल्पिताः पर इति, भगवताप्युक्तम् । यज्ञार्थात्कर्मणोऽन्यत्र लोकोयं कर्मबन्धनः । तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचरेति, तस्मादुक्तविचाराधीनेक्षणकौशलवतस्तथैवानुष्ठितं कर्म न बन्धकृद्भवति किं तु चित्तशुद्धिकरमेव भवतीति तथैव तदनुष्ठेयामित्यर्थः । ननु स्वभावतो बन्धहेतोः कर्मणः कथमीश्वरे समर्पणेऽपि विपरीतकार्यहेतुत्वं शक्तिविपर्ययायोगादी-

त्याशङ्क्याह—तथा घटत इति । हिशब्दो दृष्टान्तप्रदर्शनार्थः । यथा दधिविषादेः केवलस्य स्वभावतो ज्वरमरणादिहेतोरपि मधुमन्त्रादियुक्तस्य पुष्टिजीवनादिहेतुत्वं तथैतदपि घटत इत्यर्थः३५५॥

एवं बहिरङ्गसाधनस्य यज्ञादेः स्वतो बन्धहेतोरपि विविदिषायां पर्यवसानायेश्वरार्पणबुद्ध्यानुष्ठानं कार्यमित्युक्तम्, इदानीमन्तरङ्गसाधनस्य तत्त्वधीजननाय न तदपेक्षेति युक्तितो दर्शयति—

यदिह साधनमात्मधियः श्रुतं
न च फलान्तरहेतुतया श्रुतम् ॥
शमदमादिकमत्र तु कौशलं
किमपि काङ्क्षितमस्ति न सिद्धये ॥ ३५६ ॥

यदिहेति । यच्छमदमादीति सम्बन्धः । इह शास्त्रे । न चेत्यस्मात्प्राक् तदित्यध्याहार्यम् । चोऽवधारणे । शुद्धिः फलान्तरपदार्थः । अत्र शमदमाद्यनुष्ठाने । शमादिमदनुष्ठितश्रवणादीनां स्वतः फलान्तरहेतुत्वं मानाभावात्तद्विघटनायेश्वरे समर्पणस्यानपेक्षितत्वात्तदनुष्ठानमात्रमेव तत्त्वज्ञानायोपकरोतीत्यर्थः॥३५६॥

संक्षेपविस्ताराभ्यामुक्तमध्यायार्थमुपसंहरति—

उक्तं साधनजातमत्र सकलं विद्यासमुत्पत्तये
यस्मिन् कर्मणि वैदिकेन विधिना नुन्नः परिव्राजकः॥
कर्तृत्वाद्युपमर्दनेन भवता विद्यानुकूलात्मना
कर्त्तव्यं तदशेषतस्तदनु ते विद्या विपाकं व्रजेत्॥३५७॥

उक्तमिति । तत्रान्तरङ्गसाधनेष्वधिकारिविशेषमाह । यस्मिन्निति । वैदिकेनेति । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीत्युक्तेन विविदिषोः संन्यासविधिनेत्यर्थः । एतदुपलक्षणं परित्यज्यात्मानमन्विच्छेदिति स्मार्तविधेरपि । नुन्नः प्रेरितः ततः स एव तत्राधिकारीति भावः । तत्कर्तृकश्रवणाद्यनुष्ठाने कर्मानुष्ठानापेक्षया प्रकारविशेषमाह—कर्तृत्वादीति । अकर्त्रादिरू-

पात्मानुभवस्योद्देश्यत्वात्तदर्थश्रवणादिकर्तृत्वाद्युपमर्देनानुष्ठितं तदनुकूलं भवति, कर्तृत्वाद्यभिनिवेशेन तदनुष्ठाने तु तेनैव विद्याप्रतिबन्धो भवेदिति युक्तिभिः कर्तृत्वादि बाधमानेनैव श्रवणाद्यनुष्ठेयं ततस्तत्त्वसाक्षात्कारप्रतिबन्धो न भवेदित्यर्थः ॥३५७॥

ननु श्रवणादावन्तरङ्गसाधने प्रव्राजकश्चेदधिकारी तर्ह्यन्येषां गृहस्थादीनां तत्र प्रवृत्तिर्न स्यात्तत्र तेषामधिकाराभावेन तदधीनफलभाक्त्वायोगादित्याशङ्क्य श्रवणादेर्दृष्टफलत्वाद् दृष्टफले च कर्मणि सति सामर्थ्ये प्रतिषेधाभावे च सत्यधिकारस्य निरपवादत्वाद् गृहस्थादीनामप्यावश्यककर्मकालावशिष्टसमयेषु श्रवणाद्यनुष्ठानसम्भवात् शूद्रो यज्ञेऽनवक्लृप्त इतिवत्प्रतिषेधाभावाच्च तेषामपि तत्राधिकारोऽस्त्येव परं तु तेषां न तस्मिन् जन्मनि परिपक्वज्ञानं ततो भवति किं तु जन्मान्तर इत्याह—

वानप्रस्थगृहस्थनैष्ठिकजनैरन्यैश्च वर्णाश्रमैः
कर्मव्यध्वनिषेवितं भवति वै जन्मान्तरे पाचकम्।
विद्यायाः श्रवणादिलक्षणमिदं नन्वेतदेषां क्वचित्
शास्त्रेण प्रतिषिद्धमीक्षितमिदं शूद्रस्य दृष्टं यथा॥३५८॥

वानप्रस्थेति। अन्यैः परिव्राजकातिरिक्तैर्वर्णाश्रमवर्णधर्ममात्रनिष्ठैराश्रमधर्मनिष्ठैस्त्रैवर्णिकैः कर्मव्यध्वेषु कर्मच्छिद्रेषु आवश्यककर्मरहितावकाशेषु निषेवितमनुष्ठितं श्रवणादिलक्षणमिदमन्तरङ्गसाधनं जन्मान्तरे विद्यायाः पाचकं भवतीति सम्बन्धः। उक्तार्थसाधकन्यायसूचको वैशब्दस्तमेवाह। न हीति। एतच्छ्रवणादि क्वचित् श्रुतौ स्मृतौ वा। इदं प्रतिषेधनम्। अपशूद्राधिकरणे हि शूद्रस्य वेदवाक्यश्रवणोच्चारणधारणप्रतिषेधनबलात्सर्ववैदिकविद्यास्वधिकारप्रतिषेधो निरूपितः, तद्वत्परिव्राजकातिरिक्तत्रैवर्णिकानामधीतवेदानां वेदान्तश्रवणादिप्रतिषेधो न दृष्ट इत्यर्थः ॥ ३५८ ॥

ननु गृहस्थादीनामपि श्रवणादावधिकारोऽस्ति चेत्कथं तज्जन्मान्तरे पाचकमित्युक्तम् । दृष्टफले तस्मिंस्तदयोगादितरथा परिव्राजकानुष्ठितश्रवणादेरपि तथात्वापातादित्याशङ्क्याह—

सर्वश्रुतिस्मृतिवचोभिरयं परिव्राड्
मुण्डः शुचिः परमहंस इति प्रसिद्धः ॥
ज्ञानाय साधनधनेषु नियुज्यमानः
प्रायेण बुद्धिपरिपाकमवाप्स्यतीह ॥ ३५९ ॥

सर्वश्रुतीति । अथ परिव्राड् विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवतीत्यादिषु मुण्डत्वादिविशेषणवान्परमहंस इति प्रसिद्धोऽयं परिव्राड् वक्ष्यमाणसर्वश्रुतिस्मृतिवचोभिर्ज्ञानाय तत्साधनभूतश्रवणादिरूपधनेषु वित्तेषु स्वाभीष्टहेतुषु नियुज्यमानस्तान्यनुतिष्ठन् प्रायेणेह जन्मनि बुद्धिपरिपाकमवाप्स्यतीति सम्बन्धः । तस्यापि सति प्रतिबन्धे जन्मान्तरे तत्प्राप्तिरिति सूचनाय प्रायेणेत्युक्तम् ।

इदमुक्तं भवति, बह्वीषु, श्रुतिस्मृतिषु परमहंससंन्यासस्य ज्ञानपरिपाकाङ्गत्वेन विधानात् परमहंसस्य कृत्यान्तराभावेनानन्यचित्ततया श्रवणादिपुष्कलसाधनस्य सम्यगनुष्ठाने शक्तत्वाच्च तस्य तस्मिन्नेव जन्मन्यसति प्रतिबन्धे दृष्टफलरूपस्वात्मसाक्षात्कारो भवत्येव, गृहस्थादीनां त्वधिकारे सत्यप्यावश्यककर्मानुष्ठानविक्षिप्तचित्ततया सम्यक्साधनकलापानुष्ठानायोगात्साक्षात्काराङ्गसंन्यासाभावाच्च न तस्मिन् जन्मनि तत्त्वज्ञानपरिपाको भवति किं तु जन्मान्तरे सति संन्यासेऽल्पयत्नादेव सम्भवतीति निश्चीयते, इतरथा संन्यासविधिवैयर्थ्यापातात् । न चैवं सति देवादीनां संन्यासाभावात्तत्त्वसाक्षात्कारो न स्यादिति वाच्यम् । कर्माधिकारिणामेव प्राप्तकर्मसंन्यासस्य दृष्टादृष्टद्वारा ज्ञानपरिपाकाङ्गत्वेन विधानाद् देवादीनां विनापि संन्यासं श्रवणादित-

स्तत्त्वसाक्षात्कारोपपत्तिरिति ॥ ३५९ ॥

ननु मनुष्याणामेव जनकादीनामाश्रमान्तरे वर्त्तमानानामेव मोक्षहेतुबोधोदय इतिहासपुराणादिषु प्रतिपाद्यते ततश्च कथं संन्यासस्य ज्ञानपरिपाकाङ्गत्वं कथं वा गृहस्थादीनां सत्यपि श्रवणादौ तस्मिन् जन्मनि तत्त्वसाक्षात्कारानुदयनियम इत्याशङ्क्याह—

जन्मान्तरेषु यदि साधनजातमासीत्
संन्यासपूर्वकमिदं श्रवणादिरूपम् ॥
विद्यामवाप्स्यति जनः सकलोऽपि यत्र
तत्राश्रमादिषु वसन्न निवारयामः ॥ ३६० ॥

जन्मान्तरेष्विति । योगभ्रष्टोक्तन्यायेन तेषां प्राचीनभवे संन्यासश्रवणाद्यनुष्ठानं कार्यबलात् संन्यासविधिबलाच्च कल्प्यते, जन्मान्तरीयसंन्यासस्याप्यदृष्टद्वारा संस्कारद्वारा च जन्मान्तरीयज्ञानपरिपाकाङ्गत्वोपपत्तेस्तादृशानामाश्रमान्तरस्थानामपि तत्त्वसाक्षात्कारं न निवारयामः, किं तु जन्मान्तरीयोक्तसाधनरहितानामेव तेषां तन्निवारयाम इत्यविरोध इत्यर्थः ॥ ३६० ॥

सर्वश्रुतिस्मृतिवचोभिरित्युक्तानि संन्यासस्य ज्ञानाङ्गत्वविषयाणि वचनानि दर्शयति—

वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद्यतयः शुद्धसत्त्वाः ॥
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्वे ॥ ३६१ ॥

वेदान्तविज्ञानेत्यादिना ॥ ३६१ ॥

नैतादृशं ब्राह्मणस्यास्ति वित्तं
यथैकता समता सत्यता च ॥

शीलं स्थितिर्दण्डनिधानमार्जवं
ततस्ततश्चोपरमः क्रियाभ्यः ॥ ३६२ ॥

नैतादृशमिति । वित्तं हितसाधनम्, एकता निस्सहायता, समता समदर्शिता, सख्यता सख्यभाषिता, शीलं शुभाचारः, स्थितिः मर्यादानतिक्रमः, दण्डनिधानं हिंसानिवृत्तिः, आर्जवमकौटिल्यम् । सर्वक्रियोपरमः फलम् ॥ ३६२ ॥

यतोयतो निवर्त्तते ततस्ततो विमुच्यते ॥
निवर्त्तनाद्धि सर्वतो वेत्ति दुःखमण्वपि ॥ ३६३ ॥

यत इति । निवृत्तिरेव सर्वदुःखोपरमोपाय इत्यर्थः ॥३६३॥

किं ते धनेन किमु बन्धुभिरेव वा ते
किं ते दारैर्ब्राह्मण यो मरिष्यसि ॥
आत्मानमन्विच्छ गुहां प्रविष्टं
पितामहास्ते क्व गताः पिता च ॥ ३६४ ॥

किं ते धनेनेत्यस्यार्थः । अनित्यधनपुत्रादिकं त्यक्त्वा नित्यात्मान्वेषणमेव हितमिति ॥ ३६४ ॥

अर्थस्य मूलं निकृतिः क्षमा च
कामस्य रूपं च वयो वपुश्च ॥
धर्मस्य यागादि दया दमश्च
मोक्षस्य सर्वोपरमः क्रियाभ्यः ॥ ३६५ ॥

इति सर्वज्ञात्ममुनिविरचितं संक्षेपशारीरके साधनलक्षणं नाम तृतीयोऽध्यायः ॥ ३ ॥

अर्थस्येति । निकृतिः शाठ्यम्, क्षमा सहिष्णुता ॥ ३६५ ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीकृतायां संक्षेपशारीरकव्याख्यानरूपसारसंग्रहदीपिकायां तृतीयोऽध्यायः ॥ ३ ॥

॥ श्रीः ॥

चतुर्थोऽध्यायः ।

साधने ज्ञानस्वरूपे विषयनिरूपणेन करणनिरूपणेन च त्रिभिरध्यायैर्निरूपितेऽनन्तरं तत्फलमोक्षरूपविचारः प्रस्तूयते, तत्र यद्यपि फलमनित्यं स्वर्गादि कर्मजमुपासनाजं च हेयमेव कैवल्ये तु धीफलं नित्यमात्मस्वरूपमानन्दघनविद्यातिरोधाननिवृत्तिमात्रेणोपादेयमेवेति प्रथम एव सूत्रे विनिर्णीतम्, तथापि ज्ञानफले मोक्षे वादिविप्रतिपत्तेः संदिहानस्य शिष्यस्य स्वरूपतः साधनतश्च तदवान्तरविशेषे निर्णयं गुरुमुखेन तत्तद्वादिविप्रतिपत्तिनिरासेन दृढयितुकामस्य प्रश्नमवतारयति—

उक्तसाधनसमुद्भवा सती
किं प्रयच्छति फलं मुमुक्षवे ॥
प्रत्यगात्ममतिरत्र मे मन-
स्यर्थिता समुपजायतेऽधुना ॥ १ ॥

उक्त साधनेति । उक्तं यत् साधनं निश्चितशक्तितात्पर्यकमपुनरुक्तमाकाङ्क्षापदपूरणेन सर्वाशङ्कोच्छेदि वेदान्तमहावाक्यं तदेव सम्यगसम्भावनादिनिवृत्त्योद्भवः कारणं यस्यास्तथा सती निर्दोषा अदुष्टकारणत्वेनाबाधितविषयत्वेन च परीक्षितप्रामाण्या प्रत्यगात्ममतिस्तत्त्वंपदार्थलक्ष्यांशोपस्थितिपूर्विका प्रत्यगखण्डब्रह्माकारनिर्विकल्पकसाक्षात्काररूपा मतिर्वेदान्तप्रमाणकरणिका मनोवृत्तिर्मुमुक्षवे आत्यन्तिकीं बन्धनिवृत्तिमिच्छतेऽनात्यन्तिकनिरवशेषफलनिस्पृहाय साधकाय किं फलं प्रयच्छति । किं जन्यमैश्वर्यात्मकम्, किं वा नित्यमविद्यानिवृत्त्युपलक्षितकूटस्थचैतन्यानन्दात्मकम् । आद्ये तस्य स्वर्गविशेषत्वेन बन्धत्वाद्बन्धनिवृत्तिकामफलत्वानुपपत्तिः, नास्त्यकृतः कृतेनेति श्रुतेश्च । अन्त्ये

त्वनिष्पाद्यत्वेन फलत्वानुपपत्तिः, बन्धमोक्षयोरविशेषापत्तिश्च । अविद्यानिवृत्त्या विशेष इति चेत्तस्या अपि जन्यत्वाजन्यत्वयोर्दोषसाम्यात् । तस्मादुभयथाप्यनुपपत्तिदर्शनादत्र ज्ञानफलमोक्षस्वरूपनिर्णये मे मम साक्षिणो मनसि स्वतादात्म्येनाध्यस्तेऽन्तःकरणेऽर्थितेच्छा सम्यक् फलाव्यभिचारेणोपजायते । अधुना समन्वयाविरोधसाधननिरूपणानन्तरं फलनिरूपणावसरे । कामः सङ्कल्प इत्यादिश्रुतेरिच्छा द्वेषः सुखं दुःखमित्यादिस्मृतेश्चार्थिता मनसीत्यनिदमंशात्साक्षिणो निकृष्टस्य कर्तृत्वादिसर्वानर्थबीजस्येदमंशस्याहङ्कारस्य निर्देशः । म इत्यहङ्कारान्निष्कृष्टस्य साक्षिणो भेदेन निर्देशः । अत्र सतीत्यनेनादुष्टकरणजत्वेन समन्वयः प्रथमाध्यायार्थः, अबाधितविषयत्वेनाविरोधो द्वितीयाध्यायार्थः, उक्तसाधनसमुद्भवेति साधनं तृतीयाध्यायार्थो दर्शितः । किं फलमिति चतुर्थाध्यायार्थः प्रस्तुतः । मुमुक्षव इत्येकवचनादेकमुमुक्षुकजगद्दृष्ट्यवस्था दर्शिता । प्रत्यगात्ममतिरित्यनेन ध्यानविलक्षणा प्रमारूपा वृत्तिर्दर्शिता । किं फलं प्रयच्छतीति सिद्धस्यैव सम्बन्धापादनं कृतं न तु जनयतीत्यसिद्धसम्बन्धकथनम्, नित्यत्वानित्यत्वसन्देहे नित्यत्वांशस्योत्कटत्वात् । एवं सिद्धान्तमादाय प्रश्नबीजमुक्तम् । वादिविप्रतिपत्तयश्चात्र बहुविधाः सन्ति ।

तथाहि । माध्यमिकास्तावच्छून्यमात्रमात्मानमुपयन्तो निखिलमिदं शून्यमेव विपर्यासदर्शनेन तु सदात्मकमवभासते परमार्थतस्तु न किं चिदपि तत्त्वमस्तीति शून्यभावनाप्रकर्षपर्यन्तात्तत्त्वज्ञानाच्छून्यभाव एवापवर्ग इत्याहुः ।

योगाचारास्तु क्षणिकं विज्ञानस्कन्धमात्मत्वेन मन्यमानाः स्वलक्षणभावनया क्षणिकभावनया दुःखभावनया शून्यभावनया च चतुर्विधया सत्याभिधया तस्य सोपप्लवविज्ञानसन्तानस्य प्रदीपनिर्वाणवदन्तोपरमं वा निरुपप्लवविज्ञानसन्तानोदयं वा सर्वज्ञसन्तानान्तर्भावं वाऽपवर्गमिच्छन्ति ।

आर्हतास्तु स्थिरं विज्ञानं देहपरिमाणं संकोचविकाशशील-परिणामिनमात्मानमभ्युपगम्य तस्य पुर्यष्टकपरिवेष्टितस्यार्हतशास्त्रोक्तेन तपसात्यैकाकारसमाधिप्रकर्षेण चाष्टविधकर्मबन्धप्रध्वंसे सति सुखैकतानस्य निरावरणज्ञानस्य सततोर्ध्वगमनमलोकाकाशगमनं वा मोक्षमाचक्षते, पञ्जरभञ्जन इव पञ्जरस्थस्य शुकस्य स्वातन्त्र्यम्, इदमेव च स्वातन्त्र्यं मोक्ष इति प्रसिद्धम् ।

काणादास्तु विभुमात्मानं नवविशेषगुणाश्रयं कल्पयन्तो जल्पन्ति—द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां यत्तत्त्वज्ञानं तत्पूर्वकादात्मतत्त्वसाक्षात्कारादीश्वरोपासनासहितान्नवानां वैशेषिकगुणानां प्रागभावासहवृत्तिप्रध्वंस आत्मनः कैवल्यमिति ।

नैयायिकास्तु प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानामुद्देशलक्षणपरीक्षाभिरात्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाख्यद्वादशविधप्रमेयनिष्कर्षेण स्वात्मपरमात्मसाक्षात्काराच्छ्रवणमननिदिध्यासनपूर्वकात् सवासनमिथ्याज्ञाननिवृत्तौ तत्कार्याणां दोषाणां रागद्वेषमोहाख्यानां निवृत्तिः, ततस्तत्कार्ययोः प्रवृत्तिपूर्वकयोर्धर्माधर्मयोर्निवृत्तिः, ततः पूर्वार्जितकर्मणां कायव्यूहपूर्वकभोगेन क्षयाच्छरीरान्तरानारम्भः, ततो वासनालक्षणस्यैकविंशतिप्रभेददुःखस्यात्यन्तविमोक्षोऽपवर्ग इति कल्पयन्ति ।

अपरे त्वेकभविकन्यायेनात्मज्ञानमन्तरेणापि सकलकर्मोच्छेदलक्षणोऽपवर्गो निषिद्धकाम्ययोरननुष्ठानेन नित्यानामनुष्ठानेन चागामिसुकृतदुष्कृतयोरनुत्पादाद्वर्तमानयोश्चोपभोगेन क्षयाद् गौरिकरक्ताः किंशुका इति न्यायेन तदात्मगतसर्वप्रागभावनिवृत्त्या स्वयमेव भवतीत्याहुः ।

प्राभाकरा अपि वैदिककर्मानुष्ठानाद्विहितात्मज्ञानपूर्वकाद्

देहेन्द्रियादिसम्बन्धस्य समूलधर्माधर्मपरिक्षयनिमित्तमात्यन्तिको-च्छेदलक्षणं मोक्षं मन्यन्ते ।

भट्टास्तु ज्ञानकर्मसमुच्चयादेवात्मनो जड़बोधात्मकस्य नित्य-सुखं चोदेति, ततश्च विषयविशेषानपेक्षया नित्यज्ञानेन नित्य-सुखाभिव्यक्तिर्मुक्तिरित्याहुः ।

मानसज्ञानेन नित्यसुखाभिव्यक्तिर्वा, तार्किकवद् दुःखाभाव-मात्रमेव वा मुक्तिरित्यपि तदीयाः केचित् ।

सांख्यास्तु प्रकृतिपुरुषविवेकादनाद्यविवेकनिवृत्तौ तं पुरुषं प्रति निवृत्ताधिकारायाः प्रकृतेर्न पुनस्तद्भोगार्था प्रवृत्तिरिति त्रि-विधदुःखस्यैकान्तात्यन्तनिरोध एव स्वभावतः केवलस्य पुरुषस्य कैवल्यमिति ।

पातञ्जलास्तु प्रकृतिपुरुषविवेकेनाभ्यासवैराग्यपरिपाकाद् यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसम्प्रज्ञातसमाधिपूर्व-काद् परमेश्वरप्रसादजात्पञ्चविधानां चित्तवृत्तीनां निरोधादेव धर्ममेघशब्दिताद्असम्प्रज्ञातसमाधेः कैवल्यमिति कल्पयन्ति ।

त्रिदण्डिनस्तु जीवब्रह्मणोर्भेदाभेदमभ्युपेत्य ज्ञानकर्मसमुच्च-याभ्यामादेव कारणात्मकब्रह्मणि कार्यात्मकजीवस्य कर्मवासना-सहितभेदांशनिवृत्तिरूपलयो मुक्तिरिति वदन्ति ।

ब्राह्मेण परमैश्वर्येण योग इत्यन्ये ।

सत्त्वरजस्तमोभेदेन समुद्रैविध्यवत् सविकारनिर्विकार-रूपेणावस्थाद्वयं ब्रह्मणः परिकल्प्य ज्ञानकर्मसमुच्चयाभ्यासादेव सविकारावस्थापरित्यागेन निर्विकारावस्थाप्राप्तिरेव मोक्षइत्यपरे ।

पाशुपतास्तु यथोक्तपाशुपतधर्माचरणात् पशुपाशविमोक्ष-णेन पशुपतिसमीपगमनमेव पुनरावृत्तिरहितं मोक्ष इत्याहुः ।

एवं यथोक्तविष्णुभक्तधर्माचरणजनिताद्विष्णुप्रसादाद्विष्णु-लोकगमनमेव मोक्ष इति वैष्णवाः ।

पञ्चाग्निविद्याद्युपासनैरर्चिरादिमार्गेण हिरण्यगर्भप्राप्तिरेव मोक्ष इति हैरण्यगर्भाः ।

औपनिषदास्तु निरतिशयाद्वयानन्दबोधरूप आत्मैवानाद्यविद्यानिवृत्त्युपलक्षितो मोक्ष इत्याचक्षते । अविद्यायाश्च दुःखजड़ानृतरूपनिखिलद्वैतोपादानत्वादात्मतत्त्वसाक्षात्कारेण निवृत्तायां तस्यां तदुपादानकस्य निखिलद्वैतप्रपञ्चस्य नाशादनादेश्च तस्याः पुनरुत्पत्त्यापादनस्याशक्यत्वादात्यन्तिकनिखिलदुःखनिवृत्तिरप्युपपद्यते । तस्य च स्वरूपे साधनानपेक्षत्वेऽपि व्यञ्जकतयाऽनाद्यविद्यावरणापनयेद वेदान्तमहावाक्यकरणकस्तत्स्वरूपसाक्षात्कार एव प्रतिबन्धचतुष्टयरहितः साधनम् । विषयभोगवासना प्रमाणगतासम्भावना प्रमेयगतासम्भावना प्रमितिगतासम्भावना चेति प्रतिबन्धचतुष्टयम् । तत्र विषयभोगवासनायाः श्रवणाङ्गभूताः शमादयो निवर्त्तकाः, प्रमाणगतासम्भावनायाः श्रवणं निवर्त्तकम्, प्रमेयगतासम्भावनाया निवर्त्तकं मननम्, प्रमितिगतासम्भावनायाश्च साक्षात्करोमीत्येवंविधव्यवहारविरोधिन्या निदिध्यासनं निवर्त्तकमिति शमादिसहितेन मुमुक्षुणा गुरुमुपसृत्य मोक्षसाधनब्रह्मात्मैक्यसाक्षात्कारप्रतिबन्धासम्भावनादिनिवृत्तये च चतुर्लक्षण्या मीमांसया वेदान्तवाक्यविचारः साङ्गः प्रतिबन्धनिवृत्तिपर्यन्तमावर्त्तनीय इति । एवंविधसादिविप्रतिपत्तिव्याकुलस्य प्रमेतरमतनिराकरणेनौपनिषदमतमेव सम्यगुपपत्त्या ज्ञापयेति शिष्याभिप्रायः ॥ १ ॥

ब्रह्मविद्यायाः कर्मानङ्गत्वेन मोक्षसाधनत्वेऽपि सा किं पापक्षयकामस्य सेतुदृष्टिरिवादृष्टद्वारेण सहायान्तरसापेक्षा तं साधयति, किं वा रज्ज्वां सर्पतया गृहीतायां दोषापायेन रज्जुदृष्टिरिवाधिष्ठानाज्ञाननिवृत्तिद्वारेण दृष्टेनैवाज्ञानोपादानां भ्रान्तिं निवर्त्तयन्ती तं साधयतीति संदिहानस्य प्रश्नान्तरमवतारयति —

किं निरस्तसहकारिकारणा
केवलैव फलमर्पयेन् मतिः ॥
बाह्यसाधनसहायसम्पदा
वाऽन्विता फलविधायिनी भवेत् ॥ २ ॥

किं निरस्तेति । केवलेत्यस्य व्याख्या निरस्तेति । अथ वा केवला कर्मप्रयोगानन्तर्भूता, प्रत्यगात्ममतेः प्रमाणवृत्तित्वेनोद्गीथादिध्यानरूपवृत्तिवैलक्षण्येऽप्याज्यावेक्षणादिवत्कर्माङ्गत्वप्राप्तिविदमुक्तम्, केवलेति । कर्मानङ्गभूतैव प्रत्यगात्ममतिर्बाह्यया स्वप्रामाण्यानुपयोगिन्या सहायसंपदा परिपुष्कलेन यज्ञादिना समुच्चिता मोक्षमदृष्टद्वारेण विधत्ते, किं वा निरस्तबाह्यसहाया दृष्टद्वारेणैव फलमर्पयेदिति शङ्कार्थः । बाह्येतिविशेषणाच्छुक्तिज्ञानस्येव प्रामाण्योपयोगिविचाररूपपरीक्षापेक्षणेऽपि न दोषः ॥ २ ॥

एवं साधनविशेषगतं संशयमुपन्यस्य तन्निरासाय स्वप्रयत्नं ज्ञापयन् गुरुं प्रार्थयते—

एतदप्यहमवैतुमुत्सहे निर्णयं कुरु कृपाविधेयधीः
एतदेव हि दयालुलक्षणं यद्विनेयजनबुद्धिवर्धनम् ॥३॥

एतदिति । एतत्साधनमपिशब्दात् फलं चावैतुं सन्देहनिरासेनावधारयितुमहमुत्सहे प्रयते इच्छामीति वा, हे गुरो त्वं निर्णयं संशयोच्छेदकं निश्चयं कुरु ममोत्पादय नाज्ञापयामि किं तु प्रार्थये, यतस्त्वं कृपया मद्विषयया विधेयधीर्वशीकृतचित्तः । ननु दयावशात्त्वाशिष आशास्या न त्वया सह वाग्व्यापारः कार्य इत्याशङ्क्य गुरुं स्तुवन्महीकरोति—एतदेवेति । दयालोर्गुरोरेतदेव लक्षणं स्वभावो यद्विनेयजनस्य मद्विधस्य बुद्धिवर्द्धनं सर्वसंशयोच्छेदेन निर्विचिकित्सतत्तत्पूर्वाज्ञातविशेषज्ञानोत्पादनम् । तस्मात्स्वदयास्वभावप्रयुक्त एव त्वमायासं सोढ्वाऽपि ममानन्यशरणस्य ज्ञानमुत्पादयितुमर्हसीत्याभिप्रायः ॥ ३ ॥

एवं स्तुतिपूर्वकप्रश्नेन परितुष्टः प्रश्नद्वयस्याप्युत्तरं गुरुः प्रतिजानीते—

उच्यते न तमसो निवृत्तितः
किं चिदस्ति परमात्मधीफलम् ॥
अन्यदल्पमपि साधनान्तरं
न व्यपेक्ष्य फलदायिनी च धीः ॥ ४ ॥

उच्यत इति । तमसोऽनाद्यज्ञानस्य निवृत्तितोऽन्यदल्पमपि फलं प्राकट्यादि परमात्मप्रमितेर्नास्ति अज्ञाननिवृत्तिरेव सर्वत्र धीफलम्, अज्ञानकार्यनिवृत्तिस्तु कारणनिवृत्तेरिति प्रथमप्रश्ने निर्णयः, धीरधिष्ठानप्रमाऽन्यदल्पमपि साधनमपेक्ष्य फलदायिनी न भवत्यनपेक्ष्यैव तथेत्यर्थः । अपिशब्दस्य भूरि नापेक्षतएवेत्यर्थः । अन्यशब्देनैव भेदे लब्धेऽन्तरशब्दोऽतिवैलक्षण्यप्रतिपादनाय, तेनातिविलक्षणमन्यत्साधनप्रामाण्यानुपयोगि कर्म वा प्रसङ्ख्यानं वा नापेक्ष्यते, प्रामाण्योपयोगि तु परीक्षणमसम्भावनादिप्रतिबन्धनिवृत्तयेऽपेक्ष्यत एवेति भावः । तेन प्रामाण्यपरीक्षणाद्युपबृंहितत्वेनासम्भावनादिप्रतिबन्धशून्या परमात्मधीः शुक्तिधीरिव दृष्टेनैव द्वारेण स्वविषयाज्ञानमुत्सारयन्ती तत्कार्यं प्रपञ्चं रजतमिव समुत्सारयतीति न यज्ञादिसमुच्चिता सेति द्वितीयप्रश्ने निर्णयः ॥ ४ ॥

ज्ञानस्याविद्यानिवृत्तिरेव फलं तत्र च न कर्मादिसहकार्यपेक्षेत्युभयत्रार्थे स्वानुभवमनुमानं च प्रमाणयितुं दृष्टान्तमाह—

शुक्तिकाविषयबुद्धिजन्मनः
शुक्तिकागततमोनिवृत्तितः ॥
नापरं किमपि दृश्यते फलं
नापरं च सहकारि कारणम् ॥ ५ ॥

शुक्तिकेति । शुक्तिकाकारायां बुद्धेर्जातायाः शुक्तिकाव-

वच्छिन्नचैतन्यगताज्ञाननिवृत्तिमन्तरेणापरं किमपि फलं न दृश्यते, सहकारिकारणं चापरं गङ्गास्नानगायत्रीजपादिरूपं तत्र न दृश्यते । बुद्धेरितिवक्तव्ये जन्मन इत्यधिकमुक्तं जन्मातिरिक्तव्यापाराभावकथनार्थम् । शुक्तिकागततम इति तदवच्छिन्नचैतन्याभिप्रायम्, जडेष्वावरणाभावस्य प्रतिपादितत्वात् । एवं च यद्विद्याफलं तदविद्यानिवृत्तिमात्रं सहकारिनिरपेक्षं चेत्युभयत्रापि व्याप्तिः सिद्धेत्यर्थः ॥ ५ ॥

एवं व्याप्तौ सिद्धायां शुक्तिविद्यादृष्टान्तेनात्मविद्यायामपि तदुभयमनुमीयत इत्याह—

एवमात्मनि तमोनिवृत्तितो
नान्यदस्ति परमात्मधीफलम् ॥
नाप्यपेक्ष्य सहकारि कारणम्
किं चिदात्ममतिरर्पयेत् फलम् ॥ ६ ॥

एवमात्मनीति । आत्मनि निर्विभागचैतन्ये यत्तमस्तदाश्रितं तद्विषयं च यदज्ञानं तन्निवृत्तितोऽन्यत्परमात्मधियोऽखण्डवाक्यार्थबुद्धेः फलं नास्ति । उत्तरार्द्धं स्पष्टम् । अत्रोभयत्रापि साध्ये मतित्वमेव हेतुर्द्रष्टव्यः । तथा चात्मतत्त्वमतेः साधनान्तरमनपेक्ष्यैव स्वविषयाज्ञाननिवृत्तिमात्रफला तत्त्वमतित्वाच्छुक्तितत्त्वमतिवदित्यनुमानं सूचितम् । हेत्वनुपन्यासाद्विद्वदनुभवोऽपि सूचितः, यथेयं शुक्तिर्भवति तद्रूपेण च भातीति तदनुभवस्तथाऽहं ब्रह्म भवामि तद्रूपेण च भामीत्यसत्त्वाभानावरणविरोधिनो विद्वदनुभवस्य साक्षिसिद्धत्वात् ॥ ६ ॥

ननु तत्त्वमतित्वं तत्त्वविषयकमनःपरिणामत्वम्, सर्वेषां च मनःपरिणामानामात्मचैतन्यक्रोडीकारेण तत्त्वविषयत्वाव्यभिचारान्मतित्वमात्रं हेतुः, स चासौ वाव लोको गौतमाग्निरित्यादिवाक्योत्थमतावुपासनरूपायां व्यभिचारी, तस्या आवर्त्य-

मानाया देवयानेन पथा कार्यब्रह्मलोकप्राप्तिहेतुत्वेनाज्ञानानिवर्त्तकत्वादार्थात्तसापेक्षत्वाच्च। न च प्रमितित्वं हेतुस्तथा च न व्यभिचार इति वाच्यम्। तद्धि अज्ञाननिवर्त्तकवृत्तित्वं वा प्रमाणकरणवृत्तित्वं वा। आद्ये साध्याविशेषादसिद्धिः। द्वितीये तु लोकाग्न्यादिबुद्धौ वेदकरणकायां व्यभिचारः। किं च ब्रह्मविद्या नाज्ञाननिवृत्तिफला शास्त्रीयविद्यात्वात् लोकाग्निविद्यावादिति-प्रतिरोधः, शुक्त्यादिविद्यायां च शास्त्रीयत्वाभावान्न व्यभिचारः। न च प्रमात्वाभाव उपाधिः। तस्यापि तेनैव हेतुना पक्षेसाधनात्। शास्त्रीयविद्यानां सर्वासामपि शाण्डिल्यदहरादिसमाख्यानां प्रमात्वाभावनियमात्। तथा ब्रह्मविद्याऽर्चिरादिमार्गप्राप्तिपूर्वकैश्वर्यफला शास्त्रीयविद्यात्वात्पञ्चाग्निविद्यावदित्यनुमानबाधश्च। तस्मान्नोक्तसिद्धिरित्याशङ्क्य लोकाग्न्यादिविद्यातो ब्रह्मविद्याया वैलक्षण्यप्रतिपादनेन समाधत्ते—

ब्रह्मज्ञानं प्रमाणं भवति दृढमिदं नात्र कश्चिद्विवादो
ब्रह्मात्मा चैकरूपो न च बहुरसकस्तत्परत्वाच्छ्रुतीनाम्॥
एवं सत्यद्वयात्मप्रमितिफलमिह द्वैतमूलापनुत्ति-
र्ब्रह्मज्ञानापनुत्तेराधिकमपि फलं किं चिदस्ति प्रमाणात्७॥

ब्रह्मज्ञानमिति। न तावद् ब्रह्मविद्या न प्रमितिः शास्त्रीयविद्यात्वाल्लोकाग्न्यादिविद्यावदित्यनुमानं साधु, यतो ब्रह्मज्ञानं प्रमाणं भवति अदुष्टकरणजत्वेनाबाधितविषयत्वेन च परीक्षणात्। दृढप्रामाण्यशङ्कानर्हमिदं नात्र कश्चिद्विवादोऽस्ति प्रथमद्वितीयाध्याययोर्महता प्रबन्धेन परिहृतत्वात्। लोकाग्न्यादिविद्या तु नादुष्टवेदकरणिका किन्तु पुंप्रयत्नकरणिका बाधितविषया च। लोकमग्नित्वेन चिन्तयेदिति तु धीर्वेदकरणिका प्रमितिरेव। तथा च प्रमाणकरणकवृत्तित्वं वा अबाधितविषयवृत्तित्वं वा अज्ञातविषयवृत्तित्वं वा अतत्त्वविषयकवृत्तित्वं वा प्रय-

ज्ञानन्यथयार्थवृत्तित्वं वा प्रमितित्वं हेतुरिति न व्यभिचारः। अतो बीजकुल्ययोर्भेदनिर्देशात् ज्ञानापेक्षया मानसकर्मणोदनाधीनपुंयत्नमाध्यत्वेन वैलक्षण्यादनिच्छतोऽपि दुर्गन्धादिज्ञानदर्शनेन ज्ञानस्य वस्तुपरतन्त्रत्वेन पुंयत्नानपेक्षत्वादतो ध्याने प्रमित्वाभावेऽपि भ्रमे व्यभिचारवारणाय तत्त्वपदमतत्त्वाविषयत्वपरम्, यथार्थत्वपरं वा। यदि तु भ्रमस्याविद्यावृत्तित्वेन मनोवृत्तिरूपं प्रमित्वं तत्र नास्तीत्युच्येत तदा तत्त्वपदमनादेयमेव स्मरणस्याप्यविद्यावृत्तित्वान्न प्रमित्वमिति न व्यभिचारः। न शास्त्रीयविद्यात्वेन साध्याभावसाधनं युक्तम्, शास्त्रीयत्वं यदि शास्त्रविहितत्वं तदसिद्धं पक्षे ब्रह्मविद्यायां प्रयत्नासाध्यत्वाच्छुक्तिविद्यायामिव यदि शास्त्रकरणकत्वं तच्चु ज्योतिष्टोमादिविधिजन्यज्ञानस्येव प्रामाण्यप्रयोजकत्वाद्विरुद्धम्, अत एव प्रमात्वाभावसाधनमप्यपास्तम्। न च शास्त्रीयविद्यात्वेनैश्वर्यफलत्वानुमानं युक्तम्। शास्त्रविहितत्वस्यासिद्धेः, शास्त्रकरणकत्वस्य च ज्योतिष्टोमादिज्ञाने व्यभिचारादित्युक्तत्वात्। तस्माद् ब्रह्मविद्या साधनान्तरानपेक्षा अज्ञाननिवृत्तिमात्रफला च प्रमितित्वादिति युक्तमनुमानम्। तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः, तस्याभिध्यानाद्योजनात्तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिः, मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते, तरत्यविद्यां वितर्तां हृदि यस्मिन्निवेशिते इत्यादिश्रुतिस्मृतिभ्यश्च। नन्वहमुक्थमस्मीति विद्यादिविधिवदहं ब्रह्मास्मीत्यपि मानसी क्रियोपासनैवास्तु न प्रमितिरन्यस्मिन्नन्यदृष्टिक्षेपत्वात्, जीवब्रह्मणोरत्यन्तभिन्नत्वात्, भिन्नाभिन्नत्वाद्वा, तथा च ब्रह्मविद्या नाविद्यानिवृत्तिफला सम्पद्रूपत्वादहमुक्थमस्मीत्यादिसम्पद्वदिति चेन्नेत्याह—ब्रह्मात्मा चेति। ब्रह्मैवात्मा जीवस्तत्त्वंपदाभ्यां लक्ष्यः शुद्धो वाक्यार्थो ब्रह्मात्मा स चैकरूपो नैव भिन्नः किं त्वभिन्नः। भेदांशोऽपि तत्र स्याद्-

ति नेत्याह । न च बहुरसक इति । नात्यन्तभिन्नो नापि भिन्न इत्यर्थः । उभयत्र हेतुमाह । तत्पारत्वाच्छ्रुतीनामिति । बहुत्वचनं गतिसामान्यप्रदर्शनार्थम्, तत्प्रमितिशेषत्वं तत्परत्वम्, तच्चोपक्रमादिलिङ्गैर्गतिसामान्येन च प्रथमाध्याये निर्णीतम् । एवं सति जीवब्रह्मणोरत्यन्तभिन्नत्वभिन्नाभिन्नत्वयोरभावे सति अद्वयात्मप्रमितेर्वेदान्तवाक्यकरणिकाया विचारपरिपाकदूरीकृतप्रतिबन्धाया अहं ब्रह्मास्मीत्यखण्डवाक्यार्थबुद्धेरधिष्ठानं प्रमात्वेन इहात्मनि कल्पितद्वैतमूलस्याज्ञानस्यापनुत्तिरुच्छेदोऽत्यन्तबाध एव फलं दृष्टद्वारा शुक्तिज्ञानस्येव तदज्ञानापनुत्तिः, यदज्ञानस्य यो विषयस्तदाकारप्रमा तदज्ञानं निवर्त्तयतीति सर्वत्र व्याप्तेः । तदुक्तम्—यतो ज्ञानमज्ञानस्यैव निवर्त्तकमिति । ननु सेतुदर्शनरूपायाः प्रमितेस्तदज्ञाननिवृत्तिविलक्षणं पापनिवृत्तिरेव फलम्, तद्वदत्राप्यज्ञानकल्पितप्रपञ्चनिवृत्तिः फलं किं न स्यादित्यत आह । न हीति । सेतुप्रमाया हि स्वेन रूपेण सेत्वज्ञाननिवृत्तिरेव दृष्टं फलम्, पापनिवृत्तिस्तु पापोत्कीर्त्तनादिनियमकलापसहितायास्तस्या विहितक्रियात्वेनादृष्टं फलम्, अत एव तन्न दृष्टफलवत् सर्वसाधारणम्, किं तु कस्य चिदेवाधिकारिणः, ब्रह्मज्ञानफलं च शुक्तिज्ञानफलवत्साधारणम्, तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति श्रुतेः, विहितक्रियात्वेन तत्फलस्यासाधारणत्वे तु देवानां तन्न स्यात्, विहितक्रियानधिकारित्वात्तेषाम्, तद्धैनत्पश्यन्नृषिर्वामदेव प्रतिपेद इति च गर्भस्थस्य कर्मानधिकरिणो वामदेवस्य तच्छ्रुतेः, अत एवाक्षपादाचार्यः, तत्त्वज्ञानान्निःश्रेयसाधिगम इत्युक्त्वा तदृष्टद्वारा वेतिसन्देहे मिथ्याज्ञाननिवृत्तिरूपदृष्टद्वारैव शुक्तिज्ञानस्येवात्मतत्त्वज्ञानस्यापि निःश्रेयसं फलमित्याह दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति, सेतुदर्शनान्तरं तद-

ज्ञाननिवृत्तेरधिकमपि यत्फलं पापक्षयरूपं किं चिदस्ति तत्प्रमाणान्न भवति किं त्वदृष्टद्वारा ॥ ७ ॥

किं च स्वर्गपितृलोकादिफलमनपेक्ष्यैवानुष्ठितं परमेश्वरे च समर्पितमत एव तत्फलात्प्रचलितं यद्विशिष्टं शास्त्रीयं कर्म तत्किं ब्रह्मधिया मोक्षायापेक्ष्यत इत्युच्यते किं वा तदतिरिक्तमिति विकल्प्याद्यं यज्ञेन विविदिषन्ति कषायपक्तिः कर्माणि, सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इत्यादिवचनविरोधेन निराकुर्वन् कैमुतिकन्यायेन द्वितीयमपि निराकरोति—

निरभिसंधि समर्पितमच्युते
विहितमिष्टफलादपि निर्गतम् ॥
यद्यपि कर्म तदप्यवधीरितं
यदि धिया न तया परमर्थ्यते ॥ ८ ॥

निरभिसंधीति । फलाभिलाषरहितमित्यर्थः । अवधीरितमुपेक्षितमनपेक्षितमिति यावत् ॥ ८ ॥

ज्ञानकर्मणोः षड्यागवत्समप्राधान्येन मोक्षसाधनत्वेन समुच्चय इत्येकः पक्षः, तत्र कर्मैव प्रधानं ज्ञानं गुणभूतं प्रयाजाज्यावेक्षणादिवदित्यपरः पक्षः, ज्ञानमेव प्रधानं कर्म गुणभूतं सेतुदर्शनादिवदित्यन्यः पक्षः, स सर्वोऽप्यसंभवीति प्रतिजानीते—

समविषमसमुच्चयो न युक्तो
न हि जगदास्ति धियः प्रसूतिकाले ॥
क्व नु बत विहितः क्रियासमूहः
कथमिव तत्र समुच्चयोपपत्तिः ॥ ९ ॥

समविषमेति । हेतुं व्याचष्टे । न हीति । यत्र त्वस्य सर्वमात्मैवाभूत्, भिद्यते हृदयग्रन्थिरित्यादिश्रुतेः सर्वद्वैतप्रपञ्चस्य तत्त्वधीबाध्यत्वप्रतीतेस्तत्त्वधीकाले त्वदभिमतकर्मणां स्थितिरेव नास्ति कुतस्तेषां तत्र ज्ञानेन समुच्चितानां मुक्तिहेतुतेत्यर्थः ॥९॥

किं च बहिरङ्गसाधनानि परित्यक्तवन्तः परमहंसस्यैवान्तरङ्गसाधनैरविद्यानिवर्त्तकविद्योदयस्य श्रुतिन्यायाभ्यामुपपादितत्वात्यक्तसर्वैषणस्य च तस्याग्निहोत्रादिकर्मासंभवात्तस्य मोक्षसाधनत्वसम्भावनैव नास्ति तत्र ज्ञानेन समुच्चयस्तु दूरापास्त इत्याशयेनाह—

अपि च परमहंसस्त्यक्तसर्वैषणः स-
न्ननुभवफलविद्यां साधनैर्यद्यवाप ॥
कथमिव पुनरत्र प्राप्तिरस्ति क्रियाया
भवतु तदपवर्गो विद्ययैवैकयाऽस्य ॥ १० ॥

अपि चेति । अनुभवोऽभिव्यक्तानन्दप्रकाशस्तत्फलां विद्यां साक्षात्काररूपामिति यावत् । अत्र विद्याफले । प्राप्तिः साधनत्वसंभावना । समुच्चयासंभवे फलितमाह । भवत्विति । अस्य परमहंसस्य ॥ १० ॥

ननु सर्वत्र शास्त्रीयज्ञानस्याज्यावेक्षणादेः पुरुषार्थहेतुभूतकर्माङ्गसंस्कारतया तदङ्गत्वदर्शनादात्मज्ञानस्यापि शास्त्रीयस्य तथैव तादृशकर्माङ्गत्वमेव कल्पयितुमुचितम् , ततश्च संस्कारकर्मफलश्रुतेरर्थवादत्वात्तस्य मोक्षहेतुत्वमेव नास्ति कुतस्तस्य नैरपेक्ष्यमित्याशङ्क्यात्मज्ञानस्य कर्माङ्गत्वावेदकप्रमाणाभावान्नैवमित्याह—

यस्य प्रयोगविधिरस्ति परिग्रहीता
द्वारैदमर्थ्यविनिवेदकमस्य सर्वम् ॥
श्रुत्यादि मानमिह नास्ति तदात्मबुद्धौ
तस्मादियं भवतु न पुरुषार्थभूता ॥ ११ ॥

यस्येति । अपूर्वपर्यवसायिशेषशेषिभावस्य मानान्तरायोग्यत्वात्तत्र श्रुतिलिङ्गादीनामन्यतमं प्रमाणं वक्तव्यम् , तदपि न निरपेक्षं शेषित्वं साधयति किं तु ग्राहकग्रहणमपेक्ष्य, साङ्गे कर्मण्यधिकारिणः प्रेरकः प्रयोगविधिरेव फलं प्रति प्रत्यासन्नत्वेन प्राधान्याद् ग्राहक इत्युच्यते, तत्प्रकरणे पठिताः सर्वे मदर्था इति सामा-

न्येन येषां तच्छेषत्वग्रहणं प्रथमं भवति पुनः साक्षात्तच्छेषत्वेऽनुपपन्ने तेषामेव तत्र द्वारभूतोपकारशेषत्वरूपद्वारैदमर्थ्यं श्रुतिलिङ्गादि निवेदयतीति स्थितिः, तथा चौपनिषदात्मज्ञानस्य प्रयोगविधिप्रकरणाभावाद्विध्ययोग्यत्वाच्च तत्परिगृहीतत्वमेव नास्ति कुतस्तच्छेषत्वेनापि तस्य द्वारैदमर्थ्यवेदकं श्रुत्यादि प्रमाणमस्ति, या तु यदेव विद्यया करोतीति तृतीयाश्रुतिः सा प्रकृतोद्गीथविद्यायाः कर्मफलसमृद्धिहेतुत्वपरा न तु ब्रह्मविद्याविषया, यद्यपि पारलौकिककर्मप्रवृत्तेर्देहातिरिक्तात्मज्ञानं विनानुपपत्तेर्देहातिरिक्तात्ममात्रज्ञानस्य तत्र सामर्थ्यलक्षणं लिङ्गमस्ति, तथापि न देहातिरिक्तत्वमात्रेणात्मोपनिषत्प्रतिपाद्यः, किं त्वशनायाद्यतीतापेतब्रह्मक्षत्रादिभावेनाद्वयब्रह्मात्मनाप्युपनिषद्भिस्तात्पर्येण प्रतिपाद्यते, तज्ज्ञानं च न कर्म प्रत्युपयोगि प्रत्युत तद्विरोधीति न सामर्थ्यरूपमपि लिङ्गमस्ति, नाप्युक्तरूपात्मधियः कर्मणा जुव्हादिवदव्यभिचरितसम्बन्धोऽस्ति येन वाक्येन पर्णतावदात्मज्ञानं कर्माङ्गं स्यात्, तस्मादुक्तरूपात्मधियः कर्मशेषत्वाभावात्तत्फलश्रुतेरभूतार्थवादत्वायोगात्सास्माकं परमपुरुषार्थहेतुत्वात्सर्वशेषिभूतैवेत्यर्थः ॥ ११ ॥

ननु कोयं तत्त्वधीसाध्यः पुरुषार्थः, परमानन्दस्वरूपाच्छादकाखिलानर्थनिदानाज्ञाननिवृत्तिरेवेति चेत् सा तर्हि निवृत्तिः सती वा स्यादसती वा सदसद्रूपा वा अनिर्वचनीया वा स्यात्। नाद्यद्वितीयौ सत्त्वेऽसत्त्वे च ब्रह्मवत् खपुष्पवच्च साध्यत्वायोगात्, अनिर्वचनीयाज्ञाने सत्त्वस्यासत्त्वस्याभावेन तत्प्रतियोगिकनिवृत्तौ तदसम्भवाच्च, न तृतीयः सदसदात्मकत्वस्यैकत्र विरोधेनासम्भवात् पूर्वोक्तदोषापरिहाराच्च, न चतुर्थः, अज्ञानातिरिक्तानिर्वचनीयस्याज्ञानाधीनसत्ताकतयाऽज्ञानस्थितिं विना तन्निवृत्तेरनिर्वचनीयत्वायोगात्, स्थितौ च तन्निवृत्तिव्याघातात्, तस्माद-

ज्ञाननिवर्त्तेरवानिरूपणात्तस्यास्तत्त्वधीफलत्वं दुर्घटमित्याशङ्क्योक्तपक्षचतुष्टयातिरिक्तपक्षान्तरे स्वीकारान्नैवमित्याह—

सदसत्सदसद्भिकल्पित-
प्रतिपक्षैकवपुर्निवर्त्तनम् ॥
तमसोऽभ्युपगम्यतेऽन्यथा-
नुपपत्त्यापतनैकहेतुतः ॥ १२ ॥

सदसादिति । सत्पक्षस्यासत्पक्षस्य सदसत्पक्षस्य विकल्पितपदार्थाभिलप्यानिर्वचनीयपक्षस्य च प्रतिपक्षं तद्विरुद्धमेकमसंकीर्णवपुः स्वरूपं यस्य तत्तथोक्तम् । निवर्त्तनं निवृत्तिः । यथा प्रमाणबलात् कस्य चित्सत्त्वं सदसत्त्वमनिर्वचनीयत्वं वा स्वीक्रियते तथाऽविद्यानिवृत्तेरप्युक्तपक्षचतुष्टयानुपपत्त्या पञ्चमप्रकारोऽभ्युपेय इत्याशयेन हेतुमाह । अन्यथेति । पक्षचतुष्टयानुपपत्त्या पञ्चमप्रकारस्यापतनं प्राप्तिः स एको मुख्यो हेतुस्ततइत्यर्थः ॥ १२ ॥

पञ्चमप्रकारायामप्यविद्यानिवृत्तावनुपपत्तेः प्रतिभासात्सोऽपि पक्षो हेय इत्याशङ्क्य किं सदसदादिपक्षचतुष्टयनिबन्धनानुपपत्तय एव पञ्चमप्रकारायां तस्यां भासन्त इत्युच्यते किं वाऽन्या अनुपपत्तये इति विकल्पलप्याद्यं निराकरोति—

सदसत्सदसद्भिकल्पित-
प्रतिबद्धा न भवन्ति वर्णिते ॥
परमात्मतमो निवर्त्तनेऽ-
नुपपत्तिप्रतिभासवृत्तयः ॥ १३ ॥

सदसत्सदसद्भिकल्पितप्रतिबद्धा इति । अस्य पदस्यान्तिमपदेनान्वयः । वर्णिते पञ्चमप्रकारेऽनुपपत्तिप्रतिभासवृत्तयः पञ्चमप्रकारेऽविद्यास्तमये सत्त्वादिपक्षचतुष्टयाप्राप्तिस्तन्निबन्धना अनुपपत्तिप्रतिभासा नैव संभवन्तीत्यर्थः ॥ १३ ॥

ननु पञ्चमप्रकाराप्यविद्यानिवृत्तिरात्मनो भिन्ना चेद् द्वैताप-

त्तिः, अभिन्ना चेत्तस्या आत्ममात्रत्वे तस्यानादित्वात्तत्त्वज्ञानवैयर्थ्यापत्तिः । आत्मनस्तन्मात्रत्वे च तत्त्वज्ञानात्प्रागात्मनोऽभावप्रसङ्गेन निराश्रयाऽविद्यानुपपत्तौ तन्निवृत्तेरप्यनुपपत्तेः । भेदाभेदौ विरोधादेवानुपपन्नौ, नापि भेदाभेदाभ्यामनिर्वचनीया सा, अविद्यां विना तदनुपपत्तेर्दर्शितत्वात् । तस्मात्पञ्चमप्रकारायामपि तस्यामन्या अनुपपत्तयः सन्तीति द्वितीयकल्पमाशङ्क्यात्रापि पञ्चमप्रकाराङ्गीकाराद्भेदादिपक्षचतुष्टयनिबन्धना अनुपपत्तयोऽपि निरवकाशा इत्याह—

चितिभेदमभेदमेव वा
द्वयरूपत्वमथो मृषात्मताम् ॥
परिहृत्य तमोनिवर्त्तनं
प्रथयन्ते खलु मुक्तिकोविदाः ॥ १४ ॥

चितिभेदमिति । चितेर्भेदमित्यर्थः । मुक्तिकोविदाः इष्टसिद्धिकाराः ॥ १४ ॥

अविद्याधिष्ठानभूतात्मैव तन्निवृत्तिः, कल्पितानामधिष्ठानातिरिक्ताभावानिरूपणात्, ततश्च सा सद्रूपैवेति सिद्धान्तरहस्यमाह—

अथ वा चितिरेव केवला
वचनोत्पादितबुद्धिवर्त्मना ॥
परमात्मतमो निवृत्तिगी-
र्विषयत्वं समुपैत्युपाधिना ॥ १५ ॥

अथ वेति । केवला केन चिदविशेषिता । तर्हि विद्योदयात्प्रागपि तस्या अविद्यानिवृत्तिव्यवहारभाक्त्वं स्यादिति शङ्क्य तद्गोचरविद्योदयस्य तत्र तद्व्यवहारप्रवृत्तिद्वारस्य स्वीकृतत्वात्तस्य चास्मिन्नुपाधौ सत्येव पश्चात्तन्निमित्तव्यवहारस्य प्रवृत्तिरित्याह । वचनेति । न चैतावता विद्याया अपि तमोनिवृत्तिशब्दार्थ-

त्वं तस्या वक्ष्यमाणदृष्टान्तेन तच्छब्दप्रयोगोपाधितया तटस्थत्वादित्यभिप्रेत्योपाधिनेत्युक्तम् । एतदुक्तं भवति, तत्त्वमादिवाक्यादखण्डैकरसब्रह्मसाक्षात्कारे सत्यनिर्वचनीयाऽविद्यातत्कार्यात्मकजडप्रपञ्चस्यान्वयव्यतिरेकाभावपरिहारेणाधिष्ठानचिन्मात्ररूपेण परिशेषात्सैव तन्निवृत्तिरित्युच्यते । न चैवं सति तमोनिवृत्तेरधिष्ठानात्मरूपाया विद्यासाध्यत्वायोगात्तत्फलत्वानुपपत्तिरिति वाच्यम् । वस्तुतस्तस्याः साध्यत्वाभावेऽपि कूपाकाशादिवत्साध्यत्वभ्रमात्तत्साधनज्ञानसिद्धये मुमुक्षुप्रवृत्त्युपपत्तेः । अत एव मोक्षशास्त्रस्याप्यविद्वद्विषयत्वमुक्तमाचार्यैः, अथ वा यस्मिन् सति यस्यानन्तरं सत्त्वं यदभावाद्यदभावस्तदेव तत्साध्यमिति स्थितिः, न तु साध्यस्य प्रागसत्त्वमपि साध्यत्वोपयोगि, अन्यतः कार्यत्वनिराकरणात्, तथा च तत्त्वसाक्षात्कारे सत्यनन्तरमविद्यानिवृत्तिरूपाद्वितीयचिदात्मनः सत्त्वात्ततः प्रागुक्तनिवृत्त्यभावरूपाया अविद्याया अपि सत्त्वात्तत्त्वधीसाध्यत्वोपपत्तेस्तत्फलत्वमनपवादमिति ॥ १५ ॥

ननु शुक्तिकादौ यथाऽधिष्ठानातिरिक्तस्तमोनिवृत्तिशब्दार्थस्तथात्मन्यपि किन्न स्यादित्याशङ्क्य दृष्टान्तासंप्रतिपत्त्या परिहरति-

शुक्तिकाविषयबुद्धिजन्मना
प्रत्यगात्मचितिरेव केवला ॥
शुक्तिकागतनमोनिवृत्तिरि-
त्युच्यते हतिहरिः पशुर्यथा ॥ १६ ॥

शुक्तिकाविषयेति । शुक्त्यादेरपि जडतया कल्पितत्वेन रजताद्यधिष्ठानत्वायोगात्तदुपहिता प्रत्यक्चितिरेव तदधिष्ठानमिति सैव केवला शुक्त्याद्यविशिष्टा तत्त्वमःस्थितिविरोधिन्यां शुक्त्यादिगोचरभ्रमायामुदितायां तामुपाधिमपेक्ष्य तत्तमोनिवृत्तिरित्युच्यत इत्यर्थः । तच्छब्दप्रवृत्त्युपाधेस्तदवाच्यत्वे दृष्टान्तमाह ।

दृतिहरिरिति ॥ १६ ॥

दृष्टान्तं विवृणोति—

वाचको हरणकर्त्तुरिष्यते
शब्द एष हि दृतेर्मनीषिभिः ॥
केवलं तु पशुता निमित्तता
बाह्यतः स्थितवती व्रजेदियम् ॥ १७ ॥

वाचक इति । एष शब्दो दृतिहरिशब्दो दृतेश्चर्मभस्त्रिकाया हरणकर्त्तुर्वाच्यस्य वाचको मनीषिभिरिष्यते, इयं पशुता तु केवलं निमित्तता व्रजेदिति सम्बन्धः । केवलामित्यस्य विवरणं बाह्यतः स्थितवतीति । दृतिहरिशब्दवाच्याद्बहिर्भूता तदवाच्यैवेति यावत् । पशुतायां दृतिहरिशब्दवाच्यतायामुपाधित्वे युक्तिमग्रे वक्ष्यति ॥ १७ ॥

दृतिहरिः पशुर्यथेति यत्र दृष्टान्त उक्तस्तं दार्ष्टान्तिकं प्रपञ्चयति—

एवमेव तु तमोनिवृत्तिगीः
शुक्तिकाविषयबुद्धिजन्मना ॥
बाह्यतः स्थितवतैव हेतुना
प्रत्यगात्मचिति वर्त्ततेऽञ्जसा ॥ १८ ॥

एवमेवेति । तमोनिवृत्तिगीः शुक्त्यादाविति शेषः । अञ्जसा मुख्यवृत्त्या, योगस्यापि मुख्यवृत्तित्वात् ॥ १८ ॥

एवं शुक्त्यादावज्ञाननिवृत्तेरधिष्ठानचिन्मात्ररूपत्वेऽपि तत्र तन्निवृत्तिव्यवहारो दृतिहरिदृष्टान्तेन शुक्त्यादिगोचरभ्रमोपाधिकस्तदनन्तरमेव तत्र भवतीत्युपपाद्य तददृष्टान्तेन संसारमूलात्मतत्त्वाज्ञाननिवृत्तिरधिष्ठानचिन्मात्ररूपा तत्प्रमितिरूपोपाधिमपेक्ष्य तद्व्यवहारविषयो भवति न प्रागित्याह—

उत्पन्नशुक्तिमतिरात्मचितिर्यथैव
शुक्तेस्तमोहतिरिति प्रतिपन्नमेवम् ॥

आत्मापि जातनिजबुद्धिरबोधहानि-
रुच्येत केवलचिदेकरसो न पूर्वम् ॥ १९ ॥

उत्पन्नेति । उत्पन्ना शुक्तिगोचरा मतिः प्रमितिरूपोपाधिर्यस्याः सा तथोक्ता । एवं केवलचिदेकरस आत्मापीति सम्बन्धः । जाता निजबुद्धिः स्वयाथात्म्यगोचरा ब्रीरूपाधिरूपा यस्य स तथोक्तः ॥ १९ ॥

पशुतायां दृतिहरिशब्दप्रयोगोपाधित्वे युक्तिं वक्ष्यतीत्यवादिष्म तामिदानीमाह—

दृतिहरणकरत्वं पुंसि चान्यत्र चेदं
दृतिहरिरिति लोके नोच्यते वर्त्तमानम् ॥
अनधिकविकलं सत् कथ्यते तत् पशुस्थं
दृतिहरिरिति शिष्टैर्बाह्यहेतोः पशुत्वात् ॥२०॥

दृतिहरणेति । पुंसि मनुष्येऽन्यत्र शकटादौ वर्त्तमानं दृतिहरणकरत्वं लोके वृद्धव्यवहारे दृतिहरिरिति नोच्यत इति सम्बन्धः । तर्हि दृतिहरणकर्तृत्वादधिको न्यूनो वा तदर्थोऽस्तु नेत्याह । अनधिकेति । हरतेर्दृतिनाथयोः पशाविति पाणिनीयवचनार्थाभिज्ञाः शिष्टाः । पशुस्थं चेत्कथ्यते पशुत्वमपि तद्वाच्यं स्यादित्याशङ्क्योक्तम् । बाह्यहेतोरिति । पशुत्वरूपाद्बाह्यहेतोः शब्दशक्त्यविषयात् तत्प्रवृत्तिनिमित्तात्पशुस्थं कथ्यत इति सम्बन्धः । तस्यापि वाच्यत्वे तत्रावयवशक्त्यभावाच्छक्त्यन्तरं कल्पनीयं स्यात्, तस्मात्तदवाच्यमेवोपाधितया तटस्थं सत् पशावेव दृतिवाहके तच्छब्दप्रवृत्तिनिमित्तं भवतीत्यर्थः ॥ २० ॥

ननु प्रत्यगभिन्नपरमात्मरूपाऽविद्यानिवृत्तेरेकत्वादन्यत्र तद्वाचकशब्दाप्रसक्तेस्तन्नियमाय तत्त्वज्ञानरूपोपाधिवर्णनं वृथेत्याशङ्क्य विद्योदयात्प्रागात्मनि तद्व्यवहाराभावात्तदुपपादनायोक्तोपाधिवर्णनमर्थवदित्याशयेनाह—

अयमपि परमात्मा प्रत्यगात्मस्वभावो
वचनजनितबुद्धेः प्राक् स्वरूपे स्थितोऽपि ॥
न खलु विषयभावं ध्वान्तविच्छेदवाचो
व्रजति हि तदुपाधेर्बुद्धिवृत्तेरभावात् ॥ २१ ॥

अयमपीति । खलुशब्दो लौकिकप्रसिद्ध्यर्थः । हिशब्दो वैदिकप्रसिद्ध्यर्थः ॥ २१ ॥

नन्वज्ञानदाहे ज्ञाननाशोऽज्ञाननिवृत्तिरित्यादिशब्देषु दाहादिपदानामभाववाचकत्वात्कथं तेषां भावरूपे चिदात्मनि प्रवृत्तिरित्याशङ्क्याभाववाचकस्यापि पदस्यान्येन समस्तस्यावयवार्थं विहाय लक्षणया ब्रह्मण्यधर्मादिपदवद्भावरूपचिदात्मनि प्रवृत्तिसंभवात्तत्रापि तत्त्वबोधात्पाक् तद्व्यवहाराभावात्तदुदयं तटस्थमुपाधिमपेक्ष्याज्ञानदाहादिशब्दाश्चिदात्मन्येव प्रवर्त्तन्ते इत्याह—

अज्ञानदाह इति नैकपदं समासात्
पूर्वोत्तरे खलु पदे पदतामुपेतः ॥
ज्ञानोदयं तटगतं समुपाददानस्त-
स्मात्तमोहतिरवोऽत्र चिति प्रवृत्तः ॥ २२ ॥

अज्ञानदाह इति । नैकपदम्, एकत्र रूढं पदं नेत्यर्थः । समासेनैकपदे फलितमाह । तस्मादिति । तमोहतिरवो ज्ञानोदयं तटगतं समुपाददान इति योजनीयम् । अत्र लोकवेदयोः ॥२२॥

हतिहरिशब्दस्य समासादैकपद्यमापन्नस्य पशौ यथा रूढिस्तथाऽज्ञाननाशादिशब्दस्यापि यत्र वृत्तिस्तत्र रूढिरेव किं न स्यादित्याशङ्क्य दृष्टान्त एवासंप्रतिपन्न इति हतिहरिशब्दस्यापि पशौ वल्गुत्वावयवार्थयोगादेव प्रवृत्त्युपपत्तेर्यौगिकार्थस्य मनुष्यादिसाधारणत्वेऽपि पशुत्वोपाधिना तत्पदप्रवृत्तेः पशावेव नियमितत्वेनातिप्रसङ्गाभावादित्यभिप्रेत्याह—

अत्राप्यसौ हतिहरिः पशुरित्यखण्डः
शब्दो न खल्वभिमतोऽवयवार्थयोगात् ॥

धातुश्च वाचकतया हरतिः प्रसिद्धो
हीन्प्रत्ययश्च हरतेः परतः प्रसिद्धः ॥२३॥

अत्रापीति । पशावपीत्यर्थः । अत्राप्यवयवार्थयोगादित्यनेन सम्बन्धः । अवयवार्थावेव विविच्य दर्शयति । धातुरिति । वाचकतया हरणस्येति शेषः । हरतेः परत इन् प्रत्ययः कर्तुर्वाचकतया प्रसिद्ध इति शेषः ॥ २३ ॥

एवं तत्त्वबोधोदयमपेक्ष्यात्मैवाविद्यातत्कार्यनिवृत्तिरित्युक्तम् इत्युक्तम्, तत्र तत्त्वबोधस्य घटादिवदविद्याद्यविरोधित्वे तन्निवृत्तिव्यवहारे तदपेक्षैव न स्यात्तत्तस्य तद्विरोधित्वं वक्तव्यम्, न चाविद्यादिप्रतियोगिकप्रतियोग्यसत्त्वापादकागन्तुकध्वंसजनकत्वं विना तस्य तद्विरोधित्वमुपपद्यते, आत्मरूपाऽविद्यानिवृत्तिश्चानादिकालेऽविद्यादिना सह वर्त्तमानत्वान्न तदसत्त्वापादिका, तस्मादात्मातिरिक्त आगन्तुकस्तत्त्वधीसाध्योऽविद्यादिध्वंसः स्वीकर्त्तव्यः, स एव च तद्दाहादिपदाभिलप्य इति चेन्न, आगन्तुकध्वंसस्य प्रतियोग्यसत्त्वापादकतायाः सत्कार्यवादिनां कुत्राप्यसंप्रतिपन्नत्वात्, तत्र को मोहः कः शोक एकत्वमनुपश्यतः, तरत्यविद्यां विततां हृदि यस्मिन्निवेशितं इत्यादिवचनादद्वितीयाखण्डैकरसात्माविद्यैव साक्षादविद्यातत्कार्ययोरसत्त्वापादिकेति नागन्तुकध्वंसेन कृत्यमस्तीत्यभिप्रेत्य तथापि किं विद्या वेदान्तवाक्यादुत्पद्यमानैवाविद्यादि बाधत उतोत्पन्नेति वीक्षायां किमनेन विचारेण, उभयथापि विद्याबाधिताऽविद्यादेरनन्तरं स्थित्ययोगात् तया तद्बाधे यत्नान्तरानपेक्षणाच्च सर्वत्र तथा दर्शनादित्याह—

उत्थान्निरस्यति तमश्च तदुद्भवं च
वेदावसानवचनादथ चोदितः सन् ॥
ऐकात्म्यवस्तुविषयोऽनुभवोऽत एवं
कं चित् सहायमनपेक्ष्य निवर्त्तकोऽसौ ॥ २४ ॥

उद्यन्निति। ऐकात्म्यवस्तुविषयोऽनुभवो वेदान्तज्ञानवचनादुद्यन्नुदितः सन्निति सम्बन्धः। अत एव ततस्तद्बाधे विलम्बाभावादेव। कं चित् कर्मादिरूपम्। असावनुभवः। उद्यन्नेव निरस्यतीति तत्त्वम्। असत्कार्यवादानभ्युपगमादन्यानपेक्षत्वाच्चेति द्रष्टव्यम्॥ २४॥

विद्याया अविद्यादिबाधे नैरपेक्ष्याविलम्बौ विवदानर्हाविति दृष्टान्तेन स्पष्टयति—

दीपस्तमस्तिरयतीह भवन्नुत स्विद्
भूत्वा क्षणव्यवधिमात्रमपेक्ष्य नात्र।
काश्चिद् विवादपदवीमुपयाति वादी
तद्वत् प्रतीच्यवगतौ तमसोऽपहन्त्र्याम्॥ २५॥

दीपस्तम इति। तिरयति निवर्तयति। इह तमस्विदेशे। भवन्नुत्पद्यमानः क्षणव्यवधिमात्रमपेक्ष्य भूत्वा वा तिरयतीति सम्बन्धः। उत्पत्तिक्षणानन्तरक्षणः क्षणशब्दार्थः। मात्रचा तृतीयादिक्षणापेक्षा निरस्यते। अत्र अन्यानपेक्षत्वे। प्रतीच्यवगताविति व्यधिकरणे सप्तम्यौ, प्रत्यगविषयावगतावित्यर्थः। तमसोऽज्ञानस्यापहन्त्र्यां बाधिकायां विवादो न कार्य इति शेषः॥ २५॥

उद्यन्निरस्यतीत्ययमेव पक्षः साधुरित्यभिप्रेत्यात्मतत्त्वज्ञानं स्वोत्पत्त्यतिरिक्तानपेक्षमेव तदविद्याद्युपमर्दकं तत्त्वापरोक्षज्ञानत्वात् शुक्त्यादितत्त्वज्ञानवदिति ज्ञानकर्मसमुच्चयपक्षमपि प्रतिक्षिपति—

उत्पत्तिरेव हि धिया स्वफलं प्रदातु-
माकाङ्क्षिता न च ततोऽपरमर्थनीयम्॥
यत् कारकं तदिह काङ्क्षति जन्ममात्रा-
दन्यन्न धीः किमपि काङ्क्षति जन्म लब्ध्वा॥ २६॥

उत्पत्तिरेवेति। विमतं स्वफले स्वजन्मातिरिक्तापेक्षं साधनत्वात् काष्ठादिवदित्याशङ्क्य तत्र कारकत्वमुपाधिः, न च सा-

धनव्यापकत्वम्, तत्त्वज्ञानस्य व्यञ्जकत्वेन कारकत्वाभावात् । कारकत्वं हि स्वविषयस्योत्पत्त्याद्यन्यतमानुकूलक्रियाहेतुत्वम् । व्यञ्जकत्वं तु स्वविषयेऽस्ति प्रकाशत इत्यादिव्यवहारप्रतिबन्धकमात्रापनेतृत्वमिति तयोर्भेद इत्याशयवानाह । यत्कारकमिति ॥२६॥

प्रमाणज्ञानं स्वफले स्वजन्मातिरिक्तानपेक्षमित्यत्र प्रत्यक्षलक्षणपरजैमिनीयसूत्रस्थजन्मपदसामर्थ्यं लिङ्गमित्याह—

प्रत्यक्षसूत्र इदमेव निवेदयिष्य-
न्न्यायेन जैमिनिरुवाच विदग्धबुद्धिः ॥
सत्संप्रयोग इति तत्र हि बुद्धिजन्म-
शब्दस्य नान्यदिह किं चन कृत्यमस्ति ॥ २७ ॥

प्रत्यक्षसूत्र इति । इदं स्वफले जन्मातिरिक्तानपेक्षत्वम् । सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति सूत्रम् । अत्रेन्द्रियाणां सता विद्यमानेन विषयेण संप्रयोगे सति निर्दोषसम्प्रयोगे सतीति वा पुरुषस्य यद् बुद्धिजन्म तत्प्रत्यक्षमित्यत्र जन्मपदस्य लक्षणेऽनुपयोगाद्वैयर्थ्यायोगाच्च तेन प्रमाणं स्वफले जन्मैवापेक्षते नान्यदिति ज्ञाप्यत इत्यर्थः ॥ २७ ॥

उत्पत्तिमात्रेण विद्याया अविद्यातत्कार्यबाधकत्वेऽपि स्वबाधकत्वायोगात्तस्या बाधकान्तरं वाच्यम्, तस्या अबाध्यत्वे च द्वैतापत्तेः, ततश्चानवस्थेत्याशङ्क्य स्वस्या अप्यविद्याकार्यत्वात्स्वयमेव बाधिका ततश्चाधिष्ठानचैतन्यमात्रपरिशेषान्न द्वैतापत्तिर्न वाऽनवस्थेत्यभिप्रेत्याह—

वेदान्तवाक्यजनिता मतिवृत्तिरेव-
मुत्पत्तितः सकलमेव भवार्णवाम्बु ॥
पीत्वा स्वयं च खलु शाम्यति दग्धलोह-
पीतं यथाम्बु चितिमेव तु शेषयित्वा ॥ २८ ॥

वेदान्तवाक्येति । स्वपराविरोधित्वे वस्तुपरिशेषे च इ-

ष्टान्तमाह । दग्धलोहेति । दग्धलोहे सिक्तमम्बु दाहं शमयत् स्वयं च शाम्यति लोहं तु परिशिष्यते तद्वदित्यर्थः ॥ २८ ॥

एवमविद्यानिवृत्तेः पञ्चमप्रकारत्वे चिदात्ममात्रत्वे च विद्योदयमात्राधीनत्वप्रतिपादनेन मुक्तौ ज्ञानकर्मसमुच्चयो निराकृतः, इदानीं ब्रह्म वेद ब्रह्मैव भवतीत्यादिशास्त्रसिद्धब्रह्मात्मतालक्षणमुक्तावपि चतुर्विधक्रियाफलासम्भवात्कर्मानुपवेशेन समुच्चयायोग इत्यभिप्रेत्य तस्याः कूटस्थनित्यतामनुमानेन साधयति ।

कूटस्थनित्यैव तु मुक्तिरेषा
विद्याफलत्वादिह यद्यदेवम् ॥
तत्तत्तथा दृष्टमशेषमेव
यथा हि शुक्त्यादिपदार्थसंवित् ॥ २९ ॥

कूटस्थनित्येति । सदा समस्तविकारायोग्येत्यर्थः । विद्याया उद्देश्यफलत्वादिति हेत्वर्थः । ततश्च पञ्चमप्रकाराऽविद्यानिवृत्तौ न व्यभिचारः, शुक्तिरशनादिपदार्थाकारापरोक्षान्तःकरणवृत्तिरूपाया विद्यायाः शुक्त्याद्यवच्छिन्नात्मरूपसंविदेवाभिव्यक्ता फलं न तु स्वत उत्पत्त्यादिमज्जडं स्वप्रकाशं वा तत्फलं निरूपयितुं शक्यमिति प्रतिकर्मव्यवस्थादौ निरूपितम्, ततो न दृष्टान्ते साध्यवैकल्यशङ्केति भावः ॥ २९ ॥

किं च प्रमाणफलभूतायाः संविदः स्वाभाविकजन्मादिविकारसाधकाभावाच्च सा कूटस्थनित्येत्याह ।

जन्मादिषड्भावविकारहीना
शुक्त्यादिवस्तूपनिविष्टसंवित् ॥
न प्रागभावाद्यनुभूतिरस्याः
स्वतः प्रमाणादपि युज्यते हि ॥ ३० ॥

जन्मादीति । किं संवित्स्वयमेव स्वजन्मादिविकारसाधिका किं वा मानान्तरं तस्यास्तत्साधकं नोभयथापीत्याह । न

प्रागभावेति। अभूत्वा भवनरूपं जन्म प्रागभावपदार्थः। न तावत्संविदैव स्वजन्मसिद्धिः, अभूत्वा भवनरूपजन्मनः प्रागभवनग्रहं विना ग्रहीतुमशक्यत्वात् तदा च तस्या असत्त्वादेव तथा प्रागभावस्य ग्रहणायोगात्तद्घटितस्वजन्मप्रग्रहासंभवात्, नापि स्वध्वंसस्यापि सा साधिका, ध्वंसकालेस्वस्या अभत्त्वात्, स्वकाले च ध्वंसासत्त्वात्तया तद्ग्रहणासंभवात्, संविदो जन्मनाशयोरसिद्धौ तद्व्याप्तित्वादान्तरालिकविकाराणां तदभावोऽपि सिद्ध एव, नापि मानान्तरंस्वप्रकाशसंविदो जन्मादिविका रवत्त्वेन साधयितुमलम्, तस्यास्तदयोग्यत्वादिति हिशब्दार्थः॥ ३० ॥

सर्वसाक्षिभूतात्मैव संविज्जन्मादिसाधक इत्याशङ्क्य किमजामजानन्नेव तदीयजन्मादि साधयति उत जानन्, नाद्यः, धर्म्यग्रहे तत्र धर्म्यवैशिष्ट्यग्रहायोगादित्याह—

अबुद्ध्यमानो न हि संविदं तत्
तत्संबन्धि किं चित् प्रतिपत्तुमीशः॥
न बुद्ध्यमानोऽपि तथा तदा हि
न संविदेषा विषयत्वहेतोः॥ ३१ ॥

अबुध्यमान इति। किं चिज्जन्मादि। द्वितीये संविदोऽपि घटादिवद् दृश्यत्वेऽसंवित्त्वप्रसङ्गान्न साक्षिगम्या संवित् किं तु स्वयमेव कूटस्थाऽद्वितीया साक्षिभूता नातिरिक्तेत्यभिप्रेत्याह। न बुध्यमानोऽपीति। बुध्यमानोऽपि तत्सम्बन्धि प्रतिपत्तुमीश इति तथाशब्दार्थः। तत्र हेतुः—तदा हीति॥ ३१ ॥

एवं स्वसिद्धान्तसिद्धान्वयदृष्टान्तेन मुक्तेः कूटस्थनित्यत्वं प्रसाध्योक्तप्रतिज्ञाहेत्वनुवादेन व्यतिरेकदृष्टान्तेनापि तत्साधयति—

जन्या न मुक्तिर्घटते कुतश्चिद्
विद्याफलत्वादिति पूर्वहेतोः॥
यद्यद्धि जन्यं जगति प्रसिद्धं
तत्तन्न विद्याफलमम्बरादि॥ ३२ ॥

जन्या न मुक्तिरिति। स्पष्टोऽक्षरार्थः ॥ ३२ ॥

एवं ब्रह्मभावलक्षणमोक्षस्य कूटस्थनित्यत्वं प्रसाध्य तत्र कर्मणामनुपयोगमर्थसिद्धमपि तेनैव हेतुना साक्षात्साधयति ज्ञानकर्मसमुच्चयविघटनाय—

मोक्षस्वरूपो विकल्पक्रियोऽसौ
विद्याफलत्वादिह यद्यदेवम् ॥
तत्तत्तथा दृष्टमशेषमेव
यथैव रज्ज्वादितमोनिवृत्तिः ॥ ३३ ॥

मोक्ष इति। असौ ब्रह्मभावरूपः। मोक्षसाधनविद्यायां कर्मणामुपयोगाङ्गीकारात्स्वरूप इत्युक्तम् ॥ ३३ ॥

ननु यस्यैत अष्टाचत्वारिंशत्संस्काराः स ब्राह्मणः सायुज्यं सालोक्यं च गच्छतीत्यादिस्मृतेः सायुज्यादिरूपमोक्षस्य कर्मफलत्वप्रतिपत्तेस्तद्बाधितविषयत्वादुक्तानुमानमप्रमाणमित्याशङ्क्याह।

सायुज्यादि विवादगोचरपदं निःश्रेयसं नो भवेत्
कार्यत्वादिह यद्यदीदृशमदो निःश्रेयसं नेक्षितम् ॥
यद्वत् कुड्यघटादि तादृशमिदं तस्मादिदं तादृशं
युक्तं कल्पयितुं न तद्विसदृशं तादृङ् न दृष्टं यतः ॥ ३४ ॥

सायुज्यादीति। किं ब्रह्मभाव एव सायुज्यं किं वा तच्छरीरेणैव शरीरित्वं सत्समानशरीरत्वं वा। नाद्यः, पूर्वरूपे स्थिते नष्टे च वस्तुतोऽन्यस्यान्यात्मत्वासम्भवेन तस्य कर्मसहस्रेणापि साधयितुमशक्यत्वात्, कर्मसाध्यस्यानित्यत्वनियमेन तस्य मुक्तित्वानुपपत्तेश्च, अनादित्वे तु ब्रह्मभावस्य ब्रह्मवदेव न कर्मसाध्यत्वं सम्भवति। न च कर्मणां नित्यसिद्धब्रह्मभावाभिव्यञ्जकत्वात्तस्य कर्मजन्यस्यानित्यत्वनियमेन मुक्तित्वानुपपत्तेश्चानादिफले हेतुत्वमिति वाच्यम्। तदभिव्यक्तेरनिर्वचनीयाविद्यानिवृत्तिरूपाया विद्यैकसाध्यत्वेन कर्मणां तदभिव्यञ्जकत्वासम्भवात्। तस्मा-

नित्यसिद्धब्रह्मभावाभिव्यञ्जकविद्योपनाड्या कर्मणां ब्रह्मभावरूपसायुज्योपयोगित्वमुक्तस्मृत्या विवक्षितम्, अत एव तत्र कर्मसु संस्कारशब्दः प्रयुक्तः, फलसाधनाङ्गतातिशयहेतुकर्मण्येव संस्कारशब्दप्रयोगान्न स्मृत्यनुमानयोर्विरोधः। नापि द्वितीयः, न तस्य कार्यं करणं च विद्यते, अकायमव्रणम्, अस्थूलमनणु, नेतिनेतीत्यादिश्रुतिविरोधेन ब्रह्मणो वास्तवशरीरासम्भवेन तदेकशरीरित्वरूपसायुज्यायोगात्, सशरीरमुक्तेर्निराकृतत्वाच्च। अतएव न तृतीयः, समानशरीरत्वस्यैव सायुज्यरूपत्वे तस्य सारूप्यरूपमुक्तेर्विशेषाभावप्रसङ्गाच्च। किं च नित्यसिद्धब्रह्मभावातिरिक्तसायुज्यादेः कार्यत्वावश्यंभावेनानित्यत्वध्रौव्यान्न तन्निःश्रेयसमिति तात्पर्यार्थः। अक्षरार्थस्तु विवादगोचर इति पदं विशेषणतया विद्यतेऽस्येति तथोक्तम्। एतच्च विशेषणं नित्यसिद्धब्रह्मभावरूपसायुज्यव्यावृत्त्यर्थम्। नो भवेत् न भवेत्। इह लोकवेदयोः। ईदृशं कार्यं तादृशमिति द्विरुक्तिरुपनयनिगमनार्था। तद्विसदृशं कल्पयितुं न युक्तमित्यनुषङ्गः। तादृशं निश्रेयसरूपं कार्यमिति शेषः॥ ३४॥

किं च कर्मसाध्या मुक्तिः कस्य चिद्भावस्योत्पत्तिरूपा किं वा कस्य चिन्नाशरूपा अनिर्वचनीयवस्तुरूपा वा, नाद्यः उत्पत्तेः-प्राक् कार्यस्य सत्त्वेऽसत्त्वे वोत्पत्त्यसम्भवस्योक्तत्वादित्याशयेनाह—

सदसदुद्भवनं न विमुक्तता
सदसदुद्भवनानुपपत्तितः॥
सदसतोर्नशनं न विमुक्तता
सदसतोर्नशनानुपपत्तितः॥ ३५॥

सदसदुद्भवनमिति। न द्वितीयः, नाशात्पूर्वं सतोऽसतो वा नाशासम्भवस्याप्युपपादितत्वादित्याह। सदसतोरिति॥ ३५॥

न तृतीयः, अनिष्टत्वादनुपपन्नत्वाच्चेत्याह—

न च तमोमयजन्म विमुक्तता
न हि तदिष्टमनिष्टतरं हि तत् ॥
न खलु कल्पितजन्म विमुक्तता
समुपगच्छति तद्धितथं यतः ॥ ३६ ॥

न च तमोमयेति । आविद्यकस्य तत्त्वधीबाध्यत्वेन मिथ्यात्वात्तदूपाया मुक्तेः केनाप्यनङ्गीकारादिति । हेतुमाह-न खल्विति॥३६॥

सतोऽसतो वा विनाशासम्भवेऽप्याविद्यकानिर्वचनीयबन्धस्यात्यन्तिकनाशो मुक्तिरिति निरुद्धगतिकस्य शङ्कामनुवदति—

अथ तमोमयविश्वविकल्पना-
विलयनात्मकमभ्युपगम्यते ॥
सकलदूषणजातविवर्जितं
तदिह मोक्षपदं न निवार्यते ॥ ३७ ॥

अथेति । मोक्षपदं मोक्षस्वरूपम्, अस्य विलयनात्मकमित्यनेन सम्बन्धः । अस्मिन्पक्षे प्रत्यगात्मनो ब्रह्मभावस्य नित्यसिद्धत्वादाविद्यकबन्धनिवृत्तेश्च तत्त्वज्ञानमात्राधीनत्वात्कर्मणामनुपयोगात् समुच्चयासिद्धिरित्यभिप्रेत्य तन्मुक्तिरूपमङ्गीकरोति । तदिति । इहासमुच्चयमते ॥ ३७ ॥

ननु न तत्त्वज्ञानमात्राद्बन्धनिवृत्तिः संभवति तत्त्वविदामपि शरीरादिबन्धदर्शनादित्याशङ्क्य तया विद्वान्नामरूपाद्विमुक्तः एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषापणाः पुरुषं प्राप्यास्तं गच्छन्तीत्यादिशास्त्रप्रामाण्याल्लोके विद्याया अविद्यानिवृत्तौ निरपेक्षसाधनत्वाच्च तत्त्वसाक्षात्कारवतः सद्य एव विदेहकैवल्यं भवति यस्य तु देहादिबन्धो दृश्यते स न तत्त्वसाक्षात्कारवानिति निश्चीयते इत्याशयेन सद्यो मुक्तिमतं दर्शयति—

सम्यग्ज्ञानविभावसुः सकलमेवाज्ञानतत्सम्भवं
सद्यो वस्तुबलप्रवर्त्तनमरुद्व्यापारसन्दीपितः ॥

निर्लेपेन हि दन्दहीति न मनागप्यस्य रूपान्तरं संसारस्य शिनष्टि तेन विदुषः सद्यो विमुक्तिर्ध्रुवा॥३८॥

सम्यग्ज्ञानेति । सद्यो दन्दहीतीति सम्बन्धः । वस्तु विषयभूतं परमार्थसद्ब्रह्म तदेव बलं तदेव वृत्तिज्ञानस्याविद्यादिदाहकत्वे प्रयोजकत्वात् प्रवर्त्तनमरुत् तद्व्यापारो वृत्तौ प्रतिफलनं तेन सन्दीपितः प्रज्वलित इत्यर्थः । शिनष्टि शेषयति ॥३८॥

ननु तत्त्वविदः सद्यो विदेहकैवल्योपगमे, तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये, प्रजहाति यदा कामान्सर्वान् पार्थ मनोगतान्, आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते इत्यादिजीवन्मुक्तिप्रतिपादकशास्त्रं निर्विषयं स्यादित्याशङ्क्य तस्यार्थवादतया शुकवामदेवादिमुक्तिशास्त्रवत्प्रकृष्टप्राज्ञकल्पितजीवन्मुक्त्यनुवादेन ब्रह्मविद्यास्तुतिपरत्वान्न तद्विरोध इत्यभिप्रेत्याह—

जीवन्मुक्तिप्रत्ययं शास्त्रजातं
जीवन्मुक्ते कल्पिते योजनीयम् ॥
तावन्मात्रेणार्थवत्त्वोपपत्तेः
सद्यो मुक्तिः सम्यगेतस्य हेतोः ॥ ३९ ॥

जीवन्मुक्तीति । जीवन्मुक्तेः प्रत्ययो येन तत्तथोक्तम् । अर्थवत्त्वोपपत्तेः स्तुतिरूपप्रयोजनवत्त्वोपपत्तेः । एतस्य हेतोरेतस्माद्धेतोः जीवन्मुक्तिशास्त्रस्यान्यविषयत्वाद्धेतोरिति यावत् ॥३९॥

जीवन्मुक्तिशास्त्रस्यार्थवादत्वेऽपि तदर्थस्य मानान्तराविरुद्धत्वेन भूतार्थवादत्वोपपत्तेस्तत्सिद्धा जीवन्मुक्तिर्न शक्याऽपलपितुम् । न च विद्यासामर्थ्यान्निःशेषाविद्यानिवृत्तौ तदनुपपत्तिरिति वाच्यम् । अनारब्धकार्य एव तु पूर्वे तदवधेरितिसूत्रोक्तन्यायेन विद्यया आरब्धफलकपुण्यपापनिवर्त्तकत्वायोगेन तत्स्थितिनिमित्तया कल्पिताविद्यालेशवशेन विदुषोऽपि यावत्प्रारब्धकर्मक्षयं शरीरादिधारणोपपत्तेरिति मतान्तरमाह—

यद्वा विद्वद्गोचरं योजनीयं
तस्याविद्यालेशवत्त्वोपपत्तेः ॥
तस्याभीष्टा निर्निमित्ता निवृत्ति-
र्यद्वा विद्यासन्ततिर्हेतुलेशम् ॥ ४० ॥

यद्वेति । योजनीयं जीवन्मुक्तिशास्त्रमिति शेषः । तर्हि विद्याया अविद्यालेशनिवर्त्तकत्वाभावात्स न निवर्त्तेतेत्याशङ्क्य प्रारब्धकर्मणां भोगादेव क्षये सति प्रयोजनाभावात् स स्वयमेव निवर्त्तत इत्याह । तस्येति । अविद्यालेशनिवृत्तेरपि निवर्त्यातिरिक्तं निमित्तं वाच्यम्, अन्यथा तस्य लेशस्य क्षणिकत्वापत्तेरित्याशङ्क्याह । यद्वेति । वृत्तिसाक्षात्काराभिव्यक्तस्वरूपचैतन्यमेवानुवर्त्तमानं विद्यासन्ततिः, सैव प्रतिबन्धककर्मणां भोगेन क्षये जीवन्मुक्तिहेतुभूतमविद्यालेशं निवर्त्तयतीत्यर्थः ॥ ४० ॥

ननु विद्यया चिदात्मनि ब्रह्मात्मनाभिव्यक्ते तत्राविद्यालेशस्याप्यसम्भवात्कथं तदधीना जीवन्मुक्तिर्घटते, किं च कैश्चिदे विद्यागन्धस्य अन्यैरविद्याछायाया अपरैरविद्यासंस्कारस्य जीवन्मुक्तिघटकत्वमुच्यते, तद्विरोधादपि नाविद्यालेशाधीनजीवन्मुक्तिरिति तत्राह—

जीवन्मुक्तिव्यापृतेः प्रापको य-
स्तस्याविद्यालेशगन्धादिभाषाः ॥
नाविद्याया नापि भागस्य तस्या-
स्तस्मिन् पक्षे दुर्घटत्वाद् विमुक्तेः ॥ ४१ ॥

जीवन्मुक्तिव्यापृतेरिति । अनृतेन हि प्रत्यूढाः, अनीशया शोचति मुह्यमान इत्यादिश्रुतेरविद्याया आवरणविक्षेपलक्षणकार्यद्वयानुरोधेनावरणशक्तिमदविद्यांशनाशेऽपि जीवन्मुक्तसम्बन्धिकार्यकरणव्यापारप्रापकविक्षेपशक्तिमदविद्यांशस्य बलवत्प्रारब्धकर्मसहितस्य जीवन्मुक्तिप्रयोजकत्वात्स एव सर्वैर्लेशग-

न्धादिशब्दैरभिलप्यते । ततश्च जीवन्मुक्तस्यात्मस्वरूपेऽभिव्यक्तेऽपि विक्षेपकाविद्यालेशानुवृत्तिर्युज्यते प्रारब्धकर्मक्षयावधिकेति तस्य जीवन्मुक्तिघटकत्वे न कोपि दोष इति भावः । ननु समग्रैवाविद्या तदीयावरणशक्तिमद्भागो वा लेशादिशब्दैरभिधीयताम्, नेत्याह । नाविद्याया इति । विमुक्तेः पूर्वावस्थातो विशेषाभावात्तदा जीवतो मुक्तिरेव दुर्घटा स्यादित्यर्थः ॥ ४१ ॥

ननु भाष्यकारादिभिरविद्यादेर्बाधितानुवृत्त्या जीवन्मुक्तव्यापृतिरिति क्व चित् क्व चित् कथ्यते सा किं गन्धच्छायादिपदाभिलप्यलेशपक्षादर्थान्तरम्, नेत्याह—

गन्धच्छायालेशसंस्कारभाषा
विज्ञातव्या भाष्यकारीयतन्त्रे ॥
स्वाविद्याया बाधिताया: प्रतीतिः
पौर्वापर्येणार्थमालोच्य बुद्ध्या ॥ ४२ ॥

गन्धच्छायेति । अस्मिन्पदे बहुव्रीहिर्द्रष्टव्यः । प्रतीतिरनुवृत्तिस्तस्याः प्रतिभासमात्रशरीरत्वाद् बाधितानुवृत्तेरपि निर्निमित्ताया असम्भवात् तन्निमित्ततयोक्ताविद्यालेशोऽवश्यमुपेयः, ततश्च स एव प्रातिभासिकविक्षेपरूपेणानुवर्त्तमानस्तथा कथ्यत इत्यर्थः ॥ ४२ ॥

ननु विदुषोऽपि द्वैतदर्शने तदधीनभयशोकादिरूपबन्धस्यावश्यकत्वात्कुतो जीवन्मुक्तिः, जीवत एव मुक्तौ वा कुतो द्वैतदर्शनमित्याशङ्क्योभयस्यापि विद्वदनुभवसिद्धत्वादाविरोध इत्याह—

जीवन्मुक्तिस्तावदस्ति प्रतीते-
र्द्वैतच्छाया तत्र चास्ति प्रतीतेः ॥
द्वैतच्छायारक्षणायास्ति लेश-
स्तस्मिन्नर्थे स्वानुभूतिः प्रमाणम् ॥ ४३ ॥

जीवन्मुक्तिरिति । तत्रोपपत्तिमप्याह । द्वैतच्छायारक्ष-

णायेति । प्रातिभासिकविक्षेपशक्तिमदविद्यांशो लेशशब्दार्थः । तत्र विद्वदनुभवं प्रमाणयति । तस्मिन्निति ॥ ४३ ॥

ननु विदुषोऽप्यज्ञानलेशश्चेदस्ति तदा पूर्ववद्ब्रह्म नास्ति न प्रकाशते चेति व्यवहारः स्यादित्याशङ्क्य तस्य पूर्वमविद्याकृतावरणयुक्तत्वादावरकांशस्य च तत्त्वज्ञानेन नाशादनन्तरं तदयोगादहं ब्रह्मास्मीत्येव व्यवहारो युज्यते, तथापि मुक्तावस्थायामहमिदं ममेदमित्यपि व्यवहारदर्शनात्तदुपपत्तये विक्षेपशक्तिवदविद्यालेशः स्वीकार्य इत्याह—

ब्रह्मात्मत्वं सान्तरायं पुरस्ताद्
बोधोत्पत्तौ ध्वस्तमोहान्तरायम् ॥
यद्यप्येवं द्वैतलेशानुवृत्तेः
प्रत्यक्षत्वान्मोहलेशोऽभ्युपेयः ॥४४॥

ब्रह्मात्मत्वमिति । स्पष्टोऽक्षरार्थः ॥४४॥

विदुषोऽप्यहमिदमित्यादिव्यवहारोपगमे तन्निमित्तपुण्यपापान्तरारम्भसम्भवात्तदधीनदेहान्तरस्यावश्यकत्वाद्विदेहकैवल्यानुपपत्तिरिति शङ्कां निराकुर्वन् जीवन्मुक्तिमुपसंहरति—

तस्माज्जीवन्मुक्तरूपेण विद्वा-
नारब्धानां कर्मणां भोगसिद्ध्यै ॥
स्थित्वा भोगं ध्वान्तगन्धप्रसूतं
भुक्त्वाऽत्यन्तं याति कैवल्यमन्ते ॥ ४५ ॥

तस्मादिति । प्रारब्धकर्मप्रतिबद्धविद्ययाऽविद्यालेशाक्षयादित्यर्थः । प्रारब्धकर्मक्षयमात्रमपेक्ष्य व्यवहरता विदुषा कर्मान्तरानारम्भात कर्मबलाद्भवतो व्यवहारस्यापि स्वप्नवदात्मानुभवेन प्रतिक्षणम्बाध्यमानस्यादृष्टाजनकत्वाद् भोगेन प्रारब्धकर्मनाशेऽप्रतिबद्धविद्ययाऽविद्यालेशस्यापि नाशाच्च विदुषो देहान्तरानुपपत्तेर्वर्त्तमानदेहपातानन्तरं विदेहकैवल्यसिद्धिरिति भावः॥४५॥

वर्णितोभयविधमुक्तौ श्वेताश्वतराणां श्रुतिं प्रमाणयति—

क्षरं प्रधानममृताक्षरं हरः
क्षरात्मानावीशते देव एकः ॥
तस्याभिध्यानाद्योजनात्तत्त्वभावाद्
भूयश्चान्ते विश्वमायानिवृत्तिः ॥ ४६ ॥

क्षरम्प्रधानमिति । प्रधीयतेऽस्मिन् जगदिति प्रधानमव्याकृतम् । तस्य नित्यतां निवारयति । क्षरमिति । तर्हि नित्यवस्त्वेव नास्तीति शङ्कायामाह । अमृताक्षरमिति । सर्वकार्यसंहर्तुर्हरस्य संहारे कारणाभावात्स एव मरणापक्षयादिरहितं वस्त्वित्यर्थः । तर्हि प्रधानपुरुषौ तत्संहर्तारौ भवेतामित्याशङ्क्य तयोस्तन्नियम्यत्वेन तत्पारतन्त्र्यान्नैवमित्याशयेनाह । क्षरात्मानाविति । ईशते—इष्टे इति एकवचनत्वेन परिणेतव्यम् । तर्हि द्वैतापत्तिरित्याशङ्क्य हरगोचरतत्त्वज्ञानात्प्रधानपदाभिलप्यमायायाः सकार्यायाबाध्यत्वात् पुरुषस्य च हरस्वरूपेणैवावस्थानाच्चाद्वैतमेव वस्तु परिशिष्यत इत्यभिप्रेत्याह । तस्याभिध्यानादिति । तस्य हरशब्दोदितब्रह्मण आभिमुख्येनाहं ब्रह्मास्मीत्येवंरूपाद्ध्यानादादरेण निरन्तरं दीर्घकालचिन्तनाद् द्वैतसत्यत्वभ्रमहेतुभूतमायालेशो निवर्त्तते, ततो ध्यानपरिपाकसाक्षात्काराद्योजनाद् द्वैते व्यावहारिकसत्त्वभ्रमहेतुभूतमायालेशो निवर्त्तते, भूयश्च तत्त्वभावादनावृतपूर्णब्रह्मात्मत्वरूपस्वभावादन्ते प्रारब्धकर्मणां भोगेन क्षये द्वैते प्रातिभासिकत्वभ्रमहेतुभूतमायालेशस्यावशिष्टस्य निवृत्तिरित्येवं विश्वमायानिवृत्तिस्तत्त्वबोधाद्भवतीत्यर्थः । अत्रान्ते प्रारब्धकर्मावसाने विश्वमायानिवृत्तिरित्युक्तत्वात् प्रागपि सावशेषमायानिवृत्तिः प्रतीयत इतीयं श्रुतिरुभयविधमुक्तौ मानमिति भावः ॥४६॥

ननु सूर्यद्वारेण ते विरजाः प्रयान्ति, यत्रामृतः स पुरुषो ह्यव्ययात्मा तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना इत्यादि-

शास्त्राद्विदुषामप्यर्चिरादिमार्गेणोद्गतानामेव मुक्तिभाक्त्वात्कथं जीवतो विदुषो मुक्तिरिति तत्राह—

ब्रह्मादीनामस्ति मुक्तिः श्रुतिभ्य-
स्तेषामेषा नार्चिराद्या गतिर्वः ॥
तस्मादस्या निर्गुणब्रह्मविद्या-
सम्बन्धित्वं नैषितव्यं भवद्भिः ॥ ४७ ॥

ब्रह्मादीनामिति । तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्, ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे, परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमित्यादिवचनेभ्यो ब्रह्मलोकवासिनां ब्रह्मादीनामपि परब्रह्मविद्यावतां मुक्तिरस्त्येव, न च तेषां मुक्तिप्राप्तावर्चिराद्या गतिर्भवतामपीष्टा, ब्रह्मलोकादर्वागेवार्चिरादीनां स्थितत्वात्, तस्मादस्या अर्चिरादिगतेर्निर्गुणब्रह्मविद्यासम्बन्धित्वं तत्फलप्राप्तिद्वारत्वं भवद्भिर्मनुष्येष्वपि नैषितव्यं किं तु कार्यं बादरिरस्य गत्युपपत्तेरित्युक्तन्यायेन सगुणविद्याफलभूतकार्यब्रह्मप्राप्तिद्वारत्वमेव तस्या एषितव्यम्, एवं च सूर्यद्वारेणेत्यादिवचनमपि सगुणविद्यावद्विषयमुपेयमिति भावः ॥ ४७ ॥

ननु तयोर्द्धमायन्नमृतत्वमेतीति मूर्द्धन्यनाड़ीद्वारोर्द्धगमनस्यामृतत्वप्राप्त्युपायत्वश्रवणान्मनुष्याणामूर्द्धगमनं विना नामृतत्वप्राप्तिरित्याशङ्क्याह—

प्राणोत्क्रान्तिर्नास्ति मूर्द्धन्यनैषां
नाड्या तस्माद् यत्रयत्रैव विद्या ॥
तत्रैव स्यान् मुक्तिरित्यभ्युपेयं
गत्युत्क्रान्ती तेन विद्यान्तरेषु ॥ ४८ ॥

प्राणोत्क्रान्तिरिति । स्वतोऽपरिच्छिन्नस्यात्मनो वस्तुतः सुषुम्नानाड़ीद्वारोर्द्धगमनायोगात् प्राणात्मकलिङ्गगमनोपाधिकं गमनं वाच्यम्, न च तत्परब्रह्मविद उपपद्यते, न तस्य प्राणा उ-

त्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येतीत्यादिश्रुत्या विदुषः प्राणोत्क्रान्तिप्रतिषेधेन तदुपाधिकोत्क्रान्त्यादेरसम्भवात्, प्राप्तव्यब्रह्मणः परिपूर्णत्वेन तत्प्राप्तिरूपामृतत्वस्योत्क्रान्त्याद्यनपेक्षत्वाच्च, ततश्च यत्र यत्र देशे काले च विद्या जायते तत्र तत्रैव जीवन्नेव देहे मुक्तिरत्र ब्रह्म समश्नुत इति श्रुतेरभ्युपेयेत्यर्थः । तर्हि तयोर्द्धमायान्नित्यादिश्रुतेनरार्थक्यम, नेत्याह । गत्युत्क्रान्तीति । तेन परब्रह्मविद्यायामुत्क्रान्तिप्रतिषेधेन ॥ ४८ ॥

एवमर्चिरादिमार्गानपेक्षां मुक्तेः प्रसाध्य कर्मापेक्षामपि निराकुर्वन् तस्याः केवलविद्याधीनत्वमाह—

देवादीनां नास्ति कर्माधिकारो
विद्या तेषां केवला मुक्तिहेतुः ॥
पारंपर्यात् कर्मणामुक्तहेतो-
र्विद्याङ्गत्वं सर्ववर्णाश्रमाणाम् ॥ ४९ ॥

देवादीनामिति । तथापि मनुष्याणां कर्मण्यधिकृतानां कर्मापेक्षा मुक्तिर्भविष्यति, इतरथा सर्वापेक्षा च यज्ञादिश्रुतेरिति-सूत्रविरोधः स्यादित्यत आह । पारंपर्यादिति । मनुष्याणामपि ज्ञानपरिपाकाङ्गत्वेन संन्यासस्यावश्यकत्वात्सति ज्ञाने कर्माधिकारबाधान्नकर्मणेत्यादिश्रुतिविरोधाच्च न साक्षात्कर्मणां मुक्तिहेतुत्वं घटते तदिदमुक्तम् । उक्तहेतोरिति । सूत्रं तु सर्ववर्णाश्रमविहितकर्मणां साक्षान्मोक्षहेतुभूतविद्यां प्रति परंपरया साधनत्वपरम्, इतरथा अत एव चाग्निन्धनाद्यनपेक्षेति पूर्वसूत्रेण विरोधापत्तेरित्यर्थः॥४९॥

केन द्वारेण पारंपर्यमिति वीक्षायामाह—

पारंपर्यं शुद्धिहेतुत्वहेतो-
र्यज्ञादीनां श्रूयते स्मर्यते च ॥
साक्षादेषां मोक्षहेतुत्वमेव-
मन्विच्छन्तोऽप्यागमान्न प्रतीमः ॥ ५० ॥

पारंपर्यमिति । शुद्धिपदं विविदिषोपलक्षणम् । तत्र प्रमाणमाह । श्रूयते इति । येन केन चन यजेतापि दर्विहोमेनानुपहतमना एव भवति, तमेतं वेदानुवचनेनेत्यादिश्रुतिर्योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये, कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्त्तते इत्यादिस्मृतिश्चोक्तपारंपर्ये मानमित्यर्थः । उक्तविधया कर्मणां पारंपर्येण मुक्तावुपयोग इव साक्षादुपयोगे मानाभावान्न समुच्चयसिद्धिरित्यभिप्रेत्याह । साक्षादिति ॥ ५० ॥

निरूपितप्रमेयजातस्य स्वकपोलकल्पितत्वापामाणिकत्वशङ्कारूपातिलाभार्थमेतद्ग्रन्थकरणमिति मतिं च निराकुर्वन् प्रकरणार्थमुपसंहरति—

इति बहुश्रुतभाषितमुच्चकैः
श्रुतिशिरोवचनानगतं महत् ॥
समुपदिष्टमिदं कृपया मया
प्रियमतीव हितं च मुमुक्षवे ॥ ५१ ॥

इति बहुश्रुतेति । सूत्रभाष्यटीकावार्त्तिककारा बहुश्रुतास्तैरुच्चकैस्तात्पर्येण निरूपितमित्यर्थः । महत्त्वविधपरिच्छेदशून्यं प्रत्यगभिन्नं ब्रह्म। अतीव प्रियं निरतिशयानन्दरूपत्वात्, अतीव हितं समस्तानर्थासंस्पर्शित्वात् ॥ ५१ ॥

नन्वत्र ब्रह्मैव न निरूपितं समन्वयादेरपि निरूपितत्वादित्याशङ्क्य तन्निरूपणस्य ब्रह्मप्राप्तित्यर्थत्वाद् ब्रह्मैव प्राधान्येन निरूपितमित्यभिप्रेत्य तत्प्राप्तेः सद्यो मुक्तिफलत्वं मुख्याधिकारिशिष्यानुभवसिद्धमिति वदन् स्वानुभवरूपापकं तद्वचनमवतारयति -

एवं समन्वयविरोधनिरासविद्या-
निष्पत्तिसाधनफलानि गुरोः क्रमेण ।
विज्ञाय वेदफलमात्मनि सर्वमेव
पश्यन्नुवाच कृतकृत्यमतिः स शिष्यः ॥ ५२ ॥

एवं समन्वयति । वेदो वेदनं तत्फलं मोक्षं सर्वद्वैतबाध-सुखदुःखप्राप्तिपरिहाररूपम् ॥ ५२ ॥

तदुक्तीरेव दर्शयति षड्भिः—

विद्याविग्रहमग्रहेण पिहितं प्रत्यञ्चमुच्चैस्तरा-
मुत्कृष्योत्तमपूरुषं मुनिधिया मुञ्जादिषीकामिव ॥
कोशात् कारणकार्यरूपविकृतात् पश्यामि निःसंशयं
कास्मीदस्ति भविष्यतीति कनुगतः संसारदुःखोदधिः॥५३॥

विद्याविग्रहमिति । स्वप्रकाशचिदेकरसमित्यर्थः । उत्तमपुरुषस्य परमात्मनः प्रतीचो भिन्नत्वादेवानवभासो नाविद्यापिहितत्वादितिशङ्कानिरासायोक्तं—प्रत्यञ्चमिति। उच्चैस्तरामित्यस्य पिहितमित्यनेन सम्बन्धः । पिधानस्योच्चैस्तरत्वं यत्नसहस्रैरभेद्यत्वम् । मुनिधिया श्रुत्यनुकूलमननेनिशितविवेकधिया । मुञ्जादिषीकाच्छादकवाह्यत्वचः । कोशादन्नमयाद्यानन्दमयान्तात् । कारणकार्यरूपेणान्तर्बहिर्भावेन विकृताद्विविधतया कृतादुत्कृष्येति सम्बन्धः । कोशपञ्चकाद्विविक्तात्मनो ब्रह्मभावेन दर्शनफलं प्रकटयति । कास्मीदिति ॥ ५३ ॥

तथापि द्वैताभासस्यासम्भावितस्यापि प्रतीतेर्जीवत एव मुक्तिरनुभवसिद्धेत्याह—

पश्यामि चिन्नामिव सर्वमिदं द्वितीयं
निष्ठामि निष्कलचिदेकवपुष्यनन्ते ॥
आत्मानमद्वयमनन्तसुखैकरूपं
पश्यामि दग्धरशनामिव च प्रपञ्चम् ॥ ५४ ॥

पश्यामीति। प्रतिभासमानद्वैतस्यार्थक्रियासामर्थ्यं निवारयति । दग्धेति ॥ ५४ ॥

नन्वद्वैतदर्शने सति कथं तद्विरुद्धद्वैतदर्शनानुवृत्तिस्तदभावे वा कथं जीवन्मुक्तिरित्याशङ्क्याद्वैतस्य वास्तवत्वेन द्वैतस्यावास्तवत्वेनानुभूयमानत्वान्न किं चिदनुपपन्नमित्याह—

अद्वैतमप्यनुभवामि करस्थबिल्व-
तुल्यं शरीरमहिनिर्ल्वयनीव वीक्षे ॥
एवं च जीवनमिव प्रतिभासमानं
निःश्रेयसोऽधिगमनं च मम प्रसिद्धम् ॥ ५५ ॥

अद्वैतमिति । अद्वैतं साक्षादनुभवतः कदाचिद्भासमानमपि द्वैतं न पूर्ववद्भातीत्यत्र निदर्शनमाह । अहिनिर्ल्वयनीवेति। अहिनिर्मोको हि त्यागात् पूर्वमहिनाऽहमित्येव प्रतिपन्नस्त्यागानन्तरं तदभिमानरहित एव प्रतीयते, तथा शरीरादिरूपे द्वैते पूर्ववदहं ममाभिमानं विहाय मिथ्यैवेदं भातीति पश्यामीत्यर्थः । मिथ्यात्वेन निश्चतद्वैतदर्शनानुवृत्तौ फलितमाह—एवंचेति ॥ ५५ ॥

विद्यामहिम्ना मदपकारकं निर्मूलमेवोच्छिन्नमिति तां प्रशंसति—

अद्वैतबाधकमभून् मम यद् द्वितीय-
मद्वैतमस्य बत बाधकमेव जातम् ॥
मोहाद् द्वितीयमपबाधकमस्य विद्या-
सामर्थ्यतोऽद्वयनिबर्हणमद्वितीयम् ॥ ५६ ॥

अद्वैतबाधकमिति । इदानीमपि पूर्ववदेव द्वैतमेवाद्वैतबाधकं किन्न स्यादित्याशङ्क्य द्वैतस्यालोकमोहबलावष्टम्भेनाद्वैतबाधकस्य दुर्बलत्वादद्वैतस्य तु परमार्थवस्त्ववगाहिविद्यासामर्थ्यावष्टम्भेन बलवत्त्वान्मैवमित्याशयेनाह ।मोहादीति। अस्य अद्वैतस्य ॥ ५६॥

निर्मुक्तमात्मानं दृष्ट्वा पूर्वमनुभूतसंसारं स्मरन् तत्र स्वस्योत्पन्नामाश्चर्यधियं प्रकटयति—

आश्चर्यमद्य मम भाति कथं द्वितीयं
नित्ये निरस्तनिखिलाशिवचित्प्रकाशे ॥
आसीत् पुरेति किमिमाः श्रुतयो न पूर्वं
येन द्वितीयमभवत्तिमिरप्रसूतम् ॥ ५७ ॥

आश्चर्यमिति । किमत्राश्चर्यं वस्तुत उक्तरूपे परात्मन्यज्ञानाद् द्वैतरूपानर्थोपपत्तेरित्याशङ्क्याज्ञाननिवर्त्तकतत्त्वधीजनने नि-

रपेक्षकारणेषु वेदान्तवाक्येष्वनादिसिद्धेषु ज्ञानाभावादज्ञानानुवृत्त्या द्वैतानुवृत्तिरिसेतदप्याश्चर्यमेवेत्याह । किमिमा इति ॥५७॥

इदानीं पूर्वं श्रुतिवाक्येषु सत्स्वप्यन्वयव्यतिरेकाभ्यां तत्त्वबोधाभावे कारणं निश्चित्याज्ञानादि सम्भावयन्नाश्चर्यधियं त्यजति ।

त्वत्पादपङ्कजसमाश्रयणं विना मे
सन्नप्यसन्निव परः पुरुषः पुरासीत् ।
त्वत्पादपद्मयुगलाश्रयणादिदानीं
नासीन्न चास्ति न भविष्यति भेदबुद्धिः ॥५८॥

त्वत्पादपङ्कजेति । पूर्वं संसारं निर्वेदपूर्वकं त्वादृशगुरूपसत्त्यभावात्मतत्त्वेऽपि वेदान्तवाक्येषु गुरूपदेशाधीनतत्त्वबोधाभावादज्ञानाधीनद्वैताभिनिवेशेनाद्वैतं परमार्थं सदप्यसत्कल्पमभूत्, इदानीं तु गुरुप्रसादलब्धतत्त्वबोधेनाद्वैतात्मतत्त्वमेव सदास्ति भ्रान्तिमात्रसिद्धं तु द्वैतं कालत्रयेऽप्यसदिति निश्चिनमित्यर्थः ॥५८॥

आत्मलाभात्परस्य लाभस्याभावात्तं प्रापितवतो गुरोस्तदनुरूपप्रत्युपकाराभावाद्भक्तिपुरःसरं गुरूपासनमेव यावदायुर्मया कार्यम्, तावतापि तत्तोषो भवेदित्यभिप्रेत्याह—

यस्मात् कृपापरवशो मम दुश्चिकित्सं
संसाररोगमपनेतुमसि प्रवृत्तः ॥
त्वत्पादपङ्कजरजः शिरसा दधान-
स्त्वामाशरीरपतनादहमप्युपासे ॥५९॥

यस्मात्कृपेति ॥ ५९ ॥

साधिकारविषयप्रयोजनां स्वकृतिमुपसंहरन् तस्या मुमुक्षुभिरुपादेयतां सूचयन् तस्याः सान्वयसंज्ञामाह—

संक्षेपशारीरकमेव मेतत्
कृतं परिव्राजकमुक्तिहेतुः ॥
गुरुप्रसादात् परिलभ्य तत्त्वं
त्रयीशिरस्तत्त्वनिवेदनाय ॥

संक्षेपेति ॥ ६० ॥

तां कृतिं गङ्गासाम्येन स्तुवन् तस्या मङ्गलं प्रार्थयते—

अविरलपदपङ्क्तिः पद्मनाभस्य पुण्या
चरणकमलधूलिग्राहिणी भारतीयम् ॥
घनतरमुपघातं श्रेयसः श्रोतृसंघात्
सुरसरिदिव सद्यो मार्ष्टु माङ्गल्यहेतुः ॥६१॥

अविरलेति । नानावृत्तात्मकत्वाद्बहुविधपदविन्यासक्रमवतीत्यर्थः । पद्मनाभस्य चरणकमलपोर्धूलिग्राहिणी श्रोतृसंघात् श्रेयस उपसंघातं मार्ष्टु इत्यन्वयः ॥६१॥

ग्रन्थस्य साम्प्रदायिकत्वं दर्शयितुं गुरोः स्वस्य च नाम निर्दिशन्ग्रन्थोत्पत्तिकालं दर्शयति—

श्रीदेवेश्वरपादपङ्कजरजःसंपर्कपूताशयः
सर्वज्ञात्मगिराङ्कितो मुनिवरः संक्षेपशारीरकम् ॥
चक्रे सज्जनबुद्धिवर्द्धनमिदं राजन्यवंशे नृपे
श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥६२॥

श्रीदेवेश्वरेति ॥६२॥

अन्तेऽपि भगवन्नमस्काररूपं मङ्गलमाचरति—

भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने ॥
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे ॥६३॥

इति श्रीसर्वज्ञात्ममुनिविरचिते संक्षेपशारीरके फललक्षणं नाम चतुर्थोऽध्यायः ॥ ४ ॥

भुजङ्गमाङ्गेति ॥ ६३ ॥

इह योऽस्ति विमोहयन्मनः परमानन्दघनः सनातनः ।
गुणदोषभृदेष एव नस्तृणतुल्यो यदयं स्वयं जनः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्यमधुसूदनसरस्वतीकृतायां संक्षेपशारीरकटीकायां चतुर्थोऽध्यायः ॥

समाप्तश्चायं ग्रन्थः । शुभमस्तु सर्वजगताम् ।